
184610

UNIVERSAL
LIBRARY

OU_184610

UNIVERSAL
LIBRARY

॥ ओम् ॥

॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृत–"वेदार्थप्रकाश"-नामभाष्यसहितम् ॥

(अथ भाष्योपक्रमः)

॥ ॐ नमः श्रीगणेशाय नमः[१] ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥१॥
यस्य निःश्वसितं[२] वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तं महं वन्दे विद्यातीर्थमहेश्वरम् ॥२॥
तत्कटाक्षेण तद्रूपं दधतो बुक्कभूपतेः[३] ।
कृतावतरणः[४] चौरमागरादिव चन्द्रमाः ॥३॥
विजितारातिब्रातो[५] [illegible]

धर्मब्रह्माध्वन्यः[१] समादिशत्सायणाचार्य्यम्[२] ॥ ४॥
ऋग्यजुःसामशाखाना मेकैका व्याकृता त्वया ।
तावता तत्समानार्था ज्ञातुं शक्यास्ततः पराः ॥ ५॥
वासना विग्रहा[३] यच्च मन्त्रार्थाना मशेषतः ।
प्रायेणाध्वर्यवं कर्म पूर्णं[४] शाखान्तरैर्विना ॥ ६॥
करामलकवद्यच्च परं तत्त्वं प्रकाशितम् ।
या काचित्तादृशी शाखा त्वया व्याख्यायता मिति ॥ ७॥
सर्वतः[५] सायणाचार्य्यो विस्पष्टोदीरितान् गुणान् ।
माध्यन्दिने शतपथे ब्राह्मणे व्याकरोति[६] तत् ॥ ८॥
सञ्चारः पदवाक्यार्थन्यायानां दर्शितः पुरा ।
वेदाना मर्थवत्त्वादि यच्चान्यदुपयुज्यते ।
सर्वशाखासमत्वेन विज्ञेयं तदिहाखिलम् ॥ ९॥
यच्च[७] सन्दिग्धं मज्ञात मत्र तद्विवरिष्यते[८] ।
समाप्या कल्पसूत्राणां ब्राह्मणानाञ्च सङ्ग्रहात् ॥ १०॥

१— ' ' — '–इति ज, झ, ञ, ट; 'धर्मब्रह्माचार्यः'–इति ड ।

(अथ प्रथमकाण्डीय-प्रथमप्रपाठक-प्रथमब्राह्मणस्यावतरणी)

इह हि चरमे चतुर्दशे काण्डे करतलामलकवत् परतत्त्वं प्रकाशितम्, ततः प्राक्तनैश्च त्रयोदशभिः काण्डैस्त्रेताग्निसाध्यो[1] धर्मः प्राधान्येन प्रतिपादितः। अग्न्याधाने[2] अग्नयश्चाधानपवमानेष्टिभिर्निष्पाद्याः; पवमानेष्टयश्च दर्शपूर्णमासविकृतितया[3] तदधिगमसापेक्षज्ञाना इति प्रथमे काण्डे दर्शपूर्णमासौ प्रतिपाद्येते; तदनुष्ठानारम्भश्च पूर्णमासपूर्वकः[4]; अतश्च तस्य पूर्णमासस्य प्रथमं यदङ्गं व्रतोपायनं[5] तदङ्गत्वेनापा मुपस्पर्शनं विधत्ते—

१— "दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः।
अग्नित्रय मिदं त्रेता प्रणीतः संस्कृतोऽनलः॥"—इति अम० को० २. ७. २०। "त्रेता त्वग्नित्रये"—इति च तत्रैव ३. ३. ६८।

२— नास्तेतत् पदं ठ-पुस्तके।

३— 'दर्शपूर्णमासविध्यन्तग्राहितया'—इति ठ; 'दर्शपूर्णमासप्रकृतितया'—इति ड; 'दर्शपूर्णमासविप्रकृतितया'—इति ज, ञ, ञ, ट।

४— 'पूर्णमासपूर्वकम्'—इति झ-ञ-टातिरिक्तेषु।

५— व्रतोपायनम् = व्रतग्रहणम्। "व्रतशब्देन कर्माङ्गभूता शास्त्रतो नियमा उच्यन्ते। "कर्माङ्गभूता यमनियमा व्रतम्, तदुपगमार्थो 'ऽग्ने व्रतपते'—इत्ययं मन्त्रः"—इत्युक्तं तन्त्ररत्ने"—इति का० २. १. ११ सू० ६०। तच्च दर्शपौर्णमासयोः अग्न्यन्वाधानानन्तरं भवति, पशौ तु ब्रह्मवरणानन्तर मिति विशेषः। विहितश्चैतत् कात्यायनेन "अपराह्णे व्रतोपायनीय मश्नीतः"—इत्यादिसूत्रद्वयेन (२. १. १०, ११.)। "अश्वन मग्न्यन्वाधानं व्रतोपायन मित्येके, व्रतोपायन मश्वन मग्न्यन्वाधान मित्येके, अग्न्यन्वाधानं व्रतोपायन मश्वन मित्येके (श्रौ० सू० ४. २. ८.)"—इत्यापस्तम्बसूत्रयोश्चेह द्रष्टव्यः। तद्विधानं तु तत्रैव मुक्तम्—"दक्षिणेनाहवनीय मव-

स्याय व्रत मुपैष्यन् समुद्रं मनसा ध्यायति, अथ जपति 'अग्ने व्रतपते व्रतं चरिष्यामि'–इति ब्राह्मणः"–इत्यादि (आप० श्रौ० सू० ४. ३. १,२.)। अथ पद्धतिः—"कृताधानस्याधानानन्तरं प्रथमपौर्णमास्यां माटपूजापूर्वक माभ्युदयिकं आद्धम्। ततो मुख्याया मेव पौर्णमास्यां सद्यो ऽन्वारम्भणीयेष्टिः। तदनन्तरं पौर्णमासस्यारम्भः। समूहन्त्यग्न्यागारम्, × × ×। अथाग्न्यन्वाधान मुच्यते × × ×। यजमानस्य सपत्नीकस्य मांसमैथुनवर्जनसङ्कल्पः। केशश्मश्रुवपनं शिखां वर्जयित्वा × × ×। अपराह्णे पत्नीयजमानौ माषमांसलवणप्रातर्होष्यमाणद्रव्यव्यतिरिक्तं घृतसंयुक्त मल्प मश्नीतौ, न ह्यग्निपर्यन्तम्। × × ×। व्रत्याशनानन्तरं यजमानः स्फ्य मादाय गार्हपत्यदक्षिणाग्न्योरन्तरालेन गत्वा आहवनीयस्य पश्चात् समीपे पूर्वाभिमुखस्तिष्ठन्नाहवनीयं विलोकयन्नुदकं दक्षिणाहस्तेन स्पृष्ट्वा 'अग्ने व्रतपते व्रतम्'–इतिमन्त्रेण व्रत मुपैति, सत्यवदनादिनियम मङ्गीकरोतीत्यर्थः। अथवा इदमहमनृतादित्यनेन मन्त्रेण व्रत मुपैति, न पूर्वोक्तेन। अतः प्रभृति क्रियमाणकर्माङ्गभूतो यजमानस्य सत्यवदननियमः। रात्रौ तस्मिन्नेव विहारे स्वय मेवाग्निहोत्रहोमः। सायाह्नेच्छायां सत्यां होमानन्तर मारण्यौषधीनां नीवारश्यामाकजङ्गादीना मन्नं वा आरण्यवृक्षाणा माम्रराजादनादीनां फलानि वाश्नीयाद्; नाश्नीयाद्वा। रात्रावाहवनीयागारे गार्हपत्यागारे वा पत्नीयजमानाभ्यां स्वस्याग्न्यपेक्षया अधो नीचं शयनं कर्त्तव्यम्। आत्मस्थास्य न निषेधः। × × ×। प्रातरपि तस्मिन्नेव विहारे स्वय मेवाग्निहोत्रहोमः। तत उदिते सूर्ये ब्रह्मचर्याद्युपक्रमः"–इति।

॥ अथ प्रथमकाण्डम् ॥

(तच)

प्रथमाध्याये (प्रथमप्रपाठके)

प्रथमब्राह्मणम् ।

॥ हरिः ॐ ॥

व्रत मुपैष्यन्* । अन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङ् तिष्ठन्नप ऽउप†स्पृशति तद्यदप ऽउपस्पृशत्यमेध्यो वै पुरुषो यदुन्नतं वदति तेन पूतिरन्तरतो मेध्या वा ऽआपो‡ मेध्यो भूत्वा व्रतꣳ§ मुपायानीति पवित्रं वा ऽआपः पवित्रपूतो व्रत मुपायानीति तस्माद् वा ऽअप ऽउपस्पृशति ॥ १ ॥

सोऽग्नि मेवाभीक्षमाणो व्रत मुपैति । अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यता मित्यग्निर्वै देवानां व्रतपतिस्तस्मा ऽएवैतत् प्राह व्रतं चरि-

---

* 'व्रत मुपैष्यन्'–इति च । एवं स्वरपाठभेदे स्यान्मुद्राशुद्धिरेव हेतुः ।

† 'प ऽउप'–इत्येवमादिषु 'ऽ'–इति चिह्नं नास्ति ग-च-ङ्क-पुस्तकेषु ।

‡ 'वा ऽआपो'–इत्येवमादिषु च 'ऽ'–इति चिह्नं ग-ङ्क-पुस्तकयोर्नास्ति ।

§ 'व्रत'–इति एकवकारात्मकः पाठः ख-च-पुस्तकयोः । सर्वत्रैवं बोध्यम् ।

ष्यामि तुच्छकेयं तुन्मे राध्यता मिति नाच तिरोहित मिवास्ति* ॥ २ ॥

अथ सꣳस्थिते व्विसृजते†। अग्ने व्रतपते व्रतु मचारिषं तदशकं तुन्मे ऽराधीत्यशकद्धोतद् यो यज्ञस्य सꣳस्था मुगन्नराधि ह्यस्मै यो यज्ञस्य सꣳस्था मुगन्नेतेनु ल्वेव भूयिष्ठा ऽइव व्रत मुपयन्त्यनेनु त्वेवोपेयात् ॥ ३ ॥

द्वयं वा ऽइदं नु तृतीय मस्ति। सत्यं चैवानृतं च सत्यु मेवु देवा ऽअनृतं मनुष्या ऽइदु महु मनृतात् सत्य मुपैमीति तुन्मनुष्येभ्यो देवानुपैति ॥ ४ ॥

स वै सत्यु मेवु व्वदेत्। एतद्ध वै देवा व्रतं चरन्ति यत्सत्यं तस्मात्ते युशो युशो ह भवति यु ऽएवं व्विद्वान्त्सत्यं व्वदति‡ ॥ ५ ॥

अथ सꣳस्थिते व्विसृजते। इदु महं यु ऽएवास्मि सोऽस्मीत्यमानुष ऽइव वा ऽएतद्भवति युद्वत मुपैति न हि तदवकल्पते युद् ब्रूयादिदु महꣳ सत्यादनृत मुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदु महं य ऽएवास्मि सोऽस्मीत्येवꣳ§ व्रतं व्विसृजेत ॥ ६ ॥

अथातोऽशनानशनस्यैव। तदु ह्याषाढः सावयसो

---

* 'मिवास्ति'–इति ख।
† 'व्विसृजते'–इति ख, च।
‡ 'वदति'–इति ख, 'वदति'–इति ग, च।
§ 'सोऽस्मीत्येवं'–इति ख, च।

ऽनश्नन मेवु व्रतुं मेने मुनो ह वै देवा मनुष्यस्या जानन्ति तु ऽएन मेतद् व्रतु मुपयुन्तं विदुः प्रातर्न्नो यक्ष्यत ऽइति तेऽस्य व्विश्वे देवा गृहानागच्छन्ति ते ऽस्य गृहेषूपवसन्ति सु ऽउपवसथः* ॥ ७ ॥

तुन्मेवानवक्लृप्तम्। यो मनुष्येषुनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेषुनश्नत्सु पूर्वोऽश्नीयात् तुस्माद् नैवाश्नीयात् ॥ ८ ॥

तुद् होवाच याज्ञवल्क्यः। युदि नाश्नाति पितृदेवत्यो भवति युद्यु ऽअश्नाति देवानत्यश्नातीति स युदेवाशित मुनशितं तुदश्नीयादिति युस्य वै हविर्न् गृह्णन्ति तुदशित मुनशितꣳ स युदश्नाति तेनापितृदेवत्यो भवति युद्यु तुदश्नाति युस्य हविर्न् गृह्णन्ति तेनो देवान्नात्यश्नाति ॥ ९ ॥

स वा ऽआरण्य मेवाश्नीयात्। या वारण्या ऽओषधयो युद्वा दृश्यं तुद् ह स्माहापि बुर्कुर्व्वार्षणो मुषान्मे पचत न वा ऽएतेषाꣳ हविर्गृह्णन्तीति तुद् तथा नु कुर्याद् व्रीहियवयोर्व्वा ऽएतदुपजं† युच्छमीधान्यं तुद् व्रीहियवावेवैतेन भूयाꣳसौ करोति तुस्मादारण्य मेवाश्नीयात् ॥ १० ॥

---

* 'ऽपवसथः'–इति च। † 'दुंपचं'–इति ङ, सायणसम्मतश्च।

सु ऽआहवनीयागारे वैताꣳ रात्रिꣳ शयीत। गार्ह-पत्यागारे वा देवान्वा ऽएषु ऽउपावर्त्तते यो व्रतु मुपैति स यानेवोपावर्त्तते तेषा मेवैतन्मध्ये शेते ऽधः शयीताधस्तादिव हि श्रेयस ऽउपचारः* ॥ ११ ॥

स वै प्रातरप ऽएत्य। प्रथमेन कर्म्मणाभिपद्यते ऽपः प्रणयति यज्ञो वा ऽआपो यज्ञ मेवैतत् प्रथमेन कर्म्म-णाभिपद्यते ताः प्रणयति यज्ञ मेवैतद्दितनोति ॥ १२ ॥

स प्रणयति। कृत्वा युनक्ति सु त्वा युनक्ति कृꣳसै त्वा युनक्ति तꣳसै त्वा युनक्तीत्येताभिरनिरुक्ताभिर्व्या-हृतिभिरनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत्प्रजा-पति मेवैतद् यज्ञं युनक्ति ॥ १३ ॥

युद्वेवापः प्रणयति। अङ्गिर्वा ऽइदꣳ सर्व मासं तत्प्रथमेनैवैतत्कर्मणा सर्व माप्नोति ॥ १४ ॥

युद्वेवास्याच। होता वाध्वर्युर्वा ब्रह्मा वाग्नीध्रो वा स्वयं† वा युजमानो नाभ्यापयति तद्देवाम्यैतेन सर्व मासꣳ भवति ॥ १५ ॥

युद्वेवापः प्रणयति। देवान् ह वै यज्ञेन युजमानां-स्तानसुररक्षसानि ररक्षुर्न्न यक्ष्यध्व‡ ऽइति तद्यदरक्षं-स्तस्माद्रक्षाꣳसि ॥ १६ ॥

---

* 'उपचारः'–इति ख,च। † 'स्वयं'–इति च। ‡ 'यक्षध्व'–इति क।

तती देवा ऽएतं व्वज्रं दद्दशुः। युद्यो व्वज्रो वा ऽआपो व्वज्रो हि वा ऽआपस्तस्माद् येनैता युन्ति निम्नं कुर्व्वन्ति युचोपतिष्ठन्ते निर्हहन्ति ततु* एतं व्वज्र मुद्यच्छंस्तस्याभये ऽनाष्ट्रे निवाते यन्नु मतन्वत तुथो एवैष एतं व्वज्र मुद्यच्छति तस्याभये ऽनाष्ट्रे निवाते यन्नं ततुते तुस्माद्पः प्रुणयति ॥ १७ ॥

ता उत्सिच्योत्तरेण गार्हपत्यꣳ सादयति। योषा वा ऽआपो व्वृषाग्निर्गृहा वै गार्हपत्यस्तुद् गृहेष्वेवैतुन्मिथुनं प्रजुननं क्रियते व्वज्रं वा ऽएष उद्यच्छति यो ऽपः प्रणयति यो वा ऽअप्रतिष्ठितो व्वज्र मुद्यच्छति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ स्मृणाति ॥ १८ ॥

स यन्नार्हपत्ये सादयति। गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तुद् गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति तुथो हैन मेष व्वज्रो नु हिनस्ति तुस्माद् गार्हपत्ये सादयति ॥ १९ ॥

ता ऽउत्तरेणाहवनीयं प्रणयति। योषा वा ऽआपो व्वृषाग्निर्मिथुनु मेवैतत्प्रजुननं क्रियत ऽएवु मिव हि मिथुनं क्रूनु मुत्तरतो हि स्त्री पुमाꣳस मुपशेते ॥ २०

ता नान्तरेण सञ्चरेयुः। नेन्मिथुनं चर्युमाण मन्त-

---

* 'तत्त'—इति ग-च-पुस्तकाभ्यां मन्यत्र।

रेण सम्भरानिति नाऽनातिहृत्य सादयेन्नो ऽअनाप्ताः सादयेत्स युदतिहृत्य सादयेदुस्ति वा ऽअमेश्चापाञ्च व्विभ्रातव्य मिव स युथेव ह तुदग्नेर्भवति युचास्याप ऽउपस्पृशन्त्यग्नौ हाधि भ्रातव्यं व्वर्ह्यथेद्युदतिहृत्य सादयेद्युद्यु ऽअनाप्ताः सादयेन्नो हाभिस्तं काम मभ्यापयेद्युस्मै कामाय प्रणीयन्ते तस्मादु सम्मृत्येवोत्तरेणाहवनीयं प्रणयति ॥ २१ ॥

अथ तृणैः परिस्तृणाति । इन्द्वं पाचाण्युदाहरति सूर्प*ऽग्नाग्निहोचहवणीञ्च स्फ्युञ्च कपालानि च शम्याञ्च कृष्णाजिनं चोलूखलमुसले इषदुपले तदुश दुशाक्षरा वै व्विराड्विराड् वै यन्नस्तुद्विराज मेवैतद्यज्ञ मभिसम्पादयत्यथ युद् इन्दुं इन्दं वै व्वीर्यं यदा वै द्वौ सꣳरुभेते ऽअथ तृहीर्यं भवति इन्दं वै मिथुनं प्रजननं मिथुन मेवैतत्प्रजननं क्रियते ॥ २२ ॥ १ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा प्रथमम्)

ब्राह्मणम् ॥ १ । १ ॥

---

* 'सूर्प'—इति ङ ।

व्रत मुपेत्यन्निति। पूर्णमासस्य प्राथम्यम्; अत्रैवाये पौर्णमासप्रयोग मभिधाय पश्चाद् दर्शप्रयोगाभिधानात्। कात्यायनेनापि तथाभिधाय "पौर्णमासवदन्यत्"–इति[१] पौर्णमासतन्त्रस्य दर्शेऽतिदेशात्। तथा दृष्टैव ब्राह्मणे[२] प्रजापतिपर्वसन्धानप्रस्तावे "पौर्णमासेन चैवामावास्येन[३] च पौर्णमासीञ्चामावास्यां च तत्पर्वाभिषज्यन्"–इति पौर्णमासप्राथम्यम्[४]। तथा तैत्तिरीयके[५]—"पौर्णमासꣳ हविरिद मेषां मय्यामावास्यꣳ हविरिद मेषां मयि"–इत्याधानानुमन्त्रणयोर्यजमानमन्त्रयोः पाठक्रमादपि पौर्णमासप्राथम्य मवगम्यते।

ननु पूर्वोऽयं पाठक्रमः श्रुत्यैव तु पौर्णमासप्राथम्यं प्रतिषिध्यते, श्रुतिश्च पाठाद्बलीयसी; श्रुत्यर्थपाठमुख्यस्थानप्रवृत्तीनां[६] क्रमप्रमाणाना मपि श्रुतेः प्राथम्येन प्राबल्यात्[७]। श्रूयते हि पौर्णमासप्राथम्यस्य निन्दा—"यत्पौर्णमासीं पूर्वा मालभेत, प्रतिलोम मेवैनावा-

---

१— श्रौ० सू० ४. २. ४४। २— उपरिष्टात् (१. ६. ३. ३६.)।

३— 'चामावास्येन'–इति झ, ट। ४— 'प्राथम्यात्'–इति ट।

५— ब्रा० ३. ७. ४. ८। तन्मन्त्रपाठस्तु इमा मूर्जं मित्यादिः।

६— 'अत्यर्थपाठमुख्यार्थानां प्रवृत्तीनां'–इति ज, झ, ञ, ट, ड।

७— 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्य मर्थविप्रकर्षात्"–इति मी० सू० ३. ३. १४। "विरोधेऽर्थस्तत्परत्वात्। श्रुतिः क्रमादानुमानिकत्वात्"–इत्यादिः (१. ५. ५-१०सू०) कात्यायनग्रन्थोऽप्यत्र पर्यालोच्यः। "अङ्गबोधकप्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याभेदेन षट्"–इत्यादिश्च मीमांसापरिभाषाप्रबन्धः। "एतस्य विधेः (विनियोगविधेः) सहकारिभूतानि षट् प्रमाणानि"–इत्यादिना लौगाक्षिभास्करेणाप्यर्थसङ्ग्रहे यानि लक्षणोदाहरणानि प्रदर्शितानि, तानि चेह द्रष्टव्यानि।

लभेत"-इति[1], न[2]; तस्य वाक्यस्य "सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्यां वै सरस्वत्यनुहोममेवैनावालभते"[3]-इति[4] सारस्वतहोमविधिशेषत्वेन पौर्णमासप्राथम्यनिन्दार्थवादात्। अतस्तदुक्तरीत्या[5] पौर्णमासप्राथम्य मुपपन्नम्। उपस्पर्शनस्थेदाचमनं विवक्षितम्।

नन्वापस्तम्बेन[6] "अप आचामत्युपस्पृशति वा"-इत्याचमनप्रतिनिधिभावेनोपस्पर्शनाभिधानात् स्पर्शनमात्रं तत्प्रतिभाति। सत्यं तच्च तथा; इह तु "तेन पूतिरन्नरतः"-इति वाक्यशेषादपोऽभ्यात्यन्नरत एव मेध्यो भवतीति वदताचमन मेव। यथा "अक्ताः शर्करा उपदधाति"-इत्यत्र घृततैलादिष्वञ्जनसाधनत्वेन सन्दिह्यमानेषु "तेजो वै घृतम्"-इति वाक्यशेषात्[7] घृत मिति निश्चयः, तद्वत्। सूचितं हि[8]—"सन्दिग्धेषु वाक्यशेषात्"-इति[9]। तस्य च व्रतोपायनाङ्गत्वम्, उपैष्यन्निति ग्रहप्रत्ययेन व्रतोपायनस्याचमनं प्रति हेतुत्वाभिधानात्; "लक्षणहेतोः क्रियायाः"-इति स्मृतेः[10]। प्रधानं हि स्वनिष्पत्त्यर्थं मङ्ग मनुष्ठापयत् तदनुष्ठाने हेतुर्भवति। न च लक्षणेऽपि व्रतुर्विधानात् कथं हेत्वर्थनिश्चय इति वाच्यम्। तदा हि भविष्यता व्रतेन लक्षितो हि यः तत्पूर्वकालः, तत्सम्बन्ध माचमनस्य

१— तै० सं० ३. ५. १. ५। २— नास्त्येतत् पदं ज-झ ञ-ट-पुस्तकेषु।
३— तै० सं० ३. ५. १. ६। ४— 'अत उक्तरीत्या'-इति ट।
५— श्रौ० सू० ४. ३. २. ९। ६— "अक्ता शर्करा उपदधात्; तेजो वै घृतम्"-इति तै० ब्रा० ३. १२. ५. १२।
७— 'च'-इति ड; ज-झ-ञ-ट-पुस्तकेषु नास्त्येव।
८— मी० सू० १. ४. २९। ९— पा० सू० ३. २. १२६।

विधातुं व्रत मुपैष्यन्नित्येतत्स्यात्। तत्कालसम्बन्धस्याचमनानन्तरं व्रतोपायनस्य विधानात् पाठादपि सिध्यतीति लक्षणार्थस्वीकारे वचन मनर्थक मिति।

ननु व्रतोपायनादपि प्रथम माहवनीयप्रणयन मन्वाधानञ्च। अत एवापस्तम्बः—"प्रातरग्निहोत्रञ्च हुत्वान्य माहवनीयं[1] प्रणीयाग्नीन्वादधाति"-इति[2]। कात्यायनस्त्वप्रणीतस्याहवनीयादेरन्वाधानासम्भवादर्थसिद्धं प्रणयनं मत्वा[3] अन्वाधान मेव प्रथम माह—"अग्न्यन्वाधान मध्वर्युर्यजमानो वा"-इति[4]। ब्राह्मणं तु तदनभिधाय ततः परावीनं[5] व्रतोपायनं तदङ्ग माचमनं वा कथं प्रथमम् अभिदधाति[6]? अत्राभिधीयते—नियमेन याजमानानां मध्ये व्रतोपायन मेव प्रथमम्; अग्न्यन्वाधानं हि नियमेन न याजमानम्। अध्वर्युर्यजमानो वेति कात्यायनोक्तेः[7]।

नन्वन्वाधानमन्त्रस्य ममाग्ने वर्च इत्यस्य[8] प्रत्यगाग्नीध्वाग्नियमेन याजमानत्वं युक्तम्; यथा आयुर्दा अग्नेऽस्यायुर्मे देहीत्यादेः[9]। तस्य हि समाख्यया आध्वर्यवत्वप्राप्तावपि प्रत्यगाग्नीध्वाग्निलिङ्गेन प्रबलेन समाख्यां बाधित्वा याजमानत्वं निर्णीतम् "मन्त्रास्त्वाकर्मकरणास्त-

---

१— 'हुत्वाहवनीयं'-इति ठ। २— श्रौ० सू० १. १. २।
३— 'मन्वानो'-इति ङ; ज-झ-ञ-ट-पुस्तकेषु नास्त्येव।
४— श्रौ० सू० २. १. २। ५— 'परत्वेन'-इति ठ, ङ।
६— 'आह'-इति झ, ञ, ट। ७— श्रौ० सू० २. १. २।
८— का० श्रौ० सू० २. १. ३. — तै० सं० ३. ७. १४. १।
९— तै० सं० १. ५. ५. १३।

दत्"-इति[१]। सत्यम्! अकरणमन्त्रत्वात् तत्र[२] तथास्तु, ममाग्ने वर्च इति तु करणमन्त्रत्वादाध्वर्यवक्रियायां विनियुक्तत्वाद् यजमानेन प्रयोगे तत्प्रतिपादनासामर्थ्यादध्वर्युणैव प्रयोज्य मित्युक्त मुत्तराधिकरणे— "करणेष्वर्थवत्त्वात्"-इति[३]। अत उक्तयुक्तेस्तत्करण मन्वाधान मप्यध्वर्युणैवानुष्ठेयम्। यत्तु कात्यायनेनाध्वर्युर्यजमानो वेत्युक्तम्, तच्च याजमानत्वं शाखान्तरमूलम्; एतच्छाखानुसारेण त्वापस्तम्बादिभिः केवलाध्वर्यवत्व मुक्त मिति विभागः[४]। अथवा यथा अप्रणीतस्या-न्वाधानानुपपत्त्या प्रणयन मप्यन्वाधानविधिनैव सङ्गृहीतं कात्यायन-सूत्रे, तथा अन्तरेणाहवनीयञ्च गार्हपत्यं च प्राङ् तिष्ठन्निति वच-नादेवाग्निप्रणयनं तत्प्रबलीकरणरूप मन्वाधानं चार्थसिद्धत्वादनुक्त मित्युच्यमानाङ्गमध्ये व्रतोपायनस्य प्राथम्य मविरुद्धम्॥

विहित मुपस्पर्शन मनूद्य प्रशंसति— "तद्यदिति। 'तत्' प्रकृतं 'यत्' उपस्पर्शनं तेनान्तरतः 'पूतिः' पवित्रता भवति। अनृतवद-नेन हि पुरस्तात् सम्भावित मपवित्रत्व मिति।

ननूपस्पर्शनस्य फल मेवेदं[५] पवित्रत्वं किं न विधीयते; कथ मपि सम्बन्धाभावेऽपि हि फलविधित्वं दृष्टम्, यथा—"प्रतितिष्ठन्ति य एता रात्रीरुपयन्ति"-इति रात्रिसत्रे[६]। (अत्रोच्यते[७]—) रात्रि-सत्रस्य ह्यनन्यशेषत्वेन स्वतन्त्रतया विधीयमानस्य युक्तं यदर्थवादो

१— मी० सू० ३. ८. १५। २— 'अकरणमन्त्रो यत्र, तत्र'-इति ङ।
३— मी० सू० ३. ८. २५। ४— 'किङ्कः (भिन्नः?)-इति ज, झ, ञ, ट।
५— 'ननूपस्पर्शनस्यापामेवेदं'-इति ज, झ, ञ, ट।
६— "द्वादशरात्रादीनि रात्रिसत्राणि"-इति का० श्रौ० सू० २४. १. १।
७— नास्त्येतद् वाक्यं डातिरिक्तेषु पुस्तकेषु।

ऽप्यपेक्षितं फलं समर्पयतीति; उपस्पर्शनस्य तु संस्कारतया संस्कार्येणैव प्रयोजनेन निरपेक्षितस्य कथ मपेक्षितं फलं समर्थो ऽर्थवादः[१] समर्पयितुम्[२] ? यथा— "यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति[३]। अत्र ह्यञ्जनस्य संस्कारतया फल मनपेक्षमाणस्य भ्रातृव्यचक्षुर्वर्जनं न फल मिति। सूचितं च— "द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात्"-इति[४]।

ननु साध्यसाधनेतिकर्त्तव्यतालक्षणे अंगत्रये ऽनुप्रविष्टं कञ्चिदप्यर्थ मनभिदधानस्य वाक्यस्यानर्थक्य मेव प्राप्तम्; "आम्नायस्य क्रियार्थत्वादानर्थक्य मतदर्थानाम्"-इति[५]। तत्रैव कस्यचिदंगस्य स्तुत्यापि भवत्यर्थवत्तेति चेत्, न; प्रवृत्तिविशेष मकुर्वाणया किं स्तुत्या? अपि च यः स्तुतश्चास्तुतश्च तावानेव सोऽर्थः[६]। अत्रोच्यते। द्वे हि लिङादियुक्तेषु वाक्येषु द्वे भावने। शब्दात्मिका चार्थात्मिका च। उक्तं च— "अभिधां भावना माहुरन्या मेव लिङादयः।

अर्थात्म-भावना त्वन्या सर्वाख्यातेषु गम्यते"-इति।

एकैका च सा साध्यसाधनेतिकर्त्तव्यताभिः त्रिभिरंशैरंगत्रयवती। भावनायां[७] हि स्वर्ग एकः साध्योऽंशः, तत्करण माग्नेयादिः साधनम्, प्रयाजादिरितिकर्त्तव्यतारूपः। तत्रैवार्थभावनायां पुरुषप्रवृत्तिः शब्दभावनाया भाग्यम्, लिङादिः तद्व्यापारो वा करणम्,

---

१— 'फल मसमर्थोऽर्थवादः'—इति ज, झ, ञ, ट।
२— 'समर्थयितुं'—इति ज, झ, ञ, ट। ३— तै० सं० ६. १. १. १७।
४— मी० सू० ४. ३. १। ५— मी० सू० १. २. १।
६— 'तावानेवास्यार्थः'—इति ड। ७— 'अर्थभावनायां'—इति ठ, ड।

आर्थवादिकी स्तुतिरितिकर्त्तव्यता[१]। तचार्थभावनाया अंशत्रयान-

---

१— भावनोपदेशोऽयं मीमांसापरिभाषायां विशेषतो व्यक्तः, अर्थसङ्ग्रहे लौगाक्षिभास्करेणाप्यल्पाक्षरेण सम्यग् बोधितः। तथाहि—"स च यागादिर्यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रति विधीयते। तथाहि यजेतेत्याख्यंग्रहयम्— यजिधातुः प्रत्ययश्च। प्रत्ययेऽप्यख्यंग्रहयम्— आख्यातत्वं लिङ्त्वञ्च। तत्राख्यातत्वं दशलकारसाधारणं, लिङ्त्वं पुनर्लिङ्मात्रे। उभाभ्यामप्यंशाभ्यां भावनैवोच्यते। भावना नाम भवितुर्भवनानुकूलो व्यापारविशेषः। सा द्विधा— शाब्दी भावना, आर्थी भावना चेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दीभावना। सा च लिङंशेनोच्यते; लिङ्श्रवणे ह्ययं मां प्रवर्त्तयति, मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः। यद्यस्माच्छब्दान्नियमतः प्रतीयते, तत्तस्य वाच्यम्; गां मानयेत्यस्मिन् वाक्ये यथा गोशब्दस्य गोत्वम्। स च व्यापारविशेषो लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः; वैदिकवाक्येषु पुरुषाभावात् लिङादिशब्दनिष्ठ एव। अत एव शाब्दी भावनेति व्यवह्रियते। सा च भावना अंशत्रय मपेक्षते— साध्यं साधन मितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेत्? इति। तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थी भावना साध्यत्वेनान्वेति; एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः। सङ्ख्यादीना मेकप्रत्ययगम्यत्वेऽप्ययोग्यत्वान्न साध्यत्वेनान्वयः। साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति; तस्य च करणत्वं न भावनोत्पादकत्वेन, तत्पूर्वं मपि तस्याः शब्दे सत्त्वात्; किन्तु भावनाज्ञापकत्वेन, शब्दभावना-भाव्यनिर्वर्त्तकत्वेन वा। इतिकर्त्तव्यताकाङ्क्षाया मर्थवादश्चाप्राप्तस्य मितिकर्त्तव्यत्वेनान्वेति। प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थी भावना। सा चाख्यातसामान्यस्य; व्यापारवाचित्वात्। साप्यंशत्रय मपेक्षते— साध्यं साधन मितिकर्त्तव्यताञ्च। किं भावयेत्? केन भावयेत्? कथं भावयेदिति। तत्र साध्याकाङ्क्षायां स्वर्गादि फलं साध्यत्वेनान्वेति, साधनाकाङ्क्षायां यागादि करणत्वेनान्वेति, इतिकर्त्तव्यताकाङ्क्षायां प्रयाजाद्यङ्गजात मितिकर्त्तव्यत्वेनान्वेति"—इति ॥

भिधानेऽपि ग्रन्थभावनेतिकर्त्तव्यताभूतां स्तुतिं ब्रुवाणो ऽर्थवादः कथ मनर्थकः स्यात् । यदाह सूत्रकारः— "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः"-इति[1] । स्तुतिविरहे ग्रन्थैकवाक्यादपरिपूर्ण-ग्रन्थभावनया च प्रवृत्तिरर्थभावनायां पुरुषस्येति तस्या अप्यानर्थक्येन मूलोच्छेदप्रसङ्ग इति कथ मनर्थिका स्तुतिः स्यात् । अत्यर्थवादरहितं[2] केवलं विधिवाक्यम्, तच विधिरेव स्तुति माक्षिपतीति नोक्तदोषा-वतारः ; इह प्रत्यक्षश्रुतायां स्तुतौ सत्यां कि माक्षेपकल्पनेत्यलम् । अयं[3] च विचारः उत्तरत्र सर्वत्रैवार्थवादेषु द्रष्टव्य इति ।

अनृतवदननिमित्तानृद्धिपरिहारेणोपस्थानस्य प्राप्तस्य मभिधाय तत्साधनभूतानां मपां स्वतः शुद्धत्वात् स्वसम्बन्धिशुद्धिहेतुत्वाच्च तत्प्राप्तौ मित्याह— "मेध्या वा इति ॥ १ ॥

इदानी मग्निदर्शनलक्षणेनाक्रान्तरेण सहितं समन्त्रकं व्रतोपायनं विधत्ते— "सोऽग्नि मिति । 'सः' यजमानः 'अग्निम्' आहवनीयम् । मन्त्रार्थस्तु— हे व्रतस्य पालक ! अग्ने ! अनृतवदनत्यागादिरूपं 'व्रतं' चरिष्यामि ; तत्कर्त्तुं शक्तो भूयासम् । शक्नोतेर्लिङ्याशिष्यत्वम् । मदीयं 'तद्' व्रतं 'राध्यताम्' समृद्धं भवत्विति[4] ।

व्रतपतिपदं व्याकरोति— "अग्निर्वै देवाना मिति । समथ-वाक्यस्याव्याख्येयत्व मत्र— प्रकेयं राध्यता मिति । तत्र च हेतु माह— "नाचेति । 'तिरोहितम्' अविस्पष्टार्थं पदम्[5] ॥ २ ॥

१— मी० सू० १. २. ७ । २— 'यदर्थवादरहितं'—इति ज;झ;ञ;ट । ३— 'एष'—इति ठ । ४— वा० सं० १. ५. १। तै० सं० १. १. १०. ८ । ५— अतोऽत्र अविस्पष्टार्थं पदं नास्ति, अतो व्याख्याने प्रयोजनाभाव इत्यर्थः ।

खीक्रतस्य व्रतस्य यागसमाप्तिपर्यन्तता माह— "अथेति। 'संस्थिते' यागे पर्यवसिते। विसर्जनमन्त्र माह— "अग्ने व्रतपते व्रत मचारिष मिति[१]। अचाग्नक मराधीति पूर्वमन्त्रादैलक्षण्यम्। तत्र हेतु माह— "अग्नकद्धीति। यो यज्ञस्य पर्यवसानं प्राप्तवान्, 'एतत्' कर्म कर्त्तुम् 'अग्नकत्' अक्नोऽभूत्। तस्मै तेन कर्मणा 'अराधि' सिद्धम्; तत्कर्म अभिध्यदित्यर्थः। अगन्निति गमेर्लुटि "मन्त्रे घसेति[२] च्लेर्लुकि, हल्ङ्यादिलोपे[३], "मो नो धातोरिति[४]। अत्र व्रतोपायने मन्त्रान्तरं विधातुं पूर्वमन्त्रात्तस्यैव विशेष माह— "एतेनेति। यत 'एतेन' वक्ष्यमाणेनेद मह मित्यादिना[५] बहवो व्रत मुपयन्ति, अतस्तु हेतोः अनेनैवोपेयात्। एवकारेणैष मन्त्रः प्रशस्यते, न तु पूर्वो निषिध्यते। अत एव कात्यायनो द्वय मयाह— "अग्ने व्रतपत इद मह मिति वा"-इति[६] ॥ २ ॥

इद मह मिति मन्त्रे कर्मलेनापादानत्वेन च सत्यानृतयोरुभयो-रेवोपादाने कारण माह— "द्वयं वा इति। यद् 'इदं' जगत्, तत् सर्व मनृतं सत्यं वेति कोटिद्वय मेव; न तृतीया कोटिरस्ति। सत्य मेव देवाः; चिरावस्थानात्, नियमेन सत्यवादित्वाद्वा। अनृतं मनुष्याः; स्वप्नदृष्टवदल्पकालावस्थानात्, प्रायेणानृतवादित्वाद्वा। तथा च देवमनुष्याणां सत्यानृतवादित्व मैतरेयके[७] ऽप्यामातम्—

१— वा० सं० २. २८। तै० सं० १. ६. ६. १३।
२— पा० सू० २. ४. ८०। ३— पा० सू० ६. १. ६८।
४— पा० सू० ८. २. ६४। ५— वा० सं० १. ५. २।
६— श्रौ० सू० २. १. ११। ७— 'तैत्तिरीयके'-इति ज, झ, ञ, ट, ड।

"सत्यसंहिता वै देवा अनृतसंहिता मनुष्याः"-इति[१]। सत्यानृतवदनसाहित्यं हि तत्र विवक्षितोऽर्थः; "तस्माद्दीक्षितेन सत्य मेव वदितव्यम्"-इति वाक्यशेषात्[२]। यदनेन मन्त्रेणोच्यते 'तन्मनुष्येभ्यो देवानुपैति'-इत्येवमात्मक मिम मर्थं मयं मन्त्र आहेत्यर्थः ॥ ४ ॥

अनेन मन्त्रेण व्रत मुपेयुषो नियम माह— "स वा इति। 'सः' इत्यं कृतव्रतोपायनः 'सत्य मेव' इत्येवकारकरणादनृतं न वदेदित्यर्थः। असत्येवकारे यद्यत् सत्यं, तत्तदवश्यं वक्तव्यं स्यात्,— "यद्दं सम्राष्टौतिवदेकत्वस्याविवक्षितत्वात्; अनृतवचनं चाप्रतिषिद्धं स्यात्, दृश्यते च तन्निषेधः। अत एव तैत्तिरीयके दर्शपूर्णमासप्रकरणे समाम्नायते— "तस्मैतद् व्रतं नानृतं वदेत्"-इति[३]। यद्यप्याहिताग्निमाचस्यानृतवदन मन्यत्र प्रतिषिध्यते[४]— "तस्मादाहिताग्निर्नानृतं वदेत्"-इति[५], तथाप्यनृतवदनवर्जनस्य दर्शपूर्णमासाङ्गत्वसिद्धये पुनरिह वक्तव्य मेव; इतरथा ह्यनृतवदनेऽपि पुरुष एव प्रत्यवेयात्, क्रतुः पुनरविगुण एव स्यात्;—

"को नाम क्रतुमध्वस्यः कलञ्जादीनि भक्षयेत्।
न क्रतोस्तच्च वैगुण्यं यथाचोदितसिद्धितः"-इतिन्यायात्।

नन्वनेनापि वचनेन कथ मनृतवदननिषेधस्य कर्माङ्गत्वसिद्धिः? वदेदितिप्रत्ययार्थस्य कर्तुः प्राधान्यात् तदर्थ एवायं प्रतिषेध इति हि युक्तम्। कर्मप्रकरणात् कर्माङ्गतेति चेत्, न; प्रतिषेधपाठादपि

१— ब्रा० १. १. ६।
२— तत्रैव ततः प्राग् द्रष्टव्यम्।
३— सं० २. ५. ५. ११।
४— 'निषिध्यते'-इति ज, झ, ञ, ट।
५— "न वाहिताग्निनानृतं वदितव्यम्"-इतीहैवोपरिष्टात् (२. २. २, २०.)।

क्रियायाश्चावत्कालप्रेषता पदश्रुत्या प्रतीयते, तदर्थं प्रतिषेधस्य; तादर्थ्येनैव प्रतिषेधोऽपि चाभिधीयते इति श्रौतेन पुरुषार्थत्वेन प्रबलेन प्राकरणिकी दर्शपूर्णमासार्थता बाध्यते ।

ननु न वदेदिति पदद्वयगम्यप्रतिषेधस्य कर्तुः सम्बन्धः, पदद्वयवाक्य मिति कथं प्रतिषेधस्य कर्तुः सम्बन्धः श्रौतः ? इति चेत्, न; यथा "यजं समाष्टौति पदद्वयगम्यसमार्गस्य यजःप्रेषता, तथापि द्वितीयायाः क्रियासामान्यं प्रति यजस्य प्रेषत्वाभिधानात् तद्विप्रेषस्य समार्गस्य पदान्तरेणोपस्थानेऽपि प्रेषप्रेषिभावस्य श्रौतता[1], तद्वत् । अत इह पुरुषार्थो निषेधो विधीयते । स्यादेव विधित इति चेत्, तथापि हि तस्या एषैव श्रुतिर्मूलं भविष्यति; द्वयोरर्थयोस्साम्यात् । अतो युक्तः श्रुत्या प्रकरणबाध इति । अथ मतम्— 'अविरोधे न दुर्बलं प्रबलेन निराक्रियते; न तु खलप्रबलमित्येव दुर्बलस्य हिंसा न्याया । न चेह प्रकृतक्रियया कर्तुः सम्बन्धे प्रकरणबाधः; अतो न केवलकालार्थतेति ।

ननु पुरुषमाचार्योऽनृतनिषेधः स्यादेव सिद्धः, स एव क्रतुगतपुरुषार्थोऽपि भविष्यतीति किं मनेन विशेषनिषेधेन ? । नच तस्याः स्तेरियं श्रुतिर्मूलमिति युक्तम्; सामान्यविशेषतया मूलमूलिभावासम्भवात् । एवं तर्हि सर्वविशेषगामिना सामान्येन स्मृतिसिद्धस्य निषेधस्य प्रकरणाबाधायात्[2] क्रतुगतपुरुषविशेषे अनुवादोऽस्तु, तस्य प्रत्ययार्थत्वेन प्राधान्यादित्युक्तम् । स्यादेवं यदि कर्तुः

१— 'ऽपि न प्रेषप्रेषिभावस्य श्रौतत्वभङ्ग'—इति ज, झ, ञ, ट, ठ ।

२— एतदनन्तरं 'ब्रूत'—इति पदं मधिकं ज-झ-ञ-ट-पुस्तकेषु ।

प्रत्ययार्थत्वं स्यात्, न त्वेतद्दृष्टम्; अवश्यम्भावस्यैव शब्दार्थत्वात्। अवश्याभिधानतया भावनयैवाक्षेपात् कर्तुः प्रतीतेः। न च "धातुः कर्मणि च"-इति[1] स्मृतिबलात् कर्तुः प्रत्ययार्थता; तथाः स्मृतेर्द्वैकयो[2]रित्यनेनैकवाक्यत्वे प्रत्ययाभिधेयत्वेनोच्यमानयोर्द्वित्वैकत्वयोर्या-वर्त्तकत्वेनैव कर्तुः समर्पणात्,—कर्तृद्वित्वे द्विवचनं कर्तृकत्वे एकवचन मिति; अतो भावनया संख्यया वा आक्षेपादेव कर्तुः प्रतीतिः सिद्धेति न स प्रधानतया प्रत्ययार्थः; अतः क्रियाया एव प्राधान्यात् तस्या एवाङ्गत्वेनानृतनिषेधो विधीयते। न च सत्या पुरुषार्थतया विहि-तस्यानृतवदननिषेधस्य[3] कथ मिह प्रकरणात् क्रत्वर्थतेति[4] वाच्यम्; "खादिरो यूपो भवति[5]"-"खादिरं वीर्यकामस्य[6]"-इतिवत् संयोग-पृथक्त्वोभयार्थत्वसिद्धेः। उक्तं हि—"एकस्य तूभयत्वे संयोगपृथक्त्वम्"-इति[7]। अतः सत्य मेव वदेदिति दर्शपूर्णमासाङ्गत्वेनानृतप्रतिषेधस्य विधिरय मिति सिद्धम्। तदाह कात्यायनः—"इदं मह मिति[8] वा सत्यवाद्यतः, कर्माङ्ग मुत्तरे सत्यवदनम्"-इति[9]।

तस्मात्ते यज्ञ इति। यज्ञस्त्विनां देवानां यज्ञोऽपि यज्ञःप्रति-पादनाय प्रशस्तम्। 'एवम्' "अग्ने व्रतपते"-इतिमन्त्रवत्। इदं मह मिति क्रियाविशेषणत्वान्नपुंसकम् ॥ ५ ॥

१— पा० सू० २. ४. ६९। २— पा० सू० १. ४. २२।

३— 'विहितस्यातोऽनृतवदननिषेधस्य'-इति ज, झ, ञ, ट।

४— 'कर्मार्थतेति'-इति आदिषु। ५— इदमेवोपरिष्टात् (३.६.२.१२.)।

६— ऐ० ब्रा० २. १. १। 'खादिरं स्वर्गकामो वीर्यकामो वा'-इति आप० औ० सू० ७. १. १६। ७— मी० सू० ४. ३. ५।

८— वा० सं० १. ५. २। ९— औ० सू० २. १. ११,१२।

मन्त्रेणाभ्युपेतस्य व्रतस्य प्रसङ्गाद्विसर्जनं माह— "अथ सꣳस्थित इति। अत्यविसर्जनमन्त्रस्य[1] अयं मर्थः,— व्रतोपायनात् प्रागहं य एव मनुष्योऽस्मि, व्रतं मुक्त्वा स एव मनुष्यः इदं मस्मि; न तु व्रत-समये इव[2] देवः। इदं मिति क्रियाविशेषणत्वान्नपुंसकम्[3]।

नन्वसौ मनुष्यो व्रतसमयेऽपि मनुष्य एव, तत् किं मुच्यते य एव मनुष्योऽस्मि स एवेदं मस्मीति? तत्राह— "अमानुष इवेति। मनुष्योऽपि हि तदा अन्यात्मकत्वात्[4] सत्यवदनाद्वा देव इवेत्युक्तम्, व्रतत्यागे तु कृते व्रतारम्भात् प्रागिव स्वभावसिद्धं मनुष्यत्व मेवेति।

ननु यथा व्रतोपायने अनृतात् सत्य मुपैमीत्युक्तम्, एवं तत्त्यागे सत्यादनृत मुपैमीति किं नोक्त मित्यत आह— "न हीति।

महत उत्कर्षात्[5] (देवत्वात्[6]) प्रच्युतत्वेनात्यन्तनिकृष्टमानुषत्व-प्राप्तिरूपनस्य परुषत्वादनवकल्पनं तदाह— "तदु खल्विति ॥ ६ ॥

व्रतप्रसङ्गादागतं तद्विसर्जनं समाप्य पूर्वेद्युर्यजमानेन व्रतानन्तरं यत् कर्त्तव्यं तत् प्रतिजानीते— "अथात इति। यतो व्रतानन्तर मग्नानग्नापरनामक मारण्याद्यग्न मेव यजमानेन कर्त्तव्यम्, 'अतः' तदनन्तर मेव तस्य निरूपणं क्रियत इत्यर्थः।

१— "व्रतं विस्रजते येनोपायात्"—इति का०श्रौ०सू० ३. ८. २९। 'पूर्वं हि व्रतग्रहणे द्वौ मन्त्रावुक्तौ अग्ने व्रतपते इदमहं मिति वेति (का० श्रौ० सू० २. १. ११.), अत्र इद मह मित्येव मन्त्रः श्रुत्यभिमतः"—इति हरिस्वामिनः। श्रुतिश्च सा इहैवाग्ने द्रष्टव्या—१. ६. ३. २३।

२— मन्त्रपाठः खलु वा०सं० २. २८. २ द्रष्टव्यः।

३— नपुंसकत्वम्'—इति झ, ठ, ढ।

४— 'आत्मात्मकत्वात्'—इति झ, 'सात्मकत्वात्'—इति ङ।

५— 'उत्कृष्टात्'—इति ढ। ६— नास्त्येतत् पदं ङ-पुस्तके।

प्रतिज्ञातस्याग्रनानग्रनपक्षस्य प्रशंसार्थं केवलानग्रनपक्षं निरसितु मुपन्यस्यति— "तदु हेति। 'तत्' तस्मिन्नग्रनानग्रनविषये सवयसः पुत्रः ('सावयसः') 'अषाढ़'-नामकः, सर्वात्मना अग्रनत्याग मेव व्रतं मेने। तथा मन्यमानस्याषाढ़स्याग्रय माह— "मनो हेत्यादि। अनुपन्यस्त मपि मनुष्यस्य मनः 'आ' समन्तात् जानन्ति। अतो योऽसौ यजमानो व्रत मुपैति, एष नः प्रातरवश्यं यक्ष्यत इति ज्ञात्वा 'विश्वे' सर्वे 'ते' देवाः व्रतदिवसे यजमानस्य गृहानागच्छन्ति।

'उपवसथ'-नामनिर्वचनेन देवाना मागमनं दृढ़यति— "तेऽस्येति। 'उप' समीपे यजमानस्य वसन्ति देवा अस्मिन्निति पर्वदिवस 'उपवसथ'-नामक इत्यर्थः ॥ ७ ॥

अस्तु किं ततः? इति चेत्— "मनुष्येष्विति। गृहे मनुष्येष्वागतेषु अनश्नत्सु 'यः' कश्चिद्यजमानः स्वयं पूर्वं भुञ्जीतेति यत्तदेवानुचित मिति वितर्कयामः; अथ यः कश्चिद् देवेष्वनश्नत्सु पूर्वो ऽश्नीयादिति यत्, तस्यानवक्लृप्तिः किमु वक्तव्या? कैमुतिकन्यायफल माह— "तस्मादिति। 'उ'-इत्यसन्देहे। तस्मादेव हेतोः अग्रनवर्जनलक्षणेऽर्थे नास्ति सन्देह इत्यर्थः ॥ ८ ॥

अषाढ़ेन चेन्मुनिना निर्णीतो ऽनग्रनपक्षः, तर्हि स एव परमार्थः; कथ मग्रनानग्रनपक्षः? इति चेत्, अस्यापि मुनिनैव याज्ञवल्क्येन सोपपत्तितो निर्णीतत्वादित्याह— "तदुहेति। 'तदु' तस्मिन्नपग्रनानग्रनपक्षे याज्ञवल्क्य उपपत्तिम् 'उवाच' आह।

अग्रनानग्रनलक्षणस्वमतसमर्थनाय प्रत्येकपक्षौ दूषयति— "यदीति। दैविके हि कर्मणि देवान् प्रत्युद्दिष्टस्यैव हविषः प्रथम. मनुप-

योगः, काम अन्यस्य; पित्र्ये पुनरतिथिपशाङ्गविधोऽन्यदपि अनुपयोज्य मिति पितृदेवत्यता मापादयतीति याज्ञवल्क्यस्याशयः। तत् किं दैविके कर्मणि प्रागपि भोक्तव्य मिति यः, न माद्यत्र मजाबानः भक्षते; तं प्रत्याह— "यद्यु इति। 'यद्यु' यदि त्वश्नाति, तदा अग्निग्निषतो देवानतिक्रम्य स्वयं भुक्तवान् स्यात्।

अश्नानाश्नपक्षयोरुभयोरपि दोषस्यात्, का गतिः? इति (तत्राह— "स यदिति[1]।) 'यद्' द्रव्य मग्नित मग्नवग्नितवद् भवति, तदश्नीयात्। किं तदिति तदाह— "यस्येति। 'यस्य' द्रव्यस्य सम्बन्ध्यन्नं 'हविः' देवा न गच्छन्ति, तदग्नित मपि यद् अनग्नितवद् भवति।

तथात्वे यथोदीरितदोषद्वयाभाव माह— "स यदिति। अश्नादेव न पितृदेवतात्वम्; अश्नमानस्य देवायोग्यत्वादेव न देवाना मतिक्रमः[2] ॥ ९ ॥

अथ किं त्वेवं प्राश्नद्रव्यम्[3]? इति तदाह— "स वा इति। आरण्यग्रहणं प्रकृतदर्शपूर्णमासहविर्व्यतिरिक्तोपलक्षणम्। 'वृक्षं' वृक्षोद्भवं फलम्।

१— नास्त्येषोऽंशः ठ-पुस्तकादन्यत्र।

२— 'अश्नान्न पितृदेवतात्वम्, तस्यान्नस्यादेवयोग्यत्वादेव न देवाना मतिक्रमः'-इति ड। 'अश्नानाश्नपितृदेवतात्वम्, अस्य यजमानस्य देवयोग्यत्वादेवं न देवाना मतिक्रमः'—इति ञ, ञा, ञ, ट।

३— 'अथ किं त्वाश्यद्रव्यम्?'—इति ञ, ञा, ञ, ट; 'अथ किं तादृग् द्रव्यम्?'—इति ठ।

भुक्तोपलक्षणत्वे मुनिविशेषव्यवहारं प्रमाणयति— "तदु हेति। वृषा नाम कश्चित्, तस्य पुत्रो 'वार्ष्णः', तस्य नाम 'वर्कुः'-इति।

मुनेर्मतमपवदति— "तदु तथेति। तत्र हेतुः— "व्रीहियवयोरिति। 'ग्रमीधान्यं' तिलमाषादि। उपचिनोतीति 'उपचम्' अल्पेनापि माषपिष्टेन मिश्रितं व्रीहिपिष्टम्। चिचतुरान् यामानपि स्थापितम्[१] 'उपचितं' बहु भवति इति प्रसिद्धं तदाह— "व्रीहियवाविति। अतो माषोपयोगे व्रीहियवावेव यत उपयुक्तौ स्याताम्, अतस्तथा न कुर्यात्। अतो युक्त मारण्य मेवाश्नीयादिति। तदेवं व्यवस्थितं सक्तदग्नम् ॥ १० ॥

स आहवनीयेति। तां रात्रि माहवनीयागारे गार्हपत्यागारे वा ग्रयीत[२]। तत्रैव ग्रयने हेतुः— "देवान् वा इति। 'उपावर्त्तते' समीपे शेते[३]। 'अधः ग्रयीत' न पुनः खट्वाद्युपरि; यत उपरि स्थितं श्रेयांस मध एव स्थिताः[४] उपचरन्ति ॥ ११ ॥

अथ प्रभाते अध्वर्योः कर्त्तव्यता माह— "स वा इति। 'सः' प्रसिद्धोऽध्वर्युः प्रथमेन कर्मणा अप एवाभिमुख्येन प्राप्नोति। किं तत्प्रथमं कर्म? तदाह— "अपः प्रणयतीति। एतच्चापां प्रणयनम्, "अथ संयौति"-इति[५] वक्ष्यमाणसंयवनार्थम्। अतः संयवनात्

१— 'माषानपि प्रापितम्'—इति ज, झ, ञ, ट; 'माखाबपितं'—इति ढ।
२— का० श्रौ० सू० २. १. १४, १५। ३— 'सेवते'—इति ठ।
४— 'खट्वाद्युपरि; यत उपस्थितं श्रेयांस मध उपस्थिताः'—इति ज, झ, ञ, ट। 'खट्वाद्युपरि ग्रयीत; उपस्थितं श्रेयांस मध उपस्थिताः'—इति ठ।
५— १प्र० ६ब्रा० ३क० अथवा २अ० २ब्रा० ३क०।

प्राक् प्रणीतानां नाग्ने पुनः प्रणयनं कार्यम्; क्षते तु संयवने तत्राग्ने ऽपि प्रयोजनस्य[१] ज्ञातत्वान्न पुनः प्रणेतव्यम्।

ननु अन्तर्वेदि प्रणीता निनयति[२] इत्युपरितन-निनयनार्थं पुनः कस्मान्न प्रणयन मिति चेत्, न; संयवनप्रसक्तौ तासा मेवापां प्रतिपत्तिमात्रम्, अतो न तदपां प्रणयनस्य प्रयोजकम्; न हि चात्वाले प्राग्नं क्षुण्णविषाणां[३] प्रयुङ्क्ते।

अथोभयं साधयतः[४] प्रणयनस्य कथं संयवन मेव प्रयोजनम्, न तु अन्तर्वेदि निनयन मिति चेत्, (न[५]); "पूर्णपात्रं निनयति"-इति[६] द्वितीयया अपां संस्कारकर्मत्वप्रतीतेर्निर्नयनस्योपयुक्तसंस्कार-तया प्राग्नवत् प्रतिपत्तित्वात्। संयवने तु समानप्रकरणे शाखान्तरे "प्रणीताभिः[७] (हवींषि) संयौति"-इति[८] तृतीयया अपां संयवनं प्रति गुणत्वप्रतीतेः। अतः संयवनार्थ मेव प्रणयनम्।

उक्तं प्रणयनं प्रशंसति— "यज्ञो वा इति। अपां यज्ञसाधनतया यज्ञरूपत्वात्तद्विस्तारात्मकस्य प्रणयनस्य यज्ञविस्तारूपत्वात् प्राग्र-ह्यम् ॥ १२ ॥

उक्तं प्रणयन मनूद्य कस्त्वेति व्याहृतिचतुष्टयात्मकं मन्त्रं[९] विधत्ते— "स प्रणयतीति। हे प्रणीतोदक! को नाम त्वां यज्ञेन 'युनक्ति'

१— 'संयोजनस्य'-इति ङ। २— इत्थैव २.२.२। का०श्रौ०२.५.११,१२।
३— इत्थ ३.२.१.१८,२८; का०श्रौ० ७.३.२९; तै०सं० ६.१.२.१५।
४— 'अथोभयसाधनता'-इति ङ। ५— नैतत् पदं ठ-पुस्तकादन्यत्र।
६— इत्थैव ६.३.१। ७— 'प्रणीतेन'-इति ञ, ञ, ञ, ट, ड।
८— आप०श्रौ०सू० १.२४.३। ९— वा० सं० १.६.१-४।

योक्तुं समर्थः ? यः समथः 'सः' युनक्ति। 'कस्मै' वा प्रयोजनाय युनक्ति ? यस्मै युनक्ति, तस्मै युनक्ति। योजने कर्त्ता प्रयोजनञ्च दुर्ज्ञान मित्यर्थः। व्याकृियन्त इति 'व्याकृतयः' मन्त्राः; दुर्ज्ञानत्वाभिधानात्, अनिश्चित्य वचनाच्च[1] 'अनिरुक्ताः'। व्याकृतिविशेषणस्यानिरुक्तत्वस्य प्रयोजन माह— "अनिरुक्तो वा इति। अनिर्ज्ञातो हि पदार्थः क इत्युपयुज्यते[2]। अतोऽसावनिरुक्तः प्रजापतिश्च 'कः'-इत्युच्यते। "को ह वै नाम प्रजापति"-रिति श्रुतिः[3]। अतः श्रुतिसाम्यात् प्रजापतेरनिरुक्तत्वम्। अथवा वाचकमन्त्रोच्चारण मन्तरेण मनसैव (ध्यात्वा[4]) प्रजापतेर्हीमादपि प्रजापतिरनिरुक्तः[5]। "यत्तूष्णीं तत्प्राजापत्यं स मनसा जुहोति, मन इव हि प्रजापतिः"-रिति[6] श्रुतेः। अस्यनिरुक्तः[7] प्रजापतिः, प्रस्तुते किं मायात मित्यत आह— "प्रजापतिर्यज्ञ इति। "प्रजापतिर्यज्ञ मसृजत"-रिति[8] यज्ञसृष्टृत्वश्रुतेः कार्यस्य कारणादभेदात्। तथा "एष वै सप्तदशः प्रजापतिर्यज्ञ मन्वायत्तः"-रिति[9] सप्तदशसमुदायात्मकस्य प्रजापतेः

१— 'निश्चित्य अवचनाच्च'-इति ठ। २— 'इति पर्यनुपयुज्यते'-इति ठ।

३— तै० ब्रा० ३. २. १०। ४— नास्त्येतत् पदं ठ-पुस्तकादन्यत्र।

५— "अनिरुक्तं वा उपांशु"-इति, "अनिरुक्तं हि मनो ऽनिरुक्तं ह्येतद् यत् तूष्णीम्"-इति चैवैव (१.३. ५. १०, २. ४. ४. ५.)।

६— तै० सं० ६. ६. १०. ३। "मनोऽसि प्राजापत्यम्"-इति तत्रैव १. ६. २. १२, "मनो वै प्राजापत्यम्"-इति च १. ६. १०. ४।

७— 'श्रुतेः स त्वनिरुक्तः'-इति ज, झ, ञ, ट।

८— तै० ब्रा० १. ७. १. ४। ऐ० ब्रा० ७. ४. १। "प्राजापत्यो यज्ञः"-इति तै० सं० १. ६. १०। ९— तै० सं० १. ६. ११. १।

सकलयज्ञानुगमश्रुतेः। अनुगच्छतश्च सामान्यादेलोके न पृथक् अनुगन्तव्यः; व्यक्तावभिमानदर्शनात्। यस्मात् प्रजापतिर्यज्ञः[1], अतः अनिरुक्ताभिर्व्याहृतिभिः प्रणयनाद्निरुक्तप्रजापत्यात्मकतया अनिरुक्तं यज्ञ मेव 'युनक्ति' प्रारभत इत्यर्थः ॥ १३ ॥

प्रशब्दोपात्तप्रकर्षसूचितप्राथम्यद्वारा प्रणयनं प्रागस्तावीत्— "यज्ञो वा इति। तच्च नयतिपदोपात्तप्रापणात्मकविस्तारद्वारत इति 'अथापः'-इत्यस्यावयवार्थपर्यालोचनयापि द्विधा[2] स्तौति— "यद्देवेति। अनियोग एवकारः। न नियोगेन प्रागुक्तरीत्या स्तुतिः, किन्त्वेव मयस्तौत्यर्थः। आप्नुवन्ति[3] सकलं जगदित्यापः। तादृग्या मपां प्रणयनात् प्रथम मेव सर्वं मान्नं स्यादित्यपि प्रशस्तं[4] तत्प्रणयन मित्यर्थः ॥ १४ ॥

अथवास्य कर्मणो यदेवाङ्गं प्रापयितव्य मध्वर्य्वादयः प्रमादान्न प्रापयन्ति, तदैकल्यम् उदकाचमनप्रोक्षणादिना[5] परिहरन्त आपयन्ति; अतोऽप्याप इति तत्प्रणयनं प्रशस्तम् ॥ १५ ॥

न केवल मवयवार्थपर्यालोचनया, उदकप्रभावपर्यालोचनयापि प्राशस्त्यं वक्तु मारभते— "देवान् हेति। असुराश्च रक्षांसि च 'असुररक्षसानि'। "अनसन्तान्नपुंसकाच्छन्दसि"-इत्यसन्तत्वात् समा-

---

१— 'सामान्यादेर्लोकेऽनुगन्तव्यः। व्यक्त्याद्यभिमानदर्शनात् प्रजापतिर्यज्ञः'—इति ज, झ, ञ, ट।

२— नास्त्येतत्पदम् ड-पुस्तके। ठ-पुस्तके तु 'द्वेधा'—इति।

३— 'आप्नुवन्ति'—इति ड, ढ। ४— 'प्रशस्तम्'—इति ज, झ, ञ, ठ।

५— 'उदकप्रोक्षणाचमनादिना'—इति ठ।

मान्तः[१]। 'न यष्ट्यध्व इति' यष्टुं न लभध्वं यूय मिति वदन्तो 'ररक्षुः' प्रतिबन्धयेयुरित्यर्थः[२] ॥ १६ ॥

ततो देवा इति। इत्थं प्रतिबद्धा देवाः 'एतम्' अलक्षणं वज्रं ददृशुः। अपां वज्रत्वं "ता एता आपो वज्रीभूत्वा"-इत्यादि श्रुत्यन्तरे प्रसिद्धम्[३]; तदाह— "वज्रो वा इति।

न केवलं प्रसिद्धिबलाद्वज्रत्वम् उपपत्तिबलाच्चेत्याह— "वज्रो ह्येति। उपपत्तेः प्रसिद्धिं वै-शब्द आह। तां प्रसिद्धा मुपपत्तिं दर्शयति— "तस्मादिति। यस्मादापो वज्रः, तस्माद् एता आपः 'येन' पथा गच्छन्ति, तं पन्थानं 'निम्नं' गर्त्तं कुर्वन्ति। गत्वा वा 'यत्र' तृणगुल्मादौ उपतिष्ठन्ते, तत् 'निर्दहन्ति' निःसारं कुर्वन्ति। (ते[४]) देवाः 'एतम्' उदकलक्षणं वज्रम् 'उदयच्छन्' उक्तप्रकारप्रणयनात्मक मुद्यमनं तस्य कृतवन्त इत्यर्थः। 'तस्य' वज्रस्य सम्बन्धिनि 'अभये' तेन वज्रेण परिहृतभये[५], 'अनाष्टे' नाशयन्तीति नाष्ट्राण्यसुररक्षांसि, तद्रहिते, 'निवाते' तत्संसृष्टेन[६] वातेनापि रहिते, स्थाने। यथा देवाः कृतवन्तः, तथैवैषा मध्वर्युः ॥ १७ ॥

प्रणयनप्रकार माह— "ता उत्सिच्येति। चमसादिपात्रस्योपरि

१— पा० सू० ५. ४. १०३। २— 'प्रतिबबन्धुरित्यर्थः'—इति ठ।

३— तै० ब्रा० १. ७. १. ६. ७; ऋ० सं० ८. १४. १३ (अपाम्फेनेन)

४— नास्त्येतत् पदं ठ-पुस्तकादन्यत्र।

५— 'सम्बन्धिनाभयेन वज्रेण'—इति ज, झ, ञ, ट। 'सम्बन्धिनि "अभये" वज्रेण परिहितभये'—इति ड।

६— 'तत्संसृष्टेन'—इति ठ।

सिक्ता पूरयित्वा न पुनः (तेन पात्रेण[१]) कुतश्चिज्जलाशयादुद्धृत्य गार्हपत्यस्योत्तरभागे स्थापयेत्। आपस्तम्बस्तु स्थापितपात्रस्य समन्त्रकं पूरणं माह[२]; इह तु ब्राह्मणे पूरितस्य स्थापनम्। अतस्तथैवोक्तं कात्यायनेन—"गार्हपत्यमुत्तरेणोदपात्रं निधाय"-इति[३]।

अवश्यं प्राङ् नेतव्याना मपां[४] किं गार्हपत्यस्योत्तरदेशे स्थापनेनेत्याशङ्क्य तत्प्रयोजनकथनेन स्तौति—"योषा वा आप इति। अप्-शब्दस्य स्त्रीलिङ्गत्वात्। वृषेति, अग्निशब्दस्य पुल्लिङ्गत्वात्। "गृहपतिना संयुक्ते ञ्यः[५]"-इत्यग्निविशेषो गार्हपत्यः। तदावासं इह लक्षणया गार्हपत्य उच्यते। अत एव तस्य गृहत्वं मुक्तम्—"गृहा वै गार्हपत्यः"-इति[६]।

उदपात्रस्थापनं प्रयोजनान्तरेण स्तौति—"वज्रं वा इति। 'अप्रतिष्ठितः' असम्बद्धः। "नैन मिति। तं नेन मग्नकम्, अनुद्यन्तारं 'संगृह्णाति' हिनस्ति। "गृहिंसायाम्[७]", "घ्वादीनां ह्रस्वः[८]"। अतो हिंसापरिहाराय स्वयं सम्बद्ध एवोद्यच्छेत ॥ १८ ॥

उद्यन्तुः प्रतिष्ठा मुक्ता उद्यन्तव्यस्यापि प्रतिष्ठा माह—"स यदिति। "गृहा वै प्रतिष्ठेति। कोशे स्थापितस्यासेरिव[९] वातादिस्पर्शविरहात्तैक्ष्ण्यस्याविनाशो वज्रस्य प्रतिष्ठा।

१— ठ-पुस्तकादन्यत्र नैते पदे स्तः। २— श्रौ० सू० ४. १. ४।
३— श्रौ० सू० २. ३. १। एता एवापः प्रणीता उच्यन्ते।
४— 'निधाय"—इति 'अवश्यं प्राङ् नेतव्याः। अपां'—इति ज, झ, ञ, ट।
५— पा० सू० ४. ४. ९०। ६— ९९० ८ पं० द्रष्टव्यम्।
७— क्र्या० प०। ८— पा० सू० ७. ३. ८०।
९— 'स्थापितस्यासेरिव'—इति ज, झ, ञ, ट।

तीक्ष्णीभूतः स वज्रः स्वप्रयोक्तुरभिमतफलनिष्पादनात् तद्विरहदुःखात्मिकां हिंसा मस्य न करोतीत्याह— "तथो हेति। गार्हपत्योपस्थिष्टे तदुत्तरभागे। 'वटे गावः सुप्येरते'-इति-वदौपस्थेषिकाधिकरणे सप्तमी[1] ॥१९॥

सादितानां मपां प्रणयन माह— "ता इति। आहवनीयस्य सन्निहितोत्तरभागे 'प्रणयति' नीत्वा सादयति[2]। "एनबन्यतरस्यामदूरे पञ्चम्याः"-इत्यनेन एनप्[3]। "एनपा द्वितीया"-इति[4] षष्ठ्यर्थे द्वितीया। अपा मग्नेश्च मिथुनता मुपपादयति— "एव मिव हि मिथुनं कृत्स्न मिति ॥२०॥

ता नान्तरेणेति। अन्तरेणेतिवचनादग्नि मिति लभ्यते। तासा मपा मग्नेश्च मध्ये[5] न सञ्चरेयुरित्यर्थः। तत्र कारण माह— "नेदिति। नेदिति परिभये। "अथापि नेत्येष इदित्येतेन सम्प्रयुज्यते परिभये"-इति हि निरुक्तम्[6]। सञ्चारे हि सति मिथुन मन्तरेण परस्परं सङ्गतयोः स्त्रीपुंसयोर्मध्ये सञ्चारान्मिथुनविच्छेदलक्षणा भीतिः 'सञ्चरान्' सञ्चरेयुरिति। (हेतुहेतुमद्भावरूपे[7]) लिङर्थे[8]

१— पा० सू० १. ४. ४५। 'औपश्लेषिको वैषयिको ऽभिव्यापकश्चेत्याधारस्त्रिधा'-इति सि० कौ०।

२— "गार्हपत्यसभीपादाहवनीयसमीपं नीत्वा" का० २. ३. ३ वृ०।

३— पा० सू० ५. ३. ३५। ४— पा० सू० २. ३. ३१।

५— 'प्रणीताहवनीययोरन्तरालेन'-इति का०श्रौ०सू० २. ३. ४ वृ०।

६— नैघ० १. ३. ६। "सर्वतो भयं परिभयम्"-इति तदृत्तौ।

७— नास्त्येतत् पदं ठ-पुस्तके। ८— 'लिङर्थे'-इति ठ, ढ।

लेट्[१] झेरन्तादेशः[२], "इतश्च लोपः[३]"-इतीकारलोपे, संयोगान्त-लोपः[४], तस्यासिद्धत्वान्नलोपाभावः[५]।

साचादुत्तरभागे आहवनीयप्रणयनं विवक्षित मिति दर्शयितुं ततः प्राक्प्रत्यगासादनं[६] निषेधति— "ता नातिहृत्येति। 'अतिहृत्य' उत्तरभाग मतीत्य प्राग्भागे। 'अनाप्नाः' उत्तरभाग मप्राप्नाः, प्रत्य-गपि[७] नासादयेत्।

तदतिहरणपक्ष मनुवदति— "स यदिति।

तत्र दोषं वक्तु मुपोद्घात माह— "अस्ति वा इति। "व्यन् सपत्ने"-इति[८] स्मृतेः 'भ्रातव्यः' शत्रुः, तस्य भावो 'भ्रातव्यम्' (भ्रात-वम्[९]) युवादित्वाद्भावे अण्[१०], विग्रिष्टं भ्रातव्यम्। अग्नेरपां च पर-स्परविनाशकत्वात् महदस्ति वैर मित्यर्थः। अस्तु, किं तत इत्याह— "स यथेवेति। 'तत्' अग्निः सह महद्वैर मग्नेर्यथा 'भवति' स्वकार्य-निर्वापणरूप मुपद्रवं कर्त्तुं प्रभवति, तथा 'सः' अतिहरन् अध्वर्युः कुर्यादित्यर्थः।

१— पा० सू० ३. ३. १५६, पा० सू० ३. ४. ७।

२— पा० सू० ७. १. ३। 'सच्चाराग्निमुपलक्षणा भीतिः। सच्चाराग्न-सच्चरेयुरिति हेतुः। हेतुसद्भावरूपे लिङर्थे लेट्। आकारोऽन्ता-देशः'—इति ज, झ, ञ, ट, ड।

३— पा० सू० ३. ४. ९७। ४— पा० सू० ८. २. २३।

५— पा० सू० ८. २. १। ६— 'प्राक्प्रत्यग्भागासादनं'—इति ढ।

७— 'प्रत्यगेव'—इति ढ। ८— पा० सू० ४. १. १४५।

९— नास्त्येतत्पदं ड-ढ-पुस्तकयोः।

१०— 'द्वायनान्तयुवादिभ्योऽण्'—इति पा० सू० ५. १. १३०।

तथा अकरणे का हानिः ? तत्राह— "यत्रेति। 'यत्र' कर्मणि 'अस्य' प्रणयनपात्रस्य सम्बन्धिनोरप उपस्पृशन्ति ऋत्विग्यजमानाः। तत्रोपस्पर्शन मग्नौ 'भाव्यं' यत्तु मृदकलक्षणं 'वर्द्धयेत्' उत्तेजयेत्। अतिहरणस्य वैरकरणसम्बन्धार्थः प्रथमोऽनुवादः, चरमस्तु भाव्य-वर्द्धनसमर्थनार्थ इत्यपौनरुक्त्यम्।

अतिहरणपक्षे दोष उक्तः, अनाग्निपक्षे दोष माह— "यद्यु इति। स्वसमये अप्राप्तत्वात्[1] तासा मपां कामप्रापकत्वं दूरापास्त मित्यर्थः।

इत्थं (तम्[2]) उपोद्घात मुक्त्वा शौपोद्घातिक माह— "तस्मादिति। 'सम्प्रत्येवं' सम्यगुत्तरभाग एव, न पुरतो न पश्चात्। अत उक्तं कात्या-यनेन "उत्तरेणाहवनीयꣳ सम्प्रति निदधाति"-इति[3] ॥ २१ ॥

प्रणीताप्रणयनानन्तरं परिस्तरणं पात्रासादनं चाह— "अथ द्वाभ्यामित्यादि। 'द्वन्द्वं' द्वे द्वे। "द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु"-इति[4] निपातितम्। पात्रपदं यज्ञ-निर्वर्तकानां स्फ्यादीनाम् अप्युपलक्षकम्[5]।

अर्थतः प्राप्तां यज्ञा मनूद्य प्रशंसति— "तद्दशेति। तस्मिन् प्रयोगे एवं परिगणने कृते दश सम्पद्यन्ते। विराजश्छन्दसो[6] ऽक्षरेषु दशत्व मस्ति। प्रथमश्च यज्ञो ज्योतिष्टोमः। "एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः"-इतिश्रूतेः[7]। तच्च नवत्युत्तरशत-

---

१— 'स्वसमयप्राप्तत्वात्'-इति ज, झ, ञ, ट।

२— गास्येतत् पदं ड-ढ-पुस्तकयोः।

३— शौ०सू० २. ३. ३। ४— पा० सू० ८. १. १५।

५— 'अप्युपलक्षणम्'-इति ठ। ६— 'विराट्छन्दसो'-इति ड।

७— ता०ब्रा०१६. १। ऐ०ब्रा० ३. ४. ५। तै०सं० ७. ४. १०, ११।

सङ्ख्याकाः स्तोत्रियाः । तास्वेकोनविंशतिसङ्ख्या विभज्यमानासु दश लभ्यन्त इत्यस्ति तत्रापि दश सङ्ख्या । अतो दशसङ्ख्यायोगाद् विराड्यज्ञयोरेकत्वादिह दशसङ्ख्यासम्पत्त्या विराडात्मको यज्ञ एव साकल्येन सम्पादितो भवति ।

एवं दशत्वं स्तुत्वा द्विशः प्रयोग मनूद्य स्तौति— "अथ यदिति । 'संरभेते' "रभ राभस्ये", राभस्यं कार्योपक्रमः ; किमपि कार्यं कर्त्तुमुपक्रमेते ॥ २२ ॥ १ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये[1] प्रथमाध्याये
प्रथमं ब्राह्मणम्[2] ॥

१— 'माध्यन्दिनशतपथब्राह्मणे'–इति ञ, झ, ञ, ट, ड ।

२— व्रतोपायनादनन्तरं सपां प्रणयनम्। तत्प्रकृतिस्त्वेषा ।– अध्वर्युर्वारणं चमसं सव्यहस्ते कृत्वा दक्षिणाहस्तस्थेनोदपात्रेण स्वयं तस्मिन्नुदकं मासिच्य दक्षिणाहस्तेन चमसं गार्हपत्यस्योत्तरतो निधाय 'ब्रह्मन्नपः प्रणेष्यामि ?'–इति ब्रह्माणं पृच्छति । 'वाचं यच्छ'–इति यजमानं प्रेषयति । ब्रह्मा 'प्रणय यज्ञमित्यादि (२. २. ८.) उपांशु पठित्वा 'ओं प्रणय'–इत्युच्चै रनुज्ञां करोति, यथाध्वर्युः गृह्णोति । ततोऽध्वर्युश्चमसं गृहीत्वा आहवनीयादुत्तरस्यां दिशि वह्निर्वेदि दर्भेषु प्रणीताचमसं निदधाति । एतदेव प्रणीताप्रणयनं चोच्यते । प्रणीताप्रणयनादनन्तरं प्रागग्रैरुदगग्रैश्च दर्भैराहवनीयस्य परिस्तरणं भवति ; गार्हपत्यस्य तु प्रथमं पुरस्तादुदगग्रैः, ततो दक्षिणतः प्रागग्रैः, प्रश्चादुदगग्रैः, उत्तरतः प्रागग्रैर्दर्भैः परिस्तरणम् । ततः पात्रासादनम् । तत्र स्रूर्पादिपात्राणां समीपे स्थापनम् । तत्प्रकृतिस्त्वेवम् ।– अध्वर्युर्यजमानो वा द्वे द्वे पात्राणि गृहीत्वा विनियोगक्रमेण आहवनीये गार्हपत्ये वा यत्र हविः अपणं करिष्यन् भवति, तस्योत्तरतः पश्चाद्वा निदधाति । एतान्येव चत्वारि कर्माणीह प्रथमब्राह्मणे आम्नातानि ।

अथ ध्रुर्ण्यञ्चाग्निहोचहवणीञ्चादत्ते। कुर्म्माणे वां व्वेषाय वा मिति यज्ञो वै कुर्म्म यज्ञाय हि तस्मादाह कुर्म्माणे वा मिति व्वेषाय वा मिति व्वेवेष्टीव हि यज्ञम्* ॥ १ ॥

अथ व्वाचं यच्छति। वाग्वै यज्ञो ऽविक्षुब्धो यज्ञं तनवा ऽइत्यथ प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो निष्टप्तꣳ रक्षो निष्टप्ता अरातय इति वा ॥ २ ॥

देवा ह वै यज्ञं तन्वानाः। ते ऽसुररक्षसेभ्य आसङ्गाद् बिभयाञ्चक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतो ऽपहन्ति† ॥ ३ ॥

अथ प्रैति। उर्व्वन्तरिक्ष मन्वेमीत्यन्तरिक्षं वा ऽअनु रक्षश्चरत्यमूलु मुभयतः परिच्छिन्नं यथायं पुरुषो ऽमूलु उभयतः परिच्छिन्नो ऽन्तरिक्ष मनुचरति तद् ब्रह्मणैवैतदन्तरिक्ष मुभय मनाष्ट्रं कुरुते ॥ ४ ॥

स वा ऽअनस एवु गृह्णीयात्। अनो ह वा ऽअग्रे पशवेव वा ऽइदं युच्छालꣳ स युदेवाग्रे तत्करवाणीति तस्मादनस एवु गृह्णीयात् ॥ ५ ॥

भूमा वा ऽअनः। भूमा हि वा ऽअनस्तस्माद्यदा

---

* 'यज्ञम्'–इति ग, च। † 'रक्षाꣳस्यपहन्ति'–इति क।

बहु भवत्यनोवाह्य मभूदित्याहुस्तद् भूमान मेवैतद्-
पैति तस्मादनस एव गृह्णीयात् ॥ ६ ॥

यज्ञो वा ऽअनः। यज्ञो हि वा ऽअनस्तस्मादनस
एव युजूꣳषि सन्ति नु कौष्ठस्य नु कुम्भ्यै भस्त्रायै ह
स्मर्षयो गृह्णन्ति तद्दृषीन् प्रति भस्त्रायै युजूꣳष्यासुस्ता-
न्येतर्हि प्राकृतानि यज्ञाद्यज्ञं निर्मिमा* ऽइति तस्मा-
दनस एव गृह्णीयात् ॥ ७ ॥

उतो पाय्यै गृह्णन्ति†। अनन्तराय सु तर्हि युजूꣳषि
जपेत् स्फ्य सु तर्ह्यधस्तादुपोह्य‡ गृह्णीयादुतो युन-
जाम ततो व्विमुञ्चामेति युतो ह्येव युञ्जन्ति ततो
व्विमुञ्चति ॥ ८ ॥

तस्य वा ऽएतस्यानसः। अग्निरेव धूरग्निर्हि वै धूरथ
यु ऽएनद्दहन्त्यग्निदग्ध मिवैषां व्वहं भवत्युथ युञ्जघुनेन
कस्तम्भीं प्रऽउगं व्वेदिरेवास्य सा नीड् एव हवि-
र्द्धानम् ॥ ९ ॥

स धुर मभिमृशति। धूरसि धूर्व धूर्वन्तं धूर्व तं
यो ऽस्मान् धूर्वति तं धूर्व यं व्वयं धूर्वाम इत्यग्निर्वा

---

* 'निर्मिमा'–इति क, भाष्यसम्मतञ्च। † 'गृह्णन्ति'–इति ख।
‡ 'तर्ह्यवस्तादुपोह्य'–इति ङ। 'तर्ह्यवस्तदुपोह्य'–इति च।

ऽएष धुर्य*स्तु मेतदत्येषुन् भवति हविर्ग्रहीष्यंस्तस्मा ऽएवैतान् निह्नुते तथो हैत मेषो ऽतियुन्त मग्निर्धुर्यो नु हिनस्ति ॥ १० ॥

तद्व स्मैतदारुणिराह । अर्द्धमासशो वा ऽअहुः सपत्नान् धूर्वामीत्येतद्व स्म स तदुभ्याह ॥ ११ ॥

अथ जघनेन कस्तम्भौ मीषा मभिमृश्य जपति । देवाना मसि व्यहितमः सस्नितमं प्रप्रितमं जुष्टतमं देवहूतमम् । अहुत मसि हविर्द्धानं दृꣳहस्व मा ह्वारित्युन एवैतदुपस्तौत्युपस्तुताद्रातुमनसो‡ हविर्गृह्णानीति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतद्धृला माशास्ते ॥ १२ ॥

अथाक्रमते । विष्णुस्त्वा क्रमता मिति यज्ञो वै विष्णुः सु देवेभ्य इमां व्यक्रान्तिं व्यचक्रमे यैषा मियं व्यक्रान्तिरिदु मेव प्रथमेन पदेन पस्पाराथेदु मन्तरिक्षं 'द्वितीयेन दिव मुत्तमेनैनाꣳवैष एतस्मै विष्णुर्यज्ञो व्यक्रान्तिं व्यक्रमते ॥ १३ ॥

अथ प्रेक्षते । उरु व्यातायेति प्राणो वै व्यातस्तद् ब्रह्मणैवैतत्प्राणाय व्यातायोरुगायु कुरुते ॥ १४ ॥

---

* 'धुर्य'–इति ख । † 'हविर्ग्रहीष्यं'–इति क ।

‡ 'द्वातुमनसो'–इति सायणसम्मतोऽपि न क्वापि मूलपुस्तके दृश्यते ।

अथापास्यति*। अपहतꣳ रक्ष इति यद्यु किञ्चि-दापन्नं भवति युद्यु नाभ्येव मृग्नेत् तन्नाष्ट्रा ऽएवैत-द्रक्षाꣳस्यतो ऽपहन्ति† ॥ १५ ॥

अथाभिपद्यते। युच्छन्तां पच्येति पुञ्च वा ऽइमा अङ्गुलयः पाङ्क्तो वै यज्ञस्तुद्यज्ञ मेवैतदुच दधाति‡ ॥ १६ ॥

अथ गृह्णाति। देवस्य त्वा सवितुः प्रसुवे ऽश्विनो-र्बाहुभ्यां पूष्णो हस्ताभ्या मग्नये जुष्टं गृह्णामीति सविता वै देवानां प्रसविता तत्सवितृप्रसृत एवैतद् गृह्णात्य-श्विनोर्बाहुभ्या मित्यश्विनावध्वर्यु पूष्णो हस्ताभ्या मिति पूषा भागदुघो ऽशनं पाणिभ्या मुपनिधाता सत्यं देवा अनृतं मनुष्यास्तत्सत्येनैवैतद् गृह्णाति§ ॥ १७ ॥

अथ देवताया ऽआदिशति। सर्वा ह वै देवता अध्वर्युꣳ हविर्ग्रहीष्यन्त मुपतिष्ठन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति ताभ्य एवैतत् सह॥ सतीभ्यो** ऽसमदं करोति ॥ १८ ॥

युद्देव देवताया ऽआदिशति। यावतीभ्यो ह वै देवताभ्यो हवीꣳषि गृह्यन्त ऽऋणु मु हैव तास्तेन

---

* 'ति'–इति ख। † 'न्ति–'इति ख। ‡ 'ति'–इति ख।
§ 'ति'–इति क। ¶ 'ग्र'–इति ग।
॥ नास्त्येतत् पदं क-ख-पुस्तकयोः। ** एतदपि पदं ख-पुस्तके नास्ति।

मन्यन्ते युदस्मै तं कामꣳ समर्द्धयेयुर्यत्काम्या गृह्णाति तस्माद्दै देवताया ऽआदिशत्येव मेव यथापूर्वꣳ हवीꣳषि गृहीत्वा* ॥ १९ ॥

अथाभिमृशति । भूताय त्वा नारातय ऽइति तद्युत एव गृह्णाति तदेवैतत्पुनरुप्याययति ॥ २० ॥

अथ प्राङ् प्रेक्षते । स्वरभिविख्येष मिति परिवृत मिव वा ऽएतदनो भवति तदस्यैतच्चक्षुः पाशुगृहीत मिव भवति यज्ञो वै स्वरुर्हविर्वाः सूर्य्यस्तत्स्वरुरेवैतदुतो ऽभिविपश्यति ॥ २१ ॥

अथावरोहति । दुꣳहन्तां दुर्याः पृथिव्या मिति गृहा वै दुर्यास्ते हैत† ईश्वरो गृहा युजमानस्य यो ऽस्यैषो ऽध्वर्युर्यज्ञेन चरति तं प्रयन्त मनु प्रच्योतोस्त-स्येश्वरः कुलं विक्षोब्धो‡स्तानेवैतदस्यां पृथिव्यां दृꣳहति तथा नानुप्रच्यवन्ते§ तथा न विक्षोभन्ते तस्मादाह दुꣳहन्तां दुर्याः पृथिव्या मित्यथ प्रैत्युर्व्वन्तरिक्ष मुन्वे-मीति सो ऽसावेव बन्धुः ॥ २२ ॥

स यस्य गार्हपत्ये हवीꣳषि अपुयन्ति । गार्हपत्ये तस्य पाचाणि सुꣳसादयन्ति जघनेनो तर्हि गार्हपत्यꣳ

---

* 'त्वा'–इति ख, च । † 'हैत'–इति च, भाष्यसम्मतञ्च ।

‡ 'विक्षुब्धो'–इति ख । § 'प्रच्यवते'–इति ख ।

सादयेद्युस्याहवनीये हवींꣳषि अपुयन्त्याहवनीये तस्य पाचाणि सꣳसादयन्ति जघनेनो तूर्ह्याहवनीयꣳ सादयेत् पृथिव्यास्त्वा नाभौ सादयामीति मुध्यं वै नाभिर्मुध्य मुभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामी*त्युदित्या ऽउपस्थ ऽइत्युपस्थ ऽइवैनदभार्षुरिति वा ऽआहुर्यत्सुगुप्तं गोपायन्ति तस्मादाहादित्या ऽउपस्थ इत्यग्ने हव्यꣳ रक्षेति तदग्नये चैवैतद्धविः परिदृदाति गुप्त्या ऽअस्यै च पृथिव्यै तस्मादाहाग्ने हव्यꣳ रक्षेति ॥ २३ ॥ २ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा द्वितीयं)

ब्राह्मणम् ॥ १ । २ ॥

पाचासादनानन्तरं कर्त्तव्य माह—"अथ शूर्प मिति । एतत्सादानं हविर्निर्वापार्थम्[१] । वामिति[२] मन्त्रगतद्विवचनलिङ्गात् उभे सह आदीयेते । अत एव सूत्रे—"शूर्पाग्निहोत्रहवणादाय"-इति[३] । इतरेतरयोग-द्वन्द्वः ।

यज्ञो वा इत्यादि । यज्ञाय हि तदादानम् ; अतः कर्मशब्दः कर्ममात्रपरोऽपि तद्विशेषं यज्ञ मेव ब्रूते । इज्यते अनेनेति 'यज्ञः' हविः ; तदिह निर्वापकाले व्रीहिरूपम् । तदग्निहोत्रहवणा

---

* 'मी'—इति ख । १— "अथ हविरावपति"—इतीहैव ४. ८ ।

२— वा० सं० १. १. ५ । ३— का० श्रौ० सू० २. ३. १० ।

शूर्पे निर्वपन्[१] 'वेवेष्टीव' परिवेषणं करोतीव। यथाऽन्यं दर्व्या भोजनपात्रे। अतो वेषाय वा मित्युक्तम्[२]। वेवेष्टीत्यत्र परिरूपोपसर्गो लुप्तो निर्दिष्टः। "विषु व्याप्तौ"[३]। "निजां त्रयाणां गुणः स्नौ[४]"—इत्यभ्यासस्य गुणः।

अथ शूर्प मित्यादि। अथ-शब्दादनुष्ठेयपदार्थपौर्वापर्यलक्षणं क्रम माहुः। अतस्तद्विशिष्टाः पदार्था विधीयन्ते। ननु चैव चेदनुष्ठेयलक्षणः क्रमः, स च सर्वेषु पदार्थेष्वेक एव, नैकैकपदार्थग इति, तद्विशेषणतया तद्विधिभिः कथं विधातुं शक्यते? तर्हि सङ्घातविशेषणतया तद्विधानेनैव विधीयता मिति चेत्, न; सङ्घातस्याविधेयत्वात्; तस्य चैकत्वेन नियमेनानेकपदार्थाश्रितस्य क्रमस्यासम्भवात्। नैष दोषः। यथा संयोगादय एकैकवस्तुन्यपर्यवसिता[५] अपि वस्त्वन्तर मपेक्ष्यैकत्रापि पर्यवस्यन्तः[६] तद्विशेषणतया तद्विधिभिर्विधीयन्ते, तद्वत् क्रमोऽपि किं न विधीयते[७]। न च शब्देनानभिधानादविधान मिति[८] मन्तव्यम्; प्राकृतोपकार[९]वदनभिहितस्यापि वैतत्यलक्षणक्रमस्यार्थाद्[१०] बुद्धावुपस्थितस्य विधि-

---

१— 'निर्वपति'—इति ड। २— वा० सं० १. ६. ५।
३— जु० उ०। ४— पा० सू० ७. ४. ७५।
५— 'एकैकवस्तुपर्यवसिता'—इति ड। 'संयोगो द्विष्ठः'—इत्यादि ल०म०।
६— 'मपेक्ष्यैकत्रापर्यवस्यन्तः'—इति ड। ७— 'विधीयेत'—इति ड।
८— 'शब्देनानभिधान मिति'—इति ड।
९— 'प्रकृतौ एकार०'—इति ञ, ञ; 'प्रकृतौ प्रकार०'—इति ड।
१०— 'चैतदुपलक्षणक्रमस्यार्थाद्'—इति ड।

सम्भवात्। न चावश्यं वैतत्यलक्षण एव क्रमः; अस्ति ह्यसावानुपूर्व्यलक्षणोऽपि। तथाच, यथा "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीति[1] क्त्वा-प्रत्ययेनाभिहितः पौर्वापर्य्यलक्षणः क्रम एवार्थविशेषणतया विधीयते, एव मत्र अथ-शब्दैरभिहितो विधीयत इति किं सुपपन्नम्? तदुक्तं जैमिनिना—"श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात्"-इति[2] ॥ १ ॥

वाग्वै यज्ञ इति। यच्छति-पदसन्निधानान्नियम्यमानैवेह वाग् विवक्षिता; तस्याश्च यज्ञसाधनत्वाद्। यज्ञसाधनता सुपपादयति—"अविक्षुब्ध इति। वाङ्नियमे हि चित्तविक्षोभ[3]हेतोर्वाग्व्यवहारस्याभावात् तदैकाग्र्ये सत्यविकलो यज्ञो यतः सम्पद्यते। क्षुभेरदान्तोपदेशत्वे ऽयागमानुशासनस्यानित्यत्वादिड्भावः[4] (क्षुभ्नादीनामिति[5] ज्ञापकात्)[6]। क्षुब्धेति[7] निपातितम्।

(शूर्पाग्निहोत्रहवणीश्च प्रतपति[8]—) "अथ प्रतपतीति। शूर्पमग्निहोत्रहवणीं चेत्यनुषङ्गात् तदुभय मित्यर्थः। "निष्टप्ता अरातय इति वा"-इति। ब्रीह्यनुष्ठानपक्षे यववाक्यस्य, (१) प्राप्तप्रामाण्यत्यागः, (२) अप्राप्ताप्रामाण्यस्वीकारः, (३) पुनर्यवानुष्ठाने स्वीकृताप्रामाण्यस्य त्यागः, (४) त्यक्तप्रामाण्यस्वीकारश्चेति चत्वारो

१— इहैवोपरिष्टात् दीक्षाप्रकरणं द्रष्टव्यम् (१२ का० १ प्र०)।
२— मी० सू० ५. १. १।
३— 'चित्तविक्षिप्त'—इति ञ, झ, ञ, ट, ठ; चित्तविक्षेप'—इति ड।
४— "आगमशास्त्र मनित्यम्"—इति प०पो० ९५ (८.४.१६. म०भा०)।
५— पा० सू० ७. २. १८। ६— नास्त्येष पाठः ठ-पुस्तके।
७— 'क्षुब्ध इति'—इति ठ। ८— नास्त्येतद्वाक्यं ठ-पुस्तकादन्यत्र।

दोषाः। इत्थं व्रीहिवाक्येऽपि चत्वार इत्यष्टौ दोषा[१] यद्यपि, तथापि गत्यभावाद्विकल्प इत्युक्तं भट्टाचार्यैः[२]—

"एव मेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते"—इति[३]।

इह पुनर्वाग्ग्रहणेनाधस्तादप्यनुष्ठितेन मन्त्रद्वयपाठिकत्वस्य[४] श्रुत्यैवाभिधानान्नैकोऽपि दोषः। एतदर्थ मेव च "एकार्थास्तु विकल्पेरन्"—इति[५] व्रीहियववदेव न्यायप्राप्तस्यापि विकल्पस्य, वेति स्वग्रहणेनोपादानम् ॥ २ ॥

मन्त्रकरणकतायै साध्यस्य निरासस्योपयोगसिद्धये निरसनीयानां प्रसक्तिं माह— "देवा ह वा इति। 'असुररक्षसेभ्यः'—इति षष्ठ्यर्थे चतुर्थी[६]। तेषाम् 'आसङ्गात्' संसर्गाद्गीताः। बिभेतेर्लिटि

१— 'इत्यसौ दोषः'—इति ज, झ, ञ, ट, ठ,।

२— मीमांसायां भट्टमतपोषकाचार्यैरित्यर्थः। मी०भ० १२ अ० ३ पा०।

३— विकल्पो द्विविधः— व्यवस्थित ऐच्छिकश्चेति। तत्रेच्छाविकल्पे भट्टमते अष्टौ दोषा भवन्ति। तद्यथा— "प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना। प्रत्युच्चीवनहानिभ्यां प्रत्येक मष्टदोषता"—इति। "व्रीहिभिर्यजेतेति वाक्यात् व्रीहयो नियम्यन्ते; एवं यवैर्यजेतेतिवाक्यात् यवा अपि नियम्यन्ते; तयो रेकार्थत्वाद् विकल्पः"—इत्यादि मी०प०।

४— "प्रतपनं प्रत्युष्टं निष्टप्त मिति वा"—इति का०श्रौ०सू० २. ३. ११। मन्त्रौ तु तौ वा० सं० १. ७. १, २।

५— मी० सू० १२. ३. १०। अस्मन्मते तु "मन्त्राणां सन्निपातित्वादेकार्थानां विकल्पः स्यात्"—इति (२९) सूत्रस्यैवायं विषयः स्यात्।

६— पा० सू० २. ३. ६२. वा० १।

"भीर्ह्रीर्भवताम्[१]"—इत्याम् प्रत्ययः, शुभावश्च । नाशयन्तीति 'नाड्याः' आसुर्यः प्रजाः, ताश्च रक्षांसि च 'तत्' तेन तपनेन[२] । अतो 'यज्ञमुखात्' यज्ञप्रारम्भाद् अपहन्ति । 'एतत्'—इति क्रियाविशेषणम् ॥ ३ ॥

अथ प्रेतीति । शूर्पप्रतपनानन्तरम् उर्विति[३] मन्त्रेण हविर्निर्वापार्थं प्रकटसमीपं 'प्रेति' प्रगच्छेत् । मन्त्रप्रयोजनमाह—"अन्तरिक्षं वा इति । यथा वृक्षो मूलैः पृथिवीं मनुप्रविष्टस्तिष्ठत्येव, न गच्छति; यथा व्याघ्रादिरभितः पाशाभ्यां बध्वा म्रियमाणः[४]; नैवं पुरुषो मूलवान्; नाप्युभयतः केनचित् संसर्गिणा प्रतिबद्धः, किन्तु 'परिच्छिन्नः' प्रतिबन्धकासंसृष्टः सन् अन्तरिक्षे विश्रम्भं[५] चरति । तथैव निर्वप्यमाणहविरादानार्थं रज्जोऽप्युक्तविशेषणविशिष्टं सत्त्वं[६] निर्वप्यमाणं पुरुष मनुगच्छेत् । अतस्तदेतत्पुरुषेण गम्यमान मन्तरिक्षप्रदेशं[७] 'अह्नया' उर्वित्यनेनैव मन्त्रेण[८] 'अनाड्' हिंसाकररहितम्[९], अत एवाभयं कुरुते । 'उरु' विस्तीर्णं प्रतिबन्धकरज्जोर्लक्षणमूर्त्तद्रव्यविरहादिति हि मन्त्रार्थः ॥ ४ ॥

अनस एव (न शालायाः[१०]) सकाशाद्ग्रहणे, कारणमाह—"अनो ह वा इति । अन एव हि प्रथमं धान्यस्याधिकरणम् ।

१— पा० सू० ३. १. ३९ । २— 'यज्ञेन'—इति ड ।
३— वा० सं० १. ७. ३ । ४— 'म्रियमाणः'—इति ञ, ञ्, ञ, ट, ढ ।
५— विस्रम्भं'—इति ठ, ड । ६— 'सत् तं'—इति ठ, ड ।
७— 'मन्तरिक्षं'—इति ढ । ८— वा० सू० १. ७. ३ ।
९— 'हिंसकरहितम्'—इति ठ । १०—नाड्येष पाठो ढ-पुस्तकादन्यत्र ।

अनसः सकाशान्नीयमानं धान्यं 'पश्चेव' पश्चादेव। किं तत्? यत् 'ग्राखं' एतत्[१] ग्राखागतं भवति। "पश्चपश्चा च छन्दसि"-इति[२] निपातितम्। ग्राखाशब्दाच्छान्दसत्वेन छस्य विकल्पितत्वादण्। यत् 'अग्रे' गृहप्रवेशात् प्राक्, अनसि स्थितम्। अत एव गृहिणा माग्रया[३] अनुपहतं तदेव यज्ञसाधनं करवाणीति योग्यत्वे[४] हेतुः। तस्मादनस एव सकाशात् सोऽध्वर्युर्गृह्णीयान्न ग्राखातः ॥ ५ ॥

अथानसोऽप्यग्रे खलादानीयमानं मूतस्थ मेव किं न निरूप्यते? इत्यत आह— "भूमा वा इति। मूतस्थं ह्येवाल्पम्[५], ततो निरूप्यमाणं हविः हिंसितभिक्षावद्देवा न गृह्णीयुः। अपि स्मर्यते हि—

"आत्मानं पीड़यित्वा तु भिक्षां यः सम्प्रयच्छति।
सा भिक्षा हिंसिता ज्ञेया न सा ग्राह्या कदाचन"-इति ॥

बहोर्भावः 'भूमा'[६]। भवितरि भावोपचारः अतिप्रयार्थः; मूर्त्तिभूतं ब्रह्मण मेवायं पुनातीतिवद्। अतो बहुतरं भूमा अन इत्यर्थः। तस्यार्थं लोकप्रसिद्धिं माह— "भूमा ह्येति। प्रसिद्धिं लोकव्यवहारेण साधयति— 'अनोवाह्यम्' अनसा वोढु मर्हं तदित्यादि। तदेतदनस्थं हविरुपयच्छन् भूयिष्ठ मेवोपैति। अतो हिंसित-भिक्षा निराकृता ॥ ६ ॥

१— 'एतत (B. यतते A. C. !!)'-इति ढ।

२— पा० सू० ५. ३. ३३। ३— 'माग्रय'-इति ढ।

४— 'योऽय मनसो ग्रहणे'-इति ड।

५— मूतम्=बद्धम्, मूतस्थम्=बद्धावस्थम्। अम० को० २. १. ६५।

६— पा० सू० ६. ४. १५८।

अनस एव ग्रहणे हेत्वन्तर माह— "यज्ञो वा इति। यज्ञ-साधनत्वादनसि साधनस्तुत्यै यज्ञत्वोपचारः। इज्यते अनेनेति करणे एव वा नङ् प्रत्ययः[१]। वै-शब्दस्तस्य विधिश्रुतिसिद्धं यज्ञसाधनत्वं स्तोतुं स्मारयति।

न केवलं श्रुतिसिद्धं तस्य तत्साधनत्वम्, अपि तु प्रत्यक्षादि-प्रमाणैरपि तस्य साधनत्वं सिद्ध मित्याह— "यज्ञो ह्येति।

अनसोऽसाधारणे हेत्वन्तर माह— "तस्मादिति। यस्मादनस एव ग्रहणम्, तस्माद्ग्रहणमन्त्राः "धूरस्य ऊत मसि हविर्द्धान मित्यादयः[२] अनोऽवयवलिङ्गा दृश्यन्ते; न पुनः कोष्ठगतस्य कुम्भी-गतस्य वा धान्यस्य। कुम्भी-शब्दस्तन्निष्ठं धान्यं लक्षयति, "मञ्चाः क्रोशन्तीतिवत्[३]। लुप्तनिर्दिष्टा षष्ठी।

ऋषिमत माह—"भस्त्राया इति। षष्ठ्यर्थे चतुर्थी[४]।

तस्मिन् पक्षे भस्त्रायाः के मन्त्रा इत्याह— "तदृषीनिति। उक्त्यर्थे। तदा तु तान्येव यजूंषि भस्त्रायाः[५] प्रतिपादकानि स्युरि-त्यर्थः। अनःपक्षे हे अनः! यत् त्वं 'धूरसि' त्व मुद्भूत मतुलं हविर्द्धान मसीति। भस्त्रापक्षे[६] तु हे भस्त्रे! इत्येव विशेषः[७]।

१— पा० सू० ३. ३. ९०। २— वा० सं० १. ८. १, २; ९. १।

३— "तात्स्थ्यात् तथैव ताद्धर्म्यात् तत्सामीप्यात् तथैव च। तत्साहचर्यात् तादर्थ्याज् ज्ञेया वै लक्षणा बुधैः"—इत्यादि ल० म०।

४— पा०सू० २. ३. ६२. वा० १। ५— 'यज्ञभस्त्रायाः'—इति ज, ट।

६— भस्त्रा चर्मनिर्मितं पात्रम्, तदेवेह पात्रीत्युच्यते।

७— एतच्च पक्षद्वयं का० औ० सू० २. ३. ३८ द्रष्टव्यम्।

मन्त्रदारिद्र्य इव कस्मात्तान्येव ! अन्यानि चेत्, भस्त्राया: के मन्त्रा इत्यत आह[१]—"तान्येतर्हीति । तैरेव यजुर्भिर्ग्रहणे[२] यानि यजूंषि प्रकृतावनस्थासन्, तान्येवैवं सति विकृतौ भस्त्राया मपि[३] स्यु: ।

तथात्वस्यापि किं फल मिति चेत् तत्राह— "यज्ञादिति । यज्ञसाधन मन आश्रित्य सकृत्प्रयुज्य तत इद मुत्तरैव[४] यज्ञं भस्त्रादिकं 'निर्ममे' अनुतिष्ठानि इत्येव मनुष्ठातुराख्याय इत्यर्थ: ।

ननु प्रकृतावेव पश्चान्तरं भस्त्रा यथा यव:[५], तत् किं मुच्यते प्राकृतानीति । सत्यम्! प्राकृत मुपदिश्यमानं यथा प्रथमं वैकृतन्यतिदेशाच्चरमं प्रतीयते, एवं स्वशब्देनाभिधानात्प्रथमप्रतिपत्तेरेव प्राकृत मुच्यते; तत्संचितापूर्वसाधनत्वात्तु पश्चात्प्रतीतेर्भस्त्राविकृतिवद्विकृति: ; अतो भस्त्राया मपि यववदुपदेशादेव धर्मसम्बन्धो नातिदेशात् । व्रीहीनवहन्तीति अपूर्वं व्रीहय: प्रकृतिद्रव्य मवहन्तीति यथा, तथानेन पदेनापि भस्त्राविपरिग्रह इति ॥ ७ ॥

पात्रीतो ग्रहणे धर्मविशेष माह— "उतो पात्र्यै इति । 'उतो' अपि तु यदि पात्र्या[६] गृह्येत[७], तदा धूरीषाद्यभावेन तदुप-

---

१— 'अन्यानि कानि चित् भस्त्राया: किं न विधीयन्त इत्यत आह—' —इति ठ । २— 'एतर्ह्यपि तैरेव यजुर्भिर्ग्रहणम्'—इति ठ ।

३— 'विहितभस्त्राया'—इति ठ, 'तान्येव भस्त्राया मपि'— इति ढ ।

४— 'सकृत्सकृत्प्रयुज्यत इद मुत्तरैव'—इति ज, 'सकृत्प्रयुज्यत इदमुत्तरैव'—इति झ, 'सकृत्प्रयुज्य तदनुत्तरैव'—इति ढ ।

५— 'भस्त्रात्तु यथा यव:'—इति ज, झ, ञ, ट ; 'भस्त्रा न तु विकृतौ यथा यवा:'—इति ठ । ६— 'पात्र्यां'—इति ज, झ ।

७— "(पात्र्यै) पञ्चम्यर्थे चतुर्थी । पात्र्या:"—इति का०सू०व्ह० (२.३.२८.) ।

स्थानविरहादननुष्ठानलक्षतं[१] व्यवधान मन्तराय मन्तरेण[२] तत्प्रकाशक-यजूंषि "धूरसि"-"देवानामसि"-इत्यादीनि[३] जपेत् ।

तत्रैव धर्मान्तर माह— "स्फ्य मु तर्हीति । तस्मिन् पाचीपत्ने तस्या अधस्तात् स्फ्य मुपनिधाय[४] गृह्णीयात् । यदाह कात्यायनः— "पात्र्यां वा स्फ्योपहितायां धुरीधारोहणानि पाचीविले जपतीति[५]। अनसो ग्रहणे[६] स्फ्योपहितपाचीतो ग्रहणे ऽतिशयितं प्रयोजन माह— "यतो युनजामेति । योऽयं[७] स्फ्य माश्रित्य 'युनजाम' यन्नेन योगं प्राप्तम्, ततस्तस्मिन्नेव स्फ्ये 'वियुञ्जाम'-इति वियोग मपि करवाम। योगवियोगसामानाधिकरण्यसिद्धिः । स्फ्योपहितपाचीतो ग्रहणपत्ने अनःपत्ताद्तिशय इत्यर्थः ।

अथ मताभिप्रायः।— अनसो निर्वापपत्ने हि जुहूपभृतौ शकटस्य धुरोर्निदध्यात् । पाचीतः पुनर्निर्वापे तदाधारभूते स्फ्ये तयो-र्निधानं विमोकः। तदुक्तं कात्यायनेन— "घृताची ऽइति[८] धुरि निदधात्यनसि चेद्ग्रहणम्"-"स्फ्ये पात्र्यां चेत्"-इति[९]। तथा अपां

१— 'तदनुष्ठानविरहादनुष्ठानलक्षतं'-इति ठ ।

२— "अनन्तरायम्" (३६१० ८पं०) = अविच्छेदम् (का०श्रौ०२.३.२६.)।

३— वा० सं० १. ८. १, २; २, ६. १ । का० तै० २. ३. १३, १४ ।

४— "स्फ्यो नाम बाहुमात्रः खड्गाकारः काष्ठविशेषः"-इति तै० सं० १. ६. ८. २. सा० भा० । "स्फ्योऽस्याकृतिः"—इति का० श्रौ० सू० १. ३. ३६ । "खादिरः स्फ्यः"—इति चैवैव ३. ६. २. १२ ।

५— श्रौ० सू० २. ३. २८, २६ । ६— "ग्रहणादपि"—इति ङ ।

७— 'योऽयं'—इति ज, झ, ञ, ट; 'यमेव'—इति ठ; 'योगं'—इति ङ ।

८— वा० सं० २. १६. १ । ९— श्रौ० सू० ३. ६. १६, २० ।

प्रणयनं च स्फ्येन सहेत्युक्त मापस्तम्बेन— "स्फ्येनोपसङ्गृह्याविविक्षन् हरति"-इति[1]। एवञ्च स्फ्येनैव योगः, स्फ्य एव वियोगात्मको विमोकोऽपीति पाचीतो ग्रहणे योगवियोगयोः सामानाधिकरण्य-लाभोऽतिशय इति।

अथ तयोर्वैयधिकरण्यात् सामानाधिकरण्योक्तोऽतिशय इत्या-शङ्क्य लोकप्रसिद्धानुसरण मतिशय इत्याह— "यतो ह्येवेति। सार्व-विभक्तिकस्तसिः[2]। यत्रैव योगः, तत्रैव वियोगो न्याय्यः; न हि कर्ण युक्तः, कण्ठ्यां विमुच्यत इत्यर्थः॥ ८॥

अथ धुरः समन्त्रक मभिमर्शनं विधास्यंस्तदुपोद्घातत्वेन देवता-रूपतां[3] तस्याः प्रतिपादयति— "तस्येत्यादिना।

"अग्निरेव धूरिति यद्धुरोऽग्न्यात्मकत्वं प्रतिज्ञातम्, तस्योप-पादनम्— "अग्निर्ह वा इत्यादि। अनसो या धूर्वलीवर्दवहनस्थानं[4], तस्याग्न्यात्मकत्व मन्वयव्यतिरेकाभ्यां लोकप्रसिद्ध मिति 'हि'-शब्दार्थः।

ता मेव प्रसिद्धिं दर्शयति— "अथ य एनदिति। 'एनद्' धुराख्यम्, अनसो योगे खलु बलीवर्दा वहन्ति, एषां 'वहं' वहन-साधनं स्कन्धरूप मङ्ग मग्निदग्ध मिव दृश्यते; अतो नूनं 'धूर्' वोढव्या धूः अग्न्यात्मिकेत्यवसीयत इत्यर्थः।

१— श्रौ० सू० १. १६. ८। २— पा० सू० ५. ३. १४।

३— 'देवतासूयतां'-इति ङ; 'देवतासूयतां'-इति ढ।

४— "युगस्य प्रान्तौ धूःशब्देनोच्यते, यावनडुत्स्कन्धयोरुपरि निधीयेते"-इति का० श्रौ० २. ३. १३ सू० ६०।

प्रकटाग्निर्वापस्य[१] प्राग्रख्यातिग्रथं द्योतयितुं तस्मिन् वेदिहवि-र्द्धानयोः सम्पत्ति माह— "अथ यज्ञघनेनेति। प्रकटस्याधःपतनं वारयितु मौषादण्डप्रोक्षणार्थो[२] मेथी 'कस्त्वो'। ईषादयं यत्र संस्पृष्टं, ततः प्रत्यङ्भागः, तयोरीषयोर्मध्यदेशः 'प्रउगम्'[३]; तस्य पश्चाद् विस्तृतम्, पुरस्ताद्वशीयः। 'वेदिः' अपि तथाविधा;— "चिंशत्पदानि पश्चात्तिरश्ची भवति, षट्चिंशत् प्राची, चतुर्विंशतिः[४] पुरस्तात् तिरश्ची"-इति[५] श्रुतेः। अतस्तात्पार्श्व्यात्प्रउगस्य वेदिलक्षपदेशः। "नीड़ एवेति। धान्यनिधानाय परिश्रितप्रदेशो 'नीड़:'[६]; हविर्द्धानमपि परिश्रितम्[७]; परिश्रयणसाम्यात् नीड़स्य हविर्द्धानत्वम् ॥ ८ ॥

औपोद्घातिकं समाप्यक मभिमर्शनं विधत्ते— "स धुर मिति।

अस्याभिमर्शनस्य प्रयोजन माह— "अग्निर्वा इति। युगस्य धुरि भवोऽग्निः 'धुर्यः'। "भवेच्छन्दसि"-इति[८] यत्। हविर्ग्रहणाय प्रकटस्य 'परिश्रितप्रदेशं' पश्चाद्भागं यास्यन्, 'तं' धुर्यं पौरस्त्यम्[९] अग्निं मतिक्रमिष्यन् भवति। तदतिक्रमे च स क्रुध्येत्[१०]। तस्य प्रसादनाय 'एतद्' "धूरसीति[११] मन्त्रोच्चारणेन 'तस्मै' एवाग्नये 'निह्नुते' अप-

---

१— 'प्रकटनिर्वापस्य'—इति ड, ढ। २— का०औ०सू० ८. ४. ५. ह०।
३— "प्रउगं प्राग्युग मौषान्तरम्"—इति का०औ०सू० ७. ६. ५. ह०।
४— 'चतुर्विंशतिं'—इति आदिषु। ५— तै० सं० ६. २. ५. ८।
६— "प्रकटस्योपस्थरूपः पश्चाद्भागः"—इति का०औ०सू० ७. ६. ६ ह०।
७— का० औ० सू० ८. ३. २१ ह०। ८— पा० सू० ४. ३. ११०।
९— 'धौरेयम्'—इति ज, झ, ञ, ट; "धौरेयम्"—इति ठ।
१०— 'सङ्क्रुध्येत्'—इति ठ। ११— वा० सं० १. ६. १।

नयति; अतिक्रमजनितं स्वापराधं प्रशमय्य[1] प्रसादयति। "क्रुङ् अपनयने" धातुः (अदा० आ०)। "स्वाध्वक्रुङ्स्वाग्रपाम्"-इति[2] तच्छब्दाच्चतुर्थी। यस्मास्माकं हिंसिता, योऽस्मभ्यमभिहिंस्यः, 'तं' द्विविधं ग्रचु मेव 'धूर्व' हिंस्याः। योऽस्मानिति हि मन्त्रार्थः। तथा सत्येवं प्रार्थितोऽग्निरतिक्रामन्त मप्यध्वर्युं न बाधत इत्यर्थः॥ १०॥

तन्मन्त्रोच्चारणेन ग्रचुहिंसनं महर्षिव्यवहारेण संवादयति— "तद्धेति। 'तत्' तत्राभिमर्शनविषये 'एतदाहणिराह स्म'। एतच्छब्दपरामृष्टं दर्शयति— "अर्द्धमासस्य इति। मासस्यार्द्धं अर्द्धमासः। "अर्द्धं नपुंसकम्"-इत्येकवद्भावः[3]। अर्द्धमासे ऽर्द्धमासे; पौर्णमास्यां दर्शे च। "सङ्ख्यैकवचनाच्च वीप्सायाम्"-इति[4] शस् प्रत्ययः। 'एतत् ह स्म'-इति ऋषेरभिप्रायकथनम्। 'एतत्' इति, धूरसीत्यभिमर्शनमित्यर्थः॥ ११॥

अथ समन्त्रक मौषाभिमर्शनं[5] विधत्ते— "अथ जघनेनेति। 'कस्तम्बौ' व्याख्यातौ[6]। "अन एवेति। यद्यप्ययं मन्त्र ईषाभिमर्शने जप्यः, तथाप्यवयविस्तुत्या अवयवोऽपि स्तुतो भवति इत्यभिप्रेत्यैतन्मन्त्रवाक्यं वोढृतमत्वादिगुणकथनेन अन एवोपस्तौति[7]। अभिवष्टऽषा-परित्यागेन तदवयवि प्रकटं स्तुवतोऽभिप्राय माह— "उप-

---

१— 'प्रशंस्य'-इति ज, झ, ञ, ट, ढ। २— पा० सू० १. ४. ३४।
३— पा० सू० २. २. २। ४— पा० सू० ५. ४. ४१।
५— प्रकटस्य दीर्घं काष्ठ मौषा, तदग्रस्य भूमिस्पर्शो मा भूदिति तदाधारत्वेन स्थापितं काष्ठ मुपस्तम्भनम्, तस्य पश्चाद्भागे ता मौषां स्पृशेदित्यर्थः। ६— पू०पृ० ३४ं० द्रष्टव्या।
७— वा० सं० १. ६. २ मन्त्रः। का० श्रौ० सू० २. ३. १७।

स्तुतादित्यादिना। 'भ्रातं'[१] दृप्तम्। देवानां दृप्तिजनने पर्याप्त मित्यर्थः। "भ्रै दृप्तौ"-इति भौवादिको धातुः। "अक्नला माग्नास्ते"-इति। 'यन्नपतिर्मा क्नार्षीत्' कुटिलगतिर्मा भवलिति मन्त्रवाक्ये प्रतिपादनात् क्नरणनिषेध[२] एव 'अक्नला'-शब्दार्थः[३]॥ १२॥

शकटस्यारोहणं विधत्ते— "अथाक्रमत इति। हे शकट! त्वां विष्णुरेवाक्रमताम्, नाहं मिति मन्त्रार्थः[४]। विष्णोरेवाक्रमणं किमिति प्रार्थते? इति चेत्, तत्राह— "यज्ञो वा इत्यादि। विष्णोर्यज्ञस्य च व्यापनसामान्यात् तादात्म्यव्यपदेशः। 'एषां' देवाना मर्थे या 'इयं' वैष्णवी विक्रान्तिः, इमा मिति पूर्वत्राम्नयः। का पुनरिय मिति तां दर्शयति— "इद मेवेत्यादिना। वैविक्रमसमये 'इद मेव' परिदृश्यमानं पृथिव्याख्यं स्थानं प्रथमेन पादनिधानेन आक्रममाणः 'पस्पार' पालयामास[५]। "स्पृ प्रीतिपालनयोः"-इति[६] धातुः। निगदव्याख्यातं मन्यत्॥ १३॥

पुरोडाशीयानां श्रोत्रियाणां समन्त्रक मवेक्षणं[७] विधत्ते— "अथ प्रेक्षत इति। "प्राणो वा इति। "वायुः प्राणो भूत्वा नासिके प्राविशत्"-इति[८] श्रुतेः प्राणवातयोरेकत्वम्। 'तत्' तथा सति

१— सर्वेष्वेव मूलपुस्तकेषु 'श्रातं' इत्येव पाठः। "श्रा दाने" जु० प०, "श्रै शब्दे" भू० प०। २— "क्नरनिषेध"-इति डातिरिक्तेषु।

३— "क्नल क्नल चलने" भू० प०।

४— वा० सं० १. ९. ३ मन्त्रो द्रष्टव्यः। का० श्रौ० सू० २. ३. १५।

५— पुनरिहोपरिष्टात् ९. ३. ९. द्रष्टव्यम्। ६— खा० प०।

७— मन्त्रस्तु वा० सं० १. ९. ४। का० श्रौ० सू० २. ३. १६।

८— ऐ० आ० १. ४. २. ४।

'ब्रह्मणा' मन्त्रेणैव प्राणात्मकाय 'वाताय' एतत् 'उद्गायम्' उद्भवनं कीर्त्तनम्[1] कुरुतेत्यर्थः ॥ १४ ॥

यद्यचेति । 'अच' पुरोडाश्नीयेषु व्रीहिषु यदि किञ्चित् तृणादिकम् 'आपन्नं' छिन्नं भवेत्, तत् "अपहतम्"-इति[2] मन्त्रेण निरस्येदित्यर्थः । यदि तु तच्च तृणादिकं न भवेत्, तदा पुरोडाश्नीयं व्रीहिसमूहमेवानेन मन्त्रेण अभिमृशेदित्यर्थः ॥ १५ ॥

हविर्ग्रहणाय समन्त्रकं[3] स्पर्शनं विधत्ते— "अथाभिपद्यत इति । 'अभिपद्यते' आलभते, स्पृशति । हविर्ग्रहीतुं बध्नन्तु पञ्चाङ्गुलय इत्यर्थः । मन्त्रगतपञ्चशब्दार्थं माह— "पाङ्क्तो वा इति । "पञ्चपदा पङ्क्तिः[4]"; यज्ञोऽपि धानाकरम्भादिपञ्चहविष्क इति पञ्चसङ्ख्यायोगसाम्यात् 'पाङ्क्तः' । तथाच तैत्तिरीयकम्— "धानाः करम्भः परिवापः पुरोडाशः पयस्या, तेन पङ्क्तिराप्यते; तद्यज्ञस्य पाङ्क्तत्वम्"-इति[5] । 'तत्' तथा सति 'एतत्' एतेन पञ्चशब्दोपेतमन्त्रोच्चारणेन 'अच' अस्मिन् प्रकटे 'पाङ्क्तं' यज्ञ मेव धारयतीत्यर्थः ॥ १६ ॥

१— 'उद्भवनकीर्त्तनम्'—इति ठ-पुस्तकादन्यत्र ।

२— वा० सं० १. ६. ५ । का० श्रौ० सू० २. ३. १७, १८ ।

३— वा० सं० १. ६. ६ । का० श्रौ० सू० २. ३. १६ ।

४— ऐ० ब्रा० ६. ४. ४ । पि० छ० सू० ५, ६ ख०. १२ सूत्राणि । पञ्च पदानि परिमाणं मस्येत्यर्थे पा० सू० ५. १. ५६ ।

५— सं० ६. ५. ११. ८ । "भ्रष्टा यवा धानाः, आज्यसंयुक्ताः सक्तवः करम्भः, व्रीहिजन्या लाजाः परिवापाः, पिष्टविकारः पुरोडाशः, क्षीरविकारः पयस्या"—इति तै० सं० १. ४. २८ सा० भा० ।

अथ समन्त्रकं[1] हविर्ग्रहणं विधत्ते— "अथ गृह्णातीति। अनुष्ठेयहविर्ग्रहणानुगुणं मन्त्रस्य दर्शयति— "सविता वा इत्यादिना। 'देवानां' मध्ये 'सविता' खलु प्रसविता, स्वस्वव्यापारेषु सर्वस्य लोकस्य प्रेरयिता; "सूते प्रेरयतीति सविता"-इति[2] तन्नामव्युत्पत्तेः। 'अश्विनावध्वर्यू'-इति। पुरा खलु देवकर्तृके यज्ञे अश्विनावध्वर्यू अभूताम्, अतस्तयोरेव बाहुभ्यां हविर्ग्रहीष्यामीति अस्यार्थस्य प्रदिपादको मन्त्रभागो युक्त इत्यर्थः। 'पूषा भागदुघः'-इति। भागं दोग्धीति 'भागदुघः' भागप्रद इत्यर्थः। "दुहः कब् घश्च"-इति[3] कब्घत्वे। तादृशः पूषा पाणितलाभ्यां सर्वस्य जनस्य 'अन्नं' भोज्य मन्नम् 'उपनिधाता' उपनिधातु मुपस्थापयितुं शीलवान्; ताच्छीलिकस्तृन्[4]। "न लोकाव्ययनिष्ठेति[5] कर्मणि षष्ठ्याः प्रतिषेधः। तथाच पूष-देवताया हस्ताभ्यां हविर्ग्रहणं युक्ततर मिति भावः। इतोऽप्यश्विनोर्बाहुभ्या मित्यादिकं युक्त मित्याह— "सत्यं देवा इति। 'देवाः' इति यत्, तत् 'सत्यम्'; अमरणत्वेन विनाशाभावात्। मनुष्यास्तु तद्विपरीत्यादनृतरूपाः। तस्मादश्विनोर्बाहुभ्या मित्यादिमन्त्रभागोच्चारणात् देवतारूपेण 'सत्येनैव' तद्धविर्ग्रहणं कृतं भवतीत्यर्थः॥ १७॥

१— वा० सं० १. १०. १। का० श्रौ० सू० २. ३. २०।
२— निघ० ५. ४. २० इत्यम्। निरु० ७. ७. ९।
३— पा० सू० ३. २. ७०। ४— पा० सू० ३. २. १३५।
५— पा० सू० २. ३. ६९।

"अग्नये जुष्टम्"-इति[1] देवतादेशनस्यावश्यकर्त्तव्यतां प्रतिपादयति—"सर्वा ह वा इत्यादिना। स्वस्वनामग्रहणसम्भावनयोपस्थितानां मध्ये कस्याश्चिदन्यादिदेवताया आदेशने सति सह वर्त्तमानाः। 'ताभ्यः' षष्ठ्यर्थे चतुर्थी[2]। तासां देवतानाम् 'अक्षमदम्' अकलहं परस्पर मविरोधं करोति ॥ १८ ॥

प्रकारान्तरेणापि देवतादेशनस्य कर्त्तव्यतां प्रतिपादयति—"यावतीभ्य इति। यत्परिणामविशिष्टेभ्य इत्यर्थः। "ऋण मु हैवेति। स्वस्वनामोद्देशेन गृहीतं हविः ऋण मेव 'ताः' सर्वा देवता मन्यन्ते। कुत इद मवगतम्? इति चेत्, उच्यते— 'यत्काम्या' यस्य फलस्येच्छया हविर्गृह्यति, 'तं कामं' काम्यमानं फलविशेषम् 'अस्मै' यजमानाय 'यद्' यस्मात् समर्द्धयेयुः, तेन कारणेन हविषः ऋण-रूपत्व मवगत मित्यर्थः। यत्काम्येति यच्छब्दादिच्छार्थे "काम्यच्च"-इति[3] काम्यच्, तदन्तात् अकारप्रत्यये[4] तृतीयाया लुक्[5]। "तस्मा-दिति। 'तस्मात्' हविषि देवताना मृणत्वाभिमानात्। फलप्रदानेन तत्प्रत्यर्पणार्थं तत्र देवतानाम अवश्य मादेष्टव्य मित्यर्थः।

अग्नीषोमीयादिहविरन्तरेऽपि उक्त मतिदिशति—"एव मे-वेति। 'एव मेव' आग्नेयवदेव 'यथापूर्वं' यथाक्रमम्, अग्नीषोमीया-दीनि 'हवींषि' गृह्णीयादित्यर्थः। अतएव मन्त्रकाण्डे आग्नेयहवि-

---

१— वा० सं० १. १०. २। का० श्रौ० सू० २. ३. २१।
२— पा० सू० २. ३. ६२. वा० १। ३— पा० सू० ३. १. ९।
४— पा० सू० ३. ३. १०२। ५— पा० सू० ७. १. ३९।

र्गृहणमन्त्रानन्तरम् "अग्नीषोमाभ्यां जुष्टं गृह्णामि"-इति[१] ग्रहण-मन्त्रशेष आम्नातः। कात्यायनोऽप्यसूत्रयत्— "एव मग्नीषोमीयं यथादेवत मन्यत्"-इति[२] ॥ १९ ॥

निरूप्तशेषस्य समन्त्रक[३] मभिमर्शनं विधत्ते— "अथेति। "तद्यत एवेति। 'तत्' तच्च प्रकटे 'यत एव' यस्मादेव स्थानाद् गृह्णाति, 'तदेव' तत् स्थान मेव अनेन मन्त्रेण पुनः 'आप्याययति' वर्द्धयति। 'भूताय' प्रभूताय सम्पद्धर्थं त्वा मभिमृशामि, 'अरातये' अदानाय असम्पद्धये नाभिमृशामि, इत्यस्यार्थस्य मन्त्रेण प्रतिपादनात्। सूचितं हि— "भूताय त्वेति शेषाभिमर्शनम्"-इति[४] ॥ २० ॥

अथ समन्त्रकं[५] प्रागवेक्षणं विधत्ते— "अथ प्राङिति। "परि-वृत मिव वेत्यादि। परिवेष्टित मेव खल्वनो भवति, धान्य-निधानार्थम्; तन्मध्ये अवस्थितस्याध्वर्योश्चक्षुः 'पाशगृहीत मिव' काचकामलादिदोषदूषितमिव द्रष्टुं न समर्थं भवति; तच्च सह-कारिण आलोकस्याभावात्। कथं तस्य दर्शनोपायः? इति, तदु-च्यते— अवेक्षणमन्त्रगत-स्वरितिशब्देन स्वर्गवाचिना तत्साधनभूतो यज्ञो ऽभिधीयते; अहरादीनि च तेन लक्षणया प्रतिपाद्यन्ते। अत एव 'स्वर्'-शब्दस्य[६] सूर्यनामत्व मुक्तं यास्केन— "स्वरादित्यो भवति। सु अरणः, सु ईरणः"-इति[७]। 'तत्' तथा सति एतन्मन्त्र-

---

१— वा० सं० १. १०. ३। २— श्रौ० सू० २. ३. २१, २२।
३— वा० सं० १. ११. १। ४— का० श्रौ० २. ३. २३।
५— वा० सं० १. ११. २। का० श्रौ० सू० २. ३. २४।
६— 'स्वः-शब्दस्य'-इति आदिषु। ७—निरु० २. ४. २ द्रष्टव्यम्।

करणकेन प्रेषणेन खर्-शब्दप्रतिपादितं[1] यज्ञादिचतुष्टय मर्थजातं प्राच्यां दिशि प्रथमत उपलभ्यमानम् 'अतः' अस्माच्छकटस्थानात् 'अभिविपश्यति' अवलोकयति ॥ २१ ॥

अथ समन्त्रकं[2] शकटादवरोहणं विधत्ते— "अथावरोहतीति। "ते वैत इत्यादि। 'अस्य' यजमानस्य, य एषः अध्वर्युः 'यज्ञेन चरति' हविर्ग्रहणादिकं यज्ञसाधन मनुतिष्ठति, तं 'प्रयन्तं' शकटस्थानात् प्रगच्छन्तम् 'अनु'-सृत्य यजमानस्य 'ते' ग्रहाः 'इतः' अस्माद्लोकात् 'प्रच्योतोरीश्वराः' प्रच्युतिं प्राप्तुं[3] समर्थाः। तथा 'तस्य' यजमानस्य कुलं 'विचोभ्योः' विचोभयितुं समर्थाः। "ईश्वरे तोसुन्-कसुनौ"-इति[4] त्यवतेः चुभेश्च तोसुन् प्रत्ययः। अनेन मन्त्रेण अवरोहन्नध्वर्युः 'तानेव' यजमानस्य ग्रहान् 'अस्यां' पृथिव्यां 'बृंहति' दृढ़ीकरोति। "बृह बृहि वृद्धौ"-इति[5] धातुः। एवं सत्युक्तदोषनिवृत्ति माह— "तयेति।

निरूप्तेन हविषा सहाग्निसमीपगमनं विधत्ते— "अथ प्रेतीति। "उर्विति मन्त्रस्य प्रागाम्नातं ब्राह्मणम्[6] अचातिदिशति[7]— "सोऽसाविति। "अन्तरिक्षं वा अनु रक्षस्यरति"-इत्यादिको यो वाक्यशेषः, 'सोऽसावेव' अचाम्नातस्यापि तस्य मन्त्रस्य 'बन्धुः' अनुकूलः, अतोऽत्राप्यनुषक्त्य योजनीय इत्यर्थः ॥ २२ ॥

१— 'खः-शब्दप्रतिपादितं'—इति ट।

२— वा० सं० १. ११. ३। का० श्रौ० सू० ७. ३. २५।

३— 'प्रच्यावयितुं'—इति ट। ४— पा० सू० ३. ४. १३।

५— भा० प०। ६— पुरस्तात् ३५, ४४ पृ० ११, ५ प० द्रष्टव्यम्।

७— का० श्रौ० सू० २. ३. २६। वा० सं० १. ११. ४।

आहवनस्थ हविषः सादनं विधत्ते— "स यस्येत्यादिना। गार्हपत्ये आहवनीये वा यस्मिन्नग्नौ श्रपणम्, तस्य पश्चात् 'पात्रासादनं' निरूपणस्य हविषः सादनं च कर्त्तव्य मित्यर्थः।

सादनमन्त्रगत-'नाभि'-शब्दस्याभिप्रेत मर्थं माह— "मध्यं वा इति। मनुष्यादिशरीरेषु नाभेर्मध्यदेशेऽवस्थानात् पृथिव्या नाभिरिति मध्य मेवोच्यते। तच्च मध्यम् 'अभयम्' भयरहितम्; प्रान्तदेशे हि चौरव्याघ्रादिभयम्। अतः पृथिव्याः सम्बन्धिनि राक्षसादिभयरहिते स्थाने त्वां सादयामीति मन्त्रभागस्यार्थः। "अदित्या उपस्थे"-इति मन्त्रस्य द्वितीयभागं व्याचष्टे— "उपस्थ इवेति। 'यद्' वस्तु 'सुगुप्तं' सुष्ठु रक्षितं यथा भवति तथा 'गोपायन्ति' रक्षन्ति; एतत् 'उपस्थ इव' उत्सङ्ग इव, उदरमध्य इव वा, 'अभार्षुः' भृतवन्त इति खलु वदन्ति लौकिकाः। अतश्च यस्मिन् स्थाने सादितं हविः सुगुप्तं भवति, तत् स्थान मुपस्थशब्देन मन्त्रगतेन विवक्षितम्। अभार्षुरिति "भृञ् भरणे"-इत्यस्मात्[१] लुङि सिचि वृद्धिः[२]। 'गोपायन्ति'-इति "गुपूधूपविच्छि"-इति[३] आय्-प्रत्ययः। अन्तिमं भाग माचष्टे— "अग्ने हव्य मिति। "इयं वा अदितिः"-इति[४] श्रुतेः अदितिर्हि पृथिवी; तस्यास्याधिपतिरग्निः[५]; स चाच गार्हपत्यरूप आहव-

---

१— वा० सं० १. ११. ५। का० औ० सू० २. ३. २७।

२— भा० उ०। ३— पा० सू० ७. २. १।

४— पा० सू० ३.१.२८। ५— ऐ० ब्रा० ३.६.७। तै० सं० ३.२. ४.७।

६— "पतिः पृथिव्याः"-इति वा० सं० ३. १२। निरु० ७. २. १; ३. १।

नीयरूपो वा ; तस्मै च 'अग्नये', तेनाधिष्ठिताय 'पृथिव्यै' च रक्षणार्थम्, 'एतद्धविः' अनेन मन्त्रभागेन दत्तं भवतीत्यर्थः ॥ २३ ॥ १ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये प्रथमाध्याये
द्वितीयं ब्राह्मणम्[1] ॥

१— पात्रासादनानन्तरं हविष्यसहित मनो गार्हपत्यस्य पश्चात् प्राङीषमवस्थापयेत् । अनः शकटम् ; तच्च युगयोक्त्रसंयुक्तं वरत्रापरिवेष्टितं च स्थाप्यम् । ततोऽध्वर्युः शूर्पाग्निहोत्रहवण्यावादत्ते । तत आरभ्य हविरावपनपर्यन्तं हविष्कृदाह्वानपर्यन्तं वा अध्वर्योर्वाग्यमनम् । ततः शूर्पाग्निहोत्रहवण्योर्गार्हपत्ये प्रतपनम् । तत उदकस्पर्शनम् । ततः शकटं प्रति गमनम् । तत्समीपे उपवेशनम् । तस्य धुरभिमर्शनम् । ततस्तत्र स्थित एवोपस्तम्भनस्य पश्चात् उत्तरा मौषा मासाभ्य मन्त्रजपः । ततः शकटस्य पश्चान्मार्गेण दक्षिणतो गत्वा दक्षिणचक्रस्योपरि आरोहति । आरुह्य व्रीहियवादीन् प्रेक्षते । ततस्तत्यटशनिरसनम् । हविरालभनम् । ततोऽपां स्पर्शनम् । पुनरपि हविरालभनम् । ततः सव्यहस्ते शूर्पं निधाय तस्योपरि उत्ताना मग्निहोत्रहवणीं निधाय प्राङासीनो मुष्ट्या हविःप्रक्षेपः । तत्र मन्त्रेण त्रिर्ग्रहणं, तूष्णीं चतुर्थम् । गृहीतं च तत् शूर्पस्य दक्षिणपार्श्वे संस्थाप्य, अपरपार्श्वेऽग्नियोमीयहविर्ग्रहणं च तथैव । शकटे यदवशिष्टं हविस्तदपि पृथक् ग्रहणीयम् । ततस्तत्रैवानस्युपविष्टः प्राचो मिक्षते । ततः शकटादवरोहणम्, गार्हपत्योत्तरस्यां गमनम् । ततस्तच्छूर्पं सहविष्कं अपराग्नेः पश्चात् सादयति । अपरा-शब्देनात्र यस्मिन्नग्नौ हविरपरां क्रियते, गार्हपत्यो वा आहवनीयो वा सोऽभिधीयते । तदेवत् सर्वं मिश्रं द्वितीयब्राह्मणे द्रष्टव्यम् ॥

पवित्रे करोति । पवित्रे स्थो वैष्णव्याविति यज्ञो वै विष्णुर्यज्ञिये स्थ इत्येवैतदाह ॥ १ ॥

ते वै हे भवतः । अयं वै पवित्रं यो ऽयं पवते सो ऽय मेक इवैव पवते सो ऽयं पुरुषे ऽन्तः प्रविष्टः प्राङ् च प्रत्यङ् च ताविमौ प्राणोदानौ तदेतस्यैवानुमाचां तस्माद् हे भवतः* ॥ २ ॥

अथो ऽअपि त्रीणि स्युः । व्यानो हि तृतीयो हे त्वेव† भवतस्ताभ्या मेताः प्रोक्षणीरुन्मृज्य ताभिः प्रोक्षति तद्यदेताभ्या मुत्पुनाति ॥ ३ ॥

व्रश्चो ह वा ऽइदꣳ सर्वं वृत्वा शिश्ये। यदिद मन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं वृत्वा शिश्ये तस्माद् वृचो नाम ॥ ४ ॥

त मिन्द्रो जघान। सु हतः पूतिः सर्वत एवापो ऽभिप्रसुस्राव सर्वत इव ह्ययꣳ समुद्रस्तस्माद् हैका आपो बीभत्साञ्चक्रिरे ता उपर्युपर्यूतिपुप्रुविरे‡ इतु हमे दर्भास्ता हैता अनापूयिता आपो§ ऽस्ति वा ऽइतरासु सुꣳसृष्ट मिव यदेना व्रश्चः पूतिरभिप्रास्रवत् तदेवासा मेताभ्यां पवित्राभ्या मुपहन्त्युथ मेध्याभिरेवाद्भिः प्रोक्षति तस्माद्वा ऽएताभ्या मुत्पुनाति ॥ ५ ॥

---

* 'भवतः'—इति ख ।
† 'त्वेव'—इति च ।
‡ 'पुप्लुविरे'—इति क, सायणसम्मतञ्च ।
§ 'अपो'—इति क, म ।

स उत्पुनाति। सवितुर्वः प्रसव ऽउत्पुनाम्युच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति सविता वै देवानां प्रसविता तत्सवितुप्रसूत एवैतदुत्पुनात्युच्छिद्रेण पवित्रेणेति यो वा ऽअयं पवत ऽएषो ऽच्छिद्रं पवित्र मेतेनैतदाह सूर्य्यस्य रश्मिभिरित्येते वा ऽउत्पवितारो यत सूर्य्यस्य रश्मयस्तस्मादाह सूर्य्यस्य रश्मिभिरिति ॥ ६ ॥

ताः सव्ये पाणौ कृत्वा। दक्षिणेनोदिङ्गयत्युपस्तौत्येवैना एतन्महयत्येव देवीरापो ऽअग्रेगुवो ऽअग्रेपुव इति देव्यो ह्यापस्तस्मादाह देवीराप इत्यग्रेगुव इति ता यत्समुद्रं गच्छन्ति तेनाग्रेगुवो ऽग्रेपुव इति ता यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुवो ऽग्र* ऽइमं मधु यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुव मिति साधु यज्ञꣳ साधु यजमान मित्येवैतदाह ॥ ७ ॥

युष्मा† ऽइन्द्रो ऽवृणीत वृत्रतुर्य ऽइति। एता उ ह्वीन्द्रो ऽवृणीत वृत्रेण स्पृद्धमान एताभिर्ह्येन मुहंस्तस्मादाह युष्मा‡ ऽइन्द्रो ऽवृणीत वृत्रतुर्य ऽइति ॥ ८ ॥

यूय मिन्द्र मवृणीध्वं वृत्रतुर्य ऽइति। एता उ ह्वीन्द्र मवृणत वृत्रेण स्पृद्धमान मेताभिर्ह्येन मुहंस्तस्मादाह यूय मिन्द्र मवृणीध्वं वृत्रतुर्य ऽइति ॥ ९ ॥

---

* 'तेनाग्रेगुवो ऽग्रेपुवो ऽग्र'–इति ग। †, ‡ 'युष्माꣳ'–इति क, ङ।

प्रोक्षिता स्थेति। तदेताभ्यो निह्नुते ऽथ हविः प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्य मेवैतत्करोति ॥ १० ॥

स प्रोक्षति। अग्नये त्वा जुष्टं प्रोक्षामीति तद् यस्यै देवतायै हविर्भवति तस्यै मेध्यं करोत्येव मेव यथापूर्वꣳ हवीꣳषि प्रोक्ष्य* ॥ ११ ॥

अथ यज्ञपात्राणि प्रोक्षति। दैव्याय कर्म्मणे शुन्धध्वं देवयज्यायाऽइति दैव्याय हि कर्मणे शुन्धति देवयज्यायै यद्वो ऽशुद्धाः पराजघ्नुरिदं व्वस्तुच्छुन्धामीति तद्यदेवैषा मचाशुद्धस्तुक्षा वान्यो वामेध्यः कश्चित्पराहन्ति तदेवैषा मेतदद्भिर्म्मेध्यं करोति तस्मादाह यद्वो ऽशुद्धाः पराजघ्नुरिदं व्वस्तुच्छुन्धामीति ॥ १२ ॥ ३ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा तृतीयं)
ब्राह्मणम् ॥ १ । ३ ॥

पवित्रकरणमन्त्रगतस्य[१] वैष्णव्याविति[२] पदस्य तात्पर्यं माह— "यज्ञो वा इति। वेवेष्टि व्याप्नोतीति व्युत्पत्त्या[३] यज्ञ एव विष्णुः[४]।

---

* 'प्रोक्ष्य'–इति ख, च। १— वा० सं० १. १२. १।
२— 'व्यत्ययो बहुलमिति (पा० सू० ३. १. ८५.) स्त्रीत्वम्"–इति महीο।
३— निरु० १२. १. ७। निघ० ३. १७. १२।
४— "विष्णुर्वै यज्ञः"–इति तै० सं० २. १. ८. ३। ऐ० ब्रा० १. ३. ४।

तथाच मन्त्रगतस्य वैष्णव्याविति शब्दस्य, हे दर्भनाड्यौ! युवां यज्ञ-सम्बन्धिन्यावेव भवथ इत्यय मर्थः प्रतिपादितो भवतीत्यर्थः ॥ १ ॥

सङ्ख्यान्तरं वारयितुं पवित्रयोर्द्वित्वं विधत्ते— "ते वा इति। तदेतदुपपादयति— "अयं वा इति। 'यः' पवमानो वायुः, अय मेव 'पवित्रं' पवनसाधनम्, शुद्धिहेतुः। "पुवः संज्ञायाम्"-इति[1] करणे ष्ट्रन-प्रत्ययः। "पन्थानञ्च विशुञ्जन्ति सोमसूर्यांशुमारुतैः"-इत्यादिस्मृतेः[2] वायोः शुद्धिहेतुत्वम्।

"एक इवैवेति। 'सः' च वाह्ये वर्त्तमानो वायुः, एकरूप एव वाति; 'सः' एव पुरुषशरीरानुप्रविष्टः सन् वृत्तिभेदेन 'प्राङ् च प्रत्यङ् च चरति'। इडापिङ्गलादिनाड़ीद्वारा वहिर्निर्गच्छन् प्राणः प्राङित्युच्यते, तयैव द्वारा पुनरन्तः प्रविशन् प्रत्यङिति; तावेतौ वृत्तिभेदौ 'प्राणोदानौ'-इत्युच्येते। तच प्राङ् सञ्चरन् प्राणः, 'उद्' ऊर्द्ध्वदेशात् आनयति[3] अन्तः प्रवेशानुगुणं[4] चेष्टत इति 'उदानः'। तस्य 'च'-शब्देन प्रत्यङ्मुखो ऽपानो विवक्षितः, मनुष्यान्तिहेतुरुदानवृत्तिरिति; तस्या ऊर्द्ध्वमुखत्वेन प्रत्यङ्मुक्त्वमानुपपत्तेः[5]। अत एव तैत्तिरीयके समानप्रकरणे पवित्रयोः प्राणापान-रूपत्व माम्नायते— "प्राणापानौ पवित्रे यजमान एव प्राणापानौ दधाति"-इति। एवं द्विधा भिन्नस्यैतस्यैव वाय्वाख्यस्य पवित्रस्य[6] 'मात्रां' परिमाणम्, 'अनु'-सृत्य, तत्पवित्रयोर्द्वित्वम् ॥ २ ॥

१— पा० सू० ३. ३. १८५।
२— वि० सं० २३. ४०।
३— 'अनिति'-इति ठ, ड।
४— 'प्रवेशानुगुणं'-इति ठ, ड।
५— 'प्रत्यक्त्वानुपपत्तेः'-इति ठ, ड।
६— तै० सं० २. १. १०. २।

द्वित्वपक्ष मभ्युपन्यस्यति— "अथो ऽपि"-इति। पक्षान्तरद्योतकः 'अथोऽपि'-शब्दः।

तत्रोपपत्तिर्व्यानो द्वौति। मुख्यपवित्रस्य वायोः प्राणोदानवद् व्यानाख्यो वृत्तिभेदः तृतीयो 'द्वि' यस्माद् विद्यते[१], तस्मात् पवित्र-द्वित्व मप्युक्त मित्यर्थः।

द्वित्वपक्ष मेव निगमयति— "द्वे त्वेवेति। "अथ यः प्राणापानयोः सन्धिः, स व्यानः"-इतिश्रुतेः[२] व्यानस्य सन्धिरूपतया तदुभयानतिरिक्तत्वाद् द्वित्वपक्ष एव श्रेयानित्यर्थः। कात्यायनस्तु पक्षद्वय मपि सूचयामास— "कुशौ समा वप्रशीर्णाग्रा वनन्तर्गर्भौ कुशेच्छिनत्ति पवित्रे स्थ इति, त्रीन् वा"-इति[३]।

अथोत्पवनं विधत्ते— "ताभ्या मिति। प्रोक्षत्याभिरिति 'प्रोक्षणीः' आपः। करणे ल्युट्[४]। 'ताभिः प्रोक्षति'-इत्युत्पवनस्य प्रयोजनकथनम्; न तु प्रोक्षणविधिः। यस्मादुत्पूताभिरद्भिः प्रोक्षणं कर्त्तव्यम्, तस्मात् पवित्राभ्यां ताभा मुत्पवनं कार्य मित्यर्थः।

तदेतदुत्पवनं स्तौतु मनुवदति— "तद्यदिति ॥ ३ ॥

उत्पवन-निवर्त्त्यां मशुद्धिं दर्शयितु मितिहास मुदाहरति— "वृत्रो हेति। 'वृत्वा श्रिष्ये'-इति, आवृत्य शयनं कृतवान्। शीङोऽ[५] लिटि "एरनेकाच"-इति[६] यण्। 'द्यावापृथिवी'-इति, द्यौश्च

१— "स वा अयं प्राणस्त्रेधा विहितः प्राणो ऽपानो व्यान इति"-इति ऐ० ब्रा० २. ४. ५।
२— छा० उप० १. ३. ३।
३— श्रौ० सू० २. ३. १२।
४— पा० सू० ३. ३. ११७।
५— अदा० आ०।
६— पा० सू० ६. ४. ८२।

पृथिवी च द्यावापृथिव्यौ[१]। "अन्तरान्तरेण"-इति[२] द्वितीया। द्यावापृथिव्योर्मध्ये इत्यर्थः। वरणाद् वृत्र इति नाम[३]। निर्वक्ति— "स यदिति ॥ ४ ॥

स वृत इत्यादि। पूतिर्दुर्गन्धः। सर्वत एवापोऽभिलक्ष्य प्रस्तुतोऽभूत्। अत एव खल्वयमपि समुद्रः, सर्वतः सर्वं मारयत्यं वर्त्तते। 'तस्माद्' दुर्गन्धात् स्रुताद् वृत्रादिमा आपो 'बीभत्साञ्चक्रिरे' जुगुप्सन्ते स्म। "मान्बधदान्शान्भ्यः"-इति[४] बधेर्वैरूप्ये सन् प्रत्ययः। बीभत्समानाः 'ताः' आपः तत्संस्पर्शं परिहर्तुं सुपर्युपरि वर्त्तमानाः 'अति पुप्लुविरे'[५] अत्राग्रय मतिक्रम्य तीरदेशं प्राप्ता आसन्। "प्लुङ् गतौ"-इति[६] धातुः। स्रुताश्च 'ताः' आपो दर्भात्मना परिणताः। अथ मर्थः तैत्तिरीयकेऽपि विस्पष्ट माम्नातः—"इन्द्रो वृत्र मह-न्त्सोऽपोऽभ्यं म्रियत, तासां यन्मेध्यं यज्ञियꣳ सदेव मासीत्; तदपोदक्रामत्, ते दर्भा अभवन्"-इति[७]। "अनापूयिता इति। 'आ' समन्तात् पूयं दौर्गन्ध्यं प्राप्ताः आपूयिताः, न आपूयिताः

१— पा० सू० ६. ३. ३०। २— पा० सू० २. ३. ४।

३— "वृत्रो वृणोतेर्वा वर्त्ततेर्वा वर्द्धतेर्वा"-इत्यादि निरु० २. ५. १। "तत् को वृत्रः? मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः, अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"-इत्यादि च तत्रैव २. ५. २। "यदिमाँल्लोकान्वृणोत्, तद् वृत्रस्य वृत्रत्वम्"-इति तै० सं० २. ४. १२. २।

४— पा० सू० ३. १. ६।

५— "पप्लुविरे"-इति ट। मूले तु "पुप्लुविरे"-इत्येव सर्वपुस्तकेषु।

६— धा० आ० ६५८। ७— तै० ब्रा० ३. २. ५. १।

'अनापूयिताः'। "पूयी विप्रसरणे, दुर्गन्धे च"-इत्यस्मात्[१] कर्त्तरि निष्ठायां छान्दस इट्। यद्वा 'आ' समन्तात् पूयमानं सञ्जात मिति 'आपूयिताः'। "तदस्य सञ्जातम्"-इति[२] तारकादित्वादितच्। 'इतरासु'-इति, दर्भात्मना परिणतजलव्यतिरिक्तासु; अमेध्यत्वा-पादकं किञ्चित् संसृष्ट मिव भवति। अत्र हेतुः—"यदेना इति। एव मनापूयिताब्विकारदर्भमयाभ्यां पवित्राभ्याम् 'आसाम्' अपा मुत्पवनं कुर्वन् पूयसंसर्गकृतं 'तत्' अमेध्यत्व मपहन्ति। ततश्च विधास्यमानं प्रोक्षणञ्च 'मेध्याभिः' मेधार्हाभिः शुद्धाभिरेवाद्भिः कृतं भविष्यतीत्यर्थः। 'तस्मात्'-इत्युत्पवननिगमनम् ॥ ५ ॥

विहित मुत्पवन मनूद्य मन्त्रं विधत्ते—"स इति। सविता वा इत्यादि पूर्ववत्[३]।

अच्छिद्रशब्दार्थ माह—"यो वा इति। योऽयं वायुः पवते, एष खल्वविच्छेदेन सर्वत्र वर्त्तमानात् छिद्ररहितं पवनसाधनम्। "एते वा इति। 'एते' सूर्यस्य रश्मयः, 'उत्' उत्कृष्टं 'पवितारः' शोधकाः; अतस्तेः करणभूतैरुत्पवनं युक्त मित्यर्थः ॥ ६ ॥

उत्पवनानन्तरं कर्त्तव्यं विधत्ते—"ता इति। 'ताः' प्रोक्षणीरपः अग्निहोत्रहवण्या पात्रेण साकं सव्ये प्राणौ धारयन् "देवीरापः"-इति[४] मन्त्रेण दक्षिणेन हस्तेन 'उदिङ्गयति' ऊर्द्धं सेचनेन चाल-यति[५]। "इगि-रिगि-लिगि गत्यर्थाः"-इति धातुः[६]। मन्त्रतात्पर्यं

१— भ्वा०आ०.४८४। २— पा०सू० ५.२.३६। ३— ५४८० द्रष्टव्यम्। ४— वा० सं० १.१२.३। का० श्रौ० सू० २.३.३५।

५— उपरिष्टाच्च (१२.५.१.१२.) द्रष्टव्यम्। ६— भ्वा०प०१५३-१५५।

माह—"उपस्तौतीति। 'एतत्' एतेन, देवीराप इतिमन्त्रपठनेन 'एनाः' अपः प्रशंसत्येव। तेन च प्रशंसनेन 'मह्यति' पूजयत्येव।

कस्तर्ह्यासां स्तावकस्तथाविधो मन्त्र इति तं दर्शयति—"देवीरिति[1]। स्तुतिरूपता मुपपादयति—"देव्य इत्यादिना। अपां देवतारूपत्वेन देवीत्वं प्रसिद्ध मिति 'हि'-शब्दार्थः। "ता यदित्यादि। 'अग्रे' पुरतो वर्त्तमानं समुद्रं गच्छन्तीति 'अग्रेगुवः'। अग्रेगू-शब्दस्य समुद्रगामित्वं विवक्षित मिति भावः। "ऊङ् च गमादीनाम्"-इति[2] गमेरूकारः। "ता यत्प्रथमा इति। आपः खल्वभिषवार्थं सिच्यमाना यष्टव्यदेवताभ्यः पूर्वं सोमरस मास्वादयन्ति, तेन सोमपानेन 'अग्रे' प्रथमं स्वात्मानं पुनन्तीति 'अग्रेपुवः'[3]। उभयत्र "तत्पुरुषे कृति बहुलम्"-इति[4] अग्रशब्दात् सप्तम्या अलुक्।

"साधुयज्ञ मित्यादि। "अग्र इमम्"-इत्यत्र 'अग्र'-शब्दः प्राग्रस्त्यवाची। 'अग्रे' प्रशस्ते 'अह्न' अस्मिन् काले 'इमं' यज्ञं प्रापयतेति प्रतिपाद्यता मन्त्रेण 'साधु यज्ञं नयत'-इत्येवोक्तं भवति; प्राग्रस्त्यं प्राग्रस्य साधुत्वनियमात्। यज्ञस्य पतिः यज्ञपतिः, त मिति। यज्ञशब्देन यजमानो विवक्षित इति व्याचष्टे—"साधु यजमान मिति। अत्रापि पूर्ववत् 'अग्रे'-शब्द-व्याख्यानम्। साध्विति विशेषणम् ॥ ७ ॥

१— वा० सं० १. १२. ३। "आपो देवीर्"-इत्यादिः तैत्तिरीयपाठः (तै० सं० १. १. ५. २.—ब्रा० ३. २. ५.)।

२— पा० सू० ६. ४. ४०. वा० १, २। अनुनासिकलोपश्चैतेनैव।

३— पुनातिश्च गमादेरन्तर्गतः। ४— पा० सू० ६. ३. १४।

युष्मा इन्द्र इति[1]। हे आपः! युष्मान् वृत्रं हन्तुकामः इन्द्रः साहाय्यकरणार्थं प्रार्थयामास। तास्त्वं यूयं वृत्रशरीररुद्धाः[2] विस्रम्भागमनार्थं वृत्रं हन्तुम् इन्द्रं प्रार्थितवत्यः। अत ईदृग्विधं परस्परप्रार्थनं युष्मा इन्द्र इत्यादिना मन्त्रभागेन[3] प्रतिपाद्यत इत्यर्थः ॥ ८ ॥ ९ ॥

"तदेताभ्य इति। यद्यपि प्रोक्षणीना मपां स्वातिरिक्तजलेन शुद्ध्यर्थं प्रोक्षणं नास्ति, तथापि "प्रोक्षिता स्थ"-इति[4] स्वात्मनैव प्रोक्षिता भवतेति मन्त्रेण प्रतिपादनात् प्रोक्षणवत्त्वसिद्धेः 'तत्' तेन मन्त्रपाठेन अप्रोक्षणजनित मपराधम् 'एताभ्यः' प्रोक्षणीभ्यो 'निह्नुते' अपनयति। प्रोक्षणपात्रगतेनैवोदकेन तत्पात्रगत मुदक मनेन मन्त्रेण प्रोक्षितव्य मिति तात्पर्यार्थः[5]। अत एवोक्तं सूत्रकृता

१— 'युष्माँ इन्द्र'-इति छ। मन्त्रस्त्वेषः- वा० सं० १. १३. १। तत्र "युष्मा=युष्मान्, अदृणीत। आकारश्छान्दसः"-इति महीध०। "युष्मानिन्द्रो"-इति तैत्तिरीयपाठः (सं०१.१.५.—ब्रा०३.२.५.)।

२— "वृत्रसेनानिरुद्धाः"-इति ज, झ, ञ, ट।

३— यद्यप्ययं संहितायां काण्डिकान्तरगतत्वात् पृथक् मन्त्र एव बुध्यते, तथाप्येतद्ब्राह्मणविधितो देवीराप इतिमन्त्रस्यैवांशूविशेष इति स्वीकार्यः; अत एव नास्य विनियोगान्तरं दर्शितं कात्यायनेन।

४— 'प्रोक्षिताः स्थ'-इति ठ। मन्त्रस्त्वेषः- वा० सं० १. १३. २।

५— 'तत् तेन'-इत्यारभ्य 'तात्पर्यार्थः'-इत्यन्तस्य स्थाने "प्रोक्षणपात्रगतेनैवोदकेन तत्पात्रगत मुदकं प्रोक्षयित्वा 'तत्' तेन मन्त्रपाठेन प्रोक्षणजनित मपराध मेताभ्यः प्रोक्षणीभ्यो 'निह्नुते' अपनयति"-इति ढ।

कात्यायनेन—"प्रोक्षिता स्थेति तासां प्रोक्षणम्"-इति[1]। तैत्तिरीयकश्रुतिस्तु एतन्मन्त्रपठन मेवासां प्रोक्षणं मेने। यदाह—"प्रोक्षिता स्थेत्याह तेनापः प्रोक्षिताः"-इति[2]।

एवं संस्कृताभिरद्भिर्हविषः प्रोक्षणं विधत्ते—"अथ हविरिति। वक्ष्यमाणस्य हविःप्रोक्षणविधिशेषार्थवादस्य सर्वप्रोक्षणविधिसाधारण्य माह—"एको वा इति। 'बन्धुः' अनुकूलं स्तावक मर्थवादवाक्यम्[3], सर्वस्यापि प्रोक्षणस्य 'एको वै' एकविध मेव; अतस्तत् सर्वत्र योजनीय मिति भावः। किम्पुनस्तदित्याह—"मेध्य मिति ॥ १० ॥

विहितं प्रोक्षण मनूद्य मन्त्रं विधत्ते—"स प्रोक्षतीति। "अग्नय इति[4]। मन्त्रे देवतादेशनस्य प्रयोजन माह—"तद्यस्या इति।

उक्त मन्यत्रातिदिशति—"एव मिति। 'एवम्' अनेनैव प्रकारेण 'यस्यै' देवतायै हविर्गृहीतं भवति, तत्तन्नाम चतुर्थ्यन्तेनादिशेदित्यर्थः ॥ ११ ॥

हविःप्रोक्षणानन्तरं यज्ञपात्राणां समन्त्रकं प्रोक्षणं विधत्ते—"अथेति। "दैव्यायेति[5]। देवाना मिदं 'दैव्यम्'। "देवाद् यञञौ"-इति प्राग्दीव्यतीयो यञ्[6]। 'शुन्धति' शोधयति। 'शुन्ध विशुद्धौ"-इति[7] धातुः। 'देवयज्यायै'-इति, देवयजनरूपाय कर्मणे

१—का० औ० २. ३. ३६। २—ब्रा० ३. २. ५ (सं० १. १. ५. ३.)।
३—३६ पृ० १६ पं०, ५७ पृ० १६ पं० द्रष्टव्यम्।
४—वा० सं० १. १३. ४, ५। का० औ० सू० २. ३. ३७, ३८।
५—वा० सं० १. १३. ६। का० औ० सू० २. ३. ३६।
६—पा० सू० ४. १. ८५. वा० २. (पा० सू० ४. १. ८३.)।
७—धा० प० ७४।

इत्यर्थः। मन्त्रस्यापरभाग मनूद्य व्याचष्टे—"यद्व इति। 'तच्चा' वर्द्धकिः, 'अन्यः' तद्व्यतिरिक्तो वृषलादिः; स सर्वोऽप्यशुद्धत्वात् 'अमेध्यः'। तत्संस्पर्शकृतं यत् 'तत्' 'एषां' पात्राणां दोषजातम्, 'एतत्' अनेन प्रोक्षणेनैषां निवर्त्तयन्, 'तत्' सर्वं पात्रं यज्ञार्हं करोति। अत ईदृग्विधस्यार्थस्य प्रत्यायनाय यद्व इति मन्त्रभागः पठितव्य इत्युपसंहरति—"तस्मादिति। 'पराजघ्नुः'-इति, पराहतं दूषितं चक्रुरित्यर्थः॥ १२ ॥ ३ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये प्रथमाध्याये
तृतीयं ब्राह्मणम्[1] ॥

१— अस्मिन् तृतीये ब्राह्मणे पूर्वं पवित्रच्छेदनं विहितम्। तत्तु समप्रमाणयोः साग्रयोः अनन्तर्गर्भयोः अत्वरिताग्रयोः कुशयोः कुरिकास्थानीयैः कुशैरेव छेदनम्। ततोऽग्निहोत्रहवण्यां स्रुव मेवोदक मासिच्य ताभ्यां पवित्राभ्या मपा मुत्प्लवन मुत्प्लेपणम्। तयोः पवित्रयोस्तैवाग्निहोत्रहवण्यां स्थापनम्। ततः सव्यहस्ते अग्निहोत्रहवणीं निधाय सव्यहस्तस्था मेव संलग्ना मेव दक्षिणाहस्तेन 'उदिङ्नम्' ऊर्द्धं चालनम्। ततस्ताभिरेव स्रुक्स्थाभिः तासा मेव प्रोक्षणम्। ततो 'ब्रह्मन् हविः प्रोक्षामि?' इति ब्रह्माणं पृच्छति; ब्रह्मा च 'प्रोक्ष यज्ञं धेहीत्यन्त मुपांशूक्त्वा 'ओं प्रोक्ष'—इत्युच्चैः प्रसौति (२. २. १०.)। ततोऽध्वर्युः अग्निहोत्रहवण्याः उदक मादाय स्रुर्पस्थे हविषी प्रोक्षति। तत्र अग्नये प्रथमम्, अग्नीषोमाभ्यां द्वितीयम्। ततः सर्वाणि सहैव प्रोक्षति। एतच्च प्रोक्षणं बहूदक मादाय कार्यम्। प्रतिपात्रं प्रोक्षणाद्दत्तिपक्षस्तु युक्ततर इति याज्ञिकदेवः। ततोऽनन्तरे प्रणीताहवनीययोरन्तराले, गार्हपत्याहवनीययोरन्तराले वा प्रोक्षणीनां निधानं कार्य मिति दिक्।

अथ कृष्णाजिन मादत्ते। यज्ञस्यैव सर्वत्वाय यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार तस्य देवा अनुविद्य त्वच मेवावच्छायाजह्रुः* ॥ १ ॥

तस्य यानि शुक्लानि च कृष्णानि च लोमानि। तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नाꣳ रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नाꣳ रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणीव हरीणि तानि यजुषाꣳ रूपम् ॥ २ ॥

सैषा चयौ व्विद्या यज्ञः। तस्या एतच्छिल्प मेव व्वर्णास्तद्यत् कृष्णाजिनं भवति यज्ञस्यैव सर्वत्वाय तस्मात् कृष्णाजिन मधि दीक्षन्ते यज्ञस्यैव सर्वत्वाय तस्मादध्यवहनन मधिपेषणं भवत्युस्कन्नꣳ हविरसदिति तद्यदेवाच तण्डुलो वा पिष्टं वा स्कुन्दात् तद्यज्ञे यज्ञः प्रतितिष्ठादिति तस्मादध्यवहनन मधिपेषणं भवति ॥ ३ ॥

अथ कृष्णाजिन मादत्ते शुर्म्मासीति चुर्म वा ऽएतत् कृष्णस्य तदस्य तन्मानुषꣳ शुर्म देवचा तस्मादाह शुर्मासीति तदुवधूनोत्युवधूतꣳ रक्षोऽवधूता अरा-

* 'मेवावत्सायाजह्रुः'—इति च (M.)।

तय इति तुन्नाष्ट्रा एवैतद्रक्षाꣳस्यतोऽपहन्त्यतिनुत्येव पाप्मानमवधूनोति युज्ञस्यामेध्य मभूत् तुज्ञस्यैतदव-धूनोति ॥ ४* ॥

तत्प्रतीचीनग्रीव मुपस्तृणाति। अदित्यास्त्वगसि प्रति त्वादितिर्व्वेत्त्विति यं वै पृथिव्यदितिस्तस्या ऽअस्यै त्वग्यदिद मस्या मधि किञ्च तस्मादाहादित्यास्त्वग-सीति प्रति त्वादितिर्व्वेत्त्विति प्रति हि स्वः सुज्ञानीते तत्सञ्ज्ञा मेवैतत् कृष्णाजिनाय च व्वदति नेदुन्योन्युꣳ हिनसात ऽइत्यभिनिहित मेव सव्येन पाणिना भवति ॥ ५ ॥

अथ दक्षिणेनोलूखल माहरति। नेदिह पुरा नाष्ट्रा रक्षाꣳस्या विशानिति ब्राह्मणो हि रक्षसा मपहन्ता तस्मादभिनिहित मेव सव्येन पाणिना भवति ॥ ६ ॥

अथोलूखलं निदधाति। अद्रिरसि व्वानस्पत्या ग्रावासि पृथुबुध्न इति वा तद्यथैवादः सोमꣳ राजानं ग्रावभिरभिषुण्वन्त्येव मेवैतदुलूखलमुसलाभ्यां हव-दुपलाभ्याꣳ हविर्यज्ञ मभिषुणोत्युद्रय इति वै तेषा मेकं नाम तस्मादाहाद्रिरसीति व्वानस्पत्य इति व्वान-

* एतदुत्तरं सर्वेष्वेव मूलपुस्तकेषु "अर्द्धप्रपाठकः"-इति लेखो विद्यते।

स्यत्यो ह्येष ग्रावासि पृथुबुध्न इति ग्रावा ह्येषु पृथुबुध्नो ह्येष प्रुति त्वादित्यास्त्वग्वेत्त्विति तत्सञ्ज्ञा मेवैतत् कृष्णाजिनाय च व्वदति नेदन्योन्युꣳ हिनुसात ऽइति* ॥ ७ ॥

अथ हविरावपति। अग्नेस्तनूरसि व्वाचो व्विसर्जन मिति यज्ञो हि तेनाग्नेस्तनूर्व्वाचो व्विसर्जन मिति यां वा ऽअमूꣳ हविर्ग्रहीष्यन् वाचं युच्छत्युच वै तां व्विसृजते तद्यदेता मुच व्वाचं व्विसृजत ऽएष हि यज्ञ उलूखले प्रत्युष्टादेष हि प्रासारि तस्मादाह व्वाचो व्विसर्जन मिति ॥ ८ ॥

स यदिदं पुरा मानुषीं व्वाचं व्याहरेत्। तचो व्वैष्णवी मृचं वा युजुर्वा जपेद् यज्ञो वै व्विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिर्हेवीतये त्वा गृह्णामीति देवानवदित्यु हि हविर्गृह्यते† ॥ ९ ॥

अथ मुसल मादत्ते। दृहद्भावासि व्वानस्पत्य इति दृहद्भावा ह्येषु व्वानस्पत्यो ह्येष तदवदधाति सु इदं देवेभ्यो हविः शुमीषु सुशुमि शमीषुेति सु इदं देवेभ्यो हविः सुꣳस्कुरु साधुसꣳस्कृतꣳ सुꣳस्कुर्व्वित्येवैतदाह ॥ १० ॥

---

* 'ऽइति'—इति ख, च। † 'हविर्गृह्यते'—इति ख, च।

अथ हविष्कृत मुद्वादयति । हविष्कृदेहि हविष्कृदेहीति व्याग्वै हविष्कृद् व्याच मेवैतद् व्यिसृजते व्यागु वै यज्ञस्तुद्यज्ञ मेवैतत् पुनरुपह्वयते ॥ ११ ॥

तानि वा एतानि । चत्वारि व्याच एहीति ब्राह्मणस्या गत्या द्रवेति वैश्यस्य च राजन्यबन्धोश्चाधावेति शूद्रस्य स यदेव ब्राह्मणस्य तदाहैतद्धि यज्ञियतम मेतद् ह वै व्याचुः शान्ततमं यदेहीति तस्मादेहीत्येव ब्रूयात् ॥ १२ ॥

तद्ध स्मैतत्पुरा । जायैव हविष्कृदुपोत्तिष्ठति तदिद मप्येतर्हि य एव कश्चोपोत्तिष्ठति स यदैष हविष्कृत मुद्वादयति तदेको हषदुपले समाहन्ति तद्यदेता मुच व्याचं प्रत्युद्वादयन्ति ॥ १३ ॥

मनोर्ह वा ऽऋषभ आस । तस्मिन्नसुरघ्नौ सपत्नघ्नौ व्याक् प्रविष्टा स तस्य ह स्म श्वसथाद्रवथादसुररक्षसानि म्रियमाणानि यन्ति ते ह्यासुराः समूदिरे पापं घत* नोऽयं मृषभः सचते कथं न्विमं दभ्नुयामेति किलाताकुली ऽऽहति ह्यासुरब्रह्मावासतुः ॥ १४ ॥

तौ होचतुः । अद्वादेवो वै मनुरावं नु व्वेदावेति

---

* 'बत'–इति क, ख ।

तौ ह्यागत्योचतुर्मनो याजयाव त्वेति केनेत्यनेनर्षभेणेति तथेति तस्यालब्धस्य सा व्यागुपचक्राम ॥ १५ ॥

सा मनोरेव जायां मनावीं प्रविवेश । तस्यै ह स्म यच्च व्यदन्त्यै शृणन्ति ततो ह स्मैवासुररक्षसानि मृद्नन्ति यन्ति ते ह्यासुराः समूदिर इतो वै नः पापीयः सचते भूयो हि मानुषी व्याग् वदतीति किलाताकुलौ हैवोचतुः श्रद्धादेवो वै मनुरावं त्वेव व्वेदावेति तौ ह्यागत्योचतुर्मनो याजयाव त्वेति केनेत्यनयैव जायेति तथेति तस्या आलब्धायै सा व्यागुपचक्राम ॥ १६ ॥

सा यज्ञ मेव यज्ञपात्राणि प्रविवेश । ततो हैनां न शेकतुर्निर्हन्तुꣳ सैषासुरघ्नी सपत्नघ्नी* व्यागुद्वदति स यस्य हैवं विदुष एता मुच व्याचं प्रत्युद्यन्ति पापीयाꣳसो हैवास्य सपत्ना भवन्ति ॥ १७ ॥

सु समाहन्ति । कुक्कुटोऽसि मधुजिह्व इति मधुजिह्वो वै सु देवेभ्य आसीद् विषुजिह्वो असुरेभ्यः स यो देवेभ्य आसीः सु न एधीत्येवैतदाहैष मूर्ज मावद त्वया व्ययुꣳ सङ्घातुꣳ सङ्घातं जेष्मेति नाच तिरोहित मिवास्ति† ॥ १८ ॥

---

* नास्त्येतत् पदं च-पुस्तके । † 'मिवास्ति'—इति ख ।

अथ शूर्प मादत्ते। व्वर्षुवृङ्ग मसीति व्वर्षुवृङ्गꣳ ह्येतद् यदि नडानां यदि व्वेणूनां यदीषीकाणां व्वर्षु मु ह्येवैता व्वर्ङ्गयति ॥ १९ ॥

अथ हविर्निर्वपति। प्रति त्वा व्वर्षुवृङ्गं व्वेत्त्विति वर्षुवृङ्गा उ ह्येवैते यदि व्रीहयो यदि यवा व्वर्षु मु ह्येवैतान् वर्ङ्गयति* तत्सञ्ज्ञा मेवैतच्छूर्पाय च व्वदति नेदन्योऽन्यꣳ हिनसात ऽइति ॥ २० ॥

अथ निष्पुनाति। पुरापूतꣳ रक्षः पुरापूता ऽअरातय ऽइत्यथ तुषान् प्रहन्त्यपहतꣳ रक्ष ऽइति तन्नाष्टा ऽएवैतद्रक्षाꣳस्यतोऽपहन्ति† ॥ २१ ॥

अथापविनक्ति। व्वायुर्वो व्विविनक्त्वित्ययं वै व्वायुर्योऽयं पुवत ऽएष वा ऽइदꣳ सर्वं व्विविनक्ति यदिदं किञ्च व्विविच्यते तदेनानेषु एवैतद्विविनक्ति सु युदैत ऽएतत्प्राप्नुवन्ति युचैनानध्यपविनक्ति ॥ २२ ॥

अथानुमन्त्रयते। देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण‡ पाणिना सुप्रतिगृहीता ऽअसन्नित्यथ त्रिः फल्गीकरोति त्रिर्वै यज्ञः ॥ २३ ॥

---

* 'वर्ङ्गयति'–इति ख, ग।

† '०स्यपहन्ति'–इति क। पूर्वत्राप्येवं गतम् ३५ पृ० १० पं०।

‡ 'प्रतिगृह्णात्वच्छिद्रेण'–इति ग।

तद्वैके देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्व मिति फल्गी-कुर्वन्ति । तदु तथा न कुर्यादादिष्टं वा ऽएतद्देवतायै हविर्भवत्यथैतदैश्वदेवं करोति यदाह देवेभ्यः शुन्धध्व मिति तत्समृदं करोति तस्मादु तूष्णी मेव फल्गी-कुर्यात् ॥ २४ ॥ ४ ॥

(प्रथमप्रपाठके प्रथमाध्याये वा चतुर्थं)

ब्राह्मणम् ॥ १ । ४* ॥

अथ निरुप्तव्रीहियवावहननार्थं[1] कृष्णाजिनादानं विधत्ते—"अथेति । 'सर्वत्वाय'-इति, अवयवकात्स्न्यार्थमित्यर्थः । कथं कृष्णा-जिनादानेन यज्ञस्य कात्स्न्यं मित्येतदुपपादयितुं पुरावृत्तं मुदा-हरति—"यज्ञो वै त्यादिना । 'कृष्णो भूत्वा'-इति, कृष्णमृगस्य रूप मास्थाय । 'अवच्छाय'-इति, अपच्छिद्येत्यर्थः । "कृ कृदने"-इत्य-स्मात्[2] क्रो ल्यप्[3] ॥ १ ॥

तस्य कृष्णाजिनस्य यज्ञरूपतां वक्तुं त्रयीमयत्वं प्रतिपादयति—"तस्य यानीत्यादिना । शुक्लकृष्णलोम्नां सङ्गत्वात् ऋक्सामात्मकता शुक्ला विभज्यापि दर्शयति—"तस्य यानि शुक्लानीति । 'यदि वा'-इति पक्षान्तरकथनम् । 'इतरथा' उक्तवैपरीत्येनेत्यर्थः । तदेव

---

* सायणाचार्यमतेऽत्रैव प्रथमपरिच्छेदसमाप्तिः, एतच्छतपथीयपरिच्छे-दस्य चाध्याय इति व्यपदेशः सर्वत्र ; मूलग्रन्थे तु सर्वत्रैव प्रपाठक इति, न चात्र प्रथमप्रपाठकसमाप्तिः । एव मुत्तरत्रापि ।

१— 'निरुप्तव्रीह्यवहननाय'-इति ड । २— दि० प० ४० ।

३— पा० सू० ७. १. ३७ ।

दर्शयति—"यान्येवेति। एवं कृष्णाजिनस्य ऋक्सामरूपता मुक्ता यजूरूपत्वं मन्याह—"यान्येव बभ्रूणीति। पिङ्गलवर्णानीव यानि लोमानि 'हरीणि'[१] हरितवर्णानि, तानि यजुषां रूपम्[२] ॥ २ ॥

अस्त्वेवं ऋक्सामयजुरात्मकत्वं कृष्णाजिनस्य, तदादानेन कथं यज्ञस्य कार्त्स्न्यं मित्यत आह—"सैषेति। यैषा ऋग्यजुस्सामात्मिका त्रयीविद्या, सैव यज्ञः; तत्साध्यत्वात्। य एष शुक्लकृष्णादिलक्षणो वर्णः, एतत्तस्याः त्रय्या उत्तरीत्या 'श्रिल्पं' चित्रं रूपम्। अत एवोपरिष्टात् सोमप्रकरणे मन्त्र आम्नायते—"ऋक्सामयोः श्रिल्पे स्थ"-इति[३]। एव मपक्रान्तस्य यज्ञरूपस्य कृष्णाजिनस्य आदानं यज्ञस्य कार्त्स्न्याय भवतीत्यर्थः। "कृष्णाजिन मधि दीक्षन्ते"-इति। यस्मादेवं कृष्णाजिनं त्रयीरूपत्वेन यज्ञरूपम्, 'तस्मात्' सोमाङ्गभूता दीक्षापि कृष्णाजिनस्योपरि क्रियते। कृष्णाजिनादानस्य प्रयोजनान्तर माह—"तस्माद्धीति। 'अधि' उपर्यर्थः। कृष्णाजिनस्योपरि अवहननं पेषणञ्च कर्त्तव्यम्। तथा सति तद्धविः 'अस्कन्नं' स्कन्नरहितम् 'असद्' भवेदिति। बुद्ध्या यदि भूम्या मेवावहननादिकं कुर्यात्, तदा तस्य हविषो ऽवश्यं स्कन्नदोष इत्यभिप्रायः। एतदेव विवृणोति—"तद्यदेवेति। अवहननसमये तण्डुलो वा पेषणसमये पिष्टं वाच कृष्णाजिने 'यदि' नाम 'स्कन्दात्' स्कन्देत्। लेट्यडागमः[४]। 'तत्' तदा यज्ञे एव यज्ञः प्रतितिष्ठेत्, न तु तस्य स्कन्नदोष इत्यर्थः ॥ ३ ॥

१— 'हरीणीव'-इति आदिषु। २— तै० सं० १. २. २. ७।
३— वा० सं० ४. ९. १। ४— पा० सू० ३. ४. ९४।

उक्त मादान मनूद्य मन्त्रं विधत्ते[1]— "अथेति। मन्त्रगत-'ग्रर्म'-ग्रब्दस्य तात्पर्य माह— "चर्म वा इति। यत् 'एतत्' कृष्णस्य 'चर्म' ग्रजिनम्, 'ग्रस्य' यज्ञस्यैतदजिनं 'तत्' लोकप्रसिद्धचर्मग्रब्दाभिधेयं सत् 'मानुषं' मनुष्यसम्बन्धि रूपं भवति। एतदेव 'देवत्रा' देवेषु, सुखकरत्वात् ग्रर्मेत्युच्यते। ग्रतो वैदिके कर्मणि 'ग्रर्मासीति' तत्स्तुतिरूपपन्ना। देवत्रेति "देवमनुष्येत्यादिना सप्तम्यर्थे त्रा-प्रत्ययः[2]।

उपात्तस्य कृष्णाजिनस्यावधूननं विधत्ते— "तदवधुनोतीति[3]। "तस्माद्वा इति। 'तत्' तेन समन्त्रकावधूननेन। गत मन्यत्[4]।

कृष्णाजिनवत् प्रसक्त मवधूननं पात्राणां निषेधति— "न त्वेवेति। न केवल मवधूननस्य रज्जोपहनन मेव प्रयोजनं किन्तु ग्रयज्ञियविक्षेपोऽपीत्याह— "यज्ञस्येति। रज्जःप्रभृतिसम्पर्कात् यत् खलु 'ग्रस्य' कृष्णाजिनस्य 'ग्रमेध्यं' मेधानर्हं मयज्ञियरूप मभूत्, तदेवास्येतेन मन्त्रेण 'ग्रवधूनोति' निरस्यति ॥ ४ ॥

तस्य समन्त्रकं प्रकारविशिष्टं स्मरणं विधत्ते[5]— "तदिति। 'प्रतीचीना' प्रत्यग्दिग्नि स्थिता ग्रीवा यथा भवति तथा।

दृयं वा इत्यादि। 'दितिः' खण्डनं न विद्यते ग्रस्या इति[6] व्युत्पत्त्या ग्रत्र मन्त्रगतादितिग्रब्देन दृय मेव पृथिवी विवक्षिता;

१— वा० सं० १. १४. १। का० ग्रौ० सू० २. ४. १।

२— पा० सू० ५. ४. ५६।

३— वा० सं० १. १४. २। का० ग्रौ० सू० २. ४. २।

४— ४४ पृ० १ पं० द्रष्टव्यम्।

५— वा० सं० १. १४. ३। का० ग्रौ० सू० २. ४. ३।

६— निघ० १. १. १४, निरु० ४. ४. १ द्रष्टव्यम्।

कथ मन्यदीया लगन्यस्य लग्नवतीत्याशङ्क्याह— "तस्या इति। 'अस्यां' भूम्याम् 'अधि' उपरिभागे 'यदिदं किञ्च' किं मपि वस्त्ववस्थितम् 'तस्यै अस्यै' पृथिव्यै, सा 'त्वक्' कृष्णाजिन मप्युपर्यवस्थानात् तस्या एव लगिति स्तुतिः। मन्त्रस्य द्वितीयं भाग मनूद्य व्याचष्टे— "प्रतीति। 'स्वः' स्वकीयो जनः आत्मीयं जनं प्रति 'सञ्जानीते' परस्परानुकूल्यं प्रकटयितुं सञ्ज्ञां करोति। 'तत्' तथा कृष्णाजिनभूम्योः समानज्ञानता मेवायं मन्त्रभागो वदति। सञ्ज्ञानस्य प्रयोजन माह— "नेदिति। परस्परानुकूल्यज्ञानाभावे ह्यन्य मन्यो हिंस्यात्। नैव तादृशी अन्योऽन्यहिंसा भवत्यित्यनेनाभिप्रायेणेत्यर्थः।

उलूखलनिधानपर्यन्तं कृष्णाजिनस्यानुत्सर्जनं विधत्ते— "अभिनिहित मिति ॥५॥

मन्त्रेण स्पृशतो ऽभिप्राय माह— "नेदिति। यदि ह्युलूखलनिधानात् प्रागेव कृष्णाजिनस्वर्गं मुत्सृजेत्, 'तत्' तदा 'इह' अस्मिन् कृष्णाजिने राक्षसादिकं प्रविशेत्, तत्रैव भवत्विति। 'विशान्'-इति विशतेर्लेटि बहुवचने आडागमः[१] झेरन्तादेशे[२] "इतश्च लोपः"-इतीकारलोपः[३]।

ननु स्वर्गेऽपि उलूखलनिधानात् पुरा कुतो रक्षांसि न प्रविशन्ति तत्राह— "ब्राह्मण इति। 'हि' यस्माद् ब्राह्मणो रक्षसा मपहन्ता मन्त्रप्रभावेन, तस्मात् तेन स्पृश्यमानं राक्षसादिर्न प्रवेष्टुं शक्नोतीति भावः ॥ ६ ॥

१— पा० सू० ३. ४. ९४। २— पा० सू० ७. १. ३।
३— पा० सू० ३. ४. ९७।

अथ समन्त्रक मुलूखलस्य निधानं विधत्ते— "अथेति । "ग्रावासीति[१] वैकल्पिको मन्त्रः । अत एव सूत्रकृतोक्तम्— "निदधात्युलूखल मद्रिरसि ग्रावासीति वा"-इति[२] । तत्राद्यमन्त्रस्याभिप्राय माह— "तद्यथेति । 'अदः'-शब्दो लुप्तविभक्तिकः ; 'असुत्र' सोमयागे यथा यागसाधनस्य सोमस्य ग्रावभिरभिषवः, एव मेवोलूखलादिभिर्हविर्यज्ञसाधनं व्रीह्यादिकम् 'अभिषुणोति' वितुषीकरणादिभिः संस्करोति । कुत एतदित्यत आह— "अद्रय इतीति । 'तेषां' सोमाभिषवहेतूनां ग्रावणां, पुरोडाशनिष्पत्तिहेतूना मुलूखलादीनां च, अद्रय इत्येतत् साधारणं नाम ; अतो नामसाम्यात् उलूखलादिसाध्य मवहननादिकं ग्रावसाध्येन सोमाभिषवेण तुल्य मित्यर्थः । एवञ्च हे उलूखल ! त्वम् 'अद्रिरसि' सोमाभिषव[३]हेतुः । "ग्रावासीति ग्रावत्वारोपणं मन्त्रेण विवक्षित मिति व्याख्यातं भवति ।

वनस्पतिविकारत्वं प्रसिद्ध मिति वानस्पत्यपदतात्पर्य्य माह— "वानस्पत्यो हीति ।

वैकल्पिकं मन्त्र मनूद्य व्याचष्टे— "ग्रावासीति[४] । "पृथुबुध्नो हीति । उलूखलस्य विस्तीर्णमूलत्वं प्रसिद्ध मित्यर्थः ।

१— वा० सं० १. १४. ५ ।

२ — "सव्याग्नेये निद०—०ग्रावासीति वा"—इति का० श्रौ० २. ४. ४ । " 'सव्याग्नेये' सव्यहस्तेनाग्नेये अमुक्ते कृष्णाजिने"—इति तत्र वृत्तिः ।

३— "कृष्णाजिन (८० पृ० ३ पं०)"—इत्यारभ्य "सोमाभिषव"—इत्यन्तो (८१ पृ० ११ प०) ग्रन्थः ठ-ड-पुस्तकाभ्या मन्यत्र नोपलभ्यते, वेवर-महोदयेन च न दृष्ट इति गम्यते तल्लेखत एव ।

४— वा० सं० १. १४. ५ । का० श्रौ० सू० २. ४. ४ ।

प्रतिलेत्यादिकं मन्त्रद्वयशेष मनूद्य[1] व्याचष्टे— "तदिति। कृष्णाजिनोलूखलयोरन्योन्यं हिंसा मा भूदिति पृथिवीकृष्णाजिनयोरिवैकमत्यप्रार्थनं वदतीत्यर्थः ॥ ७ ॥

उलूखले हविषः प्रक्षेपणं समन्त्रकं[2] विधत्ते— "अथेति। "यज्ञो वै"ति। यस्माद् 'यज्ञः' यज्ञसाधनं हविः, अतोऽग्नेः शरीर मेव तदित्यर्थः।

"यां वा इत्यादि। हविर्ग्रहणार्थम् "अथ वाचं यच्छति"-इति या वाग् नियमिता[3], 'अत्र' अस्मिन्समये ता मेव अनेन मन्त्रभागेन 'विसृजते'। (अतः[4]) विसृज्यते अनेनेति 'विसर्जनं' हविरिति मन्त्रपाठस्यार्थः[5]।

एतद्वाग्विसर्जन मुपपादयति— "तद्यदिति। 'एतां वाच मत्र विसृजते'-इति यत्, तद्युक्तम्; 'हि' यस्माद् एषः 'यज्ञः' यज्ञसाधनं हविः, उलूखले 'प्रत्यष्ठात्' प्रतिष्ठित मभूत्; यस्माच्च 'एषः' यज्ञः 'प्रासारि' प्रसारितो विस्तारितोऽभूत्; अतो हेतोर्वाग्यमनस्य प्रयोजनं नास्तीति तद्विसर्जन मेव युक्त मित्यभिप्रायः ॥ ८ ॥

हविरावपनात् पूर्वं[6] लौकिकवाग्व्यवहारे प्रायश्चित्त माह— "स यदीति। 'वैष्णवी त्वचम्'-इति, "इदं विष्णुर्विचक्रमे"-इत्यादिकाम्[7]। यजुरपि वैष्णव मेव जप्यम्। 'देववीतये'-इतिमन्त्रशेषस्य[8]

१— वा० सं० १. १४. ४। का० श्रौ० सू० २. ४. ५।
२— वा० सं० १. १५. १। का० श्रौ० सू० २. ४. ६।
३— ३५ पृ० ५ पं० द्रष्टव्यम्। ४— नास्त्येतत्पदं जादिषु।
५— 'मन्त्रपदस्यार्थः'-इति ड। ६— 'हविरावपने'-इति जादिषु।
७— वा० सं० ५. १५। ८— वा० सं० १. १५. १ मन्त्रांशस्येत्यर्थः।

अभिप्राय माह— "देवानवदितीति। यष्टव्यान् देवान् 'अवत्' अवतु, तर्पयत्विति। अनेनैवाभिप्रायेण हि हविर्गृह्यते, अतो 'देववीतये' देवानां तृप्तय इति[1] मन्त्रपदाभिप्रायः ॥ ९ ॥

समन्त्रकं मुसलादानं विधत्ते— "अथ मुसल मादत्त इति। "बृहद्भावामीति[2]। सोमसंस्कारकत्वात्वत् मुसलस्यापि हविस्संस्कारकत्वसाम्याद्भावत्वम्, दीर्घत्वाच्च बृहत्त्व मिति 'बृहद्भाव'-शब्दाभिधेयता मुसलस्य (प्रसिद्धेत्यर्थः[3])।

(तस्य मुसलस्य[4]) उलूखले प्रक्षेपणं समन्त्रकं विधत्ते[5]— "तदवदधातीति। "शमीष्व"-इतिपदस्यार्थ माह— 'हविः संस्कुरु'-इति। 'शमीष्व' शमय; दोषोपशमनेन हविः संस्कुर्वित्यभिप्रायः। "सुशमि शमीष्वेति मन्त्रस्याभिप्राय माह— 'साधु संस्कृतम्'-इति ॥ १० ॥

हविष्कृत[6] आह्वानं विधत्ते— "अथ हविष्कृत मिति। 'उद्वादयति' उच्चैराह्वयतीत्यर्थः। हविष्कृदेहीतिमन्त्रस्य द्विः पाठो मन्त्रकाण्डे द्विरान्नानात्[7]। हविष्कृच्छब्दार्थ माह— "वाग्वै हवि-

---

१— "पिष्टयज्ञे 'पिष्टवीतये'-इत्यूहः"-इति याज्ञिकदेवः।

२— वा० सं० १. १५. २। का० श्रौ० सू० २. ४. ११।

३— नास्त्येषोऽग्रः आदिषु। ४— नास्ति चैषोऽग्रो आदिषु।

५— वा० सं० १. १५. ३। का० श्रौ० सू० २. ४. १२। "पिष्टयज्ञे 'स इदं पिष्टभ्यः'-इत्यूहः"-इति या० दे०।

६— 'हविःकृत'-इति ट। एव मुत्तरत्रापीह सर्वत्र।

७— मन्त्रकाण्डे = संहिताग्रन्थे। वस्तुतस्तुच द्विरान्नानं श्रूयते, न तु द्विः। "द्विर्वार मुक्त मर्थं देवा मन्यन्त इति द्विरान्नानम्"-इति च महीध०। कात्यायनेनाप्युक्तं 'द्विरान्नयति'-इति (२. ४. १३.)।

ष्कृदिति । निर्वापादौ मन्त्ररूपाया वाचो हविष्करणसाधनत्वाद् वागेव हविष्कृत्; अतस्ता मनेनैव मन्त्रेण आङ्क्षयन् हविर्ग्रहणकाले नियमितां वाचं विसृजेत् । अत एव कात्यायनेन "अग्नेस्तनूरसीति[१] मन्त्रेण, "हविष्कृदेहीति[२] मन्त्रेण वा वाग्विसर्जनं कर्त्तव्य मिति विकल्पेन सूचितम्—"अग्नेस्तनूरसीति वाचं विसृजते, + + +, हविष्कृता वेति[३] ।

"वाग् वा इति । या वाक् हविष्कृत्, सैव खलु यज्ञः, तस्य तन्निर्वर्त्यत्वात् । 'तत्' तथा सति 'एतत्' एतेन वागात्मिकाया हविष्कृत आङ्क्षानेन यज्ञ मेव पुनराङ्क्षयते ॥ ११ ॥

ब्राह्मणचादिवर्णभेदोपजीवनेन हविष्कृदाङ्क्षानमन्त्रे विशेष माह—"तानि वा एतानि चत्वारीति । 'वाचः' सम्बन्धीनि 'चत्वारि' रूपाणि । कानि पुनस्तानीत्याह—"एहीत्यादि । वैश्यस्य "हविष्कृदागहीति मन्त्रः । 'राजन्यबन्धोः'[४] इत्यधिकृत्य विधीयमाने: "हविष्कृदाद्रवेति[५] । आपस्तम्बस्तु राजन्यवैश्ययोर्वैपरीत्येनासूचयत्—"हविष्कृदेहीति ब्राह्मणस्य, हविष्कृदागहीति राजन्यस्य, हविष्कृदाद्रवेति वैश्यस्य, हविष्कृदाधावेति शूद्रस्य"-इति[६] ।

एवं पूर्वपक्षतया ब्राह्मणचादिवर्णप्रयुक्तं विशेष मुपन्यस्य स्वमतं निगमयति—"स यदेव ब्राह्मणस्येति । "एतद्धीति । 'एहीति' एतत् खलु 'यज्ञियतमम्' अतिशयेन यज्ञार्हम्; "इड एवादित एही-

---

१, २—वा० सं० १. १५. १, ४ । ३—का० श्रौ० सू० २. ४. ७, ९ ।
४—'राजन्यस्य'-इति आदिषु । ५—एते तु मन्त्रा इहैवाम्नाताः ।
६—श्रौ० सू० १. १९. ९ ।

त्यादौ[1] अन्यत्रापि यज्ञे प्रयोगात्। "आगन्तमम्"-इति, आगच्छाद्रवेत्यादेः सकाशात् एहीत्येतदेवातिशयेन आगन्तम्; प्रार्थनावाक्येष्वेहीत्येव सर्वत्र प्रयोगादागच्छादीनां च निकृष्टप्रेषणरूपत्वाच्चेत्यर्थः ॥ १२ ॥

कोऽसौ हविष्कृदिति तं दर्शयति— "तद्धेति। पुरा खल्वेतदाङ्कानानन्तरं 'जायैव हविष्कृदुपोत्तिष्ठति', अतस्तदानीं जायैव हविष्कृदभूत्। 'तत्' तस्मादिदानीं मयेतदाङ्कानानन्तरं जाया वा, अन्यः 'कोऽपि' ऋत्विग्वा उपोत्तिष्ठति, स एव हविष्कृदित्यर्थः। तदयुक्तं सूत्रकृता— "हविष्कृदेहीति चिराङ्कयत्यतः पत्न्यवहन्त्यन्यो वा"-इति[2]।

हविष्कृदाङ्कानसमये दृषदुपलयोः शब्दया समाह्वानं विधत्ते— "स यत्रैष हविष्कृत मुद्वादयति"-इति। समाह्वाननजनितां वाचं प्रशंसितु मनुवदति— "तद्यदिति ॥ १३ ॥

अथ यज्ञायुधध्वनेः[3] यज्ञविघातकासुरराक्षसादिनिवृत्तिहेतुता मुपपादयितु मितिहास मुदाहरति— "मनोर्ह वा इति। पुरा खलु मनोः सम्बन्धिन ऋषभस्य प्रश्वासाद् रवाच्च यज्ञविघातिनोऽसुरराक्षसादयः बाध्यमाना गताः। ते च परस्परं संवादं कृतवन्तः। 'ह'-इति खेदे। 'अयम्' ऋषभः 'नः' अस्माकं 'पापं' निकर्षं

१— वा० सं० ३.२९.१।

२— का० श्रौ० सू० २.४.१४। "अन्य इत्याग्नीध्रः"-इति या० दे०।

३— 'समाह्वाननजनिताया वाचः'-इति ८।

पराजयं 'मचते' प्रापयति, कथं खलु इमं हिंस्यामेति। एवं संवादे कृते 'किलातश्च आकुलिश्च' दावसुरपुरोहितौ बभूवतुः ॥ १४ ॥

तयोर्व्यापार माह— "तौ होचतुरिति। अद्धैव देवो यस्य सः 'अद्धादेवः', अद्धालुरित्यर्थः[१]। 'आवं नु वेदाव'-इति, आवा मम मनोरभिप्रायं जानावहै इत्यर्थः। "प्रथमायाश्च द्विवचने भाषायाम्"-इति[२] भाषाया मेवात्त्वविधानात् आव मिति हस्वोच्चारणम्। "विद ज्ञाने[३]"-इत्यस्मात् लोटि उत्तमद्विवचने वेदावेति रूपम्। "मनो याजयावेत्यादि। हे मनो! त्वा मनेन ऋषभेण याजयावेति। अद्धालुं मनुं विप्रलभ्य[४] त मृषभ मवधिष्टा मिति तात्पर्यार्थः ॥ १५ ॥

"सा मनोरेव जायां मनावीं प्रविवेश"-इति। मनोर्भार्या 'मनावी'। "मनोरौ वा"-इत्यौत्वम्[५], पुंयोगलक्षणो ङीप्[६]। "तस्मै ह स्म यत्र वदन्त्ये प्रयन्ति"-इति। 'तस्मै' षष्ठ्यर्थे चतुर्थी[७]। 'यत्र' यस्मिन् देशे वदन्त्यास्तस्याः शब्दं शृण्वन्ति, 'ततः' तस्मात् स्थानात्[८] असुरादयः बाधिताः पलायन्त इत्यर्थः। "पापीयः सचत इति। तिर्यग्जातेः ऋषभस्य[९] ध्वनेः श्रवणात् प्रागस्माकं निकर्षमात्रं प्राप्तम्, इदानीं तु मनुष्यशरीरात् निर्गतवाचः श्रवणात्

१— 'अद्धालुरिति यावत्'-इति ठ, ड। २— पा० सू० ७. २. ८८।
३— अदा० प० ५७। ४— 'विप्रलभ्य'-इति ठ।
५— पा० सू० ४. १. ३८। ६— पा० सू० ४. १. ४८।
७— पा० सू० २. ३. ६२. वा० १। ८— 'वदनात्'-इति जादिषु।
९— 'वृषभस्य'-इति ठ।

अस्माकम् 'पापीयः' अतिशयितं पापं, पराजयः प्राप्नोति । इम मेवातिशय मुपपादयति— "भूयो हि मानुषी वाग्वदति"-इति । तिर्यग्वाचः सकाशात् 'भूयः' बहुतरं हि मानुषी वाग्वदति; वर्णपदवाक्यात्मना कस्यचिदर्थस्य प्रतिपादकत्वात् । एतदाकर्ण्य तावेव पुरोहितावस्यापि प्रतिक्रियाश्चक्रतुरित्याह— "किलाता-कुली हैवोचतुरिति ॥ १६ ॥

"सा यज्ञ मेवेति । असुरघ्नी या वाक्, क्रमेण मनोः ऋषभे जायायां चासीत्, 'सा' तयोर्हननान्निराश्रया सती यज्ञ मेव आश्रयितुं 'यज्ञपात्राणि प्रविवेश' । 'ततः' तेभ्यो यज्ञपात्रेभ्यः सकाशात् 'एनां' वाचं 'निर्हन्तुं' निर्गमयितुं न शेकतुः असुर-पुरोहितौ । 'सैषा' यज्ञपात्रगता असुरघ्नी वाक्, ग्राम्यया[1] समाह-ननादुद्गच्छति । एवं यज्ञपात्रध्वनेरसुरराक्षसादिनिवृत्तिहेतुतां प्रतिपादिता मुपसंहरति— "स यस्येति ॥ १७ ॥

विहितं समाहनन मनूद्य मन्त्रं विधत्ते— "समाहन्ति कुक्कुटो-सीति[2] । मधुजिह्वइतिविशेषणस्याभिप्राय माह— "स यो देवेभ्य इति । 'सः' खलु ऋषभः देवानां 'मधुजिह्वः' मधुरवाक् आसीत्; जयहेतुत्वात् । असुरेभ्यस्तु 'विषजिह्वः' विषवागासीत्; पराजय-

१— "गदया सदृग्भी बाऽपरिमिता ग्राम्या"—इति सा० (तै० सं० १.२.१२) "ग्राम्या द्वाविंशद्गुलप्रमाणा वारुणी"—इति या० दे० (का०५.३.१६)।

२— वा० सं० १. १६. १ । "असुराः क्व क्व इति तान् हन्तु मिच्छन् योऽटति, सर्वत्र सञ्चरति स कुक्कुटः । यद्वा कुत्सितं कूजं कुटति तनोतीति कुक्कुटः । यद्वा कुक्कुटाख्यपक्षिवत् ध्वनिविशेष मसुर-भीत्यर्थं तनोतीति कुक्कुट इत्युपचर्यते"—इति तद्भाष्ये महीध० ।

हेतुत्वात्। एवञ्च मधुजिह्व इति विशेषणस्याय मभिप्रायः—देवानां यादृग आसीः[१], अतोऽस्माकं[२] तादृशो भवेति।

इष मूर्ज मावहेत्यादिमन्त्रशेषस्य सप्तार्थता माह—"नाचेति। 'अत्र' अस्मिन्मन्त्रे किमपि तिरोहितं[३] नैवास्ति, अतो न व्याख्यायत इत्यर्थः॥ १८॥

अथ समन्त्रकं[४] शूर्पाधानं[५] विधत्ते—"अथेति। शूर्पस्य वर्षवृद्धत्व मुपपादयति—"यदि नडानां यदि वेणूनां यदीषीकाणाम्"-इति। जलप्रान्ते वर्त्तमानास्तृणविशेषा नडाः। नलादीनि द्रव्याणि शूर्पस्योपादानभूतानि। 'वर्षम्' उदकवृष्टिरेव हि 'एताः' नडाद्याः ओषधीर्वर्द्धयति, अतो वर्षवृद्धत्वात् शूर्पस्य 'वर्षवृद्धं मसि'-इति व्यपदेशः॥ १९॥

तस्मिन् शूर्पेऽवहतानां व्रीहीनां प्रक्षेपं विधत्ते—"अथ हविर्निर्वपतीति। 'निर्वपति' उलूखलान्निष्कृष्य (अवहतान् व्रीहीन्[६]) प्रक्षिपतीत्यर्थः। हे हविः! वर्षवृद्धं त्वा शूर्पं प्रति 'वेत्तु' आत्मन उपर्यवस्थानं जानात्विति मन्त्रार्थः[७]।

हविषो वर्षवृद्धत्व मुपपादयति—"वर्षवृद्धा उ हीति। व्रीहि-

१— 'आसीत्'-इति जादिषु।

२— 'नोऽस्माकं'-इति ठ, 'सोऽस्माकं'-इति ड।

३— १७ पृ० १९ पं०, ५ टीप्पनी द्रष्टव्या।

४— वा० सं० १. १९. २। का० श्रौ० सू० २. ४. १६।

५— 'शूर्पादानं'-इति ठ। इह सर्वत्रैव शूर्पशब्दो दन्त्यादिः ड-पुस्तके।

६— ठ-पुस्तकादन्यत्र नैते पदे विद्येते।

७— वा० सं० १. १९. ३। का० श्रौ० सू० २. ४. १७।

यवयोरन्यतरो हि हविष उपादानम्; "व्रीहिभिर्यजेत"-"यवैर्यजेत"-इति विकल्पेन[1] यागसाधनत्वश्रवणात्। व्रीहियवाद्योषधयस्य वृष्ट्या वर्द्धन्त इति प्रसिद्ध मित्यर्थः।

"प्रति त्वा"-इत्यस्याभिप्राय माह— "तत्सञ्ज्ञा मेवैतच्छूर्पाय"-इति। शूर्पहविषोरन्योन्यं हिंसा मा भवेदिति। 'शूर्पाय च'-इति चशब्दात् हविषे च। 'सञ्ज्ञां' सञ्ज्ञानम्। समानज्ञानत्व मेव मन्त्रो वदतीत्यर्थः ॥ २० ॥

तुषाणा मपनयनं समन्त्रकं[2] विधत्ते— "अथ निष्पुनातीति। तुषाणां राजसभागत्वात् तैस्तन्निरसनं विधत्ते— "अथ तुषान् प्रहन्त्यपहतम्"-इति[3]। 'प्रहन्ति' प्रक्षिपन्ति।

एतन्मन्त्रद्वयस्य प्रयोजन माह— "तन्नाद्या एवैतदिति ॥ २१ ॥

वितुषीकृतानां तण्डुलानां व्रीहीणाञ्च पृथक्करणं विधत्ते— "अथापविनक्तीति। मन्त्र[4]गतवायुशब्दस्यार्थ माह— "अयं वै वायुर्योऽयं पवते"-इति। तस्य विवेचनसामर्थ्य मुपपादयति— "एष वा इदꣳ सर्वं विविनक्ति"-इति। 'तत्' तस्मात् सर्वस्यास्य विवेचकत्वात् 'एष एव' वायुः 'एनान्' व्रीहींस्तण्डुलांश्च 'विविनक्ति' पृथक् करोति, अतस्तत्सार्थनं युक्त मित्यर्थः। "स यदैत इति। 'यद्वा'

१— म०सं० २अ० १४, १५ श्लोकौ द्रष्टव्यौ। "एकार्थास्तु विकल्पेरन्"-इत्यादीनि जैमिनिसूत्राणि (१२.३.१०-१५.) चेहेक्षितव्यानि।

२— वा० सं० १. १६. ३। का० औ० सू० २. ४. १८।

३— वा० सं० १. १६. ५। का० औ० सू० २. ४. १९।

४— वा० सं० १. १६. ६। का० औ० सू० २. ४. २०।

यस्मिन् काले 'एते' प्रोक्षितदर्भाः 'एतद्' विवेचनं प्राप्नुवन्ति, तस्मिन् समये 'यत्र' यस्यां पात्र्याम् 'अधि' उपरि एनान् अपविनक्ति ॥ २२ ॥

तत्प्राचीगतस्य हविषः समन्त्रक मनुमन्त्रणं विधत्ते[1]—"अथानुमन्त्रयते"-इति। यथा चैते तण्डुलाः 'अच्छिद्रेण' छिद्ररहितेन पाणिना 'सुप्रतिगृहीताः' शोभनं प्रतिगृहीता भवेयुः, तथा प्रतिग्रहादिति मन्त्रार्थः[2]।

फलीकरणं विधत्ते[3]—"अथेति। तस्य चित्तं प्रशंसति—"चित्तद्धि यज्ञः"-इति। सवनत्रयादिरूपेण चिरावृत्तो हि यज्ञः; अतस्तदनुसारेण फलीकरणमपि चिः[4] कर्त्तव्य मित्यर्थः ॥ २३ ॥

तस्मिन् फलीकरणे प्राक्षान्तरीयं मन्त्रविधि मनुवदति—"तद्वैश्वे देवेभ्य[5] इति। तं निषेधयति—"तदु तथा न कुर्यात्"-इति। एतदुपपादयति—"आदिष्टं वा एतद्दैवतायै"-इति। "अग्नये जुष्टं गृह्णामि"-इत्येव मग्न्यादिदेवतायै आदिष्ट मेवैतद्धविर्भवति। अथ तु "देवेभ्यः शुन्धध्वम्"-इत्यनेन मन्त्रेण[6] 'एतद्' हविः 'वैश्वदेवम्' विश्वदेवसम्बन्धि करोति; अतो देवानां[7] एतन्मन्त्रप्रयोगे 'समदं' परस्परं कलहं करोति। अतो वैश्वदेवत्वापादकं मन्त्रं

१— 'तत्प्राचीगतं हविरनुमन्त्रयते'-इत्येव ट।

२— वा० सं० १. १६. ७। का० औ० सू० २. ४. २१।

३— का० औ० सू० २. ४. २२। ४— 'चिच्छृतः'-इति ट।

५— "वौषा प्रतिपर्यायं सकृन्मन्त्रप्रायार्था"-इति या० दे०।

६— प्राक्षान्तरीय एष मन्त्रः। ७— 'देवतानां'-इति आदिषु।

परित्यज्य तूष्णी मेव फलीकर्त्तव्य मिति निगमयति—"तस्माद् तूष्णी मेव फलीकुर्यात्[1]"—इति ॥ २४ ॥ ४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये प्रथमकाण्डे प्रथमाध्याये चतुर्थं ब्राह्मणम्[2],

प्रथमाध्यायश्च समाप्तः ॥ १ ॥

१— "ग्रैव्याच्छादकदोषापनयनं फलीकरणम्"—इति तै० सं० १. १. ५ भाष्येऽप्य मेव सायणः । इह तु कणनिष्काशनं फलीकरणम् ।

२— चतुर्थेऽस्मिन् ब्राह्मणे विहितान्येतानि—कृष्णाजिनस्यादानम्, अवधूनम्, तत उदकोपस्पर्शनम्, तत उत्तरेण गार्हपत्य मुत्करदेशे वा प्रत्यगग्रीवस्य कृष्णाजिनस्योत्तरणम्, तदुपरि उलूखलस्थापनम्, तत्र पूर्वस्थापितस्य हविर्द्रव्यस्य शूर्पेणावपनम् । ततोऽध्वर्युयजमानयोर्वाग्विसर्गः । ततोऽध्वर्युः मुशलं गृहीत्वा उलूखलमध्ये प्रवेश्य कण्डनं कुर्वन्नेव तत्कण्डनाय यजमानपत्नी मन्त्रोधं वा निराह्वयति । तस्मिन्नेव काले आग्नीध्रः द्विर्दृषदं कुट्टयति उपलं चैकवारम् । विदुलीभूतेषु व्रीहिषु अध्वर्युः शूर्पं गृहीत्वा, कण्डितं तद्धविस्तस्मादुलूखलान्निष्काश्य तूष्णीं शूर्पे निदधाति । ततः शूर्पेण 'निष्णुनाति' तुषान् पृथक् करोति, पुनरप उपस्पृश्य तण्डुलानकण्डितांश्च 'विविनक्ति' पृथक् पृथक् करोति । ततः कण्डितान् निधाय अकण्डितान् पुनरुलूखलमध्ये प्रवेश्य कण्डनं कृत्वा पुनर्निष्काश्य शूर्पे कृत्वा तुषान् पृथक् कुर्यात्, निक्षिपेच्च सर्वान् तान् तुषानुत्करदेशे । पुनरप उपस्पृश्य शूर्पस्थांस्तां-

[अथ द्वितीयाध्याये प्रथमं ब्राह्मणम्]

स वै कपालान्येवान्यतरꣳ ऽउपदधाति । दधदुपलेऽअन्यतरस्तद्वा ऽएतदुभयꣳ सहꣳ क्रियते तद्यदेतदुभयꣳ सहꣳ क्रियते* ॥ १ ॥

शिरो ह वा ऽएतद्यज्ञस्य यत् पुरोडाशः । स यान्येवेमानि शीर्ष्णः कपालान्येतान्येवास्य कपालानि मस्तिष्क ऽएव पिष्टानि तद्वा ऽएतदेक मुꣳ मेकꣳ सहꣳ करवाव समानं करवावेति तस्माद्वा ऽएतदुभयꣳ सहꣳ क्रियते ॥ २ ॥

स यः कपालान्युपदधाति । सꣳ ऽउपवेष मादत्ते धृष्टिरसीति स यदेनेनाग्निं धृष्णुवोपचरति तेन धृष्टिरथ यदेनेन यज्ञꣳ ऽउपालभत ऽउपेव वा ऽएनेनैतद्देवेष्टि तस्मादुपवेषो नाम ॥ ३ ॥

तेन प्राचोऽङ्गारानुदूहति । अपाग्ने अग्निं मामादं जहि निष्क्रव्याद्ꣳ सेधेत्ययं वा ऽआमादग्नेर्नेदं मनुष्याः पक्वकाश्नन्त्यथ येन पुरुषं दुहन्ति सꣳ क्रव्यादेतावेवैतदुभावतोऽपहन्ति ॥ ४ ॥

स्तण्डुलान् पात्र्यां प्रक्षिप्याभिमन्त्रयते ; तण्डुलाननामिकाग्रेण स्पृशन् विलोकयन् वा मन्त्रं पठतीत्यर्थः । ततस्तैः फलीकरणम् ; त्रिःकरद्वयेन सूक्ष्मकणिकाभ्यो वियोज्योज्वलान् करोतीत्यर्थः ।

* तद्यदित्याद्यन्तिमांशो ग-पुस्तके नास्ति ।

अथाङ्गार मास्कौति। आ देवयुजं व्वहेति यो देवयाट् तस्मिन् हवीꣳषि अपयाम तस्मिन् यज्ञं तनवामहा ऽइति तस्माद्वा ऽआस्कौति ॥ ५ ॥

तं मध्यमेन कपालेनाभ्युपदधाति। देवा ह वै यज्ञं तन्वानास्ते ऽसुररक्षसेभ्य आसङ्गाद् बिभयाञ्चक्रुर्नेन्नोऽधुस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि* रक्षसा मपहन्ता तस्मादेव मुपदधाति तद्युदेषु एव भवति नान्यु एष हि युजुष्कृतो मेध्यस्तस्मान् मध्यमेन कपालेनाभ्युपदधाति ॥ ६ ॥

स उपदधाति। ध्रुवु मसि पृथिवीं दꣳहेति पृथिव्या ऽएवु रूपेणैतदेवु दꣳहत्येतेनैवु† द्विषन्तं भ्रातृव्य मुवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य व्वधायेति‡ बह्वी वै युजुःष्वाशीस्तद् ब्रह्म च क्षत्रं चाशास्त ऽउभे व्वीर्ये सजातवनीति भूमा वै सजातास्तद्भूमान माशास्त ऽउपदधामि भ्रातृव्यस्य व्वधायेति§ यदि नाभिचरेद् यद्यु अभिचरेदमुष्य व्वधायेति¶ ब्रूयादभिनिहित मेवु सव्यस्य पाणेरङ्गुल्या भवति ॥ ७ ॥

---

* 'न्नित्यग्निर्हि'–इति ख। † 'ात्येतेनैवु'–इति ग।
‡, §, ¶ एषु स्थानेषु 'बधायेति'–इति पवर्गीयादिपाठः च-पुस्तके।

अथाङ्गार मारक्षति । नेदिहु पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसा मपहन्ता तस्मादभिनिहित मेव सव्यस्य पाणेरङ्गुल्या भुवति ॥ ८ ॥

अथाङ्गार मुध्यूहति । अग्ने ब्रह्म गृभ्णीष्वेति नेदिहु पुरा नाष्ट्रा रक्षाꣳस्याविशानित्यग्निर्हि रक्षसा मपहन्ता तस्मादेव* मुध्यूहति ॥ ९ ॥

अथ यत्पश्चात् तदुपदधाति । धरुण मस्यन्तरिक्षं दृꣳहेत्यन्तरिक्षस्यैव रूपेणैतदेव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्य मवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य व्यधायेति† ॥ १० ॥

अथ यत्पुरस्तात् तदुपदधाति । धर्त्र मसि दिवं दृꣳहेति दिव एव रूपेणैतदेव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्य मवबाधते ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य व्यधायेति‡ ॥ ११ ॥

अथ यद्दक्षिणतस्तदुपदधाति । व्विस्वाभ्यस्त्वाशाभ्य उपदधामीति । स यदिमांल्लोः§कानुति चतुर्थ मुस्ति वा नु वा तेनैवैतद् द्विषन्तं भ्रातृव्य मवबाधते ऽनड्वा वै तद् यदिमांल्लो¶कानुति चतुर्थ मुस्ति वा न वानड्वो

---

* 'तस्मादेव'—इति च । †, ‡ 'व्यधायेति'—इति च ।

§, ¶ एतदुभयत्रैव 'यदिमाल्लो'—इति निरनुनासिकपाठो ग-पुस्तके ।

तद्यद्विश्वा आशास्तस्मादाह विश्वाभ्यस्त्वाशाभ्य उप-दधामीति तूष्णीं वैवेतराणि* कपालान्युपदधाति च्युत स्थोर्द्ध्वच्युत इति वा ॥ १२ ॥

अथाङ्गारैरुभ्यूहति। भृगूणा मङ्गिरसां तपसा तप्यध्व मित्येतद्वै तेजिष्ठं तेजो यद् भृग्वङ्गिरसाꣳ सुतप्तान्यसन्निति तस्मादेवं† मुभ्यूहति‡ ॥ १३ ॥

अथ यो दृषदुपले उपदधाति। सु कृष्णाजिन मादत्ते शुर्म्मासीति तदवधूनोत्यवधूतꣳ रक्षो ऽवधूता अरातय इति सोऽसावेव बन्धुस्तुत्§ प्रतीचीनग्रीव मुपस्तृणात्युदित्यास्त्वगसि प्रति त्वादित्यर्व्वेच्चिति सो-ऽसावेव बन्धुः ॥ १४ ॥

अथ दृषद् मुपदधाति। धिषणासि पर्वती प्रति त्वा-दित्यास्त्वग्वेच्चिति धिषणा हि पर्वती हि प्रति त्वादि-त्यास्त्वग्वेच्चिति तत् सञ्ज्ञा मेवैतत् कृष्णाजिनाय च व्यदति नेदुन्योऽन्युꣳ हिनुसात¶ ऽइतीयु मेवैषा पृथिवी रूपेण‖ ॥ १५ ॥

अथ शुम्या मुदीचीनाग्रा मुपदधाति। दिव स्कम्भ-

---

* 'वैवेतराणि'–इति च। † 'तस्मादेनु'–इति च।

‡ 'मुध्यूहति'–इति क, 'मुभ्यूहति'–इति ख।

§ 'बन्धूस्तत्'–इति क। ¶ 'हिनुसाव'–इति च।

‖ 'रूपेण'–इति ख, 'रूपेण'–इति– च।

नीरसीत्यन्तरिक्ष मेव रूपेणान्तरिक्षेण हीमे द्यावा-पृथिवी व्विष्टब्धे तस्मादाह दिव स्कम्भनीरसीति* ॥१६॥

अथोपला मुपदधाति । धिषणासि पार्व्वतेयी प्रति त्वा पर्वती व्वेच्चिति कनीयसी ह्येषा दुहितेव भवति तस्मादाह पार्वतेयीति प्रति त्वा पर्व्वती व्वेच्चिति प्रति हि स्वः सञ्जानीते तत् सञ्ज्ञा मेवैतद् दृषदुपलाभ्यां व्यदति नेदन्योऽन्यꣳ हिनसात† इति द्यौरेवैषा रूपेण हनू ऽएव दृषदुपले जिह्वैव शुम्या तस्माच्छुम्यया स-माहन्ति जिह्वया हि व्यदति‡ ॥ १७ ॥

अथ हविर्धिवपति । धान्य मसि धिनुहि देवा-निति धान्यꣳ हि देवान् धिनवदित्यु हि हविर्यच्छते§ ॥ १८ ॥

अथ पिनष्टि । प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घा मनु प्रसिति मायुषे धा मिति प्रोहति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वेति ॥ १९ ॥ (शतम् १००¶) ॥

तद्यद्देवं पिनष्टि । जीवं वै देवानाꣳ हविरमृत

---

* 'रसीति'–इति च ।

† 'हिनुसाव'–इति च । ‡ 'व्युदति'–इति ख ।

§ 'हविर्गृह्णते'–इति ख, 'हविर्गृह्यते'–इति च ।

¶ "शतकण्डिकाः"–इति ख ; क-ग-पुस्तकयोर्नास्त्येवैतत् ।

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ...	Rs.	1	14
Mu'takhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /6/ each		5	10
Mu'takhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; and 2 Indexes Vol II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc 1–19 @ /6/ each		7	2
Ma'āsir-i-'Āmmgīrī, (Text), Fasc. 1–6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Nizāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāzu-s-Salātīn, (Text) Fasc 1-5 @ /6/ each		1	14
*Suyūty's Itqān on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc 7–10 @ 1/ each		4	0
Tabaqāt-i-Nāsiri, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārikh-i-Firūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc 1–7 @ /6/ each...		2	10
Tārikh-i-Firūzshahi, of Shamsu-i-Sirāj Afif. (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc 1-2 @ 1/8/ each		3	0
Wis o Rāmin (Text) Fasc 1–5 @ /6/ each		1	14
Zafarnamah, Vol I, Fasc 1–9, Vol II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol VII, Vols XI and XVII, and Vols XIX and XX @ 10/ each ..	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No., and from 1870 to date @ /8/ per No		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12) 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), @ 1/8 per No. to Members and @ 2/ per No to Non-Members			
	N. B.—The papers enclosed in brackets give the number of Nos. in each Volume.			
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	General Cunningham's Archæological Survey Report for 1863–64 (Extra No, *J. A. S. B*, 1864)	2	0
	A sketch of the Turki Language as spoken in Eastern Turkistan by R. B. Shaw (Extra No. *J. A. S. B.*. 1878) . .	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No, *J. A. S. B*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.* 1875)	4	0
	Introduction to the Maithilī Language of North Bihār by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B* 1882)	4	0
5.	Anis-ul-Musharrahin	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Istilāhāt-us-Sufiyah, edited by Dr. A. Sprenger, 8vo.	1	0
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
10.	Jawāmlu-l-'ilm ir-riyazi, 168 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Korös	10	0
16.	Ditto Grammar ,, ,, ...	8	0
17.	Kaçmiraçabdāmrta, Parts I & II @ 1/8/	3	0
	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

16-1-1900.

Books are supplied by V-P.P.

Nyayabindutīkā, (Text)	Rs.	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each		3	6
Padumawatī Fasc. 1-3 @ 2/		6	6
Pariçiṣṭa Parvan, (Text) Fasc. 1-5 @ /6/ each		1	14
Prithivirāj Rāsa, (Text) Part II. Fasc. 1-5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākrta Laksaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II, Fasc. 1-6; Vol. III, Fasc. 1-5 @ /6/ each		7	2
Parāçara, Institutes of (English)		0	12
Prabandhacintāmani (English) Fasc. 1-3 @ /12/ each		2	4
*Sāma Veda Saṁhitā. (Text) Vols. I, Fasc. 5-10; II, 1-6; III, 1-7; IV, 1-6; V, 1-8. @ /6/ each Fasc.		12	6
Sānkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each		1	8
Ditto (English) Fasc. 1-3 @ /12/ each		2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā. (Text) Fasc. 12-45 @ /6/ each		12	12
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each		7	2
Tattva Cintāmani, (Text) Vol. I, Fasc. 1-9. Vol. II. Fasc. 1-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-9 @ /6/ each		13	8
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai. (Text) Fasc. 1-5 @ /6/ each		1	14
Upamiti-bhava-prapañca-kathā (Text) Fasc. 1-2 @ /6/ each ...		0	12
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each		5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each		4	8
Visnu Smṛti, (Text) Fasc. 1-2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each		2	10
Vrhannāradīya Purāṇa. (Text) Fasc. 1-6 @ /6/		2	4
Vrhat Svayambhū Purāṇa, Fasc. 1-5		1	14
Tibetan Series.			
Pag-Sam Thi S'iñ, Fasc. 1-4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5, @ 1/ each		13	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each		10	0
Arabic and Persian Series.			
'Ālamgīrnāmah. with Index. (Text) Fasc. 1-13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1-2 @ /12/		1	8
Āin-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each		37	0
Ditto English Fasc, 1-5 @ 1/ each		5	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each		7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each		21	0
Farhang-i-Rashidī, (Text) Fasc. 1-14 @ 1/ each		14	0
Fihrist-i-Tūsī, or, Tūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each		3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each		3	6
Ditto of Azādī, (Text) Fasc. 1-4 @ /6/ each		1	8
Haft Asmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngirī, (Text) Fasc. 1-3 @ /6/ each		1	2
Isābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāsir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each		13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 973.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAŚRAMĪ.

VOL. I, FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1900.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	1
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	1
Aphorisms of Śāṇḍilya, (English) Fasc. 1		0	1
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each			
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dipikā Vol. I, Fasc. 1–2		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Catalogue of Sanskrit Books and MSS., Fasc. 1–2 @ 2/ each ...		4	0
Çatapatha Brāhmaṇa, Fasc. 1–2		0	12
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1		0	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–14 @ /6/ each ...		4	2
Ditto Lāṭyāyāna, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1		0	6
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–7 @ /6/ each		2	10
Manuṭīkā Saṅgraha, (Text) Fasc. 1–4 @ /6/ each		1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4

ममृताना मुथैतदूलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥ २० ॥

स यदाह । प्राणाय त्वोदानाय त्वेति तत्प्राणोदानौ दधाति व्यानाय त्वेति तद्व्यानं दधाति दीर्घा मनु प्रसिति मायुषे धा मिति तदायुर्दधाति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीतान्यसन्निति चक्षुषे त्वेति तच्चक्षुर्दधात्येतानि वै जीवतो भवन्त्येव मु हैतज्जीव मेव देवानाꣳ हविर्भवत्यमृत ममृतानां तस्मादेवं पिनष्टि पिꣳषन्ति पिष्टान्यभीन्धते कपालानि ॥ २१ ॥

अथैक माज्यं निर्वपति । यद्वा ऽआदिष्टं देवतायै हविर्गृह्यते यावद्देवत्यं तद्भवति तदितरेण युजुषा गृह्णाति न वा ऽएतत् कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्मादनिरुक्तेन युजुषा गृह्णाति महीनां पयोऽसीति मह्य इति ह वा एतासा मेकं* नाम यद् गवां तासां वा ऽएतत् पयो भवति तस्मादाह महीनां पयोऽसीत्येव मु हास्यैतत् खलु युजुषैव गृहीतं भवति तस्मादेवाह महीनां पयोऽसीति ॥ २२ ॥ ५ ॥

॥ इति प्रथमप्रपाठके पञ्चमं ब्राह्मणम् [२.१.] ॥

* "मेके"—इति च ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, त मह वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

एवं प्रथमेऽध्याये व्रतोपायनादि तण्डुलकरणान्तं प्रयोगजात मुक्तम् ; अथ द्वितीये कपालोपधानादिरभिधीयते ।

तत्र कपालोपधानपेषणयोर्युगपदनुष्ठानं विधत्ते— "स वै कपालानीति । 'अन्यतरः' ऋत्विजां मध्ये एकः आग्नीध्रः[1], 'सः' कपालाना मुपधाता । 'अन्यतरः' अध्वर्युः, 'सः' पेषणार्थं दृषदुपले उपदध्यात् । उक्तं कर्त्तृभेद मुपपादयति— "तद्वा एतदुभयꣳ सह क्रियते"-इति । एककर्त्तृकत्वे हि पर्यायेणानुष्ठानं स्यात्, एतच्चोभयं सहानुष्ठेयम् ; अतो विभिन्नावेव कर्त्तारौ युगपत् कुर्याता मित्यर्थः । एतत् सहानुष्ठान मुपपादयितु मनुवदति— "तद्यदिति ॥ १ ॥

उपपादयति[2]— "शिरो ह वा एतद् यज्ञस्य यत् पुरोडाश इति । पुरोडाशस्य प्रतिज्ञातं यज्ञशिरस्त्वं सम्पादयति— "स यान्येवेमानीति । "मस्तिष्क एवेति । शिरःकपालान्तर्गतं मांसं 'मस्तिष्कः' । "तद्वा एतदिति । 'तत्' एतत् कपालं मस्तिष्करूपं मिलितं सत् शिरस्त्वञ्चक मेक मङ्गं प्रसिद्धं लोके । तथाचापि शिरःकपालमस्तिष्कसंस्तुतयोः कपालपिष्टयोः सह प्रयोगात् पुरोडाशात्मकस्य यज्ञशिरसः एकीकरणं सेत्स्यतीत्यभिप्रायः ॥ २ ॥

१— 'आग्नीध्रादिः'-इति ठ । २— 'तदुपपादयति'-इति ढ ।

तच्च कपालान्युपदधतः इत्य माह— "स उपवेष[1] मादत्ते धृष्टिरसि"-इति[2]। अङ्गारविभजनार्थं काष्ठ मुपवेषः[3]। धृष्टिशब्दं निर्वक्ति— "स यदेनेनेति। 'धृष्णिव'-इति क्रियाविशेषणम्। "ञि धृषा प्रागल्भ्ये"-इत्यस्मात्[4] धृष्णोत्यनेनेति धृष्टिरिति करणे क्तिच्नित्यर्थः। अत एवैतदुपवेषस्य मञ्ज्ञान्तरम्। तथा चान्यत्र श्रूयते— "धृष्टिरुपवेषः"-इति[5]। "अथेत्यादि उपवेषस्य निर्वचनम्[6]। अथ यज्ञे 'एनेन' काष्ठेन 'यत्' अङ्गारादिकम् 'उपालभते' प्राप्नोति। 'तत्' एतत् 'एनेन' उपवेषेण 'वेवेष्टीव'। "विष्लृ व्याप्ता-वित्यस्मात्[7] करणसाधनो घञन्त उपवेषशब्दः॥ ३॥

अग्निगताशुद्धांशस्य निरसनं विधत्ते— "तेनेति। 'प्राचः'-इति विधेयविशेषणम्, प्राग्दिग्गतानित्यर्थः।

मन्त्रगतयोरामात्क्व्याच्छब्दयोर्विवक्षित मर्थ माह— "अयं वा इति। आम मपक्व मत्तीति 'आमात्', मनुष्याणा मोदन-पाकादिहेतुरग्निः; क्रव्यं पलल मत्तीति 'क्रव्यात्'-इति शव-दहनोऽग्निः[8]॥ ४॥

१— 'उपवेष्ट'—इति तालव्योपधः जादिषु। एव मिहोत्तरत्रापि।

२— वा सं० १. १७. १। का० श्रौ० सू० २. ४. २५।

३— "पलाशशाखाया मूलदेशे छिन्न उपवेषः"—इति महीधरः।

का० श्रौ० सू० २. ४. १५. द्रष्टव्यम्। ४— खा० प० २३।

५— का० श्रौ० २६. २. १०; ३. ६; ७. २८।

६— 'उपवेषनामनिर्वचनम्'—इति ठ, ड। ७— जु० उ० १३।

८— वा० सं० १. १७. २। का० श्रौ० सू० २. ४. २६।

९— 'शवदाहकोऽग्निः'—इति ठ, ड।

एव मयज्ञिय मग्निं मन्त्रेण निर्हृत्य[1] शुद्धादग्नेः पुरोडाशअपणार्थं मङ्गाराहरणं विधत्ते— "अथेति। 'आस्कौति' विभजतीत्यर्थः। "स्कुञ् आप्रवणे"-इति धातुः[2]। दृत्यं कुर्वता मभिप्राय माह— "य इति। देवान् यजति इति 'देवयाट्', 'यः' अग्निः, तस्मिन् हविःअपणादिकं करवामहा इत्यनेनाभिप्रायेणेत्यर्थः॥ ५॥

तस्मिन्नङ्गारे मध्यमकपालस्योपधानं विधत्ते— "त मिति। अङ्गारस्योपरि विहितं कपालोपधानं प्रशंसति— "देवा ह वा इति। "नेन्नः"-इति। 'न' अस्माकं हविषो भागेनैव[3] राक्षसादय उपोत्तिष्ठेयुरित्यनेनाभिप्रायेणाङ्गारस्योपरि कपालोपधानं कृतवन्त इत्यर्थः।

एवं सत्युक्तभयनिवृत्ति माह— "अग्निर्हीति। "आ देवयजम्"-इतिमन्त्रेण[4] स्थापितस्यैवाङ्गारस्योपरि कपालोपधानं प्रशंसति— "तद्यदिति। यजुषा मन्त्रेण संस्कृतत्वादेष एव हि कपालोपधाने मुख्यः; नान्य इत्यर्थः॥ ६॥

विहित मुपधान मनूद्य मन्त्रं विधत्ते— "स उपदधातीति। "पृथिवीं दृꣳहेति[5]। पृथिवीसम्बन्धश्रवणात् तत्सम्बन्धिरूपेणैतदेव कपालं दृढं करोति। दृढेन चैतेन कपालेन विद्वेषणं कुर्वन्तं शत्रु मवबाधते।

१— 'निर्हृत्य'-इति ठ, ड। २— 'आप्रवरणे'-इति ढ।
३— ब्रा० उ० ६। ४— 'हविषोऽधोभागेनैव'-इति ठ।
५— वा० सं० १. १७. ३। का० औ० २. ४. २८।
६— वा० सं० १. १७. ४। का० औ० सू० २. ४. २९।

एतन्मन्त्रशेष मनूद्य व्याचष्टे— "ब्रह्मवनीति। "बह्वी वा इत्यादि। 'यजुष्षु' यजुर्मन्त्रेषु बहुविधा खलु 'आशीः' फलप्रार्थना, अतो बहुविधं ब्रह्मचत्रादिसभाजन मनेन प्रतिपाद्यत इत्यर्थः।

मन्त्रगतयोर्ब्रह्मचत्रशब्दयोर्लक्षणया तद्वीर्यपरत्वं विवक्षित मिति व्याचष्टे— "उभे वीर्ये"-इति। "भूमा वा इति। समानं जातमस्य इति 'सजाताः' ज्ञातयः। तेषु च बहुभावस्य दर्शनात् धर्मिवाचिना सजातशब्देन तद्धर्मा विवक्षित इत्यर्थः।

अभिचरतो विशेषं वक्तुम् उक्तं[1] नित्यपक्ष मनुवदति— "उपदधामि भ्रातृव्यस्येति। त मेव विशेषं दर्शयति— "यदु अभिचरेदिति। अभिचरणपक्षे 'भ्रातृव्यस्य वधाय'-इति स्थाने 'अमुष्य वधाय'-इति शत्रोर्नाम षष्ठ्यन्तं निर्दिश्य ब्रूयादित्यर्थः।

उपहितस्य कपालस्य उपर्यङ्गारस्था अभिनिधानं विधत्ते— "अभिनिहित मेव"-इति ॥ ७ ॥

दक्षिणहस्तेनान्यस्याङ्गारस्याहरणं विधत्ते— "अथेति। "मेहि-हेत्यादि। यदि सव्यपाण्यङ्गुल्या अभिनिधानं न कुर्यात्, तर्हि 'इह' अस्मिन् कपाले उपर्यङ्गारनिधानात् पुरस्तादेव राक्षसाः प्रविशेयुः; नैव तथा स्यादिति अङ्गुल्या[2] अभिनिहित मेव भवेदित्यर्थः। तथा सत्युक्तदोषनिवृत्ति माह— "ब्राह्मणो ह्येति। अग्निः यथा दाहेन रक्षांसि हिनस्ति, एवं ब्राह्मणोऽपि मन्त्रसामर्थ्येन तेषां

१— नास्त्येतत् पदं जादिषु।

२— "राक्षसाः प्रविशेयुः; अतः कपालस्योपरि अङ्गाराधूहनपर्यन्तम् अङ्गुल्या"—इत्येवं विशेषपाठो ढ—पुस्तके।

ष्टिंसकः; अतोऽङ्गाराधूहनपर्यन्त मङ्गुल्याभिनिहित मेव भवेदित्यर्थः ॥ ८ ॥

समन्त्रकं[1] कपालस्योपरि अङ्गाराधूहनं विधत्ते— "अथेति। "नेदिह पुरेति। 'पुरा' पुरोडाशाधिश्रयणात् प्रागित्यर्थः। अन्यत् पूर्ववत् ॥ ९ ॥

पाश्चात्यकपालस्योपधानं[2] विधत्ते— "अथेति। मध्यमकपालस्योपधानानन्तर्यम् 'अथ'-शब्दार्थः। अन्यत् सर्वं पूर्ववद्व्याख्येयम् ॥ १० ॥

मध्यमकपालात् पूर्वदेशे स्थाप्यस्य कपालस्योपधानं[3] विधत्ते— "अथ यदिति। "दिव एव रूपेण"-इति। दिवः सम्बन्धिना रूपेण 'एतत्' तृतीयं कपालं दृढीकरोतीत्यर्थः ॥ ११ ॥

दक्षिणभागस्थितस्य कपालस्योपधानं विधत्ते— "अथ यदिति। मन्त्रस्य तात्पर्यं माह— "स यदित्यादिना। पूर्वैः[4] हि त्रिभिरुपहितैः कपालैः पृथिव्यादिलोकत्रयसकाशाच्चतुर्थोऽयं प्रतिपादितः, इदानीन्तु 'इमान्' चतुर्लोकान् 'अति' अतिक्रम्य यत् 'चतुर्थं' स्थानम्, तदस्ति वा न वेति सन्दिग्ध मेव; लोकत्रयवत् प्रसिद्धभावात्। अतो मन्त्रे लोकवाचिशब्दविशेषं परित्यज्य "विश्वाभ्यस्त्वाशाभ्य"-इति[5] सर्वशब्दपर्यायस्य विश्वशब्दस्य प्रयोगात् सन्दिग्ध-

---

१— वा० सं० १. १८. १। का० श्रौ० सू० २. ४. ३०।

२— तत्र मन्त्रः — वा० सं० १. १८. २। का० श्रौ० सू० २. ४. ३१।

३ — तत्र मन्त्रः — वा० सं० १. १८. ३। का० श्रौ० सू० २. ४. ३२।

४— 'पूर्वैः'—इति ड—पुस्तकादन्यत्र।

५— वा० सं० १. १८. ४। का० श्रौ० सू० २. ४. ३३।

मानात्[१] सर्वस्मादेव स्थानात् 'द्विषन्तं' ग्रन्थं 'सः' यजमानः 'तेन' चतुर्थकपालोपधानेन बाधत इत्यर्थः ।

"विश्वाभ्यः"-इतिमन्त्रस्य लोकत्रयातिरिक्तपरत्व मुपपादयति— "अनड्वा वा इत्यादि । लोकत्रयातिवर्त्तिनश्चतुर्थस्य सङ्गावोऽसङ्गावस्य 'अनड्वा वै' अस्माक मप्रत्यक्ष एव; यद् 'विश्वा आशाः' सर्वा दिशः, तदप्यनड्वा 'अनड्वैव' अप्रत्यक्ष मेव; (लोकत्रयवत्प्रसिद्ध्यभावात्[२]।) अतोऽप्रत्यक्षदिग्वाचिना विश्वाभ्य आशाभ्य इति[३] पदद्वयेन लोकत्रयव्यतिरिक्तं सकल मेवाप्रत्यक्षं विवक्षित मित्यर्थः ।

एवं कपालचतुष्टयस्य मन्त्रेणोपधानं प्रतिपाद्य अवशिष्टकपालोपधाने पक्षद्वय माह— "तूष्णीं चैवेति ॥ १२ ॥

उपहितेषु कपालेष्वङ्गाराच्छूदनं विधत्ते— "अथेति । मन्त्रे[४] भृगूणा मङ्गिरसा मिति[५] तपसो यद् विशेषणं तद्व्याचष्टे— "एतद्वा इति । यद् 'भृग्वङ्गिरसां' महर्षीणां तपोविशेषजनितं तेजः, 'एतत्' खलु अग्न्यादितेजोऽन्तरात् 'तेजिष्ठं' तेजस्वितमम्, अतिशयेन दीप्तम् । तेजस्वि-शब्दादिष्ठनि "विन्मतोर्लुगिति[६] लुक्। एवं वदतो मन्त्रस्याभिप्राय माह— "सुतप्तानीति। एतान्युपहितानि

१— 'सन्दिग्धमानात्'-इति जादिषु ।

२— नैतद्वाक्यं ठ-पुस्तकादन्यत्र । ३— 'विश्वा आशा इति'-इति ठ ।

४— 'मन्त्रेषु'-इति जादिषु; ठ-पुस्तके तु नास्त्येवैतत् पदम् ।

५— वा० सं० १. १८. ६ । का० श्रौ० सू० २. ४. २५ ।

६— पा० सू० ५. ३. ६५ ।

कपालानि भृग्वङ्गिरसां तपसा सुष्ठु अतिशयेन तप्तानि भवेयुरित्यनेनाभिप्रायेणेत्यर्थः। 'असन्'-इत्यस्तेः पञ्चमलङ्कारे[1] रूपम् ॥ १३ ॥

एवं सहानुष्ठेययोः कपालोपधानमभिधाय पेषणं विधातुमारभते— "अथेति। अवहननवत् पेषणस्यापि[2] कृष्णाजिनस्योपरि कर्त्तव्यता मभिप्रेत्य तदादानं विधत्ते[3]— "स कृष्णाजिन मिति। "सोऽसावेवेति। अवहननप्रकरणे कृष्णाजिनावधूननविधिर्योऽयः प्रागाम्नातः— "तन्नाष्ट्रा एवैतद्रक्षांस्यतोऽपघ्नीति[4], स एवाचाप्यनुषक्त्य योजनीय इत्यतिदेशः।

अस्य कृष्णाजिनस्य स्तरणं विधत्ते— "तदिति। "दृयं वै पृथिव्यदितिः"-इत्यादिना[5] यत् प्रागाम्नात मेव मन्त्रव्याख्यानम्[6], तदयातिदिशति— "सोऽसावेवेति ॥ १४ ॥

तस्य कृष्णाजिनस्योपरि दृषदः समन्त्रकम्[7] उपधानं विधत्ते— "अथेति। "धिषणा द्यौत्यादि। पेषणीयतण्डुलानां धारणाद् 'धिषणा', पर्वतावयवत्वात् 'पर्वती'-इति। एतदुभयं प्रसिद्ध मिति 'हि'-शब्दयोरर्थः। गत मन्यत्। "दृय मेवेति। पार्थिवेन धारणात्मकेन रूपेण योगात् 'एषा' दृषत् दृय मेव पृथिवीति स्तुतिः ॥ १५ ॥

अथ दृषदः पश्चाद्भागे ग्रम्याया उपधानं विधत्ते[8]— "अथ ग्रम्या

१— पा० सू० ३. ४. ७। २— १. ४. ४. (७१, ७६ पृ०) द्रष्टव्यम्।
३— तत्र मन्त्रः— वा० सं० १. १६. १। का० औ० सू० २. ५. २।
४— ७२ पृ० १ प० द्रष्टव्यम्। ५— ७२ पृ० ५ प० द्रष्टव्यम्।
६— 'मेतन्मन्त्रव्याख्यानम्'—इति ठ।
७— वा० सं० १. १६. २। का० औ० सू० २. ५. ३।
८— तत्र मन्त्रः— वा० सं० १. १६. ३।

मिति। 'उदीचीनम्' उदगवस्थित मग्रे यस्याः सा तथोक्ता। कात्यायनोऽप्याह स्म—"पश्चाच्छम्या मुपोहत्युदीचीं दिव इति"-इति[1]। ग्रम्याया द्युलोकस्तम्भनहेतुत्वं वक्तु मन्तरिक्षरूपता माह—"अन्तरिक्ष मेवेति। द्यावापृथिव्यात्मना संस्तुतयोर्दृषदुपलयोर्मध्ये-ऽवस्थानलक्षणेन रूपेण 'अन्तरिक्ष मेव' अन्तरिक्षलोकात्मिकैव 'ग्रम्या', इमे च द्यावापृथिव्यौ अन्तरिक्षेण हि यस्माद् 'विष्टब्धे' विविध मधस्तादुपरिष्टाच्च धारिते, अतोऽन्तरिक्षात्मिका ग्रम्यापि "दिवस्कम्भनीरसीति[2] स्तूयते ॥ १६ ॥

दृषद् उपरि उपलायाः स्थापनं समन्त्रकं[3] विधत्ते—"अथेति। 'पार्वतेयी'-शब्दं व्याचष्टे—"कनीयसीत्यादिना। यस्मादेषोपला अतिशयेन दृषदः सकाशादल्पपरिमाणा, अतः 'एषा' दृषदः 'दुहि-तेव भवति'; दुहिता हि लोके मातुरल्पीयसी भवति। तस्मादेषा पर्वत्याः[4] पुत्री 'पार्वतेयी'-इति। "स्त्रीभ्यो ढक्"-इति[5] ढक्।

"प्रति त्वा पर्वती वेत्तु"-इतिमन्त्रशेषेण परस्परहिंसापरिहारार्थं दृषदुपलयोर्मित्रीकरण मर्थ इति व्याचष्टे—"प्रति ह्येति। उपर्यव-स्थानलक्षणेन रूपेण 'एषा' उपला 'द्यौरेव' द्युलोकात्मिकैवेत्यर्थः। तदेको दृषदुपले समाहन्तीति[6] प्राक् यत् तयोः समाहननं विहि-तम्, तच्च ग्रम्यायाः साधनत्वं प्रसङ्गादुपपादयति—"हनू एवेति।

१—का० श्रौ० सू० २. ५. ४। २—वा० सं० १. १६. ३।
३—वा० सं० १. १६. ४। का० श्रौ० सू० २. ५. ५।
४—'पार्वत्याः'—इति ज। ५—पा० सू० ४. १. १२०।
६—१. ४. १३ (७४ पृ० ११ पं०) द्रष्टव्यम्।

दृषदुपलयोरुभयत्रावस्थानाद्भूनूत्वम्, तन्मध्येऽवस्थानाच्छम्याया: जिह्वात्वम् । यस्माच्च जिह्वया लोको वदति, तस्मात् जिह्वास्थानीयया शम्यैव समाहननं कुर्यादित्यर्थः ॥ १७ ॥

अथ पेषणार्थं दृषद् उपरि समन्त्रकं[१] तण्डुलप्रक्षेपं विधत्ते— "अथ हविरिति । मन्त्रगतधान्यशब्दस्याभिप्राय माह— "देवान् धिनवदिति । "धिवि प्रीणनार्थः"-इति[२] धातुः । यष्टव्यानन्यादि-देवान् 'धिनवत्' प्रीणयेदित्यनेनैवाभिप्रायेण हि हविर्गृह्यते; अतो धिनोति प्रीणयतीति 'धान्यम्' । यत एव मतो देवान् धिनुहीति मन्त्रार्थः ॥ १८ ॥

समन्त्रकं[३] पेषणं विधत्ते— "अथेति । 'पिनष्टि' सचूर्णयति । "पिष्लृ सचूर्णने"-इति[४] धातुः । प्रकर्षेण अनिति चेष्टत इति नासिकाभ्यां वहिर्निर्गच्छन् श्वासरूपो वायुः 'प्राणः' । 'उत्' ऊर्ध्वात् अधोदेशं प्रत्यनिति चेष्टत इति 'उदानः'; नासिकाभ्यां देहे पुनः प्रविशन् वायुः । अन्नपानादिरसं विविधं सर्वासु नाड़ीषु अनिति प्रेरयतीति 'व्यानः'; ऊर्ध्वाधोवृत्ति[५]विलक्षणो मध्यवृत्तिर्वायुः ।

एतन्मन्त्रार्थं उत्तरमन्त्रसापेक्ष इति तदुभयं समुचित्य व्याख्यातु मुत्तरमन्त्रं विनियुङ्क्ते— "प्रोक्षति देवो व इति[६] । अनेन मन्त्रेण

१— वा० सं० १. २०. १ । का० श्रौ० सू० २. ५. ६ ।
२— भ्वा० प० ५८३ ।
३— वा० सं० १. २०. २ । का० श्रौ० सू० २. ५. ६ ।
४— रु० प० १४ । ५— 'ऊर्ध्वाधोवृत्ति-'-इति ठ, ड ।
६— वा० सं० १. २०. ३ । का० श्रौ० सू० २. ५. ७ ।

कृष्णाजिने प्रक्षिपतीत्यर्थः । यत्तु प्रकारान्तरेण कात्यायनेन सूचप्रणयनं, तद्ब्राह्मणान्तरमूलम् । स ह्येवं सूचयामास— "पिनष्टि प्राणाय त्वेति प्रतिमन्त्रं, दीर्घा मिति कृष्णाजिने प्रोक्षति, चक्षुषे त्वेतीक्षत इति[1] ॥ १९ ॥

प्राणायेतिमन्त्रस्याभिप्राय माविष्कर्तुं मुक्तं पेषणं मनुवदति— "तद्यदिति । 'अमृतानां' मरणरहितानां देवानां हविः 'जीवं'[2] प्राणधारणं युक्त मेव सत् 'अमृतम्' मरणसाधनं न भवति[3] । अथैवं सत्येतद्यज्ञसाधनं हविरवहननपेषणाभ्यां मृत्विजो मारयन्ति; तथा सति निर्जीवत्वात् तस्यामृतत्वसाधनत्वं न युक्त मिति भावः ॥ २० ॥

मन्त्रप्रयोगेणास्य परिहारं दर्शयति— "स यदाहेति । पेषणसमये "प्राणाय त्वेत्यादिमन्त्रं प्रयुञ्जानः प्राणादीनेव[4] पुनरस्मिन् हविषि स्थापयतीत्यर्थः । गत मन्यत् ।

"एतानि वै जीवत इत्यादि । 'एतानि' प्राणोदानधारणादीनि 'जीवतः' पुरुषस्य लिङ्गानि । 'एवम्' अनेन मन्त्रप्रयोगेण प्राणोदानादिस्थापने सति हविरपि सजीव मेवेति युक्तं तस्यामृतत्वसाधन मित्यभिप्रायः । "पिनष्टीति । एवं समन्त्रक मध्वर्युणा पेषणे कृते सति यजमानपरिचारका अवशिष्टं सर्वं चूर्णीकुर्युः[5] ।

१— का०श्रौ० सू० १. ५. ७, ८, ९. एतद्ब्राह्मणनये तु आयुषे धा मित्यन्तः पेषणमन्त्रः, देवो व इत्यादिरेव प्रोक्षणमन्त्र इति विशेषः ।

२— 'जीवनं'—इति ड । ३— 'अमरणसाधनं'—इति ठ, ड, ढ ।

४— "मन्त्रप्रयोगेण तस्य निर्जीवत्वं परिहरन् प्राणादीनेव"—इति ढ ।

५— "दासी पिनष्टि पत्नी वा, अपि वा पत्न्यवहन्ति शूद्रा पिनष्टि"—इति आप० श्रौ० सू० १. २१. ८, ९ ।

तथा उपहितानि च कपालानि 'अभीन्धते' अङ्गारैः प्रदीप्तानि कुर्युरित्यर्थः ॥ २१ ॥

पेषणसमये एव आज्यस्य निर्वापं विधत्ते— "अथैक इति। यदा चाध्वर्युः पिनष्टि, 'अथ' तस्मिन्नेव समये 'एकः' अन्यः आग्नीध्रादिः (आज्यं निर्वपति[1])। अत एव सूचकृता पेषणाज्यनिर्वापयोः समसमयवर्त्तित्वं सूचितम्— "पिष्यमाणेषु निर्वपत्यन्यो महीना मित्याज्यम्"-इति[2]। तच्चाज्यं प्रसिद्धदेवतावाच्यग्न्यादिशब्दरहितेन मन्त्रेण ग्रहीतव्य मिति विधित्सुराह— "यदा इति। 'यत्' खलु हविः "अग्नये जुष्टं गृह्णामीत्येवं देवतायै निर्दिष्टं भवति, 'तद्' ग्रहणसाधनं यजुश्च यावद्देवत्यं भवति, तावद्देवत्य मेव 'तत्' हविर्भवति। आज्यं च सर्वदेवतासाधारण मिति देवतादेशनरहितेनैव यजुषा गृह्णीयादित्यर्थः। तथा चाज्यस्य सर्वदेवतासाधारण्यं वेत्यतीत्याह— "न वा इति। एव मनिरुक्तयजुषा ग्रहण मुपपाद्य तद्विधत्ते— "तस्मादिति। देवतानाम निःशेषेणोक्तं यस्मिन् तत् 'निरुक्तम्', तद्विलक्षणम् 'अनिरुक्तम्'। तादृग्रं च "महीना मित्यादि यजुः[3]; तत्र प्रसिद्धदेवतावाचिपदस्यानुपलम्भात्।

अथैतन्मन्त्रं व्याचष्टे— मह्य इति। "मह पूजायाम्"[4]। मह्यन्ते पूज्यन्त इति 'मह्यः'। एतच्च 'एतासां' गवाम् 'एकं' साधारणं नाम। आज्यस्य पयःकार्यत्वात् "पयोऽसीति। विकारे प्रकृतिशब्द इत्यर्थः। ग्रहीतव्याज्यप्रकाशकत्वात् 'असि'-मन्त्रः[5] प्रयोक्तव्य इत्याह—

१— नैते पदे ढ-पुस्तकादन्यत्र। २— का० श्रौ० सू० २. ५. ६।
३, ५—वा० सं० १. २०. ५। ४— भ्वा० प० ७३०।

एव मु हेति। 'एवम्' अनेनैव मन्त्रेण आज्ये निरूप्ते सति तस्य तत्प्रकाशनसमर्थत्वात् यजुषैव 'तत्' आज्यं गृहीतं भवतीत्यर्थः ॥ २२ ॥ ५ [२. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये द्वितीयाध्याये
प्रथमं ब्राह्मणम्[१] ॥

१— अथ पेषणोपधाने सह भवतः। तत्र अग्नीत् कपालानि प्रक्षाल्य, गार्हपत्यस्य पश्चादुपविश्य, प्रथमं तावत् उपवेषं गृहीत्वा तेन अपवाग्नस्य अङ्गारान् खरमध्ये एव स्वस्थानात् प्राचां प्रेरयति,— यथाङ्गारस्थानेऽतितप्तभूमौ कपालान्युपधीयेरन्। ततस्तेनैव प्राक्प्रेरिताङ्गारमध्यात् एकमङ्गारं गार्हपत्यखरस्य पश्चाद्भागे दक्षिणपुरोडाशस्थानस्य मध्ये आनयति। तस्यानीतस्याङ्गारस्योपरि उत्तानं मध्यमं कपालमुपदधाति [तत्राभिचारं कुर्वन् मन्त्रे 'भ्रातृव्यस्य' स्थाने अमुकस्येति गृह्योर्नामग्रहणं कार्यम्, तत उदकोपस्पर्शनञ्च]। ततः सव्यहस्तस्याङ्गुल्या अग्नौ स्पृष्टे मध्यमकपाले एकमङ्गारं निदधाति, ततः पश्चाद् द्वितीयम्, ततः पुरस्तात् तृतीयम्, मध्यमाद् दक्षिणं चतुर्थम्, चतुर्थात्पूर्वमेकस्य कपालस्यान्तरालं परिगृह्य पञ्चमम्, चतुर्थपञ्चमयोरन्तराले षष्ठम्, चतुर्थस्य पश्चात् सप्तमम्, तस्य पश्चादष्टमम्, सर्वेभ्य उत्तरतो नवमदशमैकादशानि प्राक्संस्थानि। ततो ज्वलदङ्गारैः सर्वाणि तानि कपालान्याच्छादयति। ततस्तदेवोपसर्जनीरग्नीदेव गार्हपत्येऽधिश्रयति। पिष्टसंयवनार्था आप उपसर्जन्यः। इति कपालोपधानम्। अथ पेषणम्। तत्र अध्वर्युः कृष्णाजिनं मादाय, पूर्ववदवधूय, अप उपस्पृश्य, प्रत्यग्ग्रीव मासीर्य, सव्यहस्तेनाविमुक्ते कृष्णाजिने, दक्षिणेन हस्तेन प्रागग्रां दृषदं तस्य कृष्णाजिनस्योपरि निदधाति। तत्पश्चाद्भागे अधस्तादुदगग्रां ग्रम्यां प्रेरयति,— यथा दृषदः प्राचीनप्रवणतां जायेत। ततस्तस्या उपरि उदगग्रा मुपला मुपदधाति। ततस्तस्यां दृषदि तण्डुलानोप्य पिनष्टि। पिष्यमाणेषु तण्डुलेषु, तप्यमानेषु कपालेषु च यजमानो आज्यस्थाल्या माज्यं प्रक्षिपतीतीह पेषणोपधाने कर्मणी विहिते।

पवित्रवति सुंव्वपति। पाभ्यां पवित्रे ऽअवधाय देवस्य त्वा सवितुः प्रसुवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सुंव्वपामीति सोऽसावेवैतस्य युजुषो बन्धुः ॥ १ ॥

अथान्तर्व्वेद्युपविशति। अथैक उपसृजनीभिरैति ता आनयति ताः पवित्राभ्यां प्रतिगृह्णाति स माप ओषधीभिरिति सꣳ ह्येतदाप ओषधिभिरेताभिः पिष्टाभिः सङ्गच्छन्ते स मोषधयो रसेनेति सꣳ ह्येतदोषधयो रसेनैताः पिष्टा अद्भिः सङ्गच्छन्त ऽआपो ह्येतासाꣳ रसः सꣳ रेवतीर्जगतीभिः पृच्यन्ता मिति रेवत्य आपो जगत्य ओषधयस्ता उ ह्येतदुभय्यः सम्पृच्यन्ते सम्मधुमतीर्म्मधुमतीभिः पृच्यन्ता मिति सꣳ रसवत्यो रसवतीभिः पृच्यन्ता मित्येवैतदाह ॥ २ ॥

अथ सुंयौति। जनयत्यै त्वा सुंयौमीति युथा श्रिये ऽन्नाद्यायेमाः प्रजा युजमानाय युञ्छेदेवं वै तत् सुंयौत्यधिवर्ष्यन्नु वै सुंयौति युथा वा ऽअधिदृक्षोऽग्नेरुधि जायेतैवं वै तत् सुंयौति ॥ ३ ॥

अथ द्वेधा करोति। युदि द्वे हविषी भवतः। पौर्णमास्यां वै द्वे हविषी भवतः स युच्च पुनर्नु सꣳहरिष्यन्स्यात् तदभिमृशतीदु मग्नेरिदु मग्नीषोमयोरिति नाना वा ऽएतदग्रे हविर्गृह्णन्ति तत् सहावद्यन्ति

तुत् सहु पिꣳषन्ति तत् पुनर्नाना करोति तस्मादेवु मभिमृशत्यधिदृणुक्तेवैषु पुरोडाश्र मुधिश्रयत्यसा*-वाज्यम् ॥ ४ ॥

तद्वा ऽएतुत्। उभयꣳ सहु क्रियते तद्यदेतुदुभयꣳ सहु क्रियुतेऽर्द्धो ह वा ऽएषु आत्मुनो यज्ञुस्य यदाज्य मर्द्धो युदिहु हविर्भुवति स युश्चासावर्द्धो यु उ चायु मर्द्धस्ता ऽउभावमिं गमयावेति तस्मादा ऽएतुदुभयꣳ सहु क्रियत ऽएवु मु हैषु आत्मा यज्ञुस्य सन्धीयतु ॥ ५ ॥

सोऽसावाज्य मुधिश्रयति। इषे त्वेति व्वृष्ट्यै तुदाह यदाहेषे त्वेति तत् पुनरुद्दासयत्यूर्जे त्वेति यो व्वृष्टा-दूर्ग् रसो जायते† तस्मै तुदाह ॥ ६ ॥

अथ पुरोडाश मुधिदृणक्ति। घुर्म्मोऽसीति यज्ञु मेवैतुत् करोति युथा घर्म्मं प्रदृज्यादेवं प्रुदृणक्ति व्विश्वायुरिति तदायुर्दधाति ॥ ७ ॥

तं प्रथयति। उरुप्रथा उरु प्रथस्वेति प्रथयत्येवैन मेतदुरु ते यज्ञुपतिः प्रथता मिति युजमानो वै यज्ञु-पतिस्तद्युजमानायैवैतदाशिष मुाशास्ते ॥ ८ ॥

तन्नु सत्रा पृथुं कुर्यात्। मानुषꣳ ह कुर्याद् युत्

---

* 'मुधिअपत्यसा'–इति क।

† 'जायते'–इति च-मुद्रौ।

पृथुं कुर्याद् व्यृद्धं वै तद् यज्ञस्य* युन्मानुषं नेद् व्यृद्धं यज्ञे करवाणीति तस्मान्न सचा पृथुं कुर्यात् ॥ ९ ॥

अश्वशफमात्रं कुर्यादित्यु हैक ऽआहुः । कस्तद्वेद यावानश्वशफो यावन्त मेवु स्वयं मनसा नु सचा पृथुं मन्येतैवं कुर्य्यात् ॥ १० ॥

तु मद्भिरभिमृशति । सकृद्वा त्रिर्वा तद्युदेवास्याचावद्यन्तो वा पिंष्यन्तो वा क्षण्वन्ति† वा व्वि वा वृहन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति तस्माद्भिरभिमृशति ॥ ११ ॥

सोऽभिमृशति । अग्निष्टे त्वचं मा हिंसीदित्यग्निना वा ऽएनमेतदभितप्यन् भवत्येषु ते त्वचं मा हिंसीदित्येवैतदाह ॥ १२ ॥

तं पुर्यग्निं करोति । अच्छिद्र मेवैन मेतदग्निना पुरियृक्षाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशान्नित्यग्निर्हि रक्षसा मपहन्ता तस्मात् पुर्यग्निं करोति ॥१३॥

तꣳ अपयति । देवस्त्वा सविता अपयत्विति न वा ऽएतस्य मनुष्यः अपयिता देवो ह्येष तदेनं देव एवसविता अपयति व्वर्षिष्ठे ऽधिनाक ऽइति देवचो एतदाह यदाह व्वर्षिष्ठे ऽधिनाक ऽइति तु मभिमृशति श्रुतं व्वेदानीति तस्माद्वा ऽअभिमृशति ॥ १४ ॥

* 'याज्ञस्य'–इति ग । † 'क्षिगवन्ति'–इति च ।

सोऽभिमृशति। मा भेर्मा सुंव्विक्था इति मा त्वं भैषीर्म्मा* सुंव्विक्था युत् त्वाह मुमानुषꣳ सन्तं मानुषोऽभिमृशामीत्येवैतदाह ॥ १५ ॥

यदा मृतोऽथाभिवासयति। नेदेन मुपरिष्टान्नाघ्रा रुक्षाꣳस्यवपुष्यानिति नेदेवु नमु इव मुषितु इव शुयाता ऽइत्यु चैव तुस्मादु ऽअभिवासयति† ॥ १६ ॥

सोऽभिवासयति। अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयादिति नेदेतदनु यज्ञो वा युजमानो वा तास्याद्युदिदु मभिवासयामीति तुस्मादेवु मभिवासयति ॥ १७ ॥

अथ पाचीनिर्ग्रुजनम्। अङ्गुलिप्रणेजन माग्नेभ्यो निनयति तद्युदाग्नेभ्यो निनयति ॥ १८ ॥ ६ ॥

॥ इति प्रथमप्रपाठके षष्ठं ब्राह्मणम् [२. २.] ॥

अथ पिष्टानां पिण्डकरणार्थं पात्र्यां संवापं विधत्ते— "पवित्र-वति"-इति। सामान्योपक्रमात् नपुंसकनिर्देशः; पवित्रयुक्ते पात्रे इत्यर्थः। तदेव विवृणोति— "पात्र्यां पवित्रे अवधायेति। "सो ऽसावेवैतत्रेति। "सविता वै देवानां प्रसवितेत्यादिना ग्रहणप्रकरणे[१]

---

* 'भेषीर्म्मा'-इति च। † 'अभिवासयति'-इति ख, च।

१— ३८ पृ० ७ पं०, ५४ पृ० २ पं० द्रष्टव्यम्।

प्रागाख्यात एव वाक्यशेषोऽस्यापि यजुषः[1] शेषत्वेन योजनीय इत्यर्थः ॥ १ ॥

"अथान्तर्वेदीति। यद्याहवनीये हविःअपणं गार्हपत्ये वा, उभयथापि वेदिमध्ये उपविशेदित्यर्थः। कात्यायनस्तु ब्राह्मणान्तराभिप्रायेण विकल्प माह—"अपणस्य पश्चादुपविशत्यन्तर्वेदि वा"-इति[2] ॥

"अथैक इति। 'एकः' अन्य आग्नीध्रादिः। उपसृजत्याभिरिति व्युत्पत्त्या पिष्टसंसर्जनार्था आपः 'उपसर्जन्यः'; ताभिः सहागच्छेदित्यर्थः। अथ तासां तूष्णी मासेचनं विधत्ते— "ता आनयतीति। "ताः पवित्राभ्या मित्यादि। आनीयमानाः 'ताः' "स मापा"-इति[3] मन्त्रेण पिष्टाना मुपरि पवित्राभ्यां प्रतिगृह्णीयादित्यर्थः।

मन्त्रतात्पर्य माह— "सं स्रोतदिति। 'एतत्' एतर्हि, एताः आनीयमानाः 'आपः', पिष्टरूपेणावस्थिताभिः 'ओषधिभिः'[4] सङ्गच्छन्ते। अतो मन्त्रगतौषधिशब्देन तद्विकाराः पिष्टा विवक्षिताः। स मित्युपसर्गश्रवणाद् योग्यक्रियाध्याहार इत्यर्थः। एव मपा मोषधिभिः सङ्गतिं प्रतिपाद्य, व्यतिहारेणोषधीना मद्भिः सङ्गतिः प्रतिपाद्यत इति व्याचष्टे— "स मोषधय इति। पूर्ववदत्राप्योषधिशब्दः पिष्टपरः, रसशब्देन चापो विवक्षिता इत्याह— "एताः पिष्टा अद्भिरिति। "आपो हीति। उपष्टम्भकाप्यावयवयुक्ताः खल्वोषधय

१— वा० सं० १. २१. १। का० श्रौ० सू० २. ५. १०।

२— श्रौ०सू० २. ५. ११। "सोकर्यादेवोपवेशनम्"—इति तत्र या०दे०।

३— वा० सं० १. २१. २। का० श्रौ० सू० २. ५. १२, १३।

४— संहितापाठस्तु ओषधीभिरिति, तस्यैव प्रतिशब्द एषः।

आर्द्रा रसवत्यो भवन्ति, अतस्तासा मुदक मेव रस इत्यर्थः। मन्त्र-मतरेवतीशब्दस्यार्थ माह— "रेवत्य आप इति। रयिः धन मासा मस्तीति रेवत्य आपः। धनमूलत्वञ्च तासां नदीतटाकादिष्ववस्थि-तानां प्रसिद्धम्। अतो मन्त्रे रेवतीशब्देनापो विवक्षिताः। "रयेर्मतौ बहुलम्"-इति[1] सम्प्रसारणे, "उगितश्च"-इति[2] ङीप्। गम्यन्ते सर्व्वैः प्राणिभिः प्राप्यन्त इति[3] व्युत्पत्त्या जगतीशब्दोऽप्योषधिवाचक इति व्याचष्टे— "जगत्य इति। "मन्मधुमतीरित्यादि। अत्र मधुशब्देन माधुर्यरसो विवक्षित इत्याह— "मधू रसवत्य इति ॥ २ ॥

आसिक्तजलेन[4] पिष्टानां समन्तकं[5] मिश्रीकरणं विधत्ते— "अथेति। 'संयौति' सम्यग् मिश्रीकरोतीति। "यु मिश्रणे"-इति[6] धातुः।

मन्त्रतात्पर्यकथनेनैतत् संयवनं प्रशंसति— "यथेति। यथा खल्विमाः प्रजाः 'यजमानाय' षष्ठ्यर्थे चतुर्थी[7], यजमानस्य 'श्रिये' सम्पदर्थं मन्त्रार्थश्च नियच्छेद्, एव मेतदनुकूल मेव तत्पिष्टसंयवन मित्यर्थः। मन्त्रगत-'जनयत्यै'-शब्दस्य जननायेति ह्यर्थः; त मुप-जीव्य प्रशंसति— "अधिवर्ज्यमिति। 'अधिवर्जनं' पुरोडाशस्य

१— पा० सू० ६. १. ३४ वा० ३४७३। २— पा०सू० ४. १. ४६।
३— 'गम्यते०—० प्राप्यत इति'-इति ठ।
४— 'आक्षिप्तजलेन'-इति ज, झ।
५— वा० सं० १. २२. १। का० श्रौ० सू० २. ५. १४।
६— अदा० प० १०२३। 'मिश्रणेऽमिश्रणे च'-इति धा०।
७— पा० सू० २. ३. ६१ वा० १५०६।

अग्नावधिश्रयणं करिष्यन्, खलु संयौति। यथा खल्वधिश्रितः पुरोडाशोऽग्नेः सकाशात् जायेत, एवं तदनुगुण मेव तत् संयवनं "जनयत्यै"-इतिजननलिङ्गवतो मन्त्रस्य प्रयोगादित्यर्थः ॥ ३ ॥

"अथ द्वेधेत्यादिविभागविधिः। कुत्र तर्हि हविर्द्वयं मिति तद्दर्शयति— "पौर्णमास्या मिति। 'पौर्णमासी'-शब्देन कालवाचिना तत्कालानुष्ठेयं कर्म्म विवक्षितम्। तच्च ह्याग्नेयोऽष्टाकपालः, अग्नीषोमीय एकादशकपाल इति 'द्वे हविषी' विहिते इत्यर्थः।

एवं द्वेधा विभज्य, विभक्तयोस्तयोर्मन्त्राभिमर्शनं विधत्ते— "स यचेति। 'सः' खल्वध्वर्युः 'यच' यस्मिन् काले 'तत्' हविर्द्वयं 'पुनर्न संहरिष्यन्स्यात्' संहरण मेकीकरणं, तत् करिष्यन् न भवेत्[१], 'तत्' तदानीम् "इद मग्नेः"-इत्येकं भाग मभिमृशति, "इद मग्नीषोमयोः"-इत्यपरम्[२]। तावेतौ यथासङ्ख्य माग्नेयाग्नीषोमीय-पुरोडाशावित्यर्थः[३]।

कथं पुनरनयोर्द्वित्वं, कुत्र वा तयोः संहरणं, यद्व्यावृत्तये "न संहरिष्यन्"-इति विशेष्यत इति, तत् सर्वं दर्शयति— "नाना वा इत्यादिना। अग्नेर्निर्वापसमये "अग्नये जुष्टं गृह्णामि", "अग्नीषोमाभ्यां जुष्टं गृह्णामि"-इति पृथक् पृथक् देवतादेशनाद्[४] ग्रहणस्य

१— 'यस्मिन् काले तस्य हविर्द्वयस्य पुनःसंहरण मेकीकरणं करिष्यन् न भवेत्'-इति ८।

२— वा० सं० १. २२. २, ३। का० श्रौ० सू० २. ५. १५।

३—"यथादेवतमन्यत्"-इति का०श्रौ०सू० २.५.१६। 'अन्यत्' ऐन्द्रादि।

४— 'देवतादेशेन'-इत्येव पाठो ड-पुस्तकादन्यत्र सर्वत्रैव।

नानात्वम् । अवहननादिसंस्कारे सहैवानुष्ठिते सति तद्धविरन्तिम् समये पुनरनेन मन्त्रेण यथास्वं विभजतीत्यर्थः ॥

पुरोडाशकपालस्याज्याधिश्रयणस्य च समानकालतां विवक्षितत्वात् कर्तृभेद माह[1]— "अधिवृणक्तीति । 'एषः' अध्वर्युः पुरोडाशम् 'अधिवृणक्ति' अग्नेरुपर्यधिश्रयति । "अथैक आज्यं निर्वपति"-इति प्रागन्यशब्दपर्यायेणैकशब्देन य आग्नीध्र आज्यनिर्वापे कर्तृतया प्रतिपादितः[2], सोऽत्र 'असौ'-इत्यदःशब्देन विप्रकृष्टत्वाच्चिना परामृश्यते । पुरोडाशाधिश्रयणसमये 'असौ' आग्नीध्रः 'आज्यम्' अधिश्रयेदित्यर्थः ॥ ४ ॥

तदेतदुभयोः सहानुष्ठान मुपपादयति— "अर्द्धो ह वा एष इत्यादिना । आज्यं यज्ञशरीरस्यार्द्धभागः; उपस्तरणाभिघारयोः[3] प्रयाजादीनाञ्च तत्साध्यत्वात्; इतरोऽर्द्धः पुरोडाशादिहविः । सहाधिश्रयणेन तदर्द्धद्वय मेकीकृत्य अग्निं प्रापयावेत्यध्वर्योराग्नीध्रस्य चाभिप्रायः । "एव मु हेति । आज्यहविषोरुभयोः सहाधिश्रयणे सति अर्द्धद्वयस्यैकीकरणात् यज्ञशरीरं सम्भवीयत इत्यर्थः ॥ ५ ॥

विहित माज्याधिश्रयण मनूद्य मन्त्रं[4] विधत्ते— "सोऽसाविति । दृष्यत इतीडिति व्युत्पत्त्या दृट्-शब्देन दृष्टिर्विवक्षितेति व्याचष्टे—

१— 'पुरोडाशकपालस्याज्यस्य चाग्नेरुपरि अधिश्रयणस्य समानकालतां विवक्षुभिः (विवक्षुः) कर्तृभेद माह—'-इति ट ।

२— पुरस्तात् द्रष्टव्यम् २. १. २२ (९७ पृ० ११ पं०) ।

३— "आद्यन्तयोराज्यम्"—इति का० श्रौ० सू० १. ६. ८ ।

४— तन्मन्त्रस्तु वा० सं० १. २२. ४ । का० श्रौ० सू० २. ५. १७ ।

"वृष्ट्या इति। "वृष्टादूर्यम इति। तस्मात् 'वृष्टात्' उदकात् जायमानो यो बलकरोऽन्नरसो जायते, स 'ऊर्क्'-शब्देन विवक्षितः ॥ ६ ॥

"अधिवृणक्तीति। अग्नावुपरि 'वृणक्ति' वर्जयति, अपणार्थं स्थापयतीत्यर्थः[1]। "यज्ञ मेवैतदिति। घर्म्मोऽसीति[2] घर्म्मतादात्म्यस्तवनात्, घर्म्मस्य च सोमयागाङ्गत्वात् तदात्मक मेवैतत्करोति। घर्म्मस्य यत् प्रवृञ्जनं सोमे, तत्सदृश मेवैतत् पुरोडाशस्य प्रवृञ्जन मित्यर्थः ॥ ७ ॥

"तं प्रथयतीति। उपहितेषु (कपालेषु[3]) विस्तारयतीत्यर्थः। "प्रथयत्येवैन मेतदिति विहितस्य प्रशंसा। 'प्रथयति' पृथु विस्तीर्णं प्रभृतं करोतीत्यर्थः[4] ॥ ८ ॥

पुरोडाशस्य स्वाभिमतपरिमाणं[5] विधित्सुः परिमाणान्तरं निषेधति— "तन्नेति। सचेति निपातोऽनेकार्थत्वाद्व्याप्तिग्रहणार्थः। 'सचा पृथुम्' अतिपृथुं न कुर्यात्। विपक्षे बाध माह— "मानुषं हेति। अस्तु मानुषत्वं[6] को दोष इत्यत आह— "वृद्धं वा इति। 'वृद्धं' विगतर्द्धिक मित्यर्थः ॥ ९ ॥

१— गार्हपत्ये। रजोदोषप्रसवप्रवासादिना असन्निहितपत्नीकस्य मृतपत्नीकस्य चाहवनीयेऽधिश्रयण मिति का० श्रौ० सू० २. ५. १८।

२— वा० सं० १. २२. ५। का० श्रौ० सू० २. ५. १९।

३— नास्त्येतत् पदं ठ-पुस्तकादन्यत्र।

४— अत्र मन्त्रः— वा० सं० १. २२. ६। का० श्रौ० सू० २. ५. २०।

५— 'अभिमतं परिमाणं'—इति ठ, 'अभिमतपरिमाणं'—इति ड।

६— 'मानुषं'—इति ड।

पत्नान्तर मुपन्यस्यति[१]— "अश्वग्रफेति। अथ मपि पत्नो दुर्ज्ञानत्वात् न साधुरित्याह— "कस्तदिति। स्वाभिमतं पुरोडाशपरिमाण माह— "यावन्त मिति। यत्परिमाणविशिष्ट मेव पुरोडाशं स्वयं मनसैवातिपृथुं न मन्येत, किन्तु दैवतसौविष्टकृतेडाद्यवदानपर्याप्त मेव मन्येत, तत्परिमाणविशिष्टं कुर्यादित्यर्थः[२] ॥ १० ॥

पुरोडाशस्याङ्गिरभिमर्शनं विधत्ते— "त मिति। 'क्षण्वन्ति' हिंसन्ति। "क्षणु[३] हिंसायाम्"-इति[४] धातुः। 'विवृहन्ति' विस्रंषयन्ति। "वृह उद्यमने"-इति[५] धातुः। "शान्तिरापं इति। दाहदृष्णादिशमनहेतुत्वेनापां शान्तिरूपता ॥ ११ ॥

"सोऽभिमृशतीत्यादिविहिताभिमर्शनानुवादेन मन्त्रविधिः[६]। मन्त्रेणाहिंसाप्रार्थनं युक्त मिति व्याचष्टे— "अग्निना वा इति। "अभितप्स्यन्निति। अभितः सर्वतः तपनं करिष्यन्नित्यर्थः ॥ १२ ॥

पर्यग्निकरणं विधत्ते— "त मिति। परितोऽग्निर्यस्य, स 'पर्यग्निः'; परितोऽग्निमन्तं पुरोडाशं करोतीत्यर्थः[७]। तस्य प्रयोजन

१— 'पत्नान्तर मपवदति'-इति ८।

२— "षड्ङ्गुलवृत्ता कपालचितिर्यथा सम्पद्यते, तथा कपालपरिमाण माश्रयणीयम्"-इति का० श्रौ० २. ५. २० सू० वृत्तौ या० दे०।

३— 'क्षिण्वन्ति' हिंसन्ति। "क्षिणु"-इति जादिषु, ८-पुस्तके च पाठः।

४— त० उ० ४ "क्षिणु च"। ५— तु० प० ६७।

६— मन्त्रस्तु वा० सं० १. २२. ७। का० श्रौ० सू० २. ५. २१।

७— पर्यग्निकरणमन्त्रस्तु "अन्तरितं रक्षोऽन्तरिता अरातयः"-इति तै० सं० १. १. ८. १। तद्विधिः का० श्रौ० सू० २. ५. २२।

माह— "अच्छिद्र मिति। राक्षसादिसंस्पर्शाभावार्थं प्राकारवन्नीरन्ध्र मग्निना वेष्टनं कृतवान् भवतीत्यर्थः ॥ १ ३ ॥

समन्त्रकं अपणं विधत्ते— "त मिति। "वर्षिष्ठेऽधिनाक इति[१]। मन्त्रपाठे 'देवत्रो'[२] देवान् प्रत्येवैतदाह। 'वर्षिष्ठे' वृद्धतमे 'नाके' स्वर्गे 'देवः' सविता अपयत्विति हि मन्त्रार्थः। तथा च तल्लोकवासिनो देवान् प्रत्येवैतद्वचनम्। "देवमनुष्यपुरुषपुरुमर्त्येभ्यः"-इति[३] द्वितीयार्थे चा-प्रत्ययः। अपणानन्तरं तस्याभिमर्शनं विधत्ते— "त मिति। अभिमृशतोऽभिप्राय माह— "शृत मिति। 'शृतं' पक्वं जानामीत्यर्थः। "आ पाके"-इत्यस्मात्[४] निष्ठायां "शृतं पाके"-इति[५] निपातितम्। 'वेदानि'-इति "विदज्ञाने[६]"-इत्यस्माल्लोट्युत्तमैकवचनम् ॥ १ ४ ॥

विहित मभिमर्शन मनूद्य मन्त्रं[७] विधत्ते— "सोऽभीति। मन्त्रगतं 'भेः'-इत्येतत्पदं व्याचष्टे— "मा त्वं भैषीरिति। 'मा संविक्थाः'-इति मा च कम्पिष्ठा इत्यर्थः। भयकम्पयोः कारण माह— "यं वेति ॥ १ ५ ॥

"यदा शृत इति। 'यदा' यस्मिन् काले स पुरोडाशः 'शृतः' पक्वो भवति, 'अथ' अनन्तर मेव तस्योपरि 'अभिवासयति'

१— वा० सं० १. २२. ८। का० श्रौ० सू० २. ५. २३।

२— 'देवत्रा उ'-इति क्वेः। एवार्थोऽत्र उ-शब्दः।

३— पा० सू० ५. ४. ५६। ४— अदा० प० ४३।

५— पा० सू० ६. १. २७। ६— अ० प० ४५।

७— वा० सं० १. २३. १। का० श्रौ० सू० २. ५. २४।

साङ्गारेण भस्मना[१] आच्छादयतीत्यर्थः। तस्य प्रयोजन माह— "नेदिति। प्रयोजनान्तरं सदृष्टान्त माह— "नेदेवेति। 'नग्नः' स्वभावतो विवसनः; 'मुषितः' चौरादिभिरपहृतवसनः; तावुभौ यथा निरावरणौ 'ग्रयातै', तद्वत् पुरोडाग्नोऽप्यभिवासनाभावे निरावरणः ग्रयीत। नैव तथा ग्रयीतेत्यनेनैवाभिप्रायेणाभिवासनं कर्त्तव्य मित्यर्थः॥ १६॥

"सोऽभिवासयतीत्यादिर्मन्त्रविधिः[२]। 'अतमेरुः' अतमनग्नीक्षः, दृश्यते अनेनेति 'यज्ञः' पुरोडाग्नः, स ग्लानिरहितोऽभूत्; अतो यजमानस्य पुत्रादिरपि तथा भूयादिति मन्त्रार्थः। इम मर्थं प्रतिपादयति— "नेदेतदिति। यदिद मभिवासनम्, 'एतदनु' एतस्यानन्तर मित्यर्थः। "तस्मादिति। अतमेरुरिति-मन्त्रप्रयोगेण अभिवासनकृत-तमनाभावादित्यर्थः॥ १७॥

पात्र्यङ्गुलि[३]प्रक्षालनोदकस्य निनयनं विधत्ते[४]— "अथेति। निर्णिज्यते शोध्यते अनेनेति 'निर्णेजनम्' अङ्गुलिप्रक्षालनम्, पात्रीनिर्णेजनं च[५] उदकम्। अङ्गो जातत्वात् 'आप्त्याः' चितादयः[६]

१— "साङ्गारेण भस्मनेति काठके"—इति का० श्रौ० २. ५. २५ या०दे०।

२— वा० सं० १. २३. २। का० श्रौ० सू० २. ५. २५।

३— 'पात्राङ्गुलि'—इति जादिषु।

४— मन्त्रस्यस्य वा० सं० १. २३. ३। का० श्रौ० सू० २. ५. २६।

५— ढ-पुस्तके त्विमानि अङ्गुल्यादीनि त्रीणि पदानि न दृश्यन्ते।

६— ते च चितः, हितः, एकत इति। "अस्यां ध्रुवायां मध्यमायां प्रतिष्ठायां दिशि साध्याश्चात्याश्च देवाः"—इति ऐ० ब्रा० ८. ३. ३।

तेभ्यो[1] निनयेदित्यर्थः। विहितं निनयनं स्तोतु मनुवदति—"तद्यदिति ॥ १८ ॥ ६ [२.२.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये
प्रथमकाण्डे द्वितीयाध्याये द्वितीयं ब्राह्मणम्[2] ॥

१— तेषां मुत्पत्तिकथा त्रिंशेवोत्तरस्मिन् ब्राह्मणे वर्णिष्यते।

२— अथ पिष्टावपनम्।— पवित्रे पात्र्यां कृत्वा कृष्णाजिनात् पिष्टान्यादाय सपवित्रायां पात्र्यां मावपति। तत उत्थाय गार्हपत्यस्य पश्चात् वेदिमध्ये वा उपविशति। तत आग्नीध्रः स्फ्यं सव्ये गृहीत्वा उपसर्जनीरुद्वास्य अध्वर्योर्दक्षिणेनानीय पिष्टानामुपरि घृतस्य सपवित्रस्य अध्वर्योर्हस्तस्य उपरि निनयति। ततोऽध्वर्युः तेनाग्नीधा निनीयमाना उपसर्जनीर्दक्षिणाहस्तघृताभ्यां पवित्राभ्यां प्रतिगृह्णाति। आग्नीधा च तथा निनयनं कार्यं यथाध्वर्योर्मन्त्रान्ते ग्रहणं सम्पद्यते। तत उदकं पिष्टानि च मिश्रयति। मिश्रितं तत् समं विभज्य द्वौ पिण्डौ कृत्वा पात्र्या मुदकसंस्थौ निधाय इद मग्नेरिति इद मग्नीषोमयोरिति च क्रमेण आलभते। ततोऽग्नीद् सव्यहस्ते वेदं गृहीत्वा दक्षिणत आज्य मधिश्रयति, अग्नेरुपरि आज्यस्थालीं निदधातीत्यर्थः। अथ पुरोडाशप्रथनम्।— तत्राध्वर्युः सर्वेष्वासु कपालेषु प्रथमं पुरोडाशं मधिश्रयति, तत एकादशसु कपालेषु द्वितीयम्; ततो यावत्कपालं पुरोडाशं प्रथयति। अतिपृथु न करोति। ततस्त मेव पुरोडाशं सकृत् चिर्वा अद्भिरभिप्लवति, क्षालयति; प्रथने क्रियमाणे यत्र क्वचन विदीर्णं भवति तत् सन्दधातीत्यर्थः। ततः पात्र्या अङ्गुलीनां च प्रक्षालनम्। अथ पर्यग्निकरणम्।— गार्हपत्यादङ्गारं मादाय आज्यस्थालीपुरोडाशान् परितः प्रदक्षिणं मङ्गारं

॥ इति प्रथमकाण्डे प्रथमप्रपाठकः समाप्तः[1] ॥

व्रताचरण मारभ्य पात्रीनिर्णेजनान्ततः ।
वःमोक्तं प्राक्-प्रपाठकेऽन्यत्तु द्वितीयेऽभिधीयते ॥[2]

परिहरतीत्यर्थः । ततोऽङ्गारं गार्हपत्ये प्रक्षिप्य हस्तस्याग्रादक्षिणेनानयनम्, तत उदकस्पर्शः । ततो ज्वलद्भिर्दर्भपूलैः प्रथमं द्वितीयं च पुरोडाशं क्रमेण अपयति ; पृक्तापृक्तज्ञानाय तौ द्वावेव पुरोडाशौ क्रमेणाश्नाति च । अपृक्तौ चेत् तौ पुनः अपयत्यक्षेपः ; पृक्तौ चेत् वेदेनोपवेषेण वा तप्ततरेणाङ्गारमिश्रेण भस्मनाच्छादयेत् । अथ पात्रीनिर्णेजनम् ।— पात्र्यङ्गुलिप्रक्षालनं जलं पात्रीस्थ मेव गार्हपत्यादीप्तैस्तृणैर्ज्वलद्भिस्तापयित्वा विहारस्योत्तरतः स्थण्डे प्राक्संस्थास्तिस्रो रेखाः कृत्वा तासु रेखासु प्रत्यक्संस्थं परस्परं संसर्गं मप्राप्नुवत् त्रिर्निनयतीत्येतानि चत्वारि पुरोडाशकर्माण्यत्र ब्राह्मणे विहितानीति ॥

१— एतस्मात् समाप्तिवचनादनन्तरं 'क० १२१ संलग्नः'–इति ख, 'काण्डे १२१'–इति ग, 'कण्डिकासङ्ख्या १२१'–इति च ।

२— ठ-पुस्तकमात्रेऽत्रैव श्लोको दृश्यते ।

अथ

द्वितीयप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

द्वितीयाध्याये तृतीयं ब्राह्मणम्।

॥ हरिः ॐ ॥

चतुर्धा विहितो ह वा ऽग्रेऽग्निरास। स य मुग्रेऽग्निꣳ होत्राय प्रावृणत स प्राधन्वद्युं द्वितीयं प्रावृणत सु प्रैवाधन्वद्युं तृतीयं प्रावृणत सु प्रैवाधन्वद्थु योऽयु मेतर्ह्यग्निः सु भीषा निलिल्ये सोऽपः प्रविवेश तुं देवा अनुविद्य सुहसैवाङ्ग आनिन्युः सोऽपोऽभितिष्ठेवावधूता स्थ या अप्रपदनꣳ* स्थ याभ्यो वो मा मकामं नयन्तीति तुत आप्याः सम्बभुवुस्ततो दितु एकतः ॥ १ ॥

त ऽइन्द्रेण सहु चेरुः। युथेदं ब्राह्मणो राजान मनु-चरति स युच चिशीर्षाणं त्वाष्ट्रं व्विश्वरूपं जघान तस्य हैतेऽपि वृध्रस्य† व्विदाञ्चक्रुः शुश्वद्वैनं चितु एवु जघा-नात्युह तदिन्द्रोऽमुच्यत देवो हि सः ॥ २ ॥

---

* 'अप्रदनवꣳ'–इति च-मुद्रौ। † वृध्रस्य'–इति ग, च, ढ।

तु उ हैतु ऽऊचुः । उपैवेम ऽएनो गच्छन्तु येऽस्य वृध्यस्यावेदिषुरिति* किं मिति यज्ञु एवैषु मृष्टा मिति तुदेषेतद्यज्ञो मृष्टे युदेभ्यः पाचीनिर्णेजन मङ्गुलिप्रणेजनं निनयन्ति ॥ ३ ॥

तु ऽउ हाभ्या ऊचुः । अत्येव व्वयु मिद् मस्मुत्परो नयामेति कु मभीति यु एवादक्षिणेन हविषा युजाता ऽइति तुस्मान्नादक्षिणेन हविषा युजेताभ्येषु ह यज्ञो मृष्ट आभ्या ऽउ ह तुस्मिन् मृजते यो ऽदक्षिणेन हविषा युजते ॥ ४ ॥

तुतो देवाः । एतां दर्शपूर्णमासयोर्ह्दक्षिणा मकल्पयन् युदन्वाहार्यं नेददक्षिणꣳ हविरुसदिति तन्ना निनयति तुथैभ्यो ऽसमदं करोति तुदभितपति तुथैषाꣳ श्रुतं भवति स निनयति चित्राय त्वा द्वित्राय त्वैकत्राय त्वेति पशुर्ह वा ऽएष आलभ्यते युत् पुरोडाशः ॥ ५ ॥

पुरुषꣳ ह वै देवाः । अग्रे पशु मालेभिरे तस्यालब्धस्य मेधोऽपचक्राम सोऽश्वं प्रविवेश तेऽश्व मालभन्त तस्यालब्धस्य मेधोऽपचक्राम स गां प्रविवेश ते गा मालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽविं प्रविवेश तेऽवि

---

* 'वृध्यस्यावेदिषुरिति'—इति पवर्गीयादिः च, ट ।

मालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽजं प्रविवेश तेऽज मालभन्त तस्यालब्धस्य मेधोऽपचक्राम ॥ ६ ॥

स इमां पृथिवीं प्रविवेश। तं खनन्त ऽइवान्वीषुस्त मन्वविन्दंस्ताविमौ व्रीहियवौ तस्मादप्येतावेतर्हि खनन्त इवैवानुविन्दन्ति स यावद्वीर्य्यवद्व वा ऽअस्यैते सर्वे पशव आलब्धाः स्युस्तावद्वीर्यवद्वास्य हविर्हविरेव* भवति य एवं मेतद् वेदाचो सा सम्पद् यदाहुः पाङ्क्तः पशुरिति ॥ ७ ॥

यदा पिष्टान्युथ लोमानि भवन्ति। यदापु ऽआनयत्युथ त्वग् भवति यदा संयौत्युथ मांसं भवति सन्तत ऽइव हि स तर्हि भवति सन्तत मिव हि मांसं यदा शृतो ऽथास्थि भवति दारुण इव हि स तर्हि भवति दारुण मिव ह्यस्थ्युथ† यदुद्वासयिष्यन्नभिघारयति तं मज्जानं दधात्येषो सा सम्पद्यदाहुः पाङ्क्तः पशुरिति ॥ ८ ॥

स यं पुरुष मालभन्त। सु किम्पुरुषो ऽभवद्यावुश्वच्च गाच्च तौ गौरुश्च गवयुश्चाभवतां य मुवि मालभन्त स उष्ट्रोऽभवद्यु मज मालभन्त सु शरभोऽभवत्तस्मादेतेषां पशूनां नाश्नितव्य मुपक्रान्तमेधा ह्येते पशवः ॥ ९ ॥ १ ॥

॥ इति द्वितीयप्रपाठके प्रथमं ब्राह्मणम् [२. ३.] ॥

---

* 'हविरेव'–इति च। † 'दारुण मित्यस्थ्युथ'–इति च।

निर्णेजननिनयनस्याप्यभागत्व मुपपादयितुं तावत् तेषा मुत्पत्ति माह—"चतुर्द्धा"-इत्यादिना[1]। पुरा खल्वग्निः शरीरचतुष्टयधारणेन चतुर्विधो बभूव। तत्र 'यम्' अग्निं 'सः' अध्वर्युः 'होत्राय' होटकर्मणे 'प्रावृणत' प्रवृतवान्। व्यत्ययेन बहुवचनम्[2]; यद्वा सुपां सुपो भवन्तीति तच्छब्दात् जसः स्थाने सुः[3], ते देवा इत्यर्थः। 'सः' अग्निः 'प्राधवत्' प्रागच्छत्, अस्रियतेत्यर्थः। "धवि गमने"-इति[4] धातुः। "अथ योऽय मित्यादि[5]। एवं चिच्चयाग्निषु प्रगतेषु 'अथ' अनन्तरभावी 'योऽयम्' इदानीन्तनश्चतुर्थोऽग्निः, 'सः' अयम् 'भीषा' पूर्वाग्निवन्मरणभयेन 'निलिल्ये' निलीनोऽन्तर्हितो बभूव। स निलीय चापः प्रविवेश। 'तम्' अप्सु प्रविष्टं देवाः 'अनुविद्य'

१— 'पूर्वप्रपाठकान्ते "आग्नेभ्यो निनयति (१।३ ए० १२ पं०)"—इत्युक्त्वादाग्नेयोत्पत्ति माह— "चतुर्द्धेति।'—इति ड-पुस्तकस्थावतरणी।

२— पा० सू० ३. १. ८५। इहास्ति चेयं कारिका—
"सुप्तिङुपग्रहलिङ्गनराणाम्, कालहलच्स्वरकर्तृयडां च।
व्यत्यय मिच्छति प्राह्लदेषां सोऽपि च सिध्यति बाहुलकेन"—इति।

३— पा० सू० ७. १. ३९। ४— भ्वा० प० ५९७।

५— पुरेत्यादेः, योऽय मित्याद्यन्तस्य यच्छब्दस्य स्थाने ड-पुस्तके पाठस्त्वेवं दृश्यते—" 'ह'-'वै'-इति निपातौ वेदप्रसिद्ध्यर्थे। अग्नेरेकस्मात् सकाशात् अग्निस्तुर्द्धा 'विहितः' कृतः 'आस' बभूव, इत्यय मर्थो वेदप्रसिद्धः। 'सः' प्रजापतिः 'अग्रे' सृष्ट्यारम्भे पूर्वकल्पे वा 'यम्' अग्निम् 'होत्राय' होटकर्मणे 'प्रावृणत' प्रकर्षेण वृतवान्, स 'प्राधवत्' मृतोऽभवत्। यं द्वितीयं प्रावृणत, स एव सोऽपि प्राधवत्। यं तृतीयं, सोऽपि मृतोऽभवत्"—इति।

ज्ञात्वा, 'सष्ठीवेव' बलात् 'अह्नः' सकाशात् 'आनिन्युः' आजह्रुः[१]। 'सः' च बलादानीयमानोऽग्निः अपः 'अभि'लक्ष्य 'निष्ठेव' ष्ठीवनं कृतवान्। "ष्ठिवु निरसने[२]"-इत्यस्माल्लिट्। केनाभिप्रायेण ष्ठीवन मिति तं दर्शयति— हे आपः! 'याः' यूयं भीतस्य मम 'अप्रपदनं स्थ' अनाश्रयभूताः[३] स्थ, 'याभ्यः' च 'वः' पञ्चम्यर्थे चतुर्थी[४], युष्मत्सकाशात् 'अकामम्' इच्छारहितं मां बलान्नयन्ति, ता यूयं 'अवष्ठ्यूताः स्थ' ष्ठीवनेन दूषिता भवतेति। यथा लोके परैः प्रार्थितं कार्यं कर्त्तुं मत्तमः ष्ठीवनेन निन्द्यते, तद्वदपां निन्दा विवक्षिता[५]। "तत इत्यादि। 'ततः' निष्ठीवनलक्षणवीर्यधारणात् ताभ्योऽह्नः सकाशात् चितादिसञ्ज्ञका आप्त्या उत्पन्नाः। अह्नो जातत्वाच्च तेषाम् 'आप्त्याः'-इति सञ्ज्ञा ॥ १ ॥

अथ तेषां पाचीनिर्णेजनोदकं भाग इत्येतत् प्रतिपादनायाह— "त इन्द्रेणेति। यथेदानीं 'ब्राह्मणः' पुरोहितः देशाधिपतिं 'राजानम्' 'अनु'सृत्य चरति, तद्वदेव 'ते' चितादयोऽपीन्द्रेण सार्द्धं तदनुसारेणावस्थिता इत्यर्थः। 'सः' चेन्द्रो 'यत्र' यस्मिन् समये सोमपानादिसाधनैः त्रिभिः शिरोभिः उपेतं त्वष्टुः पुत्रं 'विश्वरूपं' अघान, तस्मिन् समये ते चितादयोऽपि 'तस्य वध्यस्य' कर्मणि षष्ठी[६], तं 'वध्यं' वधार्हं[७] 'विदाञ्चक्रुः' ज्ञातवन्तः। "उषविद्जागृ-

---

१ —'देवाः अन्विष्य बलाद् आनिन्युः आजह्रुः'—इति ज, झ।

२— भ्वा० प० ५६०। ३— 'अनाश्रयभूताः'—इति जादिषु, ढ—पुस्तके च।

४— पा० सू० ३. १. ८५। ५— 'तद्वदेव विवक्षिताः'—इति ङ।

६— पा० सू० २. ३. ५०। ७— 'वध्यं वधार्हं'—इति ढ।

भ्योऽन्यतरस्याम्"-इति[1] विदेर्ज्ञानार्थादाम् प्रत्ययः। अनन्तरं च 'एनं' विश्वरूपं चित एव इन्द्रसहायार्थं जघान। इन्द्रश्च 'तत्' हननजनितात्पापात् 'अत्यमुच्यत' अतिमुक्तोऽभवत्। तत्र हेतुमाह— "देवो ह्येति। यस्मात् स इन्द्रो देवः, अतोऽस्मिन् पाप-संश्लेषो न युक्त इत्यर्थः ॥ २ ॥

एवं विश्वरूपहननानन्तरं जनैः कृतं संवादं दर्शयति— "त उ हेति। 'ते' लौकिका जनाः (विश्वरूपहननानन्तरम्[2]) एतदूचुः। एतच्छब्दपरामृश्यं दर्शयति— "उपैवेति। ये खल्वस्य वध्यस्य 'अवेदिषुः' अज्ञासिषुः, इमे 'एनः' पापम् 'उपगच्छन्तु'। एव मुपगन्तव्यं तदेनः किंरूप मिति प्रश्नपूर्वकं माह— "किमितीति। 'एषु' चितादिषु 'यत्'[3] विश्वरूपवधजनित मेनः, यज्ञ एव 'तत्'[4] एनो 'मृष्टां' मृजीत, अश्लेषयदित्यर्थः। अतो 'यत्' एषां चयाणां पात्रीनिर्णेजनादि निनयनम्, 'एतत्' एतेन 'एषु' चितादिषु 'तत्' विश्वरूपहननजनित मेनो यज्ञो 'विमृष्टे' संश्लेषयति। तस्मादवहननपेषणादिजनितस्यैनसो रूपं पात्र्यादिनिर्णेजन माप्येभ्यो निनेतव्य मित्यर्थः ॥ ३ ॥

अथ तस्यैनसस्तैरपि कृतां निष्कृतिं दर्शयन् दक्षिणावतैव यागेन यष्टव्यं, नादक्षिणेनेति प्रसङ्गादाह— "त उ हेति। वय मपि 'इदम्' एनः 'परः' परस्तादन्यत्र आधारान्तरे 'अस्मात्' अस्मत्तो नयामेति[5] योजना। 'क मभीति' 'कम्' पुरुषम् 'अभि'लक्ष्येत्यर्थः।

१— पा०सू० ३. १. ३८। २— ठ-पुस्तके एष पाठोऽधिकः।
३— 'तत्'-इति ठ, ड। ४— 'यत्'-इति ठ, ड।
५— 'अस्मत्तोऽन्यत्र नयामेति'-इति ज, झ।

य एव दक्षिणारहितेन हविषा यजेत, तस्मिन्निति शेषः। अदक्षिणयागनिषेधं विपक्षबाधोपन्यासेनोपपादयति— "आग्नेय्वि-ति। 'सृष्टे'-इति "सृजू गुद्धौ[1]"-इत्यस्मात्क्त, अदादित्वाच्छपो लुक्[2] ॥ ४ ॥

का तर्हि दर्शपूर्णमासयोर्दक्षिणेति, तां माह— "तत इति। दर्शपौर्णमासिकं[3] हविर्दक्षिणारहितं नैव भवेदिति अन्वाहार्यरूपां दक्षिणा मकल्पयन्नित्यर्थः। अन्वाहरति यज्ञसम्बन्धि दोषजातं परिहरत्यनेनेति व्युत्पत्त्यान्वाहार्यो नाम ऋत्विग्भ्यो देय ओदनः[4]। तथाच तैत्तिरीयकम्— "यद्वै यज्ञस्य क्रूरं, यदविलिष्टं, तदन्वा-हार्येणान्वाहरति, तदन्वाहार्यस्यान्वाहार्यत्वम्"-इति[5] ॥

"तन्नानेति। 'तत्' आग्नेयानां निनयनं पृथक् पृथगसंसृष्ट मेव कर्त्तव्यम्। 'तथा' सति 'एभ्यः' आग्नेयेभ्यः 'असमदम्' अकल्पं करोति। संसर्गे हि मदीयत्वदीय मिति कल्पः स्यादित्यभिप्रायः॥

निनीतस्योदकशब्दाङ्गारेण प्रतपनं विधत्ते[6]— "तदभितपतीति। 'तथा' सत्येषां 'तत्' जलं 'भृतं' पक्वं भवतीत्यर्थः ॥

१— अदा० प० ५६। २— पा० सू० २. ४. ७२।

३— 'दार्शपौर्णमासिकं'—इति ङ।

४— "यज्ञस्य हीन मन्वाहरतीति अन्वाहार्यः। अध्वर्युरन्वाहार्यसञ्ज्ञकं दक्षिणार्थं तण्डुलरूप मोदनं चतुर्णा ऋत्विजां द्वित्रिर्यावता सम्भाव्यते तत्परिमाणं ततोऽधिकं वा"—इत्यादि का०श्रौ० २. ५. २७ सू०टी०। एष चौदनः दक्षिणाग्नौ पच्यत इति तस्याग्नेरपरं नाम अन्वाहार्य-पचन इति। ५— तै० सं० १. ७. ३. १।

६— 'निनीत मुदक मङ्गारेण प्रतपति'—इति ढ।

विहितं नियतं मनुष्य मन्त्रं[1] विधत्ते— "स इति ॥

एवं संस्कृतं पुरोडाशं पशुत्वेन स्तौति— "पशुर्हेति ॥ ५ ॥

अस्य पशुरूपता मुपपादयितु मितिहास मुदाहरति— "पुरुषꣳ हेति । "मेधोऽपचक्रामेति । यज्ञियः सारांशो 'मेधः' । 'तस्य' सज्ञप्तस्य पुरुषस्य सकाशादपक्रान्तो बभूवेत्यर्थः ॥ ६ ॥

"स इमा मित्यादि । एवं पुरुषाश्वादिपशुष्वालब्धेषु ततस्ततो निष्क्रान्तः 'सः' मेधः अन्ततः[2] इमां पृथिवीं प्रविष्टवान् । 'तं' मेधं पृथिवीं 'खनन्तः' विदारयन्त इव 'अन्वीषुः' देवा अन्वैच्छन् । "इषु इच्छायाम्[3]"-इत्यस्मात्सिप् । ईदृग्विधं मेधं पृथिव्यां देवाः अलभन्त । "ताविमौ व्रीहियवाविति । स एव मेधो व्रीहियवरूपेण परिणत इत्यर्थः[4] । "तस्मादपीत्यादि । 'तस्मात्' मेधपरिणामरूपत्वादेव, इदानी मपि 'एतौ' व्रीहियवौ मेधवत्कर्षणलक्षणेन खननेन लभन्ते कर्षकाः । अतः खननप्राप्यत्वदर्शनात् मेधपरिणामरूपत्वं व्रीहियवयोः स्वध्यवसान मित्यर्थः ॥

एतज्ज्ञानस्य फल माह— "स यावदिति । स इति पूर्ववद्[5] वक्तव्यं एकवचनम् । 'अस्य' यजमानस्य ते 'एते' पुरुषादयः सर्वे पशवः[6] आलभ्याः सन्तो यत्परिमाणविशिष्टवीर्यवद् हविः 'स्युः'

१— वा० सं० १. २३. ३, ४, ५ । का० औ० सू० २. ५. २६ ।

२— नास्त्येतत् पदं ड-पुस्तके । ३— तु० प० ७१ ।

४— 'परिणतोऽभूदित्यर्थः'-इति ड ।

५— व्यत्ययेनेति यावत् । १२७ पृ० द्रष्टव्यम् ।

६— नैते पदे ढ-पुस्तके ।

भवेयुः, 'अस्य' व्रीहियवयोः सर्वपशुसारत्वं विदुषो यजमानस्य तन्निष्पादितं पुरोडाशादिकं 'हविः', तावद्दीर्घवद् 'हविरेव' भवति। एवं सर्वपशुसारत्वात् पुरोडाशः पशुरूप एव संस्क्रियत इत्यर्थः[१]।

इत्थं सर्वपशुसारतया पुरोडाशस्य पशुत्वं प्रतिपाद्य सम्पत्त्यापि तद्दर्शयति— "अत्रो सेति। लोमत्वगादिपञ्चावयवयोगात् 'पाङ्क्तः पशुः'-इति यदाक्षरभिज्ञाः, 'सा' पाङ्क्तसम्पत् 'अत्रो' अत्रापि पुरोडाशे विद्यत इत्यर्थः[२] ॥ ७ ॥

ता मेव सम्पत्तिं दर्शयति— "यदेत्यादिना। यदा खलु पुरोडाशस्य पिष्टावस्था, 'अथ' अनन्तर मेव पिष्टेषु लोमसम्पत्तिः; लोमवत् पिष्टानां सूक्ष्मत्वाद्, बहुत्वाच्च। यदा खलु संयवनार्थं मप आनयति, अथ तस्मिन् समये पुरोडाशस्य त्वग् भवति; त्वचीव स्निग्धीभावदर्शनात्। संयवनावस्थायां मांसधातूत्पत्तिः। संयवनावस्थस्य पुरोडाशस्य, लौकिकमांसस्य च साम्य माह— "मन्तत इवेति। भृतावस्थस्य पुरोडाशस्यास्थ्युत्पत्तिः। ता मुत्पत्तिं लौकिकास्थिसादृश्येन प्रतिपादयति— "दारुण इवेति। भृतावस्थो हि पुरोडाशो 'दारुणः' कठिन इव हि तस्मिन् समये भवति; लौकिक मप्यस्थि कठिनम्। अतः भृतावस्थायां पुरोडाशो ऽस्थिमान् भवतीत्यर्थः। "उद्वासयित्यन्निति। उद्वासनकाले यत्

१— एव मित्यादेः स्थाने 'एवञ्च पशुरूप मेव संस्क्रियते'-इति ढ।

२— 'लोमत्वगादिपञ्चावयवयोगात् या पशौ पाङ्क्तसम्पदभिज्ञैरुच्यते, सात्रापि पुरोडाशे विद्यते'-इति ढ।

पुरोडाशस्य 'अभिघारणम्'; अस्थ्यन्तर्गतं मज्जाख्यं धातु मेव तेन स्थापयतीत्यर्थः ।

उक्तां पाङ्क्तत्वमप्यक्तिं निगमयति— "एषो इति । 'एषा उ' एषैव ॥ ८ ॥

देवैरालब्धाना मपक्रान्तमेधानां पुरुषादिपशूनां परिणामविशेषं दर्शयन् तस्य प्रसङ्गादभक्ष्यता माह— "स य मित्यादिना । 'सः'-इति पूर्ववद् बहुवचनस्थाने एकवचनम्; ते देवा इत्यर्थः । "एतेषा मिति । किम्पुरुषादीनां पशूनां[1] मांसं 'नाग्नितव्यं' न भक्षितव्यम् । तत्र हेतु माह— "अपक्रान्तेति । अपक्रान्तमेधत्वेन[2] अयज्ञियत्वादित्यर्थः ॥ ९ ॥ १ [२. ३.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये प्रथमकाण्डे द्वितीयाध्याये
तृतीयं ब्राह्मणम्[3] ॥

१— इह तु 'एतेषां' पुरुषादिपशूना मित्येवार्थः कथं न भवतीत्यपि विचार्यम्; तेषा मेव ह्यालम्भनेन अपक्रान्तमेधत्वं श्रुयतेऽत्र षष्ठकण्डिकायाम्। तथाच पुरोडाशनामपिष्टकविशेषस्य मांसप्रतिनिधित्वं प्रकल्प्य हिंसाराहित्ये एव श्रुतितात्पर्यं पर्यवस्येत ।

२— 'सारांशो मेधः'—इति ह्युक्त मिहैव पुरस्तात् (१३१ पृ० ४ पं०)।

३— एतत्पूर्वश्रुतस्यैव ब्राह्मणस्योपसंहाररूप मिदं ब्राह्मणम्। इहाख्याना मुत्पत्तिनिदानं वर्णितम्, तन्निनयनमन्त्राश्च विहिताः, अपि प्रसङ्गतः किम्पुरुष-गौर-गवयोष्ट्र-शरभ-मांसाना मभक्ष्यत्वं सूचितश्चेति ।

इन्द्रो ह युच व्वृत्राय व्वज्रं प्रजहार। स प्रहृतश्चतुर्द्धा ऽभवत्तस्य स्फ्यस्तृतीयं वा यावद्वा यूपस्तृतीयं वा यावद्वा रथस्तृतीयं वा यावद्वाथ युच प्राहरत्तच्छकलोऽशीर्यत सु पतित्वा शरोऽभवत्तस्माच्छरो नाम यदशीर्य्यतैव सु सु चतुर्द्धा व्वज्रोऽभवत् ॥ १ ॥

ततो द्वाभ्यां ब्राह्मणा यज्ञे चरन्ति। द्वाभ्याꣳ राजन्यबन्धवः संव्याधे यूपेन च स्फ्येन च ब्राह्मणा रथेन च शरेण च राजन्यबन्धवः ॥ २ ॥

स यत् स्फ्य मादत्ते। युधैव तदिन्द्रो व्वृत्राय व्वज्र मुदयच्छदेव मेवैष एतं पाप्मने द्विषते भ्रातृव्याय व्वज्र मुद्यच्छति तस्माद्वै स्फ्य मादत्ते ॥ ३ ॥

त मादत्ते। देवस्य त्वा सवितुः प्रसुवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्या माददेऽध्वरकृतं देवेभ्य इति सविता वै देवानां प्रसविता तत्सवितृप्रसृत एवैन मेतदादत्ते ऽश्विनोर्बाहुभ्या मित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्या मादत्ते न स्वाभ्यां पूष्णो हस्ताभ्या मिति पूषा भागदुघ स्तत्तस्यैव हस्ताभ्या मादत्ते न स्वाभ्यां* व्वज्रो वा ऽएष तस्य नु मनुष्यो† भर्त्ता तु मेताभिर्देवताभिरादत्ते ॥ ४ ॥

---

* 'पूष्णो'–इत्यादीनि पदानि च-पुस्तके न सन्ति।

† 'मसुष्यो'–इति च।

आददेऽध्वरकृतं देवेभ्य इति। अध्वरो वै यज्ञो यज्ञ-कृतं देवेभ्य इत्येवैतदाह तꣳ सव्ये पाणौ कृत्वा दक्षिणे-नाभिमृश्य जपति सुꣳश्यत्येवैन मेतद्यज्ञं जपति ॥ ५ ॥

सु जपति। इन्द्रस्य बाहुरसि दक्षिण इत्येष वै वीर्य्य-वत्तमो य इन्द्रस्य बाहुर्दक्षिणस्तस्मादाहेन्द्रस्य बाहुरसि दक्षिण इति सहस्रभृष्टिः शततेजा इति सहस्रभृष्टिर्वै स वज्र आसीच्छततेजा यं तं वृत्राय प्राहरत्तु मेवै-तत्करोति ॥ ६ ॥

वायुरसि तिग्मतेजा इति। एतद्वै तेजिष्ठं तेजो य-दयं योऽयं पवत ऽएषु हीमाँल्लोकाँस्तिर्य्यङ्नुपवते* सुꣳ-श्यत्येवैन मेतद् द्विषतो वध† इति यदि नाभिचरेद्यदु ऽअभिचरेदमुष्य वध इति ब्रूयात्तेन सुꣳशितेनु नात्मान मुपस्पृशति नु पृथिवीं नेदनेन वज्रेण सुꣳशितेनात्मानं वा पृथिवीं वा हिनसानीति तस्मान्नात्मान मुपस्पृ-शति नु पृथिवीम् ॥ ७ ॥

देवाश्च वा ऽअसुराश्च। उभये प्राजापत्याः पस्पृधिरे ते ह स्म यद्देवा असुरान् जयन्ति ततो ह स्मैवैनान् पुनरुपोत्तिष्ठन्ति ॥ ८ ॥

---

* 'ङ्नुपवते'—इति च, छ।

† 'वध'—इति च। एव मुत्तरत्रापि सर्वत्र।

ते ह देवा ऊचुः। जयामो वा ऽअसुरांस्तुत्त्वेव नः पुनरुपोत्तिष्ठन्ति कथं न्वेवाननपजय्यं जयेमेति ॥ ९ ॥

सु हाग्निरुवाच। उदञ्चो वै नः पलाय्य मुच्यन्त ऽइत्युदञ्चो ह स्मैवैषां पलाय्य मुच्यन्ते ॥ १० ॥

सु हाग्निरुवाच। अहु मुत्तरतः पुर्येष्याम्युथ यूयु मितु उपसुꣳरोत्स्यथ तान्त्सꣳरुध्यैभिश्च लोकैरभिनिधास्यामो युदु चेमांल्लोकानुति चतुर्थं तुतः पुनर्न सुꣳहास्यन्त ऽइति ॥ ११ ॥

सोऽग्निरुत्तरतः पुर्यैत्। अथेमु ऽइतु उपसुमरुन्धंस्तान्त्सꣳरुध्यैभिश्च लोकैरभिन्युदधुर्य्युदु चेमांल्लोकानुति चतुर्थं तुतः पुनर्न सुमजिहत तुदेतुन्निदानेन युत् स्तम्बयजुः ॥ १२ ॥

सु योऽसावमुीदुत्तरतुः पर्य्येति। अग्निरेवैषु निदानेन तानध्वर्युरेवेतु उपसुꣳरुणद्धि तान्त्सꣳरुध्यैभिश्च लोकैरभिनिदधाति युदु चेमांल्लोकानुति चतुर्थं तुतः पुनर्न सुञ्जिहते तुस्मादप्येतर्ह्यसुरा न सुञ्जिहते येनु ह्येवैनान् देवा अबाधन्त तेनैवैनानुप्येतर्हि ब्राह्मणा यज्ञे ऽवबाधन्ते ॥ १३ ॥

यु उ ऽएव युजमानायारातीयुति। युश्चैनं द्वेष्टि त मेवैतदेभिश्च लोकैरभिनिदधाति युदु चेमांल्लोकानुति

चतुर्थꣳ स वा एभिश्च लोकैरभिनिदधद्यदु चेमांल्लोकानुति चतुर्थ* मस्या एव सुर्वꣳ हरत्यस्याꣳ हीमे सुर्वे लोकाः प्रतिष्ठिताः किꣳ हि हरेद्यदन्तरिक्षꣳ हरामि दिवꣳ हरामीति हरेत्तस्मादस्या एव सुर्वꣳ हरति ॥१४॥

अथ तृण मन्तर्द्धाय प्रहरति। नेदनेन व्रज्रेण सुꣳश्नितेन पृथिवीꣳ हिनसानीति तस्मात् तृण मन्तर्द्धाय प्रहरति ॥ १५ ॥

स प्रहरति। पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिष मित्युत्तरमूला मिव वा ऽएना मेतत्करोत्यादुदानस्ता मेतदाहौषधीनां ते मूलानि मा हिꣳसिष मिति व्रजं गच्छ गोष्ठान मित्यभिनिधास्यन्नेवैतद्नपक्रमि कुरुते तद्यनपक्रमि यद् व्रजेऽन्तस्तस्मादाह व्रजं गच्छ गोष्ठान मिति व्वर्षतु ते द्यौरिति युच वा ऽअस्यै खुनन्तः क्रूरी†कुर्वन्त्यप घ्नन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति तस्मादाह व्वर्षतु ते द्यौरिति बधान देव सवितः पर मस्यां पृथिव्या मिति देव मेवैतत्सवितार माहान्धे तमसि बधानेति यदाह पर मस्यां पृथिव्या मिति शतेन पाशैरित्यमुचे तदाह योऽस्मान्

* 'स वा'–इत्यादिरेतदन्तो ग्रन्थः च-पुस्तके नास्ति।

† 'क्रूरं'–इति सायणसम्मतः पाठः।

द्वेष्टि युञ्च वयं द्विष्मस्त मुतो मा मौगिति युदि नाभिचुरेद्युद्यु ऽअभिचुरेदमु मुतो मा मौगिति ब्रूयात् ॥ १६ ॥

अथ द्वितीयं प्रहरति । अपारुं पृथिव्यै देवयुजनाद् बध्यास मित्यरुर्ह वै नामासुररक्षसु मास तं देवा अस्या अपाघ्नत तथो ऽएवैन मेतद्देषोऽस्या अपहते व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधानु देव सवितः पर मुस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान् द्वेष्टि युञ्च वयं द्विष्मस्त मुतो मा मौगिति ॥ १७ ॥

तु मग्नीदभिनिदधाति । अररो दिवं मा पप्त इति युच वै देवा अरुरु मसुररक्षसु मपाघ्नत स दिव मपि-पतिषत्तु मग्निरभिन्यदधादुररो दिवं मा पप्त इति स न दिव मपतत्तथो ऽएवैन मेतदध्वर्युरेवास्मात्लोकादन्त-रेति दिवोऽध्यग्नीत्तस्मादेवं करोति ॥ १८ ॥

अथ तृतीयं प्रहरति । द्रप्सस्ते द्यां मा स्कन्नित्ययं वा ऽअस्यै द्रप्सो यु मस्या इमꣳ रसं प्रजा उपजीवन्त्येषु ते दिवं मा पप्तदित्येवैतदाह व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्बधानु देव सवितः पर मुस्यां पृथिव्याꣳ शतेन पाशैर्योऽस्मान् द्वेष्टि युञ्च वयं द्विष्मस्त मुतो मा मौ-गिति ॥ १९ ॥

स वै चिर्य्युजुषा हरति। चयो वा ऽइमे लोका एभिरेवैन मेतल्लोकैरभिनिदधात्यङ्गा वै तद्युदिमे लोका अङ्गो तद्यजुस्तस्मात् चिर्य्युजुषा हरति ॥ २० ॥

तूष्णीं चतुर्थम्*। स यदिमांल्लोकानुति चतुर्थ मुस्ति वा नु वा तेनैवैतद् द्विषन्तं भ्रातृव्य मुवबाधतेऽनङ्गा वै तद्युदिमांल्लोकानुति चतुर्थ मुस्ति वा न वानङ्गो तद्युत्तूष्णीं तस्मात् तूष्णीं चतुर्थम् ॥ २१ ॥ २ ॥

॥ इति द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् [२. ४.] ॥

अथ वेदिकरणार्थं स्फ्यादानविधि मनूद्य स्फ्यस्य वज्ररूपत्वं वक्तु मितिहासम् आचष्टे[1]— "इन्द्रो हेति। "तस्येत्यादि। 'तस्य' चतुर्द्धाविभक्तस्य वज्रस्य स्फ्यः तृतीयोऽंशः। न्यूनाधिकरादित्येन तृतीयांशत्वज्ञानं दुर्लभ मित्यभिप्रेत्य पश्चान्तर माह— "यावदेति। तृतीयाङ्गागात् न्यून मधिकं वा यावदेव किञ्चित् तावानेव स्फ्य इत्यर्थः। एवं यूपस्तृतीय मित्यादौ योजना। चतुर्थभागस्य परिणामप्रकार माह— "अथ यत्रेति। "तच्छकल इति। 'तत्' तच देशे[2] प्रहृतः स वज्रः शकलो भूत्वा 'अग्रीर्यत' शीर्णोऽभूत्। स च शीर्णो भूमौ पतित्वा शरात्मना परिणत इत्यर्थः। शरशब्दं निर्वक्ति—"तस्मादिति। चतुर्द्धाभवन मुपसंहरति—"एव मिति॥ १॥

---

* 'चतुर्थम्'—इति क। 'चतुर्थं'—इति ख, ग।

१—'व्याचष्टे'—इति ज, झ, ट। २—'तद्देशे'—इति ठ, ड।

तेषां वज्रावयवानां स्फ्यादीनां ब्राह्मणराजन्ययोर्व्यवस्थया विनियोग माह—"तत इति। 'राजन्यबन्धवः' क्षत्रियजातीयाः 'संव्याधे' युद्धे चरन्तीत्यनुषङ्गः। "द्वाभ्या मिति मङ्त्रोक्तं विभजति—"यूपेन चेति ॥ २ ॥

अथ तस्य स्फ्यादानं विधत्ते—"स यदिति। तच्छब्दयच्छब्दाभ्यां प्रसिद्धिरभिधीयते। 'सः' प्रसिद्धोऽध्वर्युरित्यर्थः। "एव मेवैष इत्यादि। वृत्रवधार्थं मिन्द्रवत् विद्वेषणशीलं पापरूपं शत्रुं हन्तुं स्फ्यलक्षणं वज्रं सुद्यच्छतीत्यर्थः ॥ ३ ॥

विहित मादान मनूद्य मन्त्रं[1] विधत्ते—"त मादत्त इति। "देवस्य त्वेतिमन्त्रस्य[2] प्रागाम्नात मपि ब्राह्मणं[3] विधेयविशेषे योजयितुं पुनराम्नायते—"सविता वा इत्यादिना। "न स्वाभ्या मिति। देवसम्बन्धिभ्या मेव बाहुभ्यां स्फ्यादानम्, न तु स्वकीयाभ्याम्।

युक्तश्चैतदित्याह—"वज्रो वा इति। एष स्फ्यो वज्रः; तत्परिणामत्वात्। न हि मनुष्यस्तद्वज्रं भर्त्तुं शक्नोति, अतो देवस्य त्वेति मन्त्रं प्रयुञ्जानः तं स्फ्यलक्षणं वज्रं सवितृदेवताभिरेव 'आदत्ते' आदानं कृतवान् भवति ॥ ४ ॥

"आदद इति। "अध्वरो वा इति। 'ध्वरः' हिंसाप्रत्यवायो न विद्यतेऽस्मिन्नित्यध्वरशब्दस्य यज्ञोऽर्थः। अध्वरं करोतीति 'अध्वरकृत्'। तथाच यज्ञकृतं देवेभ्य आदद इत्युक्तं भवतीत्यर्थः ॥

१, २—वा० सं० १. २४. १। का० श्रौ० सू० २. ६. १३।

३—३८ पृ० ७ पं०, ५४ पृ० २ पं० द्रष्टव्यम्।

"संश्यत्येवैन मिति । वक्ष्यमाणं मन्त्रं[१] जपतीति यत्, 'एतत्' एतेन एनं 'संश्यत्येव' सम्यक् तनूकरोति, तीक्ष्णीकरोतीत्येव । "श्रो तनूकरणे"-इति[२] धातुः । "श्रोतः श्यनि[३]"-इत्योकार-लोपः ॥ ५ ॥

विहितं जप मनूद्य मन्त्रं[४] विधत्ते—"स इति । इन्द्रस्य दक्षिणो बाहुरतिशयेन वीर्यवान्; वृत्राख्यासुरवधकारित्वात् । अतः स एव त्व मसीति स्पृश्य स्तुतिरिति व्याचष्टे—"एष वा इति ।

द्वितीयं भाग मनूद्य व्याचष्टे—"सहस्रभृष्टिरिति । सहस्रं भृष्टयो ऽग्रयः[५]; यद्वा भजनानि हिंसाविशेषा वृत्रवधादिषु येन क्रियन्ते स वज्रः 'सहस्रभृष्टिः' । यः 'श्रततेजाः' श्रपरिमितदीप्तिः, तादृशो वज्रः । स एव त्व मसीति स्पृश्यस्तुतिः । वज्रस्येमां प्रसिद्धिं द्योतयितुं 'वै'-शब्दः । "यं त मिति । 'तम्' उक्तविधं 'यं' वज्रं वृत्रवधार्थं मिन्द्रः प्राहरत्, 'त मेव' तदात्मक मेव श्रनेन मन्त्र-भागेन करोतीत्यर्थः ॥ ६ ॥

तृतीयभाग मनूद्य व्याचष्टे—"वायुरसीति । यः 'तिग्मतेजाः' वायुः, स एव त्व मसीति स्तुतिः । वायोस्तिग्मतेजस्त्व मुपपाद-

---

१—इन्द्रस्य बाहुरसीति वा० सं० १. २४. २ ।

२—दिवा० प० ३८। ३—पा० सू० ७. ३. ७१ ।

४—प्रथमा टीप्पनी द्रष्टव्या । का० श्रौ० सू० २. ६. १४ ।

५—"भृष्टिर्भर्जनं पाको मारण मिति यावत् । सहस्रसङ्ख्याकानां शत्रूणां भृष्टिर्यस्य स सहस्रभृष्टिः"-इति महीध० ।

यति—"एतद्वा इति। यः 'अयं' वायुः 'पवते' अन्तरिक्षे चरति, एतत् खलु तेजसां मध्ये तेजस्वितमं तेजः। इम मेवातिशय मुपपादयति—"एष ह्येति। अग्न्यादितेजोऽन्तरं हि कुत्रचिदेव परिच्छिन्नम्, 'एष हि' वायुः इमान् सर्वान् लोकान् 'अनु'क्रमेण 'तिर्यग्'वृत्तिः 'पवते' युगपद्व्याप्नोतीत्यर्थः॥

अस्य प्रयोजन माह—"सऽश्नुतीति। 'एतत्' एतेन उक्तविध-वायुतादात्म्यप्रतिपादनेनेत्यर्थः। "अमुष्य वध इति। अभिचारप्रयोगे "द्विषतो वधः[१]"-इत्यस्य स्थाने 'अमुष्य' देवदत्तस्य वध इति शत्रोर्नाम निर्दिश्येदित्यर्थः॥

एतेन मन्त्रजपात्तीव्रीकृतेन शत्रुणात्मनोऽन्यस्य च संसर्गं निषेधति—"तेनेति। 'हिनसानि' हिंसितं करवाणीत्यर्थः। "हिंसि हिंसायाम्[२]"-इत्यस्मात्लोटि रूपम्॥ ७॥

अथ स्तम्बयजुर्हरणं विधित्सुस्तस्यासुरनिर्हरणलक्षणं प्रयोजनं वक्तु माख्यायिका माह—"देवाश्चेति। प्रजापतेर्हि द्वे स्त्रियौ,—दितिरदितिश्च। तत्रादितेः पुत्रा देवाः; दितेः पुत्रा असुराः; अतः 'उभये'ऽपि 'प्राजापत्याः' प्रजापतेः पुत्राः। ते 'पस्पृधिरे' स्पर्द्धां कृतवन्तः। यदा खलु 'ते' देवाः असुरान् जयन्ति, 'ततः' अनन्तरक्षण मेव 'एनान्' देवानभिलक्ष्य पुनरसुरा उत्तिष्ठन्ति।

१—अत्र हि हन्तेर्वधादेशे रूपं वध इति। वधादेशस्तु अन्तस्यादिः (पा० सू० २. ४. ४२.)। अतो यत्र क्वचिदपि हिंसार्थः पवर्गीयादि-र्बधो दृश्यते, न स समीचीनः; अपि बन्धनार्थो बधधातुस्तु पवर्गी-यादिरिति विवेकः। २—तुधा० प० १९।

"उदोऽनूर्ध्वकर्मणि"-इति[1] पर्युदासादिह चोर्ध्वकर्मत्वादात्मनेपदाभावः ॥ ८ ॥

अथ देवैः कृतं जयोपायचिन्तन मुपन्यस्यति — "ते हेति। 'अनपजय्यं' जेतु मशक्यम् 'एनान्' असुरान् केन खलु प्रकारेण पुनरुत्थानरहितं जयेमेत्येवं विचारितवन्त इत्यर्थः। "च्व्यजय्यौ शक्यार्थे"-इति[2] जयतेर्यति निपात्यते ॥ ९ ॥

अथाग्निनोपदिष्टं जयप्रकारं दर्शयति — "स हेति। 'नः' अस्माकं सकाशात् उदङ्मुखाः सन्तः 'पलाय्य' पलायनं कृत्वा "अय गतौ[3]"-इत्यस्मात् क्त्वो ल्यप्[4], "उपसर्गस्यायतौ"-इति[5] लत्वम्। अग्निनोक्तं वाक्यं सत्य मिति श्रुतिः स्वय मेवानुवदति — "उदङ्मुखो हेति[6] ॥ १० ॥

एव मुत्तरतोऽवस्थितानसुरान् जेतु मग्निरेवोपायं देवान् प्रत्युपदिशति — "स हेति। "इत इत्यादि। 'इतः' अस्मात् वेदिलक्षणात्[7] स्थानात् 'उपसंरोत्स्यथ' उपसंरुद्धान् प्रतिबद्धगतानसुरान् करिष्यथ। 'अथ' अनन्तर मेव वयं 'एभिः' पुरोवर्त्तिभिः पृथिव्यादिभिः स्त्रिभिर्लोकैः 'अभिनिधास्यामः' अभितः सर्वतो निरुद्धगतीन् निहितान् करिष्यामः। यद्वा ; अभितो नितरान् छिन्नान् त्याजितान् करिष्यामः। इमान् लोकान् 'अति' अतिक्रम्य

१—पा० सू० १. ३. २४। २—पा० सू० ६. १. ८१।
३—भ्वा० आ० ४७४। ४—पा० सू० ७. १. ३७।
५—पा० सू० ८. २. १९। ६—परराष्ट्राश्रितत्वादिति भावः।
७—आर्यावर्त्तलक्षणादित्यर्थः स्यादेतिहासिकाना मिति विवेच्यम्।

यत् चतुर्थं लोकं जात मस्ति[१], अस्माक मप्रत्यक्षम्, तेनापि त्याजितान् करिष्यामः[२]। 'ततः' अनन्तर मसुराः पुनः 'न संहास्यन्ते' सङ्गता न भविष्यन्ति, विशीर्णा बाधिता एव भवेयुरित्यर्थः। "श्रो हाङ् गतौ"-इति[३] धातुः ॥ ११ ॥

इत्थ मग्निनोक्तं वाक्यं श्रुत्वा तथेव तैर्देवैः कृतं श्रुतिरूपबध्नाति— "सोऽग्निरिति। अग्निः 'उत्तरतः' उत्तरस्यां दिशि 'पर्यैत्' पर्यगच्छत्। अग्निवाक्ये हि चिकीर्षितार्थोपदेशनात् भविष्यदर्थवाचिनो लटः प्रयोगः; श्रुतिवाक्ये तु निर्वृत्तार्थप्रतिपादनात् भूतानद्यतनवाचिनो लङः प्रयोग इत्येतावान् भेदः[४] ॥

"तदेतदित्यादि। यदत्र स्तम्बयजुर्हरणं करिष्यते, एतत् 'निदानेन' मूलकारणेन निरूप्यमाणं सत् देवैः कृतं 'तत्' असुरनिरसनम्। अतो यज्ञविघातकासुरनिर्हरणार्थं स्तम्बयजुर्हरण मिति विधिरत्रेयः ॥ १२ ॥

"स योऽसाविति। स्तम्बयजुर्हरणसमये 'योऽसौ' आग्नीध्रो वेदेरुत्तरतः परीत्य वर्त्तते। 'एषः' 'निदानेन' मूलकारणेन निरूप्यमाणः सन् 'अग्निरेव'। योऽग्निः पुरा असुराञ्चिरोद्धुं सृदक् पर्यैत्, तदात्मक एवाग्नीध्र इत्यर्थः।

ननु तत्रोपसंरोधका देवाः, तत्स्थानीयश्चत्वरिजां मध्ये कः?

१—'चतुर्थलोकं जात मस्ति'-इति भ, 'चतुर्थलोकजात मस्ति'-इति ड।
२—ऐतिह्यासिकपक्षे त्वचार्थान्तर मूह्यम्। ३—जु० आ० ७।
४—पा० ३. ३. १३, ३. २. १११ सूत्रे द्रष्टव्ये।

इति तं दर्शयति— "तानध्वर्युरिति। येनोपायेन पुरा देवा असुरानबाधिषत, तेनैवोपायेन यज्ञानुष्ठानसमये तद्विघातिनोऽसुरा बाधितव्या इति निगमयति— "तस्मादिति ॥ १३ ॥

न केवलं स्तम्बयजुषोऽसुरनिर्हरणं प्रयोजनम्, शत्रुनिर्हरणमपि तत्प्रयोजनमिति प्रतिपादयति— "य उ एवेति। 'अरातीयति' अरातिरिवाचरति। "उपमानादाचारे"-इति[1] क्यच्। यश्च 'एनं' यजमानं साक्षादेव 'द्वेष्टि' बाधते। 'तम्' उभयविधं शत्रुम्। अन्यत् पूर्ववत्[2]।

पृथिव्या एव सकाशात् स्तम्बयजुर्हरणं कर्त्तव्यं, नान्तरिक्षादेरित्यभिप्रेत्याह— "स वा इति। पृथिव्यादिभिस्त्रिभिर्लोकैः तदतिरिक्तेन चान्येन चतुर्थेन लोकेनासुरान्निरस्यन् 'असौ' अध्वर्युः 'अस्याः' पृथिव्या एव सकाशात् 'सर्वं' स्तम्बयजुर्हरति, नान्तरिक्षादेः। 'हि' यस्मात् 'अस्याम्' एव भूम्यां 'इमे' अन्तरिक्षादयः सर्वे लोकाः प्रतिष्ठिताः, तस्मात् स्तम्बयजुर्हरणस्य प्रथमपर्यायवत् द्वितीयादिपर्यायाणामपि पृथिव्या एव सकाशाद्धरणं युक्तमित्यर्थः।

एतदेव व्यतिरेकमुखेनोपपादयति— "किं हीति। 'यत्' यदि "अन्तरिक्षं हरामि", "दिवं हरामि"—इत्येवं स्तम्बयजुर्हरेत्, तदा 'किं' नाम 'हरेत्?' अन्तरिक्षद्युलोकयोः हर्त्तव्यस्य स्तम्बस्याभावात् न तत्र तद्धरणं सम्भवतीत्यर्थः। "तस्मादिति। प्रागुक्तनिगमनं स्तम्बयजुर्हरणार्थम् ॥ १४ ॥

१— पा० सू० ३. १. १०। २—१४३ पृ० १५ पं० द्रष्टव्यम्।

तृणान्तर्द्धानविशिष्टं स्फ्येन प्रहरणं विधत्ते— "अथेति। तृणान्तर्द्धानस्य प्रयोजनमाह— "न हिनस्तीति। तृणानन्तर्द्धाने हि तीक्ष्णेन स्फ्य-रूपापन्नेन वज्रेण पृथिवी हिंसिता स्यात्, तद्धिंसानिवृत्तये प्रहरणसमये तृणमन्तर्द्धाय तस्योपरि प्रहर्त्तव्य मित्यर्थः ॥ १५ ॥

विहितं प्रहरणमनूद्य मन्त्रं[1] विधत्ते— "स प्रहरतीति। ओषध्यास्त इति मन्त्रभागं व्याचष्टे— "उत्तरमूला मिति। स्फ्य मादद्दानोऽध्वर्युः 'एनां' पृथिवीम् 'उत्तरमूलाम्' उपरिभागावस्थितमूलयुक्ता मिव खल्वेतत् करोति। अत उत्तरमूलत्वेन प्रहरणात् तद्धिंसाशङ्कायां तदभावो ऽनेन प्रार्थ्यत इत्यर्थः। मन्त्रगतौषधिशब्दस्य जात्यभिप्रायेणैकवचनान्तता[2] इत्यभिप्रेत्य व्याचष्टे— "ओषधीना मिति॥

प्रहरणनिष्पन्नस्य तृणस्य पांशो[3]रादानमन्त्रमनूद्य व्याचष्टे— "व्रजङ्गच्छेति[4]। 'अभिनिधास्यन्' अभितो निक्षेप्स्यन् खल्वध्वर्युः 'एतत्' असुरजातम् 'अनपक्रमि' अपक्रमणरहित मितस्ततो गमनरहितं करोति। तत् खल्वनपक्रमि यद् 'व्रजे' गोष्ठेऽन्तर्निरुद्धते, अतोऽस्य मन्त्रप्रयोगस्य अपक्रमणाभावः प्रयोजन मित्यर्थः ॥

१— वा० सं० १. २५. १। का० श्रौ० सू० २. ६. १५, १६। अत्रास्ति मतान्तरविचारः, स चास्य टीकायां (या० दे०) द्रष्टव्यम्।

२— पा० सू० १. २. ५८ द्रष्टव्यम्। ३—'पांसो'—इति आदिषु।

४— वा० सं० १. २५. २। का० श्रौ० सू० २. ६. १७।

वेदिप्रेक्षणमन्त्र मनूद्य तात्पर्य माह — "वर्षतिति[१]। 'अस्मै' षष्ठ्यर्थे चतुर्थी[२]। 'अस्याः' पृथिव्याः सम्बन्धिनि 'यत्र' स्थाने वेद्यर्थं खनन्तः[३] 'क्रूरं' निष्ठुरं कुर्वन्ति; तेन च तां पृथिवीम् 'अपघ्नन्ति' हिंसन्ति; अतः खननजनितां हिंसा मनेन मन्त्रप्रयोगेण शान्ति-रूपाभिरेवाद्भिः पुनः प्रशमय्य सन्दधातीत्यर्थः ॥

व्रजङ्गच्छेत्यादिमन्त्राणां कात्यायनः स्पष्टं विनियोग मसूत्रयत्— "व्रजङ्गच्छेति पुरीष मादत्ते, वर्षतु न इति वेदिं प्रेक्षते, वधा-नेत्युत्करोति"-इति[४]।

उत्करे निधानमन्त्रस्य[५] अभिप्राय माविष्करोति — "देव मेवैतदित्यादिना। "पर मस्यां पृथिव्याम्"-इत्यस्य व्याख्यानम् — "अन्धे तमसीति। सर्वप्रकाशरहितेऽतिशयिते तमसि, यस्मिन् बद्धो न पुनरावर्त्तते, तादृशे स्थान इत्यर्थः। 'अमुचे'-इति, अमोचनायेत्यर्थः; न हि शतसङ्ख्याकैः पाशैर्बद्धः स्वात्मानं मोचयितु मीष्ट इत्यभिप्रायः ॥

अभिचरतः प्रयोगे विशेष माह — "यद्यु"-इति। अनभिचरतः प्रयोगे मन्त्रगतस्य मिति यः शब्दः, तस्य स्थाने 'अभिचरतः' यजमानस्य शत्रुनाम द्वितीयया निर्दिश्य मन्त्रः प्रयोक्तव्य इत्यर्थः ॥ १६ ॥

एवं स्तम्बयजुर्हरणस्य प्रथमपर्याय मभिधाय द्वितीयपर्यायार्थं

१— वा० सं० १. २५. ३। का० श्रौ० सू० २. ६. १८।

२— पा० २. ३. ६२ सू० वा० १५०९। ३—'खननं, तत्'-इति ठ।

४— का० श्रौ० सू० २. ६. १७, १८, १९।

५— वा० सं० १. २५. ४। का० श्रौ० सू० २. ६. १९।

प्रहरणादिकं समन्त्रकं[1] विधत्ते — "अथेति । मन्त्रप्रतिपादित मररुवधप्रार्थन मुपपादयति — "अररुर्हेति। 'अररुः' नाम असुर-रक्षसम्, सुराणां विरोधि रक्षो बभूव । 'रक्षः'-शब्दात् "अनसन्ता-दित्यकारः[2] समासान्तः । देववदेव दृढानीन्नतोऽध्वर्युरथपाररु मित्यनेन मन्त्रेण पृथिव्याः सकाशादपहन्ति । "व्रजङ्गच्छेत्यादिकस्य सर्वस्य द्वितीयपर्याये प्रयोज्यस्यापि प्रागुक्त एवार्थ इत्यभिप्रेत्यानु-वदति — "व्रजङ्गच्छेति ॥ १७ ॥

उत्करे न्युप्तस्य स्रुवयजुषोऽभिधानं समन्त्रकं[3] विधत्ते — "त मिति । 'अभिनिदधाति' उपरि हस्तनिधानेन अधस्तात् क्षिपतीत्यर्थः । 'मा पप्तः'-इति[4] पतनाभावप्रार्थनं समर्थयितुं पुरावृत्त मुदाहरति — "यच वा इति । "स दिव मिति । 'सः' देवैरपहतोऽररुः 'अपिपतिषत्' दिवं पतितुं गन्तु मैच्छत् । 'तं' तथाविधं पिपतिषु मररुम्, उत्तरतः परिगतः 'अग्निः' 'अभिन्यदधात्' उपरि हस्तनिधानेनाधस्तात् प्रेरितवान् । किं ब्रुवन्? हे अररो! 'दिवं' द्युलोकं 'मा पप्तः' मा प्राप्नुहीति । "पत्लृ गतौ[4]"-इत्यस्मात्लुङि स्वदित्वादङ्[5], "पतः पु मिति[6] पुमागमः। एव मग्निनाभिनिधाने

१— वा० सं० १. २६. १ । का० श्रौ० सू० २. ६. २१ । अस्ति चात्र विचारः ग्राखान्तरघटितः (या० दे० टीका द्रष्टव्या) ।

२— पा० सू० ५. ४. १०३ ।

३— वा० सं० १. २६. २ । का० श्रौ० सू० २. ६. २२ ।

४—भ्वा० प० ८४५ । ५— पा० सू० ३. १. ५५ ।

६— पा० सू० ७. ४. १६ ।

क्षते सति, सोऽररुर्दिवं न प्राप्नोत् । तदेवेदानीं मध्वर्युः खन्यजुर्हरन् 'अस्माद्' भूलोकात् 'एनम्' अररुम् 'अन्तरेति' अन्तरितं व्यवहितं करोति । आग्नीध्रश्चैतन्मन्त्रकरणकेनोत्कराभिनिधानेन 'दिवः' अन्तरिक्षात् त मसुर मन्तरितं[1] करोतीत्यर्थः ॥ १८ ॥

अथ तृतीयपर्यायं विधत्ते— "अथेति । मन्त्रं[2] व्याचष्टे— "अयं वा इति । 'अस्याः' पृथिव्याः सम्बन्धिनं 'य मिमं' मधुरादिरसं सर्वाः प्रजा उपजीवन्ति, अयं खल्वस्याः पृथिव्याः 'द्रप्सः' । तथाच हे पृथिवि ! 'ते' त्वदीयः 'एषः' रसः 'दिवं' द्युलोकं 'मा पप्तत्' मा पतत्विति 'इमम्' अर्थम् 'एषः' मन्त्रो ब्रूत इत्यर्थः । अस्मिन् तृतीयेऽपि पर्याये व्रजङ्गच्छेत्यादिकं सर्वं पूर्ववत् प्रयोक्तव्य मित्यभिप्रेत्य तत् पठति— "व्रज मिति ॥ १९ ॥

उक्तं समन्त्रकं चिर्हरण[3] मनूद्य प्रशंसति— "स वा इति । 'इमे' पृथिव्यादयः प्रसिद्धाः त्रयो लोकाः । तथा च चिष्कृत्वो हरणेन 'एभिः' स्त्रिभिरेव लोकैः 'एनम्' अररुम् 'अभिनिदधाति' अभितो निक्षिपति, बाधत[4] इति यावत् ॥

यजुर्मन्त्रेण हरणस्य लोकत्रयस्य च साम्य माह— "अद्धा वा इति । 'इमे' पृथिव्यादयः 'लोकाः' इति यत्, तत् 'अद्धा वै' प्रत्यक्ष मेव खलु । यदेतद्धरणसाधनं यजुः, तदपि 'अद्धो' अद्धैव प्रत्यक्ष मेव ; अनुष्ठेयार्थस्य साक्षात् प्रतिपादकत्वात् । अतो यजुषो

१— व्यवहित मित्यादिर्ग्रन्थो भ-ठाभ्या मन्यत्र न दृश्यते ।

२— वा० स० १. २९. ३ । का० श्रौ० सू० २. ६. २३ ।

३— 'निर्हरण'-इति ठ, ड । ४—'प्रतिबाधत'-इति ठ, ड ।

लोकानाञ्च प्रत्यक्षत्वसाम्यात्, त्रिवारं यजुषा हरणेन लोकत्रया-देवास्यारोर्बाधो युक्त इति निगमयति— "तस्मादिति ॥ २० ॥

अमन्त्रकं चतुर्थं पर्यायं विधत्ते— "तूष्णीं मिति[1]। तस्य प्रयोजन माह— "स यदिति। 'इमान्' प्रागुक्तान् त्रीन् लोकान् अतिक्रम्य, यत् 'चतुर्थं' लोकजातम्, तत् 'अस्ति वा न वा'-इति सन्दिग्धम्; अत्यन्तविप्रकृष्टत्वेनानुभवपथानवतारात्। एतच्चतुर्थ-हरणात्तेनैव सन्दिह्यमानेन लोकजातेन विद्वेषणं कुर्वन्तं शत्रु मवबाधते।

एतदुपपादयितुं तूष्णीं-हरणस्य लोकत्रयव्यतिरिक्तस्य चतुर्थ-स्थानस्य च साम्य माह— "अनद्वा वा इति। 'अनद्वा' अप्रत्यक्ष मित्यर्थः। तूष्णीं-हरण मप्यनुष्टेयार्थप्रतिपादकमन्त्रप्रयोगाभावाद्-स्पष्टत्वेन 'अनद्वः' अप्रत्यक्ष मेवेति ॥ २१ ॥ ४ ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये
प्रथमकाण्डे द्वितीयाध्याये चतुर्थं ब्राह्मणम्[2] ॥

१— "सटशं शाखान्तरात्"—इति का० श्रौ० २. ६. २४ सू० टीकायाम्।

२— इह हि ब्राह्मणे पुरीषादानं, वेदिप्रेक्षणं, पुरीषनिरसनञ्चेति त्रीणि कर्माणि विहितानि। तत्र प्रथमं तावत् पुरीषादानार्थं मेव अध्वर्युः दर्भसहितं स्रुवं मादाय सव्ये हस्ते सटशं तं निधाय दक्षिणेन हस्तेनाभ्य हस्तमार्जनेन तिरस्कारोति। ततस्तत्तृणं वेद्या मुदगग्रं निधाय दर्भस्याधस्ताद् भुवि स्रुवेण प्रहरति, तेन प्रह-रणेनोत्खातं पुरीषं हस्तेन गृह्णाति। इत्थं पुरीषादानं सम्पाद्य ततो वेदि-प्रेक्षते। गृहीतं च तत् पुरीष मुत्करे निक्षिपति। एव मुत्तरोत्तरं चतुः कर्त्तव्यम्; तत्र मन्त्रेण त्रिः, तूष्णीं सकृदिति विवेकः। प्रकृतप्रदेशादुद्धृतस्तृणधूल्यादिरग्निरुत्कर उच्यते ॥

देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवा ऽअनुव्य मिवासुरय ह्यासुरा मेनिरेऽस्माक मेवेदं खलु भुवन मिति ॥ १ ॥

ते होचुः । हन्तेमां पृथिवीं विभजामहै तां विभज्योपजीवामेति ता मौक्षणैश्चर्मभिः पश्चात् प्राञ्चो विभजमाना ऽअभीयुः ॥ २ ॥

तद्वै देवाः शुश्रुवुः । विभजन्ते ह वा ऽइमा मसुराः पृथिवीं प्रेत तदेष्यामो यत्रेमा मसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञ मेव विष्णुं पुरस्कृत्येयुः ॥ ३ ॥

ते होचुः । अनु नोऽस्यां पृथिव्या मभजतास्त्वेव नोऽप्यस्यां भाग ऽइति ते ह्यासुरा ऽअब्रुवन्त ऽइवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्म ऽइति ॥ ४ ॥

वामनो ह विष्णुरास । तद्देवा नु जिह्मीडिरे महद्वै नो ऽदुर्य्यं नो यज्ञसम्मित* मुदुरिति ॥ ५ ॥

ते प्राञ्चं विष्णुं निपाद्य । छन्दोभिरभितः पर्यगृह्णन् गायत्रेण त्वाच्छन्दसा परिगृह्णामीति दक्षिणतस्त्रैष्टुभेन त्वाच्छन्दसा परिगृह्णामीति पश्चाज्जागतेन त्वाच्छन्दसा परिगृह्णामीत्युत्तरतः ॥ ६ ॥

---

* 'यज्ञसम्मिता'–इति क, ख ।

तं छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात् समाधाय तेनार्चन्तः श्राम्यन्तश्चेरुस्तेनेमाꣳ सुर्व्वाम् पृथिवीꣳ समविन्दन्त* तद्यदेनेनेमाꣳ सुर्व्वाꣳ समविन्दन्त तस्माद् वेदिर्नाम तस्मादाहुर्य्यावती व्वेदिस्तावती पृथिवीत्येतया ह्येमाꣳ सुर्व्वाꣳ समविन्दन्तैवꣳ ह वा ऽइमाꣳ सुर्व्वाꣳ सपत्नानाꣳ† सुंवृङ्क्ते निर्भजत्यस्यै सपत्नान्य ऽएव मेतद्वेद ॥ ७ ॥

सोऽयं व्विष्णुर्म्लानः । छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमण मास स तत ऽएवौषधीनां मूलान्युपमुम्लोच ॥ ८ ॥

ते ह देवा ऽऊचुः । क्व नु व्विष्णुरभूत् क्व नु युज्ञो ऽभूदिति ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमण मस्त्यु चैवान्विच्छतेति तं खनन्त इवान्वीषुस्तं त्यङ्गुलेऽन्वविन्दंस्तस्मात् त्यङ्गुला व्वेदिः स्यात्तद् ह्यापि पाञ्चित्यङ्गुला मेव स्यौम्युस्याध्वरस्य व्वेदिं चक्रे ॥ ९ ॥

तद् तथा नु कुर्यात् । ओषधीनां वै स मूलान्युपाम्लोचत्तस्मादोषधीना मेव मूलान्युच्छेत्तवै ब्रूयाद्युन्वेवाच व्विष्णु मन्वविन्दंस्तस्माद्वेदिर्नाम ॥ १० ॥

तु मनुविद्योत्तरेण परिग्रहेण पर्य्यगृह्णन् । सुक्षा चासि शिवा चासीति दक्षिणत ऽइमा मेवैतत् पृथिवीꣳ

* 'सुमविन्दन्त'–इति ग, च । † 'सपुत्नाꣳ'–इति क ।

संविद्य सुक्षाꣳ शिवा मकुर्वत स्योना चासि सुषदा चासीति पश्वादिमा मेवैतत् पृथिवीꣳ संविद्य स्योनाꣳ सुषदा मकुर्व्वतोर्ज्जस्वती चासि पयस्वती चेत्युत्तरत इमा मेवैतत् पृथिवीꣳ संविद्य रसवती सुपजीवनीया मकुर्वत ॥ ११ ॥

स वै चिः पूर्व्वं परिग्रहं परिगृह्णाति । चिरुत्तरं तत् षट् कृत्वः षड् वा ऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य माचा तावन्त मेवैतत् परिगृह्णाति ॥ १२ ॥

षड्भिर्व्याहृतिभिः । पूर्व्वं परिग्रहं परिगृह्णाति षड्भिरुत्तरं तद् द्वादश कृत्वो द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य माचा तावन्त मेवैतत् परिगृह्णाति ॥ १३ ॥

व्याममाची पश्चात् स्यादित्याहुः । एतावान्वै पुरुषः पुरुषसम्मिता हि ऋरत्निः प्राची चिदृङ्हि यज्ञो नाच माचास्ति यावती मेव स्वयं मनसा मन्येत तावतीं कुर्यात् ॥ १४ ॥

अभितोऽग्नि मुꣳसा ऽउन्नयति। योषा वै वेदिर्व्वृषाग्निः परिगृह्य वै योषा व्वृषाणꣳ शेते मिथुन मेवैतत् प्रजननं क्रियते तस्मादभितोऽग्नि मुꣳसा ऽउन्नयति ॥ १५ ॥

सा वै पश्चादुरीयसी स्यात्। मध्ये सꣳहारिता पुनः पुरस्तादुर्व्येव मिव हि योषां प्रशꣳसन्ति पृथुश्रोणिर्विमृष्टान्तराꣳसा मध्ये सङ्गाह्येति जुष्टा मेवैना मेतद्देवेभ्यः करोति ॥ १६ ॥

सा वै प्राक्प्रवणा स्यात्। प्राची हि देवानां दिगथो ऽउदक्प्रवणोदीची हि मनुष्याणां दिग् दक्षिणतः पुरीषं प्रत्युदूहत्येषा वै दिक् पितृणाꣳ* सा यद्दक्षिणाप्रवणा स्यात् क्षिप्रे ह यजमानोऽमुं लोकु मियात्तथो ह यजमानो ज्योग् जीवति तस्माद्दक्षिणतः पुरीषं प्रत्युदूहति पुरीषवतीं कुर्व्वीत पशवो वै पुरीषं पशुमती† मेवैना मेतत् कुरुते ॥ १७ ॥

तां प्रतिमार्ष्टि। देवा ह वै सङ्गामꣳ सन्निधास्यन्तस्ते होचुर्हन्त यदस्यै पृथिव्या ऽअनाप्तं देवयजनं तच्चन्द्रमसि निदधामहै स यदि न ऽइतोऽसुरा जयेयुस्तत ऽएवार्च्चन्तः श्राम्यन्तः पुनरभिभवेमेति स यदस्यै पृथिव्या ऽअनाप्तं देवयजन मासीत्तच्चन्द्रमसि न्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमस्यस्यै पृथिव्यै देवयजन मित्यपि ह वा ऽअस्यैतस्मिन् देवयजन ऽइष्टं भवति तस्मादै प्रतिमार्ष्टि ॥ १८ ॥

---

* 'पितृणाꣳ'–इति च। † 'पशुमती'–इति च।

स प्रतिमार्ष्टि। पुरा क्रूरस्य विसृपो विरप्शिन्नितिं सङ्ग्रामो वै क्रूरꣳ सङ्ग्रामे हि क्रूरं क्रियते हतः पुरुषो हतोऽश्वः शेते पुरा ह्येतत् सङ्ग्रामान्युदधत तस्मादाह पुरा क्रूरस्य विसृपो विरप्शिन्नित्युदादाय पृथिवीं जीवदानु मित्युदादाय हि युदस्यै पृथिव्यै जीव मासीत्तच्चन्द्रमसि न्युदधत तस्मादाहोदादाय पृथिवीं जीवदानु मिति या मैरयꣳश्चन्द्रमसि* स्वधाभिरितिं यां चन्द्रमसि ब्रह्मणादधुरित्येवैतदाह तां मु धीरासोऽअनुदिश्य यजन्त ऽइत्येतेनो ह तां मनुदिश्य यजन्तेऽपि ह वा ऽअस्यैतस्मिन् देवयजन ऽइष्टं भवति यु ऽएवꣳ मेतद्वेद ॥ १९ ॥

अथाह प्रोक्षणीरासादयेति। व्रश्चो वै स्फ्यो ब्राह्मणश्चेमं पुरा यज्ञ मभ्यजूगुपतां व्रश्चो वा ऽआपस्तद् व्रश्च मेवैतदभिगुप्या ऽआसादयति स वा ऽउपुर्युपर्य्येव प्रोक्षणीषु धार्य्यमाणास्वथ स्फ्य मुद्यच्छत्युथ यन्निहित ऽएव स्फ्ये प्रोक्षणीरासादयेद् व्रश्चौ ह सम्पृच्छेयातां तथो ह व्रश्चौ न सम्पृच्छेते तस्मादुपुर्युपर्य्येव प्रोक्षणीषु धार्य्यमाणास्वथ स्फ्य मुद्यच्छति ॥ २० ॥

---

* 'मैरयंश्चन्द्रमसि'–इति काण्वौ, 'मैरयँश्चन्द्रमसि'–इति च-मुद्रौ।

अथैतां व्वाचं व्वदति। प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः सम्मृड्डि पत्नीꣳ सन्नह्याज्येनोदेहीति सम्प्रैषु एवैष स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेत स्वयु मु ह्येवैतदुदेद मतः कर्म कर्त्तव्य मिति ॥ २१ ॥

अथोदञ्चꣳ स्फ्यं प्रहरति। अमुष्मै त्वा व्वज्रं प्रहरामीति यद्यभिचरेदुज्जो वै स्फ्यु स्तृणुते हैवैनेनु ॥ २२ ॥

अथ पाणी ऽश्रवनेनिक्ते। यद्धस्यै क्रूर मभूत्तद्धस्या ऽएतदुहार्षीत् तस्मात्पाणी ऽश्रवनेनिक्ते ॥ २३ ॥

स ये ह्याग्र ऽईजिरे। ते ह स्मावमुर्श यजन्ते ते पापीयाꣳस आसुरथ ये नेजिरे ते श्रेयाꣳस आसुस्ततो ऽश्रद्धा मनुष्यान्विवेद ये युजन्ते पापीयाꣳसस्ते भवन्ति य ऽउ न युजन्ते श्रेयाꣳसस्ते भवन्तीति तत ऽइतो देवान् हविर्न्न जगामेतुः प्रदानाड्डि देवा ऽउपजीवन्ति ॥ २४ ॥

ते ह देवा ऽऊचुः। बृहस्पति माङ्गिरस मश्रद्धा वै मनुष्यानविदन्तेभ्यो व्विधेहि यज्ञ मिति स हेत्योवाच बृहस्पति राङ्गिरसः कथा नु यजध्व ऽइति ते होचुः किङ्कामया यजेमहि ये युजन्ते पापीयाꣳसस्ते भवन्ति य ऽउ न युजन्ते श्रेयाꣳसस्ते भवन्तीति ॥ २५ ॥

स होवाच। बृहस्पतिराङ्गिरसो यद्वै शुश्रुम देवानां

परिधूतं तुदेषु यज्ञो भवति युच्छृतानि हवीꣳषि क्रुत्ता व्वेदिस्तेनावमर्शं मचारिष्ट तस्मात् पापीयाꣳसो ऽभूत तेनानवमर्शं यजध्वं तुथा श्रेयाꣳसो भविष्यथेत्या क्रियत ऽइत्या बर्हिष स्तरणादिति बर्हिषा ह वै खल्वेषा शाम्यति स युदि पुरा बर्हिष स्तरणात् किञ्चिदापद्येत बर्हिरेव तुत् स्तृणन्नुपास्येदुथ यदा बर्हि स्तृणन्त्युपि पुदाभितिष्ठन्ति स यो हैवं व्विद्वानुनवमर्शं युजते श्रेयान् हैवु भवति तुस्मादुनवमर्शं मेवु यजेत ॥ २६ ॥ ३ ॥

॥ इति द्वितीयप्रपाठके तृतीयं ब्राह्मणम्* [२.५.] ॥

इत्थं स्तम्बयजुर्हरणं[1] विधाय वेदिपरिग्रहं वक्तु मितिहास मुपन्यस्यति— "देवाश्चेति । 'पस्पृधिरे' स्पर्द्धां क्रतवन्तः । "अपस्पृधेथा मानृचुरानृक्षरिति[2] सम्प्रसारणनिपातनस्योपलक्षणत्व मभिप्रेत्य लिट्यपि सम्प्रसारणं क्रतम् । स्पर्द्धमानानां तेषां मध्ये 'देवाः' 'ततः' तेभ्यः असुरेभ्यः 'अनुव्यम्' अनुगमनं व्यग्भूतिं[3] प्राप्ता इव

---

* सायणाचार्यमतेऽत्रैव द्वितीयाध्यायपरिसमाप्तिः ॥

१— "यजुर्मन्त्रको दर्भः 'स्तम्बयजुः'। तच्च स्तम्बरूपं स्फ्येन भित्त्वोत्करदेशे हरेत्"—इति तै० ब्रा० ३. २. ६ सा० भा० (तै० सं० १. १. ६.) "यजुषा मन्त्रेण हरणीयः पांसुसहितः स्तम्बः 'स्तम्बयजुः', तस्य हरणं"—इति तै० सं० २. ६. ४. सा० भा०। "वेदिस्थानात् सकाशात् पांशोर्मन्त्रेणान्यत्र हरणम्"—इति च तत्रैव।

२— पा० सू० ६. १. ३६। ३—'व्यत्कृतिं'—इति ठ।

बभूवुः। 'अथ ह' अनन्तर मेव ते असुराः मन्यन्ते स्म। किं मिति? 'इदं' सर्वं जगदस्माक मेवेति ॥ १ ॥

एव मुक्ता किं मुक्तवन्त इति तद्दर्शयति— "ते हेति। 'हन्त'- इति हर्षे। यत एवं देवा न्यग्भूताः[१], अतो निष्प्रत्यूहं वयम् 'इमां' पृथिवीं विभजामहै। विभज्य च तां यथाभाग मुपजीवामेति। एव मुक्ता किं कृतवन्त इति तदाह— "ता मिति। 'औच्चैः' उच्चैर्भवोऽनडुहः सम्बन्धिभिश्चर्मभिः। उच्चैस्-शब्दात् "तत्रेदम्"- इत्यणि[२] "सपूर्वहन्धृतराज्ञाम्"—इत्यत्रोपः[३]। तैश्चर्मभिः 'पश्चात्' प्रतीचीं दिश मारभ्य 'प्राञ्चः' प्राङ्मुखा विभजमानाः 'अभीयुः' अभिजग्मुरित्यर्थः ॥ २ ॥

असुरेष्वेवं कृतवत्सु देवाः किं कृतवन्त इति, तदाह— "तदा इति। "प्रेतेत्यादि। अस्माकं तूष्णी मवस्थान मनुचितम्, अस्माभि- रपि तद्विषये प्रयतितव्य मिति, परस्पर मभिमुखीकृत्येत्यर्थः प्रतिपाद्यते— हे देवाः! यूयं 'प्रेत' गच्छत, प्रोत्सहध्व मिति यावत्। यस्मिन् स्थाने असुराः पृथिवीं विभजन्ते, तत् स्थानं गमि- ष्यामः। गत्वा च 'यत्' यदि 'अस्यै' षष्ठ्यर्थे चतुर्थी[४] 'अस्याः' पृथिव्याः सम्बन्धि स्थानं न प्राप्नुयामः, 'ततः' तर्हि वय मभागिनो भवेम; यदि तु प्राप्नुयामः, तदा भागिनः 'स्याम' भवेमेत्यर्थः। एव मालोच्य देवैः कृतं दर्शयति— "त इति। यज्ञात्मक मेव 'विष्णुं' पुरतो धारयित्वा 'ईयुः' गतवन्त इत्यर्थः ॥ ३ ॥

१— 'न्यक्कृताः'—इति ठ। २— पा० सू० ४. ३. १२०।
३— पा० सू० ६. ४. १३५। ४— पा० २. ३. ६२ सू० वा० १५०९।

गत्वा चासुरान् प्रति किं मुक्तवन्त इति, तदाह—"ते हेति । 'अस्यां' पृथिव्यां 'नः' अस्मान् 'अन्वाभजत' संयोजयत; 'नः' अस्माक मप्यस्यां भागो भवतिति। असुरैः कृतं प्रतिवचनं दर्शयति—"ते हेति । 'असूयन्त इव' असूयां कुर्वन्त इव, असहमाना इति यावत् । यावन्तं देशं विष्णुर्व्याप्य वर्त्तते, तत्परिमाणं स्थानं युष्मभ्यं प्रयच्छाम इति ॥ ४ ॥

असुरैरभिहिते देवास्तदङ्गीचक्रुरित्याह—"वामनो हेति । विष्णुर्हि तदानीं 'वामनः' खर्वो बभूव । अतएवासुराः तेनाक्रान्तं स्थानं प्रयच्छाम इत्यब्रुवन् । अथापि 'तत्' असुरैरुक्तं देवाः 'न जिह्रीडिरे' न ह्यनादृतं चक्रुः, किन्तु आद्रियन्त स्मेत्यर्थः । "ह्रेडृ अनादरे"-इति[1] धातुः । आदरणप्रकार माह—"महदिति । विष्णुर्हि यज्ञः, अतो 'यज्ञसम्मितं' स्थान मस्मभ्यं दत्तवन्त इति यत्, तत् 'नः' अस्माकं 'महत्' अधिकम् ॥ ५ ॥

एवं विचार्य देवैः कृतं दर्शयति—"त इति। यज्ञात्मकं 'विष्णुं' 'प्राञ्चं' प्राक्प्रियरसं निपात्य, दक्षिणतः, पश्चाद्, उत्तरतश्च गायत्र्यादिच्छन्दोभिः सर्वतः पर्यगृह्णन् ॥ ६ ॥

"त मिति । 'तं' विष्णुं गायत्र्यादिभिश्छन्दोभिः सर्वतः परिगृह्य, पूर्वस्यां दिशि आहवनीयाख्यम् 'अग्निं' प्रज्वाल्य, 'तेन' विष्णवात्मकेन यज्ञेन 'अर्चन्तः' पूजयन्तः, 'आप्नुवन्तः' कर्मानुष्ठानजनितं अमं प्राप्नुवन्तः 'चेरुः' पूर्ववत् ववर्त्तिरे । चरित्वा च 'तेन' यज्ञात्मकस्य

१— भ्वा० आ० २८४ । "ह्रेडृ-ह्रेडृ अनादरे"-इति ठ ।

विष्णोराधारभूतेन स्थानेन देवाः सर्वां मेवेमां पृथिवीं सम्यगश्नुवन्त । अतो विद्यते लभ्यते अनेनेति यज्ञस्थानस्य 'वेदि'-नामधेयं निर्वक्ति— "तद्यदिति ।

उक्तं वेद्याः सर्वपृथिवीलाभरूपत्वम्, इदानीं वेदिपृथिव्योस्तादात्म्यविषया मभियुक्तप्रसिद्धिं मुदाहरति— "तस्मादिति। यत्परिमाणविशिष्टा खलु वेदिः, तत्परिमाणैव पृथिवी, कुत इत्यत आह— "एतयेति । 'हि' यस्मात् 'एतया' वेद्या 'इमां' सर्वां पृथिवीम् अलभन्त, अतस्तल्लाभहेतुत्वात् ततोऽनन्येत्यर्थः ॥

इत्थं पुरावृत्तं मुदाहृत्य प्रकृते योजयति— "एवं हेति । यथैव हि वेदिपरिग्रहाद्देवा असुरसकाशात् कृत्स्नां पृथिवी मपहृतवन्तः, एव मेवायं यजमानोऽपि अचुसम्बन्धिनीं सर्वां भूमि मपहरति; तांश्च अचून् 'अस्याः' पृथिव्याः 'निर्भजति' निर्भक्तान् भागरहितान् करोतीत्यर्थः। तस्माद् गायत्रेणेत्यादिभिर्मन्त्रैः[1] श्येन वेदिं दक्षिणतः पश्चादुत्तरतश्च रेखया परिगृह्णीयादित्यर्थः[2] ॥ ७ ॥

अथ वेदेः खननं विधित्सुः प्रकृत मितिहासशेष मनुक्रामति— "सोऽय मिति। 'सः' यज्ञात्मको 'विष्णुः', दक्षिणतः पश्चादुत्तरतश्च छन्दोभिः परिगृहीतत्वात् पूर्वस्यां दिशि चाग्नेरवस्थानात् इतस्ततश्चलितु मशक्यत्वेन 'ग्लानः' श्रान्तः सन् 'अपक्रमणम्' अपगमनं 'नाश' न जगाम। "अश गतिदीप्त्यादानेषु"[3]—इत्यस्माल्लिटि रूपम्।

१—वा० सं० १. २७. १–३. का० श्रौ० सू० २. ६. २५।

२— एष एव पूर्वपरिग्रह उच्यते। का० श्रौ० २. ६. २५–२६. सू०।

३— धा० उ० ८८६।

यद्वा अस्तेरेव लिटि छान्दसो भूभावाभावः[१]। ग्लानस्य तस्य विष्णोरपगमनं न बभूवेत्यर्थः। स च सर्वतः परिगृहीतो[२] विष्णुः, 'तत एव' तस्मिन्नेव स्थाने ओषधीनां मूलान्युपेत्य भूम्यन्तर्गतः सन् 'मुम्लोच' अस्तङ्गतः, अदृश्यो बभूव ॥ ८ ॥

अनन्तरञ्च ते देवास्तच्च विष्णु मपश्यन्तो वितर्कितवन्तः, किं मित्याह—"ते ह देवा इति। विष्णुः 'क' कुत्राभूत्? तदात्मको यज्ञश्च क्व वाभूदिति। एवं वितर्क्य तैर्निर्णीत मर्थं दर्शयति—"ते होचुरिति। "अत्रैवेति। चतसृष्वपि दिक्षु परिवृतत्वेन गमनासम्भवात् 'अत्रैव' स्थाने तस्य विष्णोरन्वेषणं कुरुतेत्यर्थः। इत्थं[३] परस्परं निश्चित्य भूमिं खनन्त इव 'तं' विष्णु मन्विष्टवन्तः। अन्विष्य तं भूम्यन्तः अङ्गुले 'अन्वविन्दन्' अलभन्त। यत एवम्, अत इदानी मपि यज्ञलाभाय वेदेरल्यङ्गुलमात्रखननं कर्त्तव्य मिति विधत्ते—"तस्मादिति। अङ्गुलपरिमाणेन खाता[४] वेदिर्भवेदित्यर्थः।

वेदेरल्पाङ्गुलखनन मृषिसंवादेन द्रढयति—"तदु हेति। 'पाङ्क्तिः' नाम कश्चित्, स खलु सोमयागस्यापि वेदिं अङ्गुलखाता मेव कृतवान्; अतोऽत्रापि अङ्गुलखाता वेदिर्युक्तेति भावः ॥ ९ ॥

त मिमं पक्षं निषिध्य पक्षान्तर माह—"तदु तथेति। 'सः' विष्णुः ओषधीनां खलु मूलान्युपेत्यान्तर्हितोऽभवत्; तस्मात्यावति

१— "अस् भुवि"—इति अदा० प० ५५। "आर्द्धधातुके (पा०सू० २. ४. २५.)"—इत्यधिकृत्य "अस्तेर्भूः"—इति (पा०सू० २. ४. ५२.) भूभावः प्राप्त इति भावः। २— 'प्रतिबद्धो'—इति ठ, ड।

३— 'एवं'—इति ड। ४— 'अङ्गुलप्रामाणेन खाता'—इति ञ, ञ।

देशे भूम्या मन्तरोषधीनां मूलानि प्रसरन्ति, तावत्पर्यन्तं खात्वा तन्मूलान्येवोच्छेत्तुं ब्रूयात्। "तुमर्थे सेसेनिति[1] तवै-प्रत्ययः। पूर्वं कृत्स्नपृथिवीलाभहेतुतया वेदिनाम निरुक्तम्, यज्ञात्मकस्य विष्णोर्लाभाधिकरणतयापि तन्निर्वक्ति— "यज्ञवेवेति ॥ १० ॥

अथ वेदेरुत्तरपरिग्रहः[2] कर्त्तव्य इतीतिहासमुखेन विधि मुन्नयति— "त मित्यादिना। 'तं' विष्णुम् 'अनुविद्य' लब्ध्वा उत्तरपरिग्रहेण पर्यगृह्णन्। गायत्रेण त्वेत्यादिभिः प्राक् कृतः पूर्वपरिग्रहः[3] तदपेक्षयोत्तरत्वम्। तस्य स्वरूप माह— "सुम्ना[4] वासीत्यादिना। 'दक्षिणतः' वेदेर्दक्षिणस्यां दिशि "सुम्ना वासि"-इति[5] यजुषा स्फ्येन लेखया परिगृह्णीयात् ॥

मन्त्रतात्पर्य माह— "इमा मिति। एव मुत्तरत्रापि योज्यम्। तृतीयमन्त्रे 'ऊर्क्'-शब्देन बलकरो रसो विवक्षित इति व्याचष्टे— "रसवतीं मिति। पयस्वतीत्यस्य व्याख्यानम् "उपजीवनीया मिति। पयस्विनी हि गौर्लोके उपजीव्यते ॥ ११ ॥

पूर्वोत्तरपरिग्रहयोः सङ्ख्यां समुच्चित्य प्रशंसति— "स वा इत्यादिना। षड्ऋतुसमुदायात्मको यः संवत्सरः, तदात्मकः प्रजापतिः; संवत्सरकालभरणेन जातत्वादभेदोपचारः। आम्नायते ह्येष बृहदारण्यके— "त मेतावन्तं काल मबिभर्यावान्संवत्सरस्य मेतावतः

१— पा० सू० ३. ४. ९।

२— "उत्तरं परिग्रहं परिगृह्णाति"-इत्यादि का०श्रौ० २. ६. ३१ सू०।

३— १५१ पृ० १७ पं०। ४— शोभना त्वा, सुम्ना।

५— वा० सं० १. २७. ४-६। का०श्रौ० सू० २. ६. ३१।

काण्डस्य परस्तादसृजत"-इति[1]। यज्ञस्य आस्रावयेत्यादिसप्तदशाक्षरसाध्यत्वात् "एष वै सप्तदशः प्रजापतिर्यज्ञ मन्वायत्त"-इति-श्रुतेः[2] प्रजापत्यात्मकः। एवं 'सः' यज्ञो 'यावान्' यत्परिमाणविशिष्टः, 'अस्य' च यज्ञस्य 'मात्रा' परिमाणं च यावत्, तत्परिमाणविशिष्ट मेवैतं यज्ञं षट्मन्त्रामम्यादनेन 'परिगृह्णाति' स्वीकरोतीत्यर्थः ॥ १२ ॥

पूर्वोत्तरपरिग्रहयोर्मन्त्रावयवसङ्ख्या मनूद्य समुच्चित्य प्रशंसति—"षड्भिरिति। व्याहृतयन्त इति 'व्याहृतयः' मन्त्रावयवाः, ते च पूर्वपरिग्रहे षट्। "गायत्रेण त्वेत्यादिकास्त्रान्तास्त्रयः, गृह्णाम्यन्तास्त्रयः; उत्तरपरिग्रहे च सुम्ना चासीत्येव मन्ताः षट् व्याहृतयः स्पष्टाः। अन्यत् पूर्ववत्[3] ॥ १३ ॥

गार्हपत्याहवनीययोर्मध्ये सा वेदिरायामतो यजमानमात्री; सा च पश्चादिस्तृत्या चतुररत्निः, पुरस्तात् अरत्निः कार्येति विधत्ते—"व्याममात्रीति। 'व्यामः' प्रसारितकरद्वयान्तरालप्रमाणः। 'पश्चात्' प्रत्यग्भागे इत्यर्थः। "अरत्निः प्रात्रीति। चिभिररत्निभिर्विस्तृता प्राग्भागे वेदिः कार्येत्यर्थः। "चित्रद्वीति। सवनत्रयादिरूपेण यज्ञस्य चित्रत्वम्। पश्चान्तर माह—"नाचेति। 'अत्र' वेद्यां परिमाणं नैवास्ति। 'यावतीं' यत्परिमाणविशिष्टा मेव वेदिं स्वयं मनसा

१—बृह० उप० १. २. ४। उपरिष्टात्—का० १०. अ० ६. ब्रा० ४. क० ४।

२—तै० सं० १. ६. ११। तत्रैव "आस्रावयेति चतुरक्षरं मन्त्रशीषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरं द्व्यक्षरो वषट्कारः"-इति च। ३—१६२ पृ० १५ पं०।

हविरासादनादिकार्यपर्याप्तां मन्येत, तत्परिमाणविशिष्टां वेदिं कुर्यात्। कात्यायनोऽपीमं पदार्थं मनूदयत्— "व्याममात्रीं पश्चात् त्रयरत्नीं प्राचीं मपरिमितां वा"-इति[1] ॥ १४ ॥

वेद्यंसयोराहवनीयस्य स्थानं विधत्ते— "अभित इति। 'अग्निम् अभितः' आहवनीयस्य दक्षिणोत्तरपार्श्वयोः वेद्यंसौ 'उन्नयति' ऊर्ध्वं प्रापयति। तदेतत्[2] प्रशंसति— "योषा वा इति। लोके हि योषित् पुमांस मंसाभ्यां परिष्वज्य शेते; अतो वेदेरपि अंसाभ्या मग्नेः परिष्वङ्गो युक्त इति भावः ॥ १५ ॥

"योषा वै"—इति सिद्धवदुक्तं स्त्रीत्वं, लौकिकस्त्रीसाम्येनोपपाद्य प्रशंसति— "सा वा इति। 'वरीयसी' उरुतरा, विस्तीर्णतरा। उक्तं हि[3] "व्याममात्री पश्चात् स्यादिति"। 'मध्ये' प्रत्यग्भागानन्तर-भाविनि मध्यदेशे 'संकारिता' सङ्कुचिता; 'पुरः' पूर्वभागे 'उर्वी' विस्तीर्णा; त्रयरत्निः प्राचीति विधानात् ॥

एवं वेदिस्वरूप मभिधाय तत्साम्यं स्त्रियां योजयति— "एव मिति। "विसृष्टान्तरांसेति। श्रोणितो विसृष्टं न्यून मन्तर मव-काशो ययोः तौ 'विसृष्टान्तरौ' तथाविधावंसौ यस्याः सा तथोक्ता। "सङ्गाच्चेति। मध्यदेशे हस्तेन सङ्गृहीतुं शक्या; क्षुद्रोदरीति यावत्। एवम् 'एनां' प्रशस्तयोषिदाकारां वेदिं कुर्वन् देवेभ्यः प्रियां करोति ॥ १६ ॥

१— का० श्रौ० सू० २. ५. ३, ४, ५। २— 'तदेव'—इति ङ।
३— १५३ पृ० १४ पं०। आ० श्रौ० सू० २. २. ६. १० द्रष्टव्यम्।

अथ सा वेदिः प्राक्प्रवणोदक्प्रवणा वा कार्येति विधत्ते— "सा वा इति। 'प्राक्' प्राच्यां दिशि 'प्रवणं' निम्नं यस्याः सा तथोक्ता। प्राच्या दिशो देवसम्बन्धित्वम्; दिग्विभजनसमये देवैरात्मीयतया स्वीकारात्। श्रूयते हि तैत्तिरीयके — "देवमनुष्या दिशो व्यभजन्त प्राचीं देवाः"-इति[1]। इमां प्रसिद्धिं द्योतयितु मत्र 'हि'-शब्दः। 'अथो'-इति पक्षान्तरं द्योत्यते। अत एव कात्यायनोऽपि पक्षद्वय मसूत्रयत्— "प्राक्प्रवणा मुदग्वा"-इति[2]। आपस्तम्बस्तु प्रागुदगुत्तरोपजीवनेन विकल्प मसूत्रयत्— "प्राक्प्रवणां प्रागुदक्प्रवणां वा"-इति[3]। उदीच्या मनुष्यसम्बन्धः; शान्तरूपत्वात्। अत एवान्यत्राम्नायते— "एषा वै देवमनुष्याणाꣳ शान्ता दिक्"-इति[4]॥

वेदेर्दक्षिणभागस्य पांशुभिरौन्नत्यकरणं विधत्ते— "दक्षिणत इति। 'पुरीषं' खातं पांशुं 'प्रत्युदूहति' प्रतिक्षिपति। विहित मर्थ मुपपादयितुं विपक्षे बाध मुपन्यस्यति— "एषा वा इति। 'एषा' दक्षिणा दिक् पितॄणां स्वभूता। तथा च 'सा' वेदिः यदि 'दक्षिणाप्रवणा स्यात्' दक्षिणतो निम्ना भवेत्, तदा तत्रासिक्तोदकवत् यजमानोऽपि दक्षिणतोऽवस्थितं पितृलोकं 'क्षिप्रे' क्षिप्रम् 'इयात्' प्राप्नुयात्। प्राचीनप्रवणायान्तु वेद्यां नैष दोष इत्याह— "तथो हेति। तथा सति 'सः' यजमानः 'ज्योक्' चिरं जीवेत्।

१— तै० सं० ६. १. १. १. "देवमनुष्या दिशो व्यभजन्त,— प्राचीं देवाः, दक्षिणा पितरः, प्रतीचीं मनुष्याः, उदीचीꣳ रुद्राः"-इति।

२— का० श्रौ० सू० २. ६. ६। इदमष्टमसूत्रटीका द्रष्टव्या।

३— आ० श्रौ० सू० २. २. ६। ४— तै० ब्रा० २. १. २. ५।

खाता वेदिर्नाङ्गिः श्मश्रूणीकरणीया, किन्तु पांशुभिरेव कार्येति विधत्ते— "पुरीषवती मिति। तत् प्रशंसति— "पशवो वा इति। पशुप्राप्तिहेतुत्वात् पुरीषस्य पशुत्वम्। 'पुरीषैः' पांशुभिः[1] युक्तां वेदिं कुर्वन् पशुभिर्युक्ता मेवैनां कुरुत इत्यर्थः ॥ १७ ॥

"पुरा क्रूरस्येति[2] मन्त्रेण यद्वेदेः मार्जनं, तद् विधत्ते— "ता मिति। एतत्प्रशंसार्थं मितिहास माह— "देवा वै इति। पुरा खलु देवा असुरैः सह योत्स्यमाना एव मवोचन्। किं मिति। 'अस्याः' पृथिव्याः सम्बन्धि। 'अनामृतम्' आ समन्तात् मृतम्, सर्वदा नश्वरम् 'आमृतम्', तद्विपरीतम् 'अनामृतम्', सर्वदा बाधविधुरम्। ईदृग्विधं यद् 'देवयजनं' देवयागाधिकरणभूतं स्थानम्, तत् 'चन्द्रमसि' चन्द्रमण्डलमध्ये निच्चिपाम। 'नः'-इति व्यत्ययेनैकवचनम्[3]। ते सुराः यदि 'नः' अस्मान् 'इतः' अस्मात् स्थानात् जयेयुः, तदा वय मेतत् स्थानं परित्यज्य 'तत एव' चन्द्रमसि निहिते तस्मिन् स्थाने एव, पुनर्यज्ञं कुर्वाणास्तेन यज्ञेनासुरान् पुनरभिभवेमेति। ईदृग्विधोपायजनितहर्षद्योतको 'हन्त'-शब्दः। एवं विचार्य्य तथैव देवैः कृत मिति दर्शयति— "स यदिति। व्यत्ययेन पुंस्त्वम्[4]। तद्यदस्याः पृथिव्याः सम्बन्धीत्यर्थः। 'न्यदधत' निहितवन्तो निच्चिप्तवन्तः। 'तत्' निहितं देवयजनम्, 'एतद्' इदानीं चन्द्रमसि कृष्णवर्णं सत् कलङ्कात्मतया दृश्यते।

१— इह सर्वत्रैव पांसु-पांसु-इति पाठभेदो जादि-ठाद्योः।

२— वा० सं० १. २८. १। का० औ० सू० २. ६. १२।

३— पा० सू० ३. १. ८५। ४— १२७ पृ० द्वितीयटीप्पनी द्रष्टव्या।

उक्तेऽर्थे लोकप्रसिद्धिं मुदाहरति— "तस्मादिति। यस्मादेवं पृथिव्याः अमात्मतं देवयजनं चन्द्रमसि निचिप्तम्, तस्मादेव कारणादस्याः पृथिव्याः सम्बन्ध्युदीरितलक्षणं देवयजनं चन्द्रमसि विद्यत इत्यभिज्ञाः कथयन्तीत्यर्थः। यदीदृग्विधं देवयजनम्, एतस्मिन्नेव "पुरा क्रूरस्य"-इति[1]मन्त्रेण प्रतिमार्जनं कुर्वतः 'अस्य' यजमानस्यापि यज्ञनेष्टं भवतीत्यर्थः॥ १८॥

विच्छितं प्रतिमार्जनं मनूद्य मन्त्रं[2] विधत्ते— "स इति। मन्त्रगतक्रूरपदस्यार्थं माह— "सङ्ग्रामो वै क्रूर मिति। कथं सङ्ग्रामस्य क्रूरशब्दाभिधेयतेत्याशङ्क्योपपादयति— "सङ्ग्रामे हीति। क्रूरकरणमपि कथं सङ्ग्रामे विद्यत इत्यत आह— "हतः पुरुष इति। पुरुषाश्वादेस्वतुरङ्गबलस्य तत्र हननलक्षणात् क्रूरकरणात् तदधिकरणभूतः सङ्ग्रामोऽप्यत्र क्रूरशब्देन प्रतिपाद्यत इत्यर्थः॥

पदार्थं मुक्त्वा वाक्यार्थं मुपपादयति— "पुरा हीति। 'क्रूरस्य' सङ्ग्रामस्य 'विसृपः' विसर्पणादागमनात्पुरेति मन्त्रवाक्यार्थ इत्यभिप्रायः। मन्त्रस्य द्वितीयं भाग मनूद्य 'जीवदानु'-पदस्य विवक्षितमर्थं दर्शयन् व्याचष्टे— "उदादायेति। 'अस्याः' पृथिव्याः 'जीवं' जीवनरूपं जीवात्मभूतं वा यदमात्मतं देवयजन मासीत्, तदित्यर्थः। तथा च 'जीवदानुं' जीवनप्रदां जीवभूतां पृथिवीं मिति मन्त्रपदाभिप्रायो वर्णितो भवति[3]। वैयाकरणास्तु "जीवेरदानुक्"-इति[4]

१, २— वा० सं० १. २८. १। का० श्रौ० सू० २. ६ ३२।

३, ४— तदेवं जीवं ददातीति विग्रहोऽस्यास्य ब्राह्मणकारस्येष्टः। "आशेमाणं जीरदानुरिति वर्णलोपात्"-इति पा० ६. १. ६६ सू० वा०।

जीवदानुपदं व्युत्पादयन्ति । तथैव तैत्तिरीयकैराम्नातम्[१] । मन्त्रस्य भागान्तर मनूद्य व्याचष्टे— "या मिति । 'ब्रह्मणा' मन्त्रेण । एतच्च स्वधाभिरित्यस्य व्याख्यानम् । मन्त्रस्यान्तिमं भाग मनूद्य व्याचष्टे— "ता मिति । 'एतेन' इदानीन्तनेन देवयजनेन 'तां' चन्द्रमस्यवस्थिताम्, अनाप्तां पृथिवीम् 'अनुदिश्य' तदेव मिति तादात्म्येनानुसन्धायेत्यर्थः ॥

एतद्वेदनं प्रशंसति— "अपि ह्येति ॥ १९ ॥

वेदिकरणानन्तरं कर्त्तव्यं विधत्ते— "अथेति । प्रोक्षणीरासादयेत्यादिकं सम्प्रेषं ब्रूयादित्यर्थः । प्रोक्षत्यभिरिति 'प्रोक्षणीः' आपः, तासा मासादनं यज्ञरक्षार्थ मिति व्याचष्टे— "वज्रो वा इति । स्फ्यस्तावद् वज्रः; तदंशपरिणामरूपत्वात् । तथैव प्रागाम्नातम्— "तस्य स्फ्यस्तृतीयं वा यावद् वा"-इति[२] । ब्राह्मणोऽपि वज्रात्मकः; तद्मन्त्रसामर्थ्येन रक्षसां हन्तृत्वात् । तौ खलु पुरेमं यज्ञम् 'अभ्यजूगुपताम्' अभितोऽरक्षिष्टाम् । "गुपू रक्षणे[३]"-इत्यस्मात्लुङि "गुपेश्छन्दसि"-इति[४] चङि रूपम् । तत्र हि "आयादय आर्द्धधातुके वा[५]"-इत्याय-प्रत्ययो विकल्प्यते । "वज्रो वा इत्यादि । "तस्माद् येनैता यन्ति निम्नं कुर्वन्ति"-इत्यपां वज्रत्वं प्रागेव[६] श्रुत्या

१— तै० सं० १. ५. १० । "जीरं जीवनं पुरोडाशद्वारेण यज्ञस्य ददातीति जीरदानुः"-इति तत्र सा० भा० । जीवदानुशब्दोऽप्येवमर्थकः ।

२— १३४ पृ० २ पं०, १३९ पृ० १० पं० च द्रष्टव्यम् ।

३— भ्वा० पं ३९५ । ४— पा० सू० ३. १. ५० ।

५— पा० सू० ३. १. ३१ । ६— ९ पृ० २ पं०, २९ पृ० ८ पं० ।

प्रतिपादितम् । वज्ररूपाणां तासां मासादनं यज्ञस्याभितो रक्षायै सम्पद्यत इत्यर्थः ॥

प्रोक्षणीनां मासादनसमये आग्नीध्रकर्तृकं स्फ्यस्योद्यमनं[1] विधत्ते— "स वा इति। "उपर्यध्वधः सामीप्ये[2]"-इत्युपरिशब्दस्य द्विर्वचनम्। 'उपर्युपरि' समीपे उपरि देशे। आसाद्यमानासु 'प्रोक्षणीषु' 'धार्यमाणासु' सतीषु 'अथ' अनन्तर मासादनसमकाल मेवाग्नीध्रः स्फ्यम् 'उद्यच्छति' धारयति। विपक्षे बाध माह— "अथ यदिति। उद्यमन मकृत्वा पूर्वं वेदिमध्ये निहितस्य स्फ्यस्योपरि सादने स्फ्याब्लक्षणौ 'वज्रौ' सङ्गतौ भवेताम्। तथा च वज्रद्वयसङ्गमाद् यजमानस्य बाधः स्यादित्याशयः। 'समो गम्यृच्छि"-इत्यात्मनेपदम्[3]। अस्य दोषस्याभावं स्वपक्षे दर्शयति— "तथो हेति। 'तथो' तथा च स्फ्यस्य[4] वेदेः सकाशादुद्यमने सतीत्यर्थः। "तस्मादिति प्रतिपादितार्थनिगमनम् ॥ २० ॥

प्रतीकग्रहणेन विहितं[5] सम्प्रेषमन्त्रं[6] साकल्येनानुवदति— "अथैता मिति। हे आग्नीध्र! प्रोक्षणार्था अप आसादय। अग्निसमिन्धनार्थम् 'दृषद्', वेदिस्तरणार्थम् 'बर्हिः' च, आहवनीयसमीपे आसादय। जुह्वाद्याः 'स्रुचः' सम्मार्जनसंस्कारेण संस्कुरु। यजमानस्य या पत्नी, तां योक्त्रेण 'सन्नह्य', यत् प्रागग्नावधिश्रित माज्यम्, तेज

१— स्फ्यलक्षणं ४८ पृ० द्रष्टव्यम्। २— पा० सू० ८. १. ७।
३— पा० सू० १. ३. २९। ४— 'स्फ्यस्या'—इति ज, झ।
५— 'विवक्षितं'—इति ड। ६— वा० सं० १. २८. २।

'उदेहि' आगच्छेति सम्प्रेषमन्त्रार्थः। एव मेष मन्त्रः परप्रत्याय-नार्थप्रयुक्तत्वात् सम्प्रेष एव; न तु मन्त्रान्तरवददृष्टैकप्रयोजन इत्याह— "सम्प्रेष इति ॥

"स यदीत्यादि। प्रोक्षणासादनादिकम् आग्नीध्रेण कारयितुं यदि कामयेत, तदा 'एतत्' सम्प्रेषवाक्यं ब्रूयात्; यदि स तथा न कामयेत, स्वय मेव कुर्या मित्येव मेव कामयेत, तदा 'तत्' सम्प्रेषवचनं नाद्रियेतापि, तद्विषय मादर मपि न कुर्यात्। तच्चो-पपत्ति माह— "स्वय मिति। 'अतः' अस्मात् कर्मणोऽनन्तर मिदं कर्म कर्त्तव्य मिति 'हि' यस्मात् स्वय मेवैतदेद, तस्मात्परं प्रति अज्ञानज्ञापनार्थः सम्प्रेषो निरर्थक इत्यर्थः ॥ २१ ॥

"द्विषतो वधः"-इति[1] मन्त्रेण स्फ्यस्य बहिर्वेद्युदङ् निरसनं विधत्ते— "अथेति। अभिचरतो विशेष माह— "असुग्वा इति। अस्मिन् मन्त्रे "असुग्वै"—इति ग्रन्थोनाम चतुर्थ्या निर्दिशेदि-त्यर्थः ॥ २२ ॥

हस्तप्रक्षालनं विधत्ते— "अथेति। 'अवनेनिक्ते' प्रोक्षयति, प्रक्षा-लयेदित्यर्थः। "णिजिर् शौचपोषणयोः"-इति[2] धातुः। "निजां त्रयाणाम्[3]"-इत्यभ्यासस्य गुणः। अवनेजनस्य प्रयोजन माह— "यद्धीति। यत् खलु 'अस्याः' वेदेः खननादिकं 'क्रूरं' कर्माभूत्। तदनेन स्फ्यस्योदङ्निरसनेन 'अस्याः' वेदेः 'अहार्षीत्' निरास्यत्। 'तस्मात्' पाणोः क्रूरकर्मसंस्पर्शात् अवनेजनेन शुद्धिः कार्येत्यर्थः॥ २३॥

१— वा० सं० १. २८. ३। का० श्रौ० सू० २. ६. ४२।

२— जु० उ० ११। ३— पा० सू० ७. ४. ७५।

घृतानां हविषां यागात् प्राक् निर्मिताया वेदेश्च बर्हिस्तरणात् पूर्वं स्पर्शनिषेधं विधित्सुः तत्सिद्ध्यर्थं मितिहास माचष्टे— "स ये हेति । पूर्ववद् बहुवचनस्थाने स इत्येकवचनम्[१], ते । 'ये' प्रसिद्धा यजमानाः 'अग्रे' पुरा ह 'ईजिरे' इष्टवन्तः, 'ते' खलु यागसमये घृतानि हवींषि क्लृप्तां वेदिं च 'अवमर्शम्' अवमृश्य संस्पृश्य यजन्ते; 'ते' च तेनावमर्शजनितेन दोषेण 'पापीयांसः' पापिष्ठाः निकृष्टा बभूवुः । याग मकुर्वाणास्तु अवमर्शजनितदोषविरहात् श्रेष्ठा एव बभूवुः। 'ततः' अनन्तर मेव अवमर्शनस्य दोषहेतुत्व मजानानान् 'मनुष्यान्' 'अश्रद्धा' यागविषया अरुचिः 'विवेद' प्राप्नोति[२] । ता मेवाश्रद्धां दर्शयति— "य इति । यागस्य अनर्थहेतुता मज्ञासिषुरित्यर्थः ।

"तत इत्यादि । 'ततः' अश्रद्धाप्राप्त्यनन्तरं केनचिदपि यागस्य अननुष्ठानात् 'इतः' अस्माद्लोकात् देवान् प्रति चरुपुरोडाशादिकं 'हविः' न जगाम । ननु मागमद्धविः; अमृतोपजीविनां देवाना मनेन किं प्रयोजन मित्यत आह— "इतः प्रदानाद्धीति । 'इतः' अस्माद्लोकात् प्रदीयमानं यद्धविः, तस्मादित्यर्थः । "ल्युट्यल्युटो बहुलम्"-इति[३] प्रपूर्वाद् ददातेः कर्मणि ल्युट् ॥ २४ ॥

तत्रेतिहास माह— "ते हेति। हविरागमनाभावेन निराहाराः

१— १२७ ए० टीप्पनी द्रष्टव्या । २— 'प्राप्नोत्'-इति ठ, ड ।

३— पा० सू० ३. ३. ११३ ।

'ते' देवाः अङ्गिरसः पुत्रं बृहस्पतिं सुकृवन्तः। किं मिति, 'अश्रद्धा' यागविषया मनुष्यान् प्राप्नोति[1], तत्[2] तां निरस्य तेभ्यो 'यज्ञं विधेहि' यजध्वं मिति विधिं कुर्या इत्यर्थः।

स च बृहस्पतिः आगत्योक्तवान् — हे मनुष्याः! 'कथा' कथं कस्माद्धेतोः न यजध्वे इति। "था हेतौ च च्छन्दसि"—इति[3] था-प्रत्ययः। एवं पृष्टैस्तैरुक्तं यागाननुष्ठानकारणं सुपन्यस्यति — 'किङ्कामा' किङ्कामनया? कस्य फलस्येच्छयेत्यर्थः॥ २५॥

एवं यागानुष्ठानत्यागकारणं सुकृवत्सु तेषु बृहस्पतिरयथानुष्ठानजनित मेव तत् पापीयस्त्वम्, न तु सम्यग्यागानुष्ठानज मिति बोधयंस्तेषां विपर्यस्ततां[4] निरस्यति— "स होवाचेति। "यद्वै शुश्रुमेति। 'यत्' खलु वस्तु देवाना मर्थं 'परिषूतं' परिगृहीतं शुश्रुम, 'तत्' एतदात्मक एष यज्ञः; तत्साध्यत्वात्। सामान्योक्तं विशिनष्टि— "यच्छृतानीति। 'शृतानि' पक्वानि पुरोडाशादीनि 'हवींषि', पूर्वपरिग्रहादिभिः 'क्लृप्ता' निर्मिता वेदिरिति यदस्ति, एतत्साध्यो हि देवार्थो यज्ञः, 'तेन' एवेदृग्विधेन यज्ञेन हे मनुष्याः! यूयम् 'अवमर्शं' अवमृश्य यागात् प्राक् पक्वानि हवींषि, बर्हिःस्तरणात्[5] पूर्वं वेदिं च संस्कृत्य, 'अचारिष्ट' आचरणं कृतवन्तः; यागसाधनस्य च मनुष्यसंस्पर्शो न युक्तः; अतस्तस्मादेवावमर्शनात् हे मनुष्याः! यूयं पापीयांसोऽभूत, न तु यागात्। अतोऽवमर्शं परित्यज्य तेन यज्ञेन

१— 'प्राप्नोत्'—इति ठ, ड। २— नास्त्येतत् पदं ठ-ड-पुस्तकयोः।
३— पा० सू० ५, ३, २१। ४— 'विपर्ययग्रस्तां'—इति ठ।
५— एवंविधस्थानेषु सविसर्गनिर्विसर्गपाठौ सर्वत्रैव ज्ञेयौ।

यजध्वम्; तथा च श्रैष्ठ्यं वो भविष्यतीति बृहस्पतिना बोधिते अवमर्शनपरित्यागस्यावधिं पृच्छति— "आ कियत इति। कियत्कालपर्यन्त मेव अवमर्शनपरित्याग इत्यर्थः। तस्योत्तर माह— "बर्हिष इति। बर्हिःस्तरणपर्यन्तं, संस्कृतां वेदिं न स्पृशेदित्यर्थः[१] ॥

एतच्च हविषा मप्युपलक्षणम्; अतः पक्वानि हवींष्यपि यागात् पूर्वं न स्प्रष्टव्यानीति द्रष्टव्यम्। अत एव सूचितं कात्यायनेन — "प्राक् स्तरणाद् वेदिं नावमृशेच्छृतानि च हवींष्या प्रचरणादिति[२]। युक्तश्चैतदित्याह— "बर्हिषेति। बर्हिषः स्तरणात्[३] पूर्वं मशान्ता सती सा वेदिः स्तीर्यमाणेन 'बर्हिषा' खलु शान्ता भवति; अतोऽशान्तायाः स्पृष्टौ प्रागुक्तो दोषो युज्यत इत्यर्थः ॥

"स यदीत्यादि। बर्हिषः स्तरणात्[४] पूर्वं यदि वेदिमध्ये 'किञ्चित्' तृणादिकं मापद्येत, तदा तन्निरासार्थं मपि न स्पृशेत्; किन्तु 'बर्हिः स्तृणन्' स्तरणसमये बर्हिषः स्तरणं[५] कुर्वन्नेव 'तत्' तृणादिकं निरस्येत। स्तरणप्रभृति वेदिस्पर्शो न दोषायेत्यभिप्रेत्याह— "अथेति। 'यदा' यस्मिन् काले बर्हिर्मुष्टिं स्तृणन्त्यध्वर्यवः, तदानीं 'पदा' पादेनाप्यभितिष्ठन्ति, अतस्तस्मिन् समये स्पर्शो न दुष्यतीति भावः। एव मितिहासमुखेन प्रतिपादित मर्थं सिद्धानी मप्यनुष्ठेयत्वेन विधत्ते— "स य इति। 'एवं विद्वान्' उक्त मितिहासं जानन्नित्यर्थः ॥ २६ ॥ २ [२.५.] ॥

१— 'वेदिं नावमृशेदित्यर्थः'—इति ठ।

२— का० श्रौ० सू० २. ६. ३८, ३९।

३,४— 'बर्हिःस्तरणात्'—इति ठ। ५—'बर्हिःस्तरणं'—इति ठ।

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये द्वितीयाध्याये
पञ्चमं ब्राह्मणम्[१] ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ २ ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीहरिहरमहा-
राजप्रासाज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये प्रथम-
काण्डे द्वितीयाध्यायः समाप्तः ॥ २ ॥

१— इह हि ब्राह्मणे वेदिपरिग्रहं "प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः सम्मृष्टि पत्नीः सन्नह्याज्येनोदेहि"-इति प्रैषमन्त्रं च विधाय, स्फ्य-प्रहरणं चोक्तम् । तत्र अध्वर्युः, ब्रह्मन् पूर्वं परिग्रहं ग्रहीष्यामीति ब्रह्माणं पृच्छति । ततो ब्रह्मा गृहस्पते परिगृहाणेतीमं मन्त्र मुपांशु पठित्वा ॐ३ परिगृहाणेत्युच्चैरध्वर्यु मनुजानाति । अनुज्ञातस्त्वाध्वर्युः स्फ्येन ओणेरारभ्य दक्षिणतो 'वेदिं परिगृह्णाति' रेखां करोति । ततो हर चिरिति अग्नीधं प्रति ब्रूयात् । ततोऽग्नीत् ताभ्यो लेखाभ्यः पांसूनुद्धृत्योत्करे प्रक्षिप्य ता लेखाः 'सम्मृशेत्' मार्जनेन स्फोटयेत् । ततोऽभ्रि मादाय प्रदक्षिणं सर्वतो वेदिं खनति व्यङ्गुल मोषधिमूलोच्छेदपर्यन्तं वा । एव मेव स्फ्येन दक्षिणापश्चिमोत्तरपार्श्वेषु उत्तरवेदिं परिगृह्णाति । ततः स्फ्येन दक्षिणां दिशं प्रति वेदिपुरीष्य मुद्धृत्यानुमार्ष्टि । अनुमार्जनं चात्र खननेन विषमस्य समीकरणम् । ततोऽग्नीत् प्रोक्षणीर्गृहीत्वा वेदेरुपरिष्टात् समीपे एव धारयति, अध्वर्युस्त्र स्फ्य मुद्यम्य प्रोक्षणीरासादयेत्यादि प्रैषजातं ब्रूयात् । समाप्तेषु च प्रैषेषु स्फ्यं 'प्रहरति' उदगग्र मुत्करे प्रक्षिपतीति क्रमः ।

[अथ तृतीयाध्याये प्रथमं ब्राह्मणम्]

स वै स्रुचः सम्मार्ष्टि । तद्यत् स्रुचः सम्मार्ष्टि यथा वै देवानां चरणं तदा ऽअनु मनुष्याणां तस्माद् यदा मनुष्याणां परिवेषण मुपक्लृप्तं भवति* ॥ १ ॥

अथ पाचाणि निर्णेनिजति । तैर्निर्णिज्य परिवेविषत्येवं वा ऽएषु देवानां यज्ञो भवति युच्छृतानि हवीꣳषि क्लृप्ता व्वेदिस्तेषा मेतान्येव पाचाणि यत् स्रुचः ॥ २ ॥

स यत् सम्मार्ष्टि । निर्णेनेक्त्युवैना ऽएतन्निर्णिक्ताभिः प्रचराणीति तद्वै हयेनैव देवेभ्यो निर्णेनिजत्येकेन मनुष्येभ्योऽङ्गिश्च ब्रह्मणा च देवेभ्य ऽआपो हि कुशा ब्रह्म युजुरेकेनैव मनुष्येभ्योऽङ्गिरेवैवम्वेतन्नाना भवति† ॥ ३ ॥

अथ स्रुव मादत्ते । तम्प्रतपति प्रत्युष्टꣳ रक्षः प्रत्युष्टा ऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ता ऽअरातय ऽइति वा ॥ ४ ॥

देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य ऽआस-

* 'भवति'–इति ख, ग । † 'भवति'–इति ख, च ।

ङ्गाद् बिभयाञ्चक्रुस्तद् यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतो ऽपहन्ति ॥ ५ ॥

स वा ऽइत्यग्रैरन्तरतः सम्मार्ष्टि। अनिशितोऽसि सपत्नक्षिदिति यथानुपरतो युजमानस्य सपत्नान् क्षिणुयादेवꣳ मेतदाह व्वाजिनन्त्वा व्वाजेध्यायै सम्माज्मीति यज्ञियन्त्वा यज्ञाय सम्माज्मीत्येवैतदाहैतेनैव सुर्व्वाः स्रुचः सम्मार्ष्टि व्वाजिनीन्त्वेति स्रुचं तूष्णीं प्राशित्रहरणम्* ॥ ६ ॥

स वा ऽइत्यग्रैरन्तरतः सम्मार्ष्टीति†। मूलैर्बाह्यत ऽइतीव वा ऽअयं प्राण ऽइतीवोदानः प्राणोदानावेवैतद्दधाति तस्मादितीवेमानि लोमानीतीवेमानि ॥ ७ ॥

स वै सम्मृज्य सम्मृज्य प्रतप्य प्रतप्य प्रयच्छति। यथावमर्शं निर्णिज्यानवमर्शꣳ मुत्तमं परिक्षालयेदेवं तत्तस्मात् प्रतप्य प्रतप्य प्रयच्छति ॥ ८ ॥

स वै स्रुव मेवाग्रे सम्मार्ष्टि। अथेतराः स्रुचो योषा वै स्रुग् वृषा स्रुवस्तस्माद् यद्युपि बह्व्य ऽइव स्त्रियः सार्द्धं युन्ति यु ऽएव तास्वपि कुमारकु ऽइव पुमान् भवति सु ऽएव तच्च प्रथमु ऽएत्यनूच ऽइतरास्तस्मात् स्रुव मेवाग्रे सम्मार्ष्ट्यथेतराः स्रुचः ॥ ९ ॥

---

* 'प्राशित्रहरणꣳ'–इति च। † 'ऽरतः सम्मार्ष्टीति'–इति च-B।

स वै तथैव सुम्मृज्यात्। युथाग्निं नाभिव्युक्षेद् युथा युस्मा ऽअशन माहरिष्यन्स्यात्तं पाचनिर्णेजनेनाभिव्युक्षेदेवं तत् तुस्मादु तथैव सुम्मृज्याद् युथाग्निं नाभिव्युक्षेत् प्राङिवैवोत्क्रम्य ॥ १० ॥

तद्वैके। सुक्षम्मार्ज्जनान्यग्नावभ्यादधति व्वेदस्याहाभूवन्स्रुच एभिः सुममार्ज्जिषुरिदं वै किञ्चिद् यज्ञस्य नेदिदुं बहिर्द्धा यज्ञाद् भुवदिति* तदु तथा नु कुर्याद् युथा युस्मा ऽअशन माहुरेत् तं पाचनिर्णेजनं पायुयेदेवं तत् तुस्मादु पुरास्येदुवैतानि† ॥ ११ ॥

अथ पत्नीꣳ सुन्नह्यति। जघनार्द्धो वा ऽएषु यज्ञस्य यत् पत्नी प्राञ्चे यज्ञस्तायुमानो यादिति युनक्त्येवैना मेतद् युक्ता मे यज्ञ मुन्वासाता ऽइति ॥ १२ ॥

योक्त्रेण सुन्नह्यति। योक्त्रेण हि योग्यं युञ्जन्त्युस्ति वै पुत्न्या ऽअमेध्यं युदवाचीनं नाभेरथैतदाज्य मवेक्षिष्यमाणा भवति तदेवास्या ऽएतद्योक्त्रेणान्तर्दधात्युथ मेध्येनैवोत्तरार्द्धेनाज्य मवेक्षते तुस्मात् पत्नीꣳ सुन्नह्यति ॥ १३ ॥

---

* 'भुवेदिति'—इति सायणसम्मत इति च।

† 'देवैतानि'—इति ख, च।

स वा ऽअभिवासः सुन्नह्यति । ओषधयो वै व्वासो व्वरुण्या रज्जुस्तदोषधीरेवैतदन्तर्दधाति तथो हैना मेषा व्वरुण्या रज्जुर्न हिनस्ति तस्मादभिवासः सुन्नह्यति ॥ १४ ॥

स सुन्नह्यति । अदित्यै रास्नासीतीयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वा ऽएतस्य पत्नी भवति तदस्या ऽएतद्रास्ना मेव करोति न रज्जुः हिरो वै रास्ना तां मेवास्या ऽएतत्करोति ॥ १५ ॥

स वै नु ग्रन्थिं कुर्यात् । व्वरुण्यो वै ग्रन्थिर्व्वरुणो ह पत्नीं गृह्णीयाद् युद् ग्रन्थिं कुर्यात् तस्मान्नु ग्रन्थिं करोति ॥ १६ ॥

ऊर्ध्वं मेवोन्नूहति । व्विष्णोर्व्वेष्योऽसीति सा वै नु पश्चात् प्राची देवानां यज्ञ मन्वासीतेयं वै पृथिव्यदितिः सेयं देवानां पत्नी सा पश्चात् प्राची देवानां यज्ञ मन्वास्ते तद्वेमा मभ्यारोहेत् सा पत्नी क्षिप्रेऽमुं लोकु मियात् तथो ह पत्नी ज्योग् जीवति तदस्या ऽएवैतन्नि-ह्नुते तथो हैना मियं नु हिनस्ति तस्मादु दक्षिणतु ऽइवैवान्वासीत ॥ १७ ॥

अथाज्य मुवेक्षते । योषा वै पत्नी रेत ऽआज्यं मिथुनु मेवैतत् प्रजननं क्रियते तस्मादाज्य मुवेक्षते ॥ १८ ॥

सावेक्षते । *अदब्धेन त्वा चक्षुषावपश्यामीत्युनार्त्तेन त्वा चक्षुषावपश्यामीत्येवैतदाहाग्नेर्ज्जिह्वासीति यदा वा ऽएतदग्नौ जुह्वत्यथाग्नेर्ज्जिह्वा ऽइवोत्तिष्ठन्ति तस्मादाहाग्नेर्जिह्वासीति सुहूर्देवेभ्य ऽइति साधु देवेभ्य ऽइत्येवैतदाह धाम्ने धाम्ने मे भव यजुषे यजुष ऽइति सर्व्वस्मै मे यज्ञायैधीत्येवैतदाह ॥ १९ ॥

अथाज्य मादाय प्राङुद्वाद्रवति † । तदाहवनीयेऽधिश्रयति यस्याहवनीये हवीꣳषि श्रपयन्ति सुर्व्वो मे यज्ञ ऽआहवनीये शृतोऽसदित्यथ यदमुत्राग्नेऽधिश्रयति पत्नीꣳ ह्यवकाशयिष्यन् भवति न हि तदवकल्पते युत्सामि प्रत्यग् घरेत् पत्नी मवकाशयिष्यामीत्युथ यत् पत्नीं ‡ नावकाशयेदन्तरियाद्व यज्ञात् पत्नीं तथो ह यज्ञात् पत्नीं § नान्तरेति तस्मादु सार्द्ध मेव विलाप्य प्रागुदाहरत्यवकाश्य पत्नीं यस्यो पत्नी न भवत्यग्र ऽएव तस्याहवनीये ऽधिश्रयति तत्तत ऽआदत्ते तदन्तर्व्वेद्या सादयति ॥ २० ॥

तदाहुः । नान्तर्व्वेद्या सादयेदुतो वै देवानां पत्नीः

---

* 'ऽदब्धेन'–इति च ।

† 'प्राङुद्वाद्रवति'–इति ग, 'प्राङुदाहरति'–इति च ।

‡ 'पत्नीं'–इति ख । § 'पत्नीं'–इति ख, ग ।

संयाजयन्त्युवसभा ऽग्रह देवानां पत्नीः करोति परः-पुरुसो ह्यस्य पत्नी भवतीति तदु होवाच याज्ञवल्क्यो यथादिष्टं पत्न्या ऽग्रस्तु कस्तदुद्रियेत युत्परःपुरुसा वा पत्नी स्याद् युथा वा यज्ञो व्वेदिर्य्यज्ञ ऽआज्यं यज्ञाद् यज्ञं निर्म्मिमा ऽइति तस्मादन्तर्व्वेद्येवासादयेत् ॥ २१ ॥

प्रोक्षणीषु पवित्रे भवतः । ते तत ऽआदत्ते ताभ्या माज्य मुत्पुनात्येको वा ऽउत्पुवनस्य बन्धुर्मेध्य मेवैतत्क-रोति ॥ २२ ॥

स ऽउत्पुनाति । सवितुस्त्वा प्रसव ऽउत्पुनाम्युच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति सोऽसावेव बन्धुः ॥ २३* ॥

अथाज्यलिप्ताभ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति सवितुर्व्वः प्रसव ऽउत्पुनाम्युच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति सोऽसावेव बन्धुः ॥ २४ ॥

तद्यदाज्यलिप्ताभ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति तदप्सु पयो दधाति तदिदु मप्सु पयो हित मिदꣳ हि यदा व्वर्षत्यथौषधयो जायन्त ऽओषधीर्ज्जग्ध्वापुः पीत्वा तत ऽएष रसः सुभवति तस्मादु रसस्यो चैवु सर्व-त्वाय ॥ २५ ॥

अथाज्य मुवेक्षते । तद्वैके युजमान मुवस्थापयन्ति

---

* इतोऽनन्तरं "शतं २००"—इति ख, च ।

तुदु ह्येवाच याज्ञवल्क्यः कथन्नु नु स्वयु मध्वर्य्युवो भुवन्ति कथुꣳ स्वयं नान्वाहुर्य्युच भूयस्य ऽइवाशिषः क्रियुन्ते कथुं न्वेषा मुचैवु श्रद्धा भवतीति यां वै कां च यज्ञु ऽऋत्विज ऽआशिष माशुासते युजमानस्यैव सा तुस्मादध्वर्युरेवावेक्षेत ॥ २६ ॥

सो ऽवेक्षते। सत्यं वै चक्षुः सत्यꣳ हि वै चक्षुस्तुस्माद्यु-दिदानीं द्वौ व्विवुदमानावेयाता महु मदर्शं मह मश्रौष मिति यु ऽएवु ब्रूयादहु मदर्शं मिति तुस्मा ऽएव श्रद्दध्याम तुत्सत्येनैवैतत्सुमर्द्धयति ॥ २७ ॥

सो ऽवेक्षते। तेजोऽसि शुक्रु मस्यमृत मसीति स ऽएषु सत्यु एव मुन्वस्तेजो ह्येतच्छुक्रꣳ ह्येतदमृतꣳ ह्येतत्तुत्स-त्येनैवैतत्सुमर्द्धयति ॥ २८ ॥ ४ ॥

॥ इति द्वितीयप्रपाठके चतुर्थं ब्राह्मणम्[१] [३.१.] ॥

१— एतस्य भाष्यस्यारम्भतः प्रागिमौ श्लोकौ दृश्येते ठ-पुस्तके—

"ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भं,
सप्ताब्धीन् पञ्च सौरीन् त्रिदशतरुलता धेनुसौवर्णभूमीः।
रत्नोक्षां रुक्मवाजिद्विपमहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद् विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटस्व ॥ १ ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलस्वर्णजं स्वर्णमुख्यः,
कार्पासं यं कृपावान् गुडकृत मजडो राजतं राजपूज्यः।
आज्योत्थं प्राज्यबुद्धिर्लवणज मदणः प्रार्कजं चार्कतेजाः,
रत्नाद्रौ (रत्न)-रूपं गिरि मकृत मुदा पात्रसात् सिङ्गणार्यः ॥ २ ॥"

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, त महं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥

प्रोक्षणीरासादयेतिप्रैषमन्त्रानुसारेण प्रथमं प्रोक्षणीना मासादन मुक्तम्[१]; दध्यावर्हिषोरुपसादनम् अपि[२] विशेषवक्तव्याभावात् सिद्ध मित्यभिप्रेत्य क्रमप्राप्तं स्रुक्सम्मार्जनं[३] विधत्ते— "स वा इति। "यथा वा इत्यादि। 'यत्' खलु देवानां वर्त्तनम्, 'तदनु'सार्यैव मनुष्यवर्त्तनम्; तत्कार्यत्वात्। मनुष्याणां च भोज्यान्नसूपघ्राकादौ[५] पक्के सति भोजनस्थाने च प्रोधिते, तत्परिवेषणसाधनानि दर्व्यादीनि पात्राणि अग्निः प्रज्वालनेन प्रोध्यन्ते। अतो मानुषव्यवहारनिदानत्वाद् देवव्यवहारस्य[६] देवाना मन्ने[७] हविषि पक्के वेद्यास्र

१— १५५ पृ० १२ पं०, १६८ पृ० ८ पं० द्रष्टव्यम्।

२— दधिपयआदिगणपाठनिपातनात् दीर्घः (पा० सू० २. ४. १४.)।

३— 'इति'—इति ठ-पुस्तकादिरिक्तेषु सर्वत्र; ढ-पुस्तके तु नैव।

४— "बाहुमात्र्यः स्रुचः पाणिमात्रपुष्कराख्यबिला हंसमुखप्रसेका मूलदण्डाः"—इति का० श्रौ० सू० १. ३. ३७। स्रुचस्तिस्रः—जुह्वमभृद्ध्रुवाः। तत्र "पालाग्नौ जुहूः"-इति, "आग्नेय्यौ उपभृत्"—इति च का० श्रौ० सू० १. ३. ३४, ३५। ध्रुवा तु वैकङ्कती भवति (का० श्रौ० सू० १. ३. ३१.)।

५— 'भोज्येऽन्नसूपघ्राकादौ'—इति ठ।

६— '०विदानत्वादेव व्यवहारस्य'—इति ज, ञ, ञ, ट, ढ।

७— 'मन्ते'—इति ज, ञ, ञ, ट, ढ।

संस्कृतायां तत्परिवेषणसाधनानां स्रुचां सम्मार्जनं युक्त मिति "यत् स्रुचः"-इत्येवमन्तस्य[१] वाक्यसन्दर्भस्याभिप्रेतोऽर्थः ॥ १ ॥

"अथेति। "निर्णेनिजतीति। "अद्भ्यस्त्वात्"-इति[२] झस्य अदादेशः। "परिवेविषति"-इत्यत्राप्येवम् ॥ २ ॥

ननु मानुष[३]पात्रवद् देवपात्राणां स्रुचा मप्यद्भिः प्रक्षालनेन भवितव्यम्, किं मनेन सम्मार्जनेनेत्याह— "स यदिति[४]। 'निर्णिक्ताभिः' प्रक्षालिताभिः स्रुग्भिः प्रचराणीत्यनेनाभिप्रायेण सम्मार्जनेन प्रक्षालन मेव करोतीत्यर्थः ॥

देवपात्रस्य शोधने मानुष[५]पात्राद् विशेष माह— "तद्वा इति। "द्वयेनैकेनेति सामान्योक्तं विवृणोति— "अद्भिश्च ब्रह्मणा चेति। "आपो हि कुशा इति। अपां यज्ञियांशपरिणामरूपा हि कुशाः। तथैव हि प्रागाम्नातम्— "ता उपर्युपर्यतिपुप्लुविरेऽत इमे दर्भास्ता हैता अनापूयिता आपः"-इति[६]। अतः कुशैः सम्मार्जनाद्[७] यज्ञियाभिरद्भिरेव प्रक्षालनं कृतवान् भवतीत्यर्थः ॥

"एवम्वेतदिति। द्वयेनैकेनेत्येवं साधनभेदकृतं देवमानुषपात्र-संस्काराणां[८] नानात्वं भवतीत्यर्थः ॥ २ ॥

१— 'यत् स्रुचः'-इतीहत्यद्वितीयकण्डिकान्तपदम्।

२— पा० सू० ७. १. ४। ३, ५— 'मनुष्य०'-इति ठ।

४— 'देवपात्राणां स्रुचां न मानुषपात्रवत् अद्भिः प्रक्षालनं केवलं करोति किन्तु सम्मार्जनेनैव सहितं प्रक्षालनम्'-इति ढ।

६— ६० पृ० १५ पं० द्रष्टव्यम्। ७— 'सम्मार्जनं'-इति ङ।

८— 'देवमनुष्यपात्राणां संस्काराणां'-इति ञ, झ, ञ, ट, ड।

प्रथमं स्रुवस्य[1] सम्मार्जनं विधातुं तस्यादानप्रतपने विधत्ते— "अथेति ॥ ४ ॥

"देवा इति। "देवा ह वा इत्यादिकं समन्त्रकस्य प्रतपनस्य प्रयोजनप्रतिपादकम्। तच्च निर्वापप्रकरणे प्रागेव व्याख्यातम्[2] ॥ ५ ॥

अथ तस्य प्रतप्तस्य स्रुवस्य समन्त्रकं[3] सम्मार्जनं विधत्ते— "स वा इतीति। स्रुवस्यान्तरतो बिल्वमध्ये वेदाग्रैरिति (प्राक्[4]) सम्मार्ष्टि। सम्मार्जनप्रकाराभिनयार्थः 'इति'-शब्दः। स च प्रकारः कात्यायनेन सूचितः— "वेदाग्रैरन्तरतः प्राक् सम्मार्ष्टीति[5]।

मन्त्रस्य प्रयोजनं माह— "यथेति। यथा खलु अयं स्रुवः 'अनुपरतः' उपरति मप्राप्तः सन् यजमानस्य ग्रचून् 'क्षिणुयात्' हिंस्यात्। "रि क्षि०—०हिंसायाम्"-इति[6] धातुः। एव मेवैतत् ॥

मन्त्रवाक्यं माह— "सपत्नानिति। सपत्नान् क्षिणोतीति 'सपत्नक्षित्'—इति मन्त्रपदस्याभिप्राय इति भावः। मन्त्रशेष मनूद्य व्याचष्टे— "वाजिनं त्वेति। 'वाजः' हविर्लक्षण मन्नम्, तदेव यज्ञः तदर्हत्वेन; तद्वन्तं त्वां 'वाजेध्यायै' वाजस्य अन्न-स्येन्धनं दीपनम्, भूयःकरण मनेन क्रियत इति 'वाजेध्या'

१— "खादिरः स्रुवः"—इति, "अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः"—इति च का० श्रौ० सू० १. ३. ३२, ३८।

२— ३५ पृ० ८ पं०, ४३ पृ० ६ पं० द्रष्टव्यम्।

३— वा० सं० २. २९. २। का० श्रौ० सू० २. ६. ४६।

४— नास्त्येतत् पदं ८-पुस्तकादन्यत्र।

५— का० श्रौ० सू० २. ६. ४६। ६— खा० प० ३०।

यज्ञः, तस्मै सम्मार्ज्मीति मन्त्रशेषस्यार्थः । तदेतदाह— "यज्ञियन्वेति । यज्ञ मर्हतीति यज्ञियः । "यज्ञर्त्विग्भ्याम्"-इति घः[१] ।

जुह्वादीनां स्रुचां सम्मार्जनं विधत्ते— "एतेनैवेति । अनिग्रितोऽमौति योऽयं स्रुवसम्मार्जने मन्त्रः[२], 'एतेनैव' अनिग्रितासौति[३] स्त्रीलिङ्गत्वेन विपरिणमितेनेत्यर्थः । अतएव सूत्रकृतोक्तम्— "अनिग्रितेति स्रुचः"-इति[४] । स्रुचः स्त्रीत्वेन तत्प्रकाशनाय वाजिनं त्वेत्यस्यापि पुंल्लिङ्गशब्दस्य स्थाने वाजिनीं त्वेति स्त्रीलिङ्गतया प्रयोक्तव्य मित्याह— "वाजिनीं त्वेति । सम्मार्जनक्रियापेक्षया 'स्रुचम्'-इति द्वितीया । जुह्वादिवत् समन्त्रकसम्मार्जनस्य प्रसक्तस्य निवृत्त्यर्थ माह— "तूष्णी मिति । प्राग्निचाख्यो यो भागः, स ह्रियते अनेनेति 'प्राग्निचहरणं' गोकर्णाकृति पात्रम्[५], तत् तूष्णीं सम्मार्ष्टीत्यर्थः । तदुक्तं कात्यायनेनापि— "तूष्णीं प्राग्निचहरणम्"-इति[६] । आपस्तम्बस्तु समन्त्रकपक्ष मप्यसूत्रयत्[७]— "प्राग्निचहरणं तूष्णीं वा"-इति[८] ॥ ६ ॥

१— पा० सू० ५. १. ७१ । २— 'स्रुवसम्मार्जनमन्त्रः'-इति ठ ।
३— वा० सं० १. २९. ३ । का० औ० सू० २. ६. ४७ ।
४— का० औ० सू० २. ६. ४७ ।
५— प्राग्निचहरणं वारणं, प्रादेशमात्रं, आदर्शाकृति (वर्त्तुलं), चमसाकृति (चतुरस्रं) वा भवति । का० औ० १. ३. ३६, ४०, ४१ ।
६— का० औ० २. ६. ४८ । ७— आप० औ० सू० २. ४. ८ ।
८— तन्मन्त्रस्तु तत्रैव— "रूपं वर्णं पशूनां मा निर्भक्तं वाजि त्वा सपत्नसाहं सम्मार्ज्मीति"-इति ।

स्रुचां सम्मार्जनप्रकार मभिनयेन दर्शयति— "स वा इति। 'इति' अनेन प्रकारेण 'प्रागपवर्गं' वेदाग्रैर्बिलमध्ये सम्मार्जनम्। 'इति' अनेन प्रकारेण 'प्रत्यगपवर्गम्' आत्माभिमुखं 'बाह्यतः' पृष्ठभागे वेदाग्रमूलैः सम्मार्जनं कार्य मित्यर्थः। तथैव सूचितम्— "वेदाग्रैरन्तरतः प्राक्सम्मार्ष्टीनिगित इति, विपर्य्यस्य बहिर्मूलैरिति[1]। यदेतदन्तरतो बाह्यतश्च द्विविधं सम्मार्जनम्, तत् प्राणोदानात्मना प्रशंसति— "इतीवेति। 'इति'-शब्दोऽत्राप्यभिनयार्थः। 'अयं' प्राणवृत्त्यात्मको वायुः 'इतीव' अनेनैव खलु प्रकारेण प्राङ् सञ्चरति। उदानशब्दस्यापानवृत्त्यभिधायकत्वं प्राक् प्रतिपादितम्[2]। अपानवृत्त्यात्मको वायुः[3] 'इतीव' अनेन प्रकारेण प्रत्यङ् सञ्चरति। अतः प्राक्-प्रत्यक्-सम्मार्जनाभ्यां स्रुचु प्राणापानावेव स्थापयतीत्यर्थः॥

"तस्मादित्यादि। यस्मात् स्रुचा स्रुपरिभागस्य सम्मार्जनं प्राचीनम्, पृष्ठभागस्य च प्रतीचीनम्; 'तस्मात्' अरत्नेः उपरिभागस्य लोमानि 'इतीव' एवमेव प्राचीनानि भवन्ति, पृष्ठभागस्य च लोमानि 'इतीव' इत्थं प्रतीचीनानि भवन्तीत्यर्थः। अथ मर्थस्योत्तिरीयके विस्पष्ट माम्नायते— "तस्मादरत्नौ प्राच्युपरिष्टाल्लोमानि प्रत्यञ्चधस्तात्"-इति[4] ॥ ७॥

१— का० श्रौ० २. ६. ४६।

२— १०६ पृ० १२ पं० द्रष्टव्यम्। नास्येतद्वाक्यं ढ-पुस्तके।

३— 'उदानवृत्त्यात्मकस्त्र'-इति ढ।

४— तै० ब्रा० ३. ३. १. ४. (तै० सं० १. १. १०. सा० भा०)।

सम्मार्जनानन्तरं प्रतपनपुरस्सरं प्रदानं विधत्ते—"स वा इति। 'सः' खल्वाग्नीध्रः तत्तत्सम्मार्गानन्तर मेव सम्मृष्टं पात्रं पुनरग्नौ प्रताप्य अध्वर्यवे दद्यादित्यर्थः ॥

तदेतत्पुनः प्रतपनं लौकिकदृष्टान्तेनोपपादयति—"यथेति। यथा खलु कांस्यादिकं लौकिकं पात्र मवमृश्यावमृश्य निर्णिज्य प्रक्षाल्य, 'उत्तमं' चरमं क्रियाविशेषण मेतत्; अन्ततः 'अनवमर्शं' अवमर्शन मन्तरेव केवल मुदकेनैव 'परितः' अन्तरतो बाह्यतश्च सर्वतः क्षालयेत्, एवं तत्सम्मार्जनानन्तरं पुनः[1] प्रतपनमित्यर्थः ॥ ८ ॥

स्रुवसम्मार्जनस्य प्राथम्यं स्रुक्सम्मार्जनस्य तदानन्तर्यञ्च प्रागुक्तं लौकिकदृष्टान्तेन प्रसंसितु मनुवदति—"स वा इति। "योषा वा इत्यादि। स्रुक् स्त्रीलिङ्गत्वाद् योषित्; स्रुवस्तु पुंल्लिङ्गत्वात् सेचनसमर्थः पुमान्। यस्मादेवं 'तृणः' स्रुवस्य सम्मार्जने प्राथम्यं, 'तस्मात्' एव कारणात् बह्वोऽपि स्त्रियः समूय गच्छन्त्यो वाल मपि पुमांसं पुरस्कृत्य तस्य पश्चात् प्रयन्ति। तस्मात् दृष्टानुसारेण स्रुवस्य प्रथमं सम्मार्जनं युक्तम्[2], पश्चाच्च सुचा मित्येतत् युक्त मित्यर्थः ॥ ९ ॥

सम्मार्जने धर्मविशेष माह—"स वा इति। 'यथा' येन प्रकारेण सम्मार्जनसमये[3] 'अग्निम् अभि न व्युचेत्' अग्नेरुपरि सम्मार्जनसाधनं कुशोदकादिकं न पतेत्, तथैव सम्मृज्यात्। तदे-

---

१— 'पुनः-पुनः'-इति जादिषु। "प्रतप्य-प्रतप्य"—इति का० २. ६. ४७।

२— 'सम्मार्जन मुक्तम्'—इति ठ।

३— 'सम्मार्जनस्य समये'—इति ठ।

तन्नौकिकदृष्टान्तेनोपपादयति— "यथेति। यस्य खलु भोजनार्थं मन्न माहरति, तं भुक्त्यर्थपात्रप्रक्षालनोदकेन यथाभ्युक्षेत्[१], एवमेव तदग्नेरभ्युक्षणम्। अग्नेर्होमार्थं हि हविः; स्रुक्स्रुवादीनि च पात्राणि तत्साधनानि; अतस्तत्प्रक्षालनोदकेन तस्याभ्युक्षणं तादृगेव स्यात्। न हि लोके पात्रप्रक्षालनोदकेन भोक्ताभ्युक्षते। अतः पात्रसम्मार्जनोदकेन[२] अग्नेरभ्युक्षणं न कार्यं मित्यर्थः॥

कथं तर्हि सम्मार्जनं कार्यं मित्याह— "प्राङ्विवेति। प्राङ्मुख एवाग्नेः[३] सकाशादुल्कामुन्य गत्वा अग्नेरुपरि यथा न पतति तथा सम्मृजीतेत्यर्थः॥ १०॥

स्रुक्सम्मार्जनानां वेदाग्राणा माहवनीये प्रहरणं शाखान्तराभिमत मुपन्यस्यति— "तद्धैक इति। स्रुचः सम्मृज्यन्ते एभिरिति 'स्रुक्सम्मार्जनानि' वेदाग्राणि अग्नावभ्यादधाति। दधता मभिप्राय माह[४]— "वेदस्येति। यज्ञसाधनो हि 'वेदः'; वेदस्य सम्मार्जनादावुपयुक्तत्वात्। एतानि च (वेदाग्राणि[५]) तस्यावयवा अभूवन्। 'अह'-इत्यवधारणे। न केवलं वेदावयवत्वादेव वेदाग्राणां यज्ञियत्वम्, अपि तु एभिर्वेदाग्रैः स्रुचः 'समार्जिषुः' सम्मृष्टवन्त ऋत्विजः, अत इदं वेदाग्रजातं[६] यज्ञसम्बन्धि किञ्चिदङ्गम्। यदि

१— 'यथा व्युक्षेत्'—इति ज, झ।

२— 'पात्रसम्मार्गोदकेन'—इति ठ। ३— 'इवाग्नेः'—इति ज, झ।

४— 'अग्नावभ्यादधतीति तेषां मिम मभिप्राय माह'—इति ज, झ, ड।

५— पद मिदं ढ-पुस्तकमात्रे विद्यते।

६— 'वेदाग्रपरिजातं'—इति ज, झ।

'चेत्'[१] अग्नेरन्यच निरस्येत्, तदा तद्यज्ञाद् 'बहिर्धा' बाह्यतो भवेत्; अग्नौ प्रक्षिप्तं हि यज्ञेऽन्तर्भवति, नैवेत्थं भवेदित्यनेनाभिप्रायेणाग्नौ प्रक्षिपन्तीत्यर्थः ॥

स्वमतं दर्शयितु मेकीयं मतं निषेधति— "तदु तथेति। एतल्लौकिकदृष्टान्तेनोपपादयति— "यथेति। यथा खलु भोजनायोपविष्टं भोक्तारं ततः प्रागेव पात्रप्रक्षालनोदकं पाययेत्, एवमेव तद्धोमात् प्राक् सम्मार्जनतृणानामग्नौ प्रहरणम्; अतो नैतद्युक्तमित्यर्थः। स्वमत मुपन्यस्यति— "तस्मादिति। यस्मादेकीयमते उक्तरीत्या दोषः, 'तस्मात्' एतानि सम्मार्जनानि तृणानि उत्करे प्रक्षिपेदित्यर्थः। पञ्चदश मपि कात्यायनः सूत्रयामास— "सम्मार्जनान्यपास्त्यात्रवनीये प्राग्वंश मेक इति[२] ॥ ११ ॥

प्रेषक्रमप्राप्तं पत्नीसन्नहनं विधत्ते— "अथेति। "जघनार्द्धो वा इत्यादि। गार्हपत्यानुष्ठेयेषु[३] पत्नीसंयाजादिषु पत्न्याः सम्बन्धात् सा यज्ञस्यापरार्द्धः। किं ततः? इत्याह— "प्रागिति। मदीयो यज्ञः प्रागपवर्गं 'तायमानः' विस्तार्यमाणो 'यात्' गच्छेत्। अतः परार्द्धं मारभ्य यज्ञो विस्तारयितव्य इत्यनेनाभिप्रायेण पत्नीं सन्नह्येदित्यर्थः[४] ॥

यदेतत्सन्नहनं तदेतत् रथे अश्वादीना मिव पत्न्या यज्ञेन सार्द्धं योजनं बन्धन मित्याह— "युनक्तीति। "युक्ताम इति।

१— 'यदि च'—इति ङ। 'यदि'—एतन्मात्र मेव ढ-पुस्तके।

२— का०श्रौ०सू० २. ६. ५०, ५१। ३— 'गार्हपत्येऽनुष्ठेयेषु'—इति ठ।

४— "पत्नीसन्नहन मेके पूर्वम्"—इति च आप० श्रौ० सू० २. ४. १।

योक्तुरभिप्रायाविष्करणम् । युक्ता च सा मदीयं यज्ञम् 'अनु'लक्ष्य यज्ञसमाप्तिपर्यन्तम् 'आसाते' आसीत; न ह्ययुक्तोऽस्वादौ रथे नियमेनास्त इत्यर्थः ॥ १२ ॥

एवं विहितं सन्नहनं प्रशस्य, तत्साधनं विधत्ते— "योक्त्रेणेति । रथाद्यवयवस्य युगस्य धुरि बलीवर्दादियोजनार्थं दाम 'योक्त्रम्', तेन सन्नह्येदित्यर्थः । लौकिकोदाहरणेनैतद् द्रढयति । "योक्त्रेणेति । 'योग्यं' योजनीयम् अनडुदश्वादिक मित्यर्थः ॥

तच्च सन्नहनं नाभिप्रदेशे कार्यं मित्यभिप्रेत्याह— "अस्ति वा इति । 'अयज्ञियस्य' पत्न्या नाभेरधोभागस्य, 'यज्ञियस्य' उपरिभागस्य च मध्ये सन्नहनेन साङ्कर्यनिवारणात् यज्ञियेनैवोपरिभागेन विधास्यमान माज्यावेक्षणं[1] साधुकृतं भविष्यतीत्यर्थः ॥ १३ ॥

परिहितस्य वाससः उपरि तत्सन्नहनं कार्यं मिति विधत्ते— "स वा इति । योक्त्र-पत्नीशरीरयोः वाससा व्यवधानं प्रशंसति— "ओषधय इति । ओषधिकार्यत्वाद् वाससः तत्तादात्म्यव्यपदेशः । "वरुणेति । वरुणसम्बन्धिनी, वरुणपाशात्मिका रज्जुः । स च वरुणपाशो निग्रहहेतुरिति तस्य व्यवधानेन केनचिद्भवितव्य मिति वासोलक्षणौषधिभिरन्तर्द्धानं युक्त मित्यर्थः ॥

तस्य प्रयोजन माह— "तयो क्षेति ॥ १४ ॥

विहितं सन्नहन मनूद्य मन्त्रं[2] विधत्ते— "स इति । मन्त्रं व्याचष्टे— "इयं वा इति । 'अदितिः' अखण्डनीया देवानां पत्नी

१— इहैवोपरिष्टाद् द्रष्टव्यम् (१८ क० १९२ पृ० १२ पं०)।

२— वा० सं० १. ३०. १ । का० श्रौ० सू० २. ७. १ ।

या पृथिवी, 'सा' च[1] एषापि 'योषित्', यजमानस्य पत्नी भवति। 'तत्' तस्मात् पृथिव्या दृवास्याः 'रास्ना' रशनाम् अलङ्कारार्थां मणिमुक्तादिखचितां मेखला मेव बध्नाति; न रज्जु मिति मन्त्र-प्रयोगाभिप्रायः। उक्तार्थपरतां 'रास्ना'-शब्दस्य दर्शयति— "स्थिर इति। 'स्थिर'-शब्दो मेखलापर्यायः॥ १५॥

योक्त्रस्य सन्नहनसमये ग्रन्थिकरणं निषेधति[2]— "स वा इति।

विपक्षे बाध माह— "वरुण इति। वरुणपाशो हि ग्रन्थिमान्, अतो ग्रन्थिरपि वरुणसम्बन्धी; तत्करणे वरुणः पत्नीं गृह्णीयाद्, बाधेतेत्यर्थः॥ १६॥

ननु ग्रन्थिकरणाभावे योक्त्रं विस्रस्तं स्यादित्यत आह— "ऊर्ङ्ग मिति। योक्त्रस्य मूलाग्रे संयोज्यैकीकृत्य 'ऊर्ङ्ग मुद्गूहेत्' उपरि-ष्टात् लम्बयेदित्यर्थः[3]। तथा चोक्तं सूत्रकृता— "दक्षिणं पाश्र मुत्तरे प्रतिमुच्योर्ङ्ग मुद्गूहति"-इति[4]॥

सन्नहनसमये गार्हपत्यस्य नैर्ऋत्यां दिशि पत्न्या अन्वासनं विधित्सुः साक्षात् पश्चात् प्राङ्मुखोपवेशनं निषेधति— "सा वा इति। तदुपपादयति— "इयं वा इति। 'इयं' हि पृथिवी देवानां पत्नी; सा गार्हपत्यस्य पश्चात् प्राङ्मुखी सर्वदा उपविशति; अतः तत्रासीना[5] इमा मेव देवपत्नी मभ्यारोहेत्॥

१— 'सैव'-इति ठ।

२— "न ग्रन्थिं करोति"-इति का० श्रौ० सू० २. ७. ३ द्रष्टव्यम्।

३— उद्गूहनमन्त्रस्तु वा० सं० १. ३०. १।

४— का० श्रौ० सू० २. ७. २। ५—'तत्रान्वासीना'-इति जादिषु।

तथा च यो बाधस्तं दर्शयति— "सेति । 'क्षिप्रे' अल्पकाले इत्यर्थः । "तथो हेति । पश्चादुपवेशनपरित्यागे सति उक्तदोषाभावात् चिरकालं पत्नी जीवेत् । तेन पश्चादासनपरित्यागेन 'अस्याः' देवपत्न्याः यदुपवेशनस्थानं तत् 'निर्ऋते' अपलपति, तत्स्थानवर्जनेन तां प्रीणयतीत्यर्थः। तथा चेयं पृथिव्यपि 'एनां' पत्नीं 'न हिनस्ति' न बाधते ॥

इदानीं स्थानविशेषे तस्या उपवेशनं विधत्ते— "तस्मादिति । 'तस्माद्' देवपत्नीस्थानाद् 'दक्षिणतः' दक्षिणभागे, गार्हपत्यस्य नैर्ऋत्यां दिशीत्यर्थः । अत एव सूत्रितं कात्यायनेन— "पत्नीं सन्नह्यति प्रत्यग् दक्षिणत उपविष्टां गार्हपत्यस्य मुञ्जयोक्त्रेण"— इति[1] ॥ १७ ॥

पत्न्या आज्यावेक्षणं विधत्ते[2]— "अथेति । रेतसः पुरुषोपभुक्ताज्यपरिणामत्वात् कारणकार्ययोरभेदोपचारात्तादात्म्यम् ॥ १८ ॥

विहित मवेक्षण मनूद्य मन्त्रं[3] विधत्ते— "सेति ॥

मन्त्रगत मदभ्येनेति पदं व्याचष्टे— "अनार्त्तेनेति । आर्त्तिर्हिंसा, तद्रहितेनेत्यर्थः । "अग्नेर्जिह्वासि"-इतिप्रतिपादित माज्यस्य जिह्वारूपत्व मुपपादयति— "यदा वा इति । जिह्वासदृशज्वालाहेतुत्वात् आज्यं जिह्वेत्युच्यते इत्यर्थः । मन्त्रगतं सुह्वरिति पदं

१— का० श्रौ० सू० २. ७. १ । "अनेकपत्नीके सर्वासाम्"–इति या० दे० ।

२— आज्यावेक्षणात् प्राक् आज्योद्वासनं कार्यं विहितम् । का० श्रौ० सू० ३. ७. ४ । तत्र मन्त्रः ऊर्जे त्वेति वा० सं० १. ३०. ३ ।

३— वा० सं० १. ३०. ४ । का० श्रौ० सू० २. ७. ४ ।

Nyayabindutīkā, (Text)	Rs. 0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0
Pariçiṣṭa Parvan. (Text) Fasc. 1–5 @ /6/ each	1	14
Prākṛita-Paingalam, Fasc. 1–2 @ /6/ each	0	12
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV. 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III. Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II. Fasc. 1–10 @ /6/ each	13	14
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	0	12
Tul'si Sat'sai. (Text) Fasc. 1–5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-3 @ /6/ each ...	1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	
Viṣnu Smṛti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradiya Purāṇa. (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6	2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each	13	0
Rtogs brjod āpag ākhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah. with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I. Fasc. 1–2 @ /12/	1	8
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, 1–5 @ 1/ each	5	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsi, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādi, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīri, (Text) Fasc. 1–3 @ /6/ each.	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each	13	2
Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each	1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs. 5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Nizāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāzu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	1	14
*Suyūty's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each	4	0
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārikh-i-Firūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārikh-i-Firūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
Wis o Rāmin. (Text) Fasc. 1–5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), (@ 1/8 per No. to Members and @ 2/ per No. to Non-Members *N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.*		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) .. .	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmla-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein PH.D., JI Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

24-10-1900.

Books are supplied by V-P.P.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 984.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ.

VOL. I, FASCICULUS III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitacinta Kaustubha, Fasc. 1		0	6
*Agni Purāna, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Śāṇdilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–2		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çatapatha Brāhmaṇa, Fasc. 1–3		1	2
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1		0	12
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–15 @ /6/ each ...		4	8
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–2		0	12
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–8 @ /6/ each		3	0
Manutīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti. (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika. Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nyayabinduṭika, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati Fasc. 1–3 @ 2/		6	0

व्याचष्टे— "साध्विति। सुष्ठु ह्रियमाणत्वात् 'सुहवः'। अनेन च होमानुगुणेन साधुत्वं लक्ष्यत इत्यर्थः। "धात्रे-धात्रे"-इति मन्त्रशेषं व्याचष्टे— "सर्वस्मा इति। 'धात्रे-धात्रे' तत्तद्देवताशरीराय, यजुषे-यजुषे, तत्तद्ग्रहणमन्त्राय च पर्याप्तं भवेति मन्त्रार्थः। अतः सर्वस्मै यज्ञाय 'एधि' भवेति तदर्थप्रतिपादनं ब्राह्मणेन क्रियते ॥ १९ ॥

पुरस्ताद्धरणं विधत्ते— "अथेति[1]। पत्न्यवेक्षणानन्तर्य्यम् 'अथ'-शब्दार्थः।

पुन[2]स्तस्याहवनीयेऽधिश्रयणं विधत्ते— "तदिति। हविःश्रपणं हि आहवनीय-गार्हपत्ययोर्विकल्पितम्[3]। तत्राहवनीये श्रपणपक्षे पत्न्यवेक्षणानन्तर मेवाज्यं पुरस्ताद्धृत्वा आहवनीये अधिश्रयेदित्यर्थः। एवं कुर्वतोऽभिप्राय माह— "सर्वं इति। यागसाधनत्वात् हविरत्र 'यज्ञ'-शब्दार्थः। आज्यपुरोडाशादिलक्षणं सर्व मपि मदीयं 'हविः' आहवनीये संस्कृतं भवेदित्यनेनाभिप्रायेणेत्यर्थः। अस्मिन्नपि पक्षे प्रथमतो गार्हपत्याधिश्रयणे कारण माह— "अथ यदमुचेति। 'अमुत्र' गार्हपत्ये, 'अग्ने' पशुपुरोडाशाधिश्रयणकाले[4] 'पत्नीम् अवकाशयिष्यन्' पत्न्यवेक्षणाद्धेतोस्तत्सन्निधानाय गार्हपत्येऽधिश्रयणं कर्त्तव्य मित्यर्थः ॥

प्रथमत एवाज्यस्याहवनीयेऽधिश्रयणे दोष माह— "न होति। पुरोडाशाधिश्रयणकाले एव आहवनीये यद्याज्य मधिश्रयेत्, तदा

१— नास्येतद् वाक्यं ङ-पुस्तके।

२— 'पुर'-इति ङ। ३— १. २. २१. १९ ए०।

४— 'पुरोडाशाधिश्रयणकाले'-इत्येव ठ।

गार्हपत्यसमीपे अन्वासीनायाः पत्न्यास्तद्वेक्षणं न घटते ; भिन्नदेश-त्वात्। यदि च पत्नीम् 'अवकाग्नयिष्यामि' अवेक्षयिष्यामि 'इति' तदर्थं 'यामि' संस्कारमध्ये तत् 'प्रत्यक्'[1] पश्चात् पत्न्याः समीपं हरेत्, तदा संस्कारविघातः स्यादिति तदपि न युज्यते। अथै-तद्दोषपरिजिहीर्षया पत्नीं नावेक्षयेत्, तस्याः पत्न्या यज्ञादन्तरायो भवति। एतदुक्तं भवति। गार्हपत्ये हविःश्रपणपक्वे[2] हि आज्य मपि तत्रैवाधिश्रीयत इति तत्समीपोपविष्टायाः पत्न्यास्तद्वेक्षणं घटत इति न काप्यनुपपत्तिः ; आहवनीयश्रपणपक्वे प्रथमत एवाज्यस्यापि तत्रैवाधिश्रयणे ईदृग्विधो दोषः प्रसज्येत[3] इति। कथं तर्हि तस्मिन् पक्वे कार्यं मिति चेत्,— उच्यते। प्रथमतो गार्हपत्ये अधिश्रित्य पत्न्यवेक्षणानन्तर[4] माहवनीयसमीपं नीत्वा तत्राधिश्रयेत्। तथा सत्युक्तदोषाभाव माह— "तथो इति।

"तस्मादित्यादि। यस्मादेव माहवनीये प्रथमतोऽधिश्रयणे दोषः, 'तस्मात्' पत्न्या सार्द्धं गार्हपत्ये प्रथम माज्यस्य विलापन मित्यर्थः॥

यस्य तु पत्न्या रजोदर्शनादिनिमित्तवशेन असन्निधानात् तदीय-कर्मणाज्यावेक्षणादीनि न क्रियन्ते, तस्योक्तदोषाभावात् प्रथमत एवाहवनीये आज्याधिश्रयणं कार्य मित्याह— "यस्यो इति॥२०॥

१— 'प्राक्'–इति ज, झ।

२— 'गार्हपत्यहविःश्रपणपक्वे'–इति ज ; 'गार्हपत्यहविःश्रपणे'–इति झ।

३— 'प्रसज्यते'–इति आदिषु ; 'प्रसज्जते'–इति ड।

४— "पत्नी मवेक्षयत्यदब्धेनेति"–इति का० श्रौ० सू० २. ७. ५।

तस्माज्यस्यान्तर्वेद्यासादनं केषाञ्चिन्मतेन निषेधति— "तदाहुरिति। निषेधाभिप्राय माह— "अत इति। 'अतः' अस्मादेव खल्वाज्याद् देवपत्नीनां यागः, अतस्तत्सम्बद्धस्याज्यस्यान्तर्वेद्यासादने सति तदैव देवपत्नीः 'अवसभाः' अवगतजनसमूहाः करोति; यष्टव्यदेवसङ्घस्य वेद्या मवस्थानात्। 'अह'-इति निपातो विनिग्रहे। अस्तु तथात्वं देवपत्नीनाम्, किं तत इत्यत आह— "पर इति। देवपत्नीनां सभाप्रापणात् 'अस्य' यजमानस्य पत्न्यपि 'परःपुंसा' भवति। 'परस्'-इत्ययं सकारान्तः, परस्तादित्यर्थे। स्वपुरुषादन्यत्र राजवीथ्यादौ पुरुषसमूहं प्राप्ता 'परःपुंसा'-इत्युच्यते। "अचतुरादिसूत्रे[1] स्त्रीपुंसेति निपातितत्वात् परःपुंसेत्युपपदान्तरेऽपि समासान्तोऽच्प्रत्ययो द्रष्टव्यः। 'इति'-शब्द एकीयमतसमाप्त्यर्थः॥

याज्ञवल्क्यमतेनान्तर्वेद्यासादन मेव निगमयति— "तदिति। 'यथादिष्टं' यथादेशनं यथाशास्त्रम्, 'पत्न्याः' सम्बन्धि कार्यम्, 'अस्तु' भवतु; अतः पत्नीसंयाजार्थम् अन्तर्वेद्यनासादन मिति न युक्तम्। पत्न्यपि 'परःपुंसा वा' भवतु, प्रयाता 'यथा तथा वा' भवतु, तथापि[2] किं प्रयोजनम्? अतः परःपुंसेत्येतदपि दूषणं को वा आद्रियेतेत्यर्थः॥

एव मुक्तदूषणं निरस्य वेद्यासादनपक्ष मुपपादयति— "यज्ञो वेदिरिति। वेदिराज्यं चोभय मपि यज्ञसाधनत्वाद् 'यज्ञः'; तथाच वेद्यासादने वेदिरूपाद् यज्ञाद् आज्यरूपं यज्ञं 'निर्मिमै' निर्मित-

---

१— पा० सू० ५. ४. ७१। २— 'तथापि'- इति आदिषु।

वान् भवतीत्यनेनाभिप्रायेण तचैवासादयेदित्यर्थः। 'तस्मात्'-इति उक्तार्थनिगमनम् ॥ २१ ॥

तस्माज्यस्योत्पवनं विधत्ते—"प्रोक्षणीष्विति[1]। प्रोक्षणीत्पवनं याभ्यां पवित्राभ्यां कृतम्, ते तत आदाय ताभ्यामेवाज्यस्योत्पवनं कार्यमित्यर्थः। उत्पवनविधिस्तावकं "वृचो ह वा इदं सर्वमित्यादिकं प्रागाम्नातं[2] ब्राह्मणम्, आज्योत्पवनस्यापि समानमित्यत आह—"एको वा इत्यादि।

उत्पवनसंस्कारेण पर्यवसितमर्थं माह—"मेध्यमिति ॥ २२ ॥

विहितमुत्पवनमनूद्य मन्त्रं विधत्ते—"स उत्पुनातीति"-इति। आज्यस्यैकत्वात् 'त्वा'-इत्येकवचनान्तत्वेव प्रोक्षणीत्पवनमन्त्रतोऽस्य विशेषः; अतस्तन्मन्त्रव्याख्यानरूपं "सविता वै देवानां प्रसवितेत्यादिकं[3] ब्राह्मणं मन्त्रातिदिशति—"सोऽसाविति ॥ २३ ॥

आज्योत्पवनानन्तरं ताभ्यामेव लेपसहिताभ्यां पवित्राभ्यां पुनः प्रोक्षणीत्पवनं विधत्ते—"अथेति ॥

प्रागाम्नातमेव मन्त्रं[4] पठित्वा तद्ब्राह्मणं मन्त्रातिदिशति—"सवितुर्व इति ॥ २४ ॥

आज्यलेपसहिताभ्यां[5] पवित्राभ्यां[6] प्रोक्षणीत्पवनमुत्पादयति—

१— का० श्रौ० सू० २. ७. ७। तत्र मन्त्रः वा० सं० १. ३१. १।
२— १. ३. ४; ६० पृ० १० पं०, ६४ पृ० १६ पं०।
३— १. ३. ६; ६१ पृ० २ पं०, ६६ पृ० १० पं०।
४— १. ३. ६; ६१ पृ०।
५— 'आज्यस्य सहिताभ्यां'-इति आदिषु।
६— नास्त्येतत् पदं आदिपुस्तकेषु।

"तद्यदिति[१]। 'तत्' तत्र 'यत्' इदम् आज्यलिप्ताभ्यां पवित्राभ्यां मपा मुत्पवनम्, तेन पय एवाप्सु 'दधाति' स्थापयति संयोजयति; आज्यस्य पयःकार्यत्वात्। अप्सु हि परम्परया तत्कार्यत्वात् पयः प्रतिष्ठितम्।

एतदेव पारम्पर्येणोपपादयति—"इदं हीति। 'जग्ध्वा' भक्षयित्वा। "अदो जग्धिर्ल्यप्तिकिति"-त्यदेर्जग्धादेशः[२]।

"तस्मादिति। यस्मादेवं गव्यं पयः परम्परया उदकरसपरिणामरूपम्, 'तस्मात्' कारणात् तत्कार्यस्याज्यस्यापाङ्क्त यदुत्पवने संसर्जनम्, तत् रसस्यैव 'सर्वत्वाय' सम्पूर्णत्वाय कात्स्न्यीय भवतीत्यर्थः ॥ २५ ॥

अध्वर्योराज्यावेक्षणं विधत्ते—"अथेति[३]। एकीयमत मुपन्यस्य निरस्यति—"तद्वैक इति। 'अवस्थापयन्ति' स्थातिरत्र पश्यतिकर्मा[४]; अवेक्षयन्तीत्यर्थः ॥

याज्ञवल्क्यस्य मत मुपन्यस्यति—"तदिति। य एवं यजमान मवेक्षयन्ति, ते स्वकीये यज्ञे 'कथं' कस्मादेव 'स्वयं' यजमाना एव सन्तोऽध्वर्यवो न भवन्ति? कथं वा स्वय मेव होतारो भूत्वा

१— का० श्रौ० सू० २. ७. ८। अत्र मन्त्रः वा० सं० १. ३१. २।
२— पा० सू० २. ४. ३९।
३— का० श्रौ० सू० २. ७. ९। अत्र मन्त्रः वा० सं० १. ३१. ३।
४— निघ० ३. ११. १–५। निरु० ३ भा० ३९९ पृ०, ४ भा० ११२, २९२ पृ०।

याज्यानुवाक्यादीनि नानुब्रुयुः?। तेषा माध्वर्यवादिकरणे हेतु माह—"यत्रेति। 'यत्र' खल्वाध्वर्यवादौ तत्करणमन्त्रैर्बहुतरा इव 'आग्निधः' फलप्रार्थनाः क्रियन्ते, तादृक्फलप्रतिपादकमन्त्र-विशिष्ट माध्वर्यवादिकं कस्मान्न कुर्युः?। तत्परित्यज्य 'एषाम्' एकेषां ग्राखिना मवैवावेक्षणं यजमानेनैव कर्त्तव्य मिति कस्मात् कारणात् श्रद्धा जातेत्यर्थः।

एवं यजमानावेक्षणादि प्रकृत्य अध्वर्युणैव तदवेक्षणं कार्य मिति प्रतिपादयति—"यां वा इति। दक्षिणाभिः परिक्रीतत्वादृत्विग्भिः यत् फल माग्नास्यते, तद् यजमानस्यैवेति न तेन पृथगाग्नासनं कार्यम्। अतोऽध्वर्युरेवाज्य मवेक्षेतेत्यर्थः॥ २६॥

तदवेक्षण मनूद्य प्रशंसति—"स इति। अवेक्षणस्य करणं हि चक्षुः; तच्च यथाभूत मेव वस्तु विषयीकरोतीति 'सत्यम्'। एतदेव लोकव्यवहारेण संवादयन् द्रढयति—"तस्मादिति। यस्मादेवं चक्षुः सत्यम्, तस्मादेव कारणात् विवदमानयोर्मध्ये यश्चक्षुषा दृष्टवान-स्मीति वदति, तदेवन मेव श्रद्धार्हम्, न लितरस्य श्रुतवानस्मीति वचन मित्यर्थः॥ २७॥

विहित मवेक्षण मनूद्य मन्त्रं विधत्ते—"स इति। योऽयं "तेजोऽसीति[1] मन्त्रः, 'स एषः' 'सत्यः' यथार्थ एव। कुत इत्यत आह—"तेजो हीति। 'हि' यस्मात् 'एतत्' आज्यं 'तेजः' तद्धेतु-त्वात्, तथा 'शुक्रं' निर्मलम्, 'अमृतं' यागादिद्वारा अमरण-

---

१—वा० सं० १. ३१. ३।

साधनम्; यद्वा अमृतवत्पुष्टिकरम्। 'एवम्' आज्यस्यैवंरूपत्वात्, विद्यमानार्थप्रकाशकत्वान्मन्त्रः सत्य इत्यर्थः ॥२८॥ ४ [३. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये तृतीयाध्याये
प्रथमं ब्राह्मणम्[१] ॥

१— इह हि ब्राह्मणे स्रुक्सम्मार्जनम्, पत्नीसन्नहनम्, आज्यावेक्षणम्, आज्याधिश्रयणम्, आज्यासादनम्, आज्योत्पवनम्, प्रोक्षणीउत्पवनम्, अध्वर्योराज्यावेक्षणञ्चेति कर्माणि विहितानि। तत्रेयं पद्धतिः— अध्वर्युः स्फ्यं गृहीत्वा उत्करे पाणौ प्रक्षाल्य प्रणीतानां पश्चात् प्रागग्रं मुदगग्रं वा स्फ्यं निदधाति। ततोऽग्नीद् वेदिमध्ये उदगग्रा मग्निहोत्रहवणी मासाद्य प्रणीतानां पश्चात् स्फ्यस्योत्तरतः प्रागग्र मिध्मं मासाद्य इध्मादुत्तरतो बर्हिः प्रागग्रं मासादयति। तत आग्नीध्रः स्रुव मादाय गार्हपत्ये प्रतप्य अप उपस्पृश्य अग्नेः प्राच्यां गत्वा वेदाग्रैरन्तरतः प्राचं सम्मार्ष्टि मूलादारभ्याग्रपर्यन्तम्, अपि वेदमूलै-र्बर्हिः प्रत्यचं सम्मार्ष्टि अग्रादारभ्य मूलपर्यन्तम्, पुनरग्नौ गत्वा प्रतप्याप उपस्पृश्याध्वर्यवे समर्पयति। ततो जुहूपभृद्ध्रुवाणां स्रुचा मप्येव मेव सम्मार्जनम्। किञ्चोत्ताना एव धारयमाणाः स्रुचः सम्मार्ष्टीत्यपि स्मर्त्तव्यम्। ततस्तूष्णीं प्राग्निचहरणे प्रस्तावदानं पुरोडाशप चीं च सम्भृत्याग्नौ प्रतप्याध्वर्यवे समर्पयति। ततः पत्नी-सन्नहनम्। तद्यथा— अग्नीद् योक्त्र मादाय गार्हपत्याग्नेर्दक्षिणां दिशमुपोद्धानाभिमुखो मुर्ध्वजानु मुपविष्टां पत्नीं परिहितवस्त्राद् बर्हिः योक्त्रेण द्विर्वेष्टयति। अनेकासु पत्नीषु सर्वासां योक्त्रबन्धनम्। ततः कर्त्तव्यानि आज्यावेक्षणादीनि मूले एव विस्पष्टानि।

पुरुषो वै यज्ञः। पुरुषस्तेन यज्ञो युदेनं पुरुषस्तनुत ऽएष वै तायुमानो युावानेव पुरुषस्तावान्त्रिधीयते तस्मात्पुरुषो यज्ञः ॥ १ ॥

तस्येयु मेवु जुह्वूः। इयु* मुपभृदात्मैवु ध्रुवा तद्वा ऽआत्मन ऽएवेमानि सुर्व्वाण्युङ्गानि प्रुभवन्ति तस्मादु ध्रुवाया एव सुर्व्वो यज्ञः प्रुभवति ॥ २ ॥

प्राणु ऽएवु स्रुवः। सोऽयं प्राणः सुर्व्वाण्युङ्गान्यनुसञ्चरति तस्मादु स्रुवः सुर्व्वा ऽअनु स्रुचः सञ्चरति ॥ ३ ॥

तस्यासावेव द्यौर्जुह्वः। अथेदु† मन्तरिक्ष मुपभृदियु मेवु ध्रुवा तद्वा ऽअस्या ऽएवेमे सुर्व्वे लोकाः प्रुभवन्ति तस्मादु ध्रुवाया एव सुर्व्वो यज्ञः प्रुभवति ॥ ४ ॥

अयु मेवु स्रुवो योऽयं पुवते। सोऽयु मिमान्सुर्व्वांल्लोकान्‡नुनुपवते तस्मादु स्रुवः सुर्व्वा अनु स्रुचः सञ्चरति ॥ ५ ॥

सु ऽएषु यज्ञुस्तायुमानः§। देवेभ्यस्तायत ऽऋतुभ्य ऽस्कुन्दोभ्यो युज्ञविस्तुद्देवानां यत्सोमो राजा युत्पुरोडाश स्तत्तदादृश्य गृह्णात्यमुष्मै त्वा जुष्टं गृह्णामीत्येवु मु हैतेषाम् ॥ ६ ॥

---

* 'जुह्व। इयु'–इति ख, च। † 'जुह्व। अथेदु'–इति ख।

‡ 'सर्व्वांलोका'–इति क, 'सर्वाल्लोका'–इति ख, ग। § 'नो'–इति ख, च।

अथ यान्याज्यानि गृह्यन्ते। ऋतुभ्यश्चैव तानि छन्दोभ्यश्च गृह्यन्ते तत्तदुनादिश्याज्यस्यैव रूपेण गृह्णाति स वै चतुर्ज्जुह्वां गृह्णात्यष्टौ कृत्व उपभृति ॥ ७ ॥

स यच्चतुर्जुह्वां गृह्णाति। ऋतु*भ्यस्तुन्नृह्णाति प्रयाजेभ्यो हि तुन्नृह्णात्यृतवो हि प्रयाजास्तत्तदुनादिश्याज्यस्यैव रूपेण गृह्णात्युजामितायै जामि ह कुर्याद्युद्वसन्ताय त्वा ग्रीष्माय त्वेति गृह्णीयात्तस्मादुनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ ८ ॥

अथ यदष्टौ कृत्व ऽउपभृति गृह्णाति। छन्दोभ्यस्तुन्नृह्णात्यनुयाजेभ्यो हि तुन्नृह्णाति छन्दाꣳसि ह्यनुयाजास्तत्तदुनादिश्याज्यस्यैव रूपेण गृह्णात्युजामितायै जामि ह कुर्याद्युन्नायच्यै त्वा चिष्टुभे† त्वेति गृह्णीयात्तस्मादुनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ ९ ॥

अथ यच्चतुर्द्ध्रुवायां गृह्णाति। सर्व्वस्मै तुद्यज्ञाय गृह्णाति तत्तदुनादिश्याज्यस्यैव रूपेण गृह्णाति कुस्मा ऽउ ह्यादिशेद्युतः सर्व्वाभ्य ऽएव देवताभ्योऽवद्युति तस्मादुनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ १० ॥

युजमान एव जुहू मुनु। योऽस्मा ऽअरातीयुति सु

---

* 'गृह्णा। त्वृतु'–इति ग। † 'त्रिष्टुभे'–इति च।

ऽउपभृत मन्वक्तैव जुहू मन्वाद्य ऽउपभृतमन्वक्तैव जुहूराद्य ऽउपभृत्स वै चतुर्जुह्वां गृह्णा*त्यष्टौ कृत्व ऽउपभृति ॥ ११ ॥

स यच्चतुर्जुह्वां गृह्णाति । अक्तार† मेवैतत्पुरिमिततरं कनीयाꣳसं करोत्यथ युदष्टौ कृत्व ऽउपभृति गृह्णात्याद्य मेवैतदुपरिमिततरं भूयाꣳसं करोति तद्वि सम्पद्यं युचाक्ता कनीयानाद्यो भूयान् ॥ १२ ॥

स वै चतुर्जुह्वां गृह्णन् । भूय ऽआज्यं गृह्णात्यष्टौ कृत्व ऽउपभृति गृह्णन् कनीय ऽआज्यं गृह्णाति ॥ १३ ॥

स यच्चतुर्जुह्वां गृह्णन् । भूय ऽआज्यं गृह्णात्यक्तार मेवैतत्पुरिमिततरं कनीयाꣳसं कुर्व्वंस्तस्मिन्वीर्यं बलं दधात्यथ युदष्टौ कृत्व ऽउपभृति गृह्णन् कनीय ऽआज्यं गृह्णात्याद्य मेवैतदुपरिमिततरं भूयाꣳसं कुर्व्वंस्तु मवीर्य मबलीयाꣳसं करोति तस्मादुत राजापारां विशं प्रावसायाप्येकवेश्मनैव जिनाति त्वद्यथा त्वत्कामयते तथा सचत ऽएतेनो ह तद्वीर्येण युज्जुह्वां भूय ऽआज्यं गृह्णाति स युज्जुह्वां गृह्णाति जुह्वैव तुज्जुहोति युदुपभृति गृह्णाति जुह्वैव तुज्जुहोति ॥ १४ ॥

तदाहुः । कस्मा ऽउ तुर्ह्युपभृति गृह्णीयाद्युदुपभृता नु जुहोतीति स युद्वोपभृता जुहुयात् पृथग्घैवेमाः प्रजाः

---

* 'गृह्णा'–इति ख, च । † 'गृह्णा । क्तार'–इति ख, ग ।

स्युर्नैवान्ना स्यान्नाद्यः स्यादथ यत्तज्जुह्वैव समानीय जुहोति तस्मादिमा विशः क्षत्रियाय बलिꣳ हरन्त्यथ यदुपभृति गृह्णाति तस्माद् क्षत्रियस्यैव वैश्ये सति वैश्यं पशव उपतिष्ठन्तेऽथ यत्तज्जुह्वैव समानीय जुहोति तस्माद्यदोतु क्षत्रियः कामयतेऽथाह वैश्य मपि युक्ते परो निहितं तदाहरेति तं जिनाति त्वद्युथा त्वत्कामयते तथा सचत एतेनो ह तद्दौर्येण ॥ १५ ॥

तानि वा एतानि। छन्दोभ्य आज्यानि गृह्यन्ते स यच्चतुर्जुह्वां गृह्णाति गायत्र्यै तन्नृह्णात्युथ यदष्टौ कृत्व उपभृति गृह्णाति चिष्टुब्जगतीभ्यां तन्नृह्णात्युथ यच्चतुर्ध्रुवायां गृह्णात्यनुष्टुभे तन्नृह्णाति वाग्वा अनुष्टुब्वाचो वा एदꣳ सर्व्वं प्रभवति तस्माद् ध्रुवाया एव सर्व्वो यज्ञः प्रभवतीयं वा अनुष्टुबस्यै वा एदꣳ सर्व्वं प्रभवति तस्माद् ध्रुवाया एव सर्व्वो यज्ञः प्रभवति ॥ १६ ॥

स गृह्णाति। धाम नामासि प्रियं देवाना मित्येतद्वै देवानां प्रियतमं धाम यदाज्यं तस्मादाह धाम नामासि प्रियं देवाना मित्यनाधृष्टं देवयजन मसीति व्वज्रो ह्याज्यं तस्मादाहानाधृष्टं देवयजन मसीति ॥ १७ ॥

स एतेन युजुषा। सकृज्जुह्वां गृह्णाति चिस्तूष्णी मेतेनैव युजुषा सकृदुपभृति गृह्णाति सप्त कृत्वस्तूष्णी

मेतेनैव युजुषा सकृद् ध्रुवायां गृह्णाति त्रिस्तूष्णीं तदाहु-स्त्रिस्त्रिरेव युजुषा गृह्णीयात् त्रिर्वै यज्ञ इति तदु नु सकृत्सकृदेवाचो ह्येव त्रिर्गृहीतꣳ सम्पद्यते ॥ १८ ॥ ५ ॥

॥ इति द्वितीयप्रपाठके पञ्चमं ब्राह्मणम् [३. २.] ॥

अथ जुह्वपभृद्ध्रुवास्रेतस्याज्यस्य स्रुवेण[1] ग्रहणं विधित्सुस्तत्साधु-दायस्य पुरुषावयवकल्पनया स्तुत्यर्थं तत्साध्यस्य यज्ञस्य पुरुषतादात्म्य माह—"पुरुषो वा इति। तादात्म्य मुपपादयति—"पुरुषस्तेनेति। पुरुषप्रयत्ननिर्वर्त्यत्वाद्यज्ञस्य पुरुषत्व मित्यर्थः।

"एष वा इत्यादि। यत एवं यज्ञः पुरुषः, अतः 'एषः'[2] यज्ञो विस्तार्यमाणः, यदवयवपरिमाणविशिष्टः पुरुषः, तादृगवयवपरि-माणविशिष्ट एव विधीयते ॥ १ ॥

तादृगवयवकृत्रि मभिनयेन दर्शयति—"तस्येति। या 'जुह्वः', सा 'दृयम्' अयम्, दक्षिणो बाहुरित्यर्थः। तथा या 'उपभृत्', सा 'दृयम्' वामबाहुः। ध्रुवा 'आत्मा' मध्यदेहः[3] इत्यर्थः। अत एव तैत्तिरी-यके विस्पष्ट माम्नायते—"जुह्वर्दक्षिणो हस्त, उपभृत् सव्य, आत्मा ध्रुवेति[4]। ध्रुवाया आत्मत्व मुपपादयति—"तद्वा इति। 'आत्मनः'

१— "खादिरः स्रुवः०—०पर्णमयी जुह्वः०—०आश्वत्थी उपभृत्०—० वैकङ्कती ध्रुवा०—०एतद्वै स्रुचाꣳ रूपम्"—इति तै०सं० ३.५.७।

२— 'एव'—इति ठ। ३— 'देहमध्य'—इति जादिषु।

४— तै० ब्रा० ३. ३. १। अस्य "प्राणो वै स्रुवः"—इत्यारम्भः।

मध्यदेहादेव 'इमानि' परितो वर्त्तमानानि हस्तपादादीन्यङ्गानि सर्वाणि 'प्रभवन्ति' उत्पद्यन्ते। यस्मादेवं लोके 'तस्माद्' ध्रुवाया आत्मत्वात्, तस्या एव सकाशात् क्षुत्क्षोऽपि यज्ञः 'प्रभवति' उत्पद्यते। ध्रुवास्यस्याज्यस्य सर्वयागसाधारण्य मनेन प्रतिदिशं भवति[१] ॥ २ ॥

जुह्वादिषु सर्वासु स्रुक्षु स्रुवस्य सञ्चरण मुपपादयितुं तस्य प्राणरूपता माह—"प्राण ऽएवेति। देहमध्येऽवस्थितः प्राणवायुः यस्मात् सर्वाण्यङ्गानि नाडीभिः क्रमेण व्याप्नोति, तस्मात् तदात्मकः स्रुवोऽपि जुह्वाद्याः सर्वाः 'स्रुचः' 'अनु'लक्ष्य क्रमेण सञ्चरति ॥ ३ ॥

एवं पुरुषावयवादिकल्पनया[२] जुह्वादिसमुदायं प्रशस्य, लोकतादात्म्यप्रतिपादनेनापि तं प्रशंसति—"तस्येति। 'तस्य' यज्ञस्य 'असौ' दूरदेशेऽवस्थिता द्यौरेव जुह्वः; इद मेवान्तरिक्ष मुपभृत्; 'इय मेव' भूमिर्ध्रुवा; जुह्वादयो लोकत्रयात्मिका इत्यर्थः[३]।

अस्त्वेवं किं तत इत्याह—"तदा इति। 'तत्' तथा सति 'अस्याः' भूम्या एव सकाशात् यस्मादिमे सर्वे लोकाः 'प्रभवन्ति' उत्पद्यन्ते, तस्मादेव कारणात् पृथिव्यात्मिकाया ध्रुवाया एव सर्वो यज्ञः प्रभवति। इतोऽपि ध्रुवास्य माज्यं सर्वयागसाधारण मित्यर्थः ॥ ४ ॥

अस्मिन्नपि पक्षे स्रुवस्य सर्वासु स्रुक्षु सञ्चरण मुपपादयति—"अय मेवेति। 'योऽयं' लोकत्रये वायुः 'पवते' वाति, तदात्मक एव स्रुवः। 'सः' च बाह्यो वायुः, यथा सर्वान् लोकान् 'अनु'लक्ष्य

१— नास्त्येतदाक्यं ड-पुस्तके।

२— आध्यात्मिकभावेनेत्यर्थः। छा० उ० १. २ द्रष्टव्यम्।

३— इदं व्याख्यान माधिदैविकम्। छा० उ० १. ३ द्रष्टव्यम्।

सञ्चरति, तथैव तदात्मकस्य स्रुवस्यापि लोकत्रयात्मिकासु स्रुक्षु सञ्चरणं युक्त मित्यर्थः ॥ ५ ॥

अथ तासु स्रुक्षु आज्यग्रहणं विधित्सुः तस्य पुरोडाशादि-हविरन्तरवत्प्रसक्तं देवतादेशनपूर्वकत्वं निवारयितु माह—"स एष इति। 'तायमानः' विस्तार्यमाणो यज्ञः, प्रथम मग्न्यादिभ्यः प्रधान-भूतेभ्यो 'देवेभ्यः' तादर्थ्ये चतुर्थी[१] देवतार्थं 'तायते' विस्तार्यते। "तनु विस्तारे"[२]-इत्यस्मात् कर्मणि यकि[३] "तनोतेर्यकि"-इत्यात्त्वम्[४]। ततः 'ऋतुभ्यः' वसन्तादिभ्यः प्रयाजदेवताभ्यः, 'छन्दोभ्यः' गाय-त्र्यादिभ्योऽनुयाजदेवताभ्यश्च; तायत इति शेषः। तच्च पुरोडाशादि-लक्षणं 'यत् हविः', तत् देवानां स्वभूतम्, अतस्तत् देवताना मादेशपुरःसरं ग्रहीतव्यम्।

कुत एतदित्यत आह—"एव मिति। एव मेव हि 'तेषाम्' अग्न्यादिदेवतानां दर्शपूर्णमासादिषु सोमयागादिषु च नामादेश-विशिष्टा मन्त्राः समाम्नाताः। "अग्नये त्वा जुष्टं गृह्णामि"-इति[५], "अग्नीषोमाभ्यां त्वा जुष्टं गृह्णामि"-इति[६] पुरोडाशनिर्वापे; सोमरसग्रहणेष्वैन्द्रवायवादिषु "उपयामगृहीतोऽसि वायव इन्द्र-वायुभ्यां त्वा"-इति[७] ॥ ६ ॥

१— पा० सू० १. ४. ३३. वा० १। २— धा० पा० त० प० १।
३— पा० सू० ३. १. ९७। ४— पा० सू० ६. ४. ३३।
५— वा० सं० १. १०. २ (इहापि ३८ पृ० ७ पं०, ५५ पृ० १ पं०)।
६— वा० सं० १ १०. ३ (इहापि ५६ पृ० १ पं०)।
७— वा० सं० ७. ८. १, २। तै० सं० १. ४. ४; ब्रा० ६. ४. ७।

"अथेति । अथ तस्मिन् यज्ञे यदाज्यग्रहणम्, तत्प्रयाजानुयाज-देवतार्थम्; 'च'-शब्दादेव खिष्टकृद्यागार्थञ्च[1]। 'तत्' तथा सति 'तत्' आज्यं देवतानाम 'अनादिश्य' अनुक्त्वा आज्यसम्बन्धिनैव[2] रूपेण गृह्णाति। आज्यसम्बन्धि रूपञ्च देवताया अनादेशनम्; "न वा एतत्कस्यैचन देवतायै हविर्गृह्णन्नादिशति यदाज्यम्"-इति अनादेशनस्य तद्धर्मतया प्रागाम्नातत्वात्[3]।

अथ जुह्वुपभृतोराज्यग्रहणं विधत्ते— "स वा इति। जुहां चतुर्वारं स्रुवेणाज्यं गृह्णीयात्; उपभृत्यष्टवारम् ॥ ७ ॥

तत्र जुह्वस्य माज्यं किमर्थ मित्याशङ्क्य तत्प्रयोजन माह— "स यदिति। के पुनस्ते ऋतवः, येभ्यो जुह्वस्य माज्यं भाग इत्यत आह— "प्रयाजेभ्य इति। प्रयाजदेवता हि ऋतवो वसन्ताद्याः, तेषां च नामादेशनरहित मेवाज्यं ग्रहीतव्य मित्युक्तम्[4]; तदिदानी मनूद्य तस्य प्रयोजन माह— "तदिति। 'तत्' तथा सति 'तत्' अनादिश्य ग्रहणम् 'अजामितायै' जामितादोषराहित्याय सम्पद्यते; हविर्ग्रहणाज्यग्रहणयोर्देवतादेशने सत्येकरूपेणाजामिता स्यात्। त मिमं दोषं विपक्षे दर्शयति— "जामि हेति ॥ ८ ॥

औपभृताज्यस्य विनियोग माह— "अथेति। अच छन्दसां कः प्रसङ्ग इत्यत आह— "अनुयाजेभ्य इति। गायत्र्यादिच्छन्दोरूपा

१— 'अवभृथेष्टकृत्तन्त्रयज्ञार्थञ्च'-इति ठ, ड।

२— 'आज्यस्वरूपसम्बन्धिनैव'-इति ज्ञादिषु।

३— ६७ पृ० १३ पं०, १०८ पृ० १२ पं०।

४— २०१ पृ० २ प०।

ह्वनूयाजदेवताः ; अतोऽनुयाजेभ्य एवोपभृति तदाज्यग्रहणम् । अत्रापि देवतानादेशनं पूर्ववज्जामितादोषराहित्यायेत्याह— "तदिति । पूर्ववद्विपक्षे बाध मुपन्यस्यानादेशन मुपपादयति— "जामि हेति ॥ ९ ॥

ध्रुवायां चतुर्गृहणविधिपुरःसरं तत्प्रयोजन माह— "अथेति । ध्रौवाज्यग्रहण मप्याज्यधर्मेण देवतानादेशनलक्षणेन कर्त्तव्य मित्युक्ता[1] अत्र देवतादेशनस्य प्रसक्तिरेव नास्तीत्याह— "कस्मा उ ह्यादि- ग्रेदिति । 'यतः' यस्मात् कारणात् ध्रुवास्थ माज्यं यज्ञे यावत्यो देवताः सन्ति, तावतीभ्यः सर्वाभ्य एव देवताभ्यः 'अवद्यति' विभज्य गृह्णाति, 'अतः' सर्वदेवतासाधारण्यात् देवताविशेषस्य उद्देशनं न सम्भवतीत्यर्थः । अत एव तैत्तिरीयके समाम्नायते— "यज् जुह्वां गृह्णाति प्रयाजेभ्यस्तद् यदुपभृति प्रयाजानुयाजेभ्यस्तत्, सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवाया माज्यम्"–इति[2] ॥ १० ॥

अथ जुह्वुपभृतोराज्यग्रहणस्य चतुर्ग्रहादिसङ्ख्याविशेष मुपपादयितु माह— "यजमान एवेति । 'यजमान एव जुह्व म'भागो, तस्य जुह्वभाग इत्यर्थः । "लक्षणेत्थंभूताख्यानभागवीप्सासु[3]"–इत्यनोः कर्मप्रवचनीयत्वम् ; "कर्मप्रवचनीययुक्ते"–इति[4] द्वितीया । तथा यस्य 'अस्मै' यजमानाय 'अरातीयति' अरातिः शत्रुरिवाचरति, सः 'उपभृत मनु' उपभृत् तस्य भाग इत्यर्थः । अत एव

१— ९७, १०८, २०७ पृ० ४ प० । २— तै० ब्रा० ३. ३. ५. ५ ।
३— पा० सू० १. ४. ९० । ४— पा० सू० २. ३. ८ ।

तैत्तिरीयकम्— "यजमानदेवत्या वै जुह्वः भ्रातृव्यदेवत्योपभृत्"-इति[1] ।

तथा भोक्तुः भोग्यस्य[2] च क्रमेण जुह्वुपभृतौ भागावित्याह— "अत्तैव जुह्व मिति । तद्भागत्वेन तत्तादात्म्य माह— "अत्तैव जुह्वरिति ।

प्राग् विहितं तयोराज्यग्रहणं[3] स्तुत्यर्थं मनुवदितु मनुसन्धत्ते— "स वा इति ॥ ११ ॥

तच्च जुह्वां चतुर्ग्रहण मनूद्य सङ्ख्यान्यूनत्वं प्रशंसति— "स यदिति । जुह्वा अत्तृरूपत्वाद् अष्टसङ्ख्यातः चतुस्सङ्ख्याया अल्पीयस्त्वेनात्तार मेव परिमिततरम्, अत एव 'कनीयांसम्' अल्पीयांसं करोति ।

उपभृति आज्यग्रहणसङ्ख्या मनूद्य तद्बहुत्वं प्रशंसति— "अथ यदिति । आद्यरूपा ह्युपभृत्, तच्च भोक्तृरूपजुहूतः सङ्ख्याबाहुल्यात् 'आद्यं' भोग्यवस्तुजात मेव 'अपरिमिततरम्' अधिकतरम् ; अत एव 'भूयांसम्' बहुतरम्, अतिशयेन बहुलं करोति ।

"तद्धि समृद्ध मित्यादि । यत् खलु भोक्तृणा मल्पीयस्त्वम्, भोग्यवस्तुजातस्य च भूयस्त्वम्, तत् खलु समृद्ध मित्यर्थः ॥ १२॥

जुह्वुपभृतोराज्यग्रहणे प्रतिनियतं धर्मविशेषं विधत्ते— "स वा

१— तै० ब्रा० ३. २. ५. ४ ।

२— 'भोक्तृभोग्यस्य'—इति जादिषु, ढे च । 'भोक्तुर्भोज्यस्य'—इति ड ।

३— इहैव अष्टमनवमकण्डिकाभ्यां मिति शेषः (२०१ ए०) ।

इति। 'भूयः' बहुतर मधिक माज्यं जुह्वां यथा भवति तथा सम्यक् पूर्णेन स्रुवेण कर्त्तव्यम्; 'कनीयः' अल्पतरम् उपभृति गृह्यमाण माज्यं यथा भवति तथा अर्द्धपूर्णस्रुवेण कार्य मित्यर्थः ॥ १२ ॥

जौहवाज्यस्य विहितं भूयस्त्व मनूद्य प्रशंसति— "स यदिति। ग्रहणसङ्ख्याह्रासेन भोक्तारं भोग्यजातात्[1] अल्पीयांसं[2] कुर्वन् भूयो-ग्रहणेन 'तस्मिन्' भोक्तरि अधिकं 'वीर्यं' सामर्थ्यं तद्धेतुभूतं 'बलं' च स्थापयति।

औपभृताज्यस्य विहित मल्पीयस्त्व मनूद्य प्रशंसति— "अथ यदिति। सङ्ख्याधिक्येन भोग्यपदार्थ मपरिमितं कुर्वन्, अल्पीयस आज्यस्य ग्रहणेन 'तम्' आद्यम् 'अवीर्यं' वीर्यरहितं बलरहितं च करोति। "तस्मादिति। यस्मादेव माद्यवर्गो बलरहितः 'अबलीयान्,' तस्मादेव कारणात्, सार्वभौमो 'राजा', 'अपारां' निरवधिकां 'विशं' राज्यं 'प्रावसाय' प्राप्यापि 'एकवेशनैव' एकगृहात्मनैव 'जिनाति' जयति, स्वाधीनं करोति। तत्र च 'त्वत्-त्वत्' एकमेकं वस्तु यथा कामयते, तथा 'सचते' समवैति, प्राप्नोति। 'त्वत्'-शब्दः एकशब्द-समानार्थः; "उत त्वः पश्यन्न ददर्श वाचम्"-इत्यादौ[3] तथा दृष्टत्वात्। यद्वा त्वदिति निपातस्यार्थे[4]; 'जिनाति च, यथा च कामयते'-इति योज्यम्। तदेतद्राज्ञः सामर्थ्यम्, एतेनैव वीर्येण जनितम्; 'यद्' वीर्यं जुह्वां भूयोग्रहणेन भोक्तुर्निष्पन्न

१— 'भोज्यजातात्'-इति ठ। २— 'बलीयांसं'-इति ठ।

३— ऋ० सं० १०. ७१. ४। ४— निरु० १. ३. ५।

मित्यर्थः । जुह्वुपभृद्धृतयोराज्ययोर्जुहूरेव होमः कर्त्तव्य इति विधत्ते— "स यदिति ॥ १४ ॥

उपभृतो होमसाधनलाभावे तत्राज्यग्रहणं किमर्थ मित्याक्षिपति— "तदाऊरिति । उपभृति ग्रहणं समर्थयिष्यंस्तावत्तस्या होमसाधनत्वे दोष माह— "स यद्धोपभृतेति । होमसाधनत्वे जुह्वदुपभृतोऽपि स्रुतन्यादन्नस्थानीयाः 'इमाः' सर्वाः प्रजाः, राज्ञः[1] सकाशात् 'पृथक्' स्रुतन्त्रा एव भवेयुः ; तथा च राजा नैवात्ता स्यात्, राज्य मपि नैव भोग्यं[2] भवेदित्यर्थः ।

औपभृत माज्यं जुहूा मानीय, तयैव होमे तु नोक्त दोष इत्याह— "अथ यदिति ।

होमाभावे च उपभृति कस्माद् ग्रहण मित्यस्योत्तर माह— "अथ यदिति । यस्मादेव होमाय जुहू मपेक्षमाणाया मुपभृत्याज्यं गृह्यते, तस्मादेव कारणात् 'क्षत्रियस्य वशे' रक्षार्थं क्षत्रियाधीनत्वे सत्येव, वैश्यं 'पशवः' गवाद्याः 'उपतिष्ठन्ते' । उपभृति ग्रहणाद्वैश्यस्य धनसमृद्धिर्भवतीत्यर्थः ।

"अथ यदित्यादि । यस्मादौपभृत माज्यं समानीय जुहूरेव जुहोति, नोपभृता ; तस्माद्यदैव स क्षत्रियः कामयते, 'अथ' अनन्तर मेतं वैश्यं ब्रूते । कथ मिति । हे वैश्य ! 'ते' तव 'परः' परस्तादन्यत्र गोप्यस्थाने निहितं 'यत्' धन मस्ति, तदाहरेति । एव मुक्ता 'तं' वैश्यं 'जिनाति' धनापहारेण हीनं करोति । अन्यत्पूर्ववत् ।

१— 'अत्तराज्ञः'–इति जादिषु, ठे च । २— 'भोज्यं'–इति ठ ।

"एतेनो ह तद्वीर्येण"-इति। औपभृताज्यस्य[1] जुह्वसमानयन-जनितवीर्येणेत्यर्थः ॥ १५ ॥

ध्रौवस्याज्यस्य प्रागुक्तं[2] सर्वयज्ञसाधारण्यं द्रढयितुं जुह्वादिष्वाज्य-ग्रहणं प्रकारान्तरेण प्रशंसति—"तानि वा इति।

सामान्योक्तं विवृणोति—"स यदिति। प्राथम्यसाम्यात् पाद-चतुष्टयोपेतत्वेन चतुष्पच्छन्दःसाम्याच्च जुह्वां ग्रहणं गायत्र्यर्थ मित्यर्थः।

ननु त्रिपदा गायत्री, कथ मस्यास्चतुष्पच्छन्दःयोगः? सत्यम्! अष्टाक्षरैः पादैस्त्रिपदा, षडक्षरैः पादैस्तु चतुष्पदापि भवति। अत एवान्यत्राम्नायते—"सैषा चतुष्पदा षड्विधा गायत्री"-इति[3]। त्रिष्टुब्जगत्योर्मिलितयोः पादाना मष्टपच्छन्दःसंज्ञा भवति। तथाचोप-मृत्यष्टत्वलो ग्रहणं ताभ्या मर्थे सम्पद्यते, एव मेव पादसंज्ञा-साम्यात् ध्रुवायां चतुर्ग्रहण मनुष्टुबर्थं भवतीत्यर्थः।

अनेन ध्रुवायाः[4] अनुष्टुबर्थत्वोपजीवनेन तत्स्थस्याज्यस्य सर्वयज्ञ-साधारण्य मभिप्रेत्याह—"वाग्वा इति। "अनुष्टुप् च वै सप्तदशश्च समभवताम् सानुष्टुप् चतुरुत्तराणि छन्दाꣳस्यसृजत षडुत्तराꣳस्त्रो-मान्सप्तदशः"-इति[5] सामब्राह्मणे सर्वेषां छन्दसा मनुष्टुप्सकाशात् सृष्टेरानातत्वात् सा वागात्मिका ॥

१— "औपभृदाज्यस्य"-इति आदिषु, "उपभृदाज्यस्य"-इति ड।

२— इत्थैव द्वितीयतृतीयचतुर्थकण्डिकासु द्रष्टव्यम् (२००, २०५ पृ०)।

३— सा० छा० ब्रा० ५.१२.५।

४— 'ध्रुवायाम्'-इति ञ, झ, ञ, ट, ड।

५— सा० ता० ब्रा० १० प्र० २ ख०।

"वाचो वा इत्यादि। 'वाचः' शब्दस्य सकाशात् 'इदं' सर्वं मर्थजातं प्रभवति। अत एव जगतः शब्दविवर्त्तत्व माह:—

"अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः" इति[1]।

तथान्यत्रापि शब्दानुवेधात्तत्कार्यत्व मर्थप्रपञ्चस्योक्तम्—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्ध मिव ज्ञानं सर्वं शब्देन गम्यते[2]"-इति।

यस्मादेवं वाचः सर्वजगदुत्पत्तिहेतुत्वम्, तस्मात् तत्सम्बधिन्या ध्रुवाया अपि सर्वयज्ञहेतुत्वं युक्त मित्यर्थः।

इतोऽपि ध्रुवायाः सर्वयज्ञहेतुत्व मित्याह—"इयं वा अनुष्टुप्"-इति॥ १६॥

विहित माज्यग्रहण मनूद्य मन्त्रं[3] विधत्ते—"स इति। मन्त्रगतस्य धामशब्दस्य विवक्षित मर्थ माह—"एतद्वा इति। धामशब्दस्तेजोवाची[4]; तद्धेतुत्वादाज्य मपि धामेत्युच्यते इत्यर्थः। मन्त्रशेष मनूद्य तत्रानाधृष्टपदस्य तात्पर्यगम्य मर्थ माह— "अनाधृष्ट मिति। 'हि' यस्मात् 'आज्यं वज्रः' "घृतं खलु वै देवा वज्रं कृत्वा सोम मघ्नन्[5]"-इति[6] श्रुतेः। वज्रश्च धर्षितु मशक्यत्वाद् 'अनाधृष्टः' अतस्तदात्मकत्वादाज्य मप्यनाधृष्ट मित्यर्थः॥ १७॥

१— हरिकारिकैषा। २— वाक्यपदीयश्लोक एषः।
३— वा० सं० १. ३१. ४। का० श्रौ० सू० २. ७. ११, १२।
४— निरु० ९. ३. ७ द्रष्टव्यम्। अ० को० ३. ४. १८. १०४। "घृते श्रितो घृतस्यस्य धाम"-इति ऋ० सं० २. ३. ११।
५— 'सोम मघ्नभौत्'-इति भ्रु। ६— उपरिष्टादिहैव ४. १. ४. ८।

अनेन मन्त्रेण ग्रहणे विशेष आह—"स एतेनेति।

पक्षान्तर आह—"तदाऽऽहुरिति। 'तत्' तत्र ग्रहणविषये ब्रह्मवादिन 'आहुः' अनेन मन्त्रेण जुह्वादिषु 'चित्स्रुः' गृह्णीयात्[1]। तथा च समन्त्रकग्रहणस्य प्रत्येकं चिरावृत्तत्वात् यज्ञस्य चितृत्वं सिध्यतीति तेषा माशयः[2]।

सकृत्त्वपक्षं निगमयति—"तदु चिति। सर्वास्वपि स्रुचु सकृत्सकृदेव मन्त्रेण गृह्णीयात्। अत्र सकृद्ग्रहणपक्षेऽपि हि ग्रहणस्य चित्वसङ्ख्या समाहारेण सम्पद्यत इत्यर्थः॥ १८॥ ५ [३.२.]॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये तृतीयाध्याये
द्वितीयं ब्राह्मणम्[3]॥

१—पक्षापक्षविचारस्तात्पर्यं का० श्रौ० २. ७. १३–१७ सू० पर्यालोच्यम्।

२—"ध्रुवायाश्च जुह्वत्"–इति का० श्रौ० सू० २. ७. १८।

३—इह तु ब्राह्मणे एकैव कर्म विहित माज्यनिनयनं नाम। तत्रेयं पद्धतिः—अध्वर्युः सव्येन जुहूं वेदं च गृहीत्वा दक्षिणेन स्रुव मादाय, तेनैव स्रुवेणाज्यस्थाल्याः तूष्णी माज्य मादाय मन्त्रेण जुह्वां निनयति। निनयनं ग्रहणम्। जुह्वां चतुरः स्रुवान् गृह्णाति। तत्र मन्त्रेणैकवारं चित्स्रूष्णीम्, अथवा त्रिर्मन्त्रेण सकृत् तूष्णीम्। तत उपस्तृति अपसकृत्वः तथैवाज्यस्य ग्रहणं कर्त्तव्यं भवति। तत्रैकवारं त्रिवारं वा मन्त्रप्रयोगः; मन्त्रस्तु स एव। ततो ध्रुवायां तथैव चतुर्ग्रहणम्। तत्रापि जुह्वा मिव सकृत् त्रिर्वा मन्त्रप्रयोगः। मन्त्रश्च स एवेति विवेकः।

प्रोक्षणीरध्वर्यु*रादत्ते। सु ऽइध्म मेवाग्रे प्रोक्षति कृष्णो ऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामीति तन्मेध्य मेवैतदग्नये करोति † ॥ १ ॥

अथ व्वेदिं प्रोक्षति। व्वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामीति ‡ तन्मेध्या § मेवैतद् बर्हिषे करोति ॥ २ ॥

अथास्मै बर्हिः प्रयच्छति‖। तत् पुरस्ताद्ग्रन्थ्या सादयति तत् प्रोक्षति बर्हिरसि सुग्भ्यस्त्वा जुष्टं प्रोक्षामीति¶ तन्मेध्य मेवैतत् सुग्भ्यः करोति ॥ ३ ॥

अथ याः प्रोक्षण्यः परिशिष्यन्ते। ताभिरोषधीनां मूलान्युपनिनयत्यदित्यै व्युन्दन मसीतीयं वै पृथिव्यदितिस्तदस्या ऽएवैतदोषधीनां मूलान्युपोनत्ति ता ऽइमा आर्द्रमूला ऽओषधयस्तस्माद्यद्यपि शुष्काण्युग्राणि भवन्त्यार्द्राण्येव मूलानि भवन्ति** ॥ ४ ॥

अथ व्विसृ ऽस्य ग्रन्थिम्। पुरस्तान्प्रस्तरं गृह्णाति व्विष्णो स्तुपोऽसीति यज्ञो वै व्विष्णुस्तुस्येव मेव†† शिखा

---

* 'ध्वर्यु'–इति ग। † 'ति'–इति क, ख।
‡ 'प्रोक्षामि'–इत्येव च। § 'तन्मेध्य'–इति क।
‖ 'प्रयच्छन्ति'–इति क, ग। ¶ 'प्रोक्षामि'–इत्येव च।
** 'न्ति'–इति क, ख। †† 'यु मे'–इति ख, च।

स्तुप एता मेवास्मिन्नेतद्दधाति पुरस्ताद् गृह्णाति पुरस्ताद्व्यर्धꣳ स्तुपस्तस्मात्पुरस्ताद् गृह्णाति* ॥ ५ ॥

अथ सन्नहनं व्विस्रꣳसयति। प्रजापतꣳ हैवास्य स्त्री व्विजायत ऽइति तस्मात् सन्नहनं व्विस्रꣳसयति तद्दक्षिणायाꣳ श्रोणौ निदधाति नीविर्हैवास्यैषा दक्षिणत ऽइव ह्वीयं नीविस्तस्माद्दक्षिणायाꣳ श्रोणौ निदधाति तत्पुनरभिच्छादयत्यभिच्छन्नेव ह्वीयं नीविस्तस्मात्पुनरभिच्छादयति† ॥ ६ ॥

अथ बर्हिꣳ स्तृणाति। अयं‡ वै स्तुपः प्रस्तरोऽथ यान्युवाञ्चि लोमानि तान्येवास्य यदितरं बर्हिस्तान्येवास्मिन्नेतद्दधाति तस्माद्बर्हिꣳ स्तृणाति ॥ ७ ॥

योषा वै व्वेदिः§। ता॥ मेतद्देवाश्च पर्य्यासते ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्तेषुवैना मेतत् पर्य्यासीनेषुनमां करोत्यनमुताया ऽएव तस्माद्बर्हिꣳ स्तृणाति ॥ ८ ॥

यावती वै व्वेदिः¶। तावती** पृथिव्योषधयो बर्हिस्तदास्य मेवैतत् पृथिव्या मोषधीर्दधाति ता ऽइमा

---

* 'ति'–इति क, ख।
† 'ति'–इति क, ख।
‡ 'णात्य। यं'–इति क, ग।
§ 'वै व्वेदिः'–इति क, ग।
॥ 'व्वेदि। स्ता'–इति क, ग।
¶ 'वै व्वेदिः'–इति क, ग।
** 'दि। स्तावती'–इति क, ग।

ऽअस्यां पृथिव्या ओषधयः प्रतिष्ठितास्तस्माद्वर्हिः स्तृणाति ॥ ९ ॥

तद्वै बहुलꣳ स्तृणीयादित्याहुः। युच्च वा ऽअस्यै बहुलतमा ऽओषधयस्तदस्या ऽउपजीवनीयतमं तस्माद् बहुलꣳ स्तृणीयादिति तद्वै तदाहर्त्तर्यैवाधि चिद्वृत् स्तृणाति चिद्वृद्धि यज्ञोऽथो ऽअपि प्रबर्हꣳ* स्तृणीयात् स्तृणन्ति बर्हिरानुषगिति ह्यृषि†णाभ्युनूक्त मधरमूलꣳ स्तृणात्यधरमूला‡ ऽइव ह्येमा ऽअस्यां पृथिव्या ओषधयः प्रतिष्ठितास्तस्मादधरमूलꣳ स्तृणाति§ ॥ १० ॥

सु स्तृणाति। जुर्णम्रदसं॥ त्वा स्तृणामि स्वासस्थां¶ देवेभ्य ऽइति साध्वीं देवेभ्य ऽइत्येवैतदाह यदा ह्येर्ण-म्रदसं त्वेति स्वासस्थां देवेभ्य ऽइति स्वासदां देवेभ्य ऽइत्येवैतदाह** ॥ ११ ॥

अथाग्निं कल्पयति। शिरो वै यज्ञस्याहवनीयः पूर्व्वार्द्धो†† वै शिरः पूर्व्वार्द्धं मेवैतद्यज्ञस्य कल्पयत्युपर्यु-

---

* 'प्रव्वर्हिꣳ'–इति ख, 'प्रवर्हꣳ'–इति च।

† 'त्वृषि' च, 'व्वृषि'–इति च-शुद्धौ।

‡ 'ला'–इति च। § 'ति'–इति ख।

॥ 'स्तृणा। त्वूर्णम्रदसं'–इति क, ग। ¶ 'स्वासंस्था'–इति क, ग।

** 'ह्व'–इति ख। †† 'पूर्व्वोऽर्द्धो'–इति च।

परि प्रस्तरं धारयन् कल्पयत्ययं वै स्तुपः प्रस्तर ऽएतमेवास्मिन्नेतत्प्रतिदधाति तस्मादुपर्युपरि प्रस्तरं धारयन् कल्पयति ॥ १२ ॥

अथ परिधीन्परिदधाति। तद्यत्परिधीन्परिदधाति युज्ञ वै देवा ऽअग्रेऽग्निꣳ होत्राय प्रावृणत तद्धोवाच न वा अहꣳ मिद मुत्सहे युद्धो होता स्यां युद्धो हव्यं व्वहेयन्त्रीन्पूर्व्वान्प्रावृङ्गं ते प्राधन्विषुस्तान्नु मेऽवकल्पयताथ वा ऽअहꣳ मेतदुत्साह्ये युद्धो होता स्यां युद्धो हव्यं व्वहेय मिति तथेति तानस्मा ऽएतानुवाकल्पयंस्तु ऽएते परिधयः ॥ १३ ॥

सु होवाच। व्वज्रो वै तान्व्वषट्कारः प्रावृणग् व्वज्राद्वै व्वषट्कारात् बिभेमि युन्मा व्वज्रो व्वषट्कारो नु प्रवृञ्ज्यादेतैरेव मा परिधत्त तथा मा व्वज्रो व्वषट्कारो न प्रवर्ष्ट्यतीति तथेति तु मेतैः पर्यदधुस्तन्न व्वज्रो व्वषट्कारः प्रावृणक् तद्धर्म्मैवैतदमुये नह्यति यदेतैः परिदधाति ॥ १४ ॥

तु ऽउ हैतु ऽऊचुः। इदु* मु चेदस्मान् यज्ञे युङ्क्ष्यास्त्वेवास्माक मपि यज्ञे भाग ऽइति ॥ १५ ॥

तथेति देवा ऽअब्रुवन्। युदहिष्परिधि स्कन्स्यति

---

* 'ऽऊचु रिदु'–इति क, ग।

तद्युष्मासु हुत मथ यद्व उपर्युपरि होष्यन्ति तद्वो* ऽविष्यत्यथ यदग्नौ होष्यन्ति तद्वो ऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यदेनानुपर्युपरि जुह्वति तदेनानवत्यथ यद्वहिष्परिधि स्कन्दति तदेतेषु हुतं तस्माद्दु ह नाग इव स्कन्नꣳ स्यादिमां वै ते पृथिवीं† प्राविशन् यद्वा ऽइदं किञ्च स्कन्दत्यस्या मेव तत्सर्वं प्रतितिष्ठति ॥ १६ ॥

सु स्कन्न मभिमृशति। भुवपतये स्वाहा भुवनपतये स्वाहा भूतानाम्पतये स्वाहेत्येतानि वै तेषा मग्नीनां नामानि यद् भुवपतिर्भुवनपतिर्भूतानाम्पतिस्तद्यथा व्युषट्कृतꣳ हुत मेव मस्यैतेष्वग्निषु भवति ॥ १७ ॥

तद्वैके। इध्मस्यैवैतान्परिधीन्परिदधति। तदु तथा न कुर्यादनवक्लृप्ता ह तस्यैते भवन्ति यानिध्मस्य परिदधात्यभ्याधानाय ह्येवेध्मः क्रियते तस्यो ह्वैवैतेऽवक्लृप्ता भवन्ति यस्यैतान्न्यानाहरन्ति परिधय ऽइति तस्मादन्यानेवाहरेयुः ॥ १८ ॥

ते वै पालाशाः स्युः। ब्रह्म वै पलाशो ब्रह्माग्निरग्नयो हि तस्मात्पालाशाः स्युः ॥ १९ ॥

यदि पालाशान् न विन्देत्। अथो‡ ऽअपि व्वैकङ्कताः

---

* इत उत्तरं 'तद्वो'–इत्यन्तो ग्रन्थः च-पुस्तके नास्ति।

† नास्त्येतत् पदं च-पुस्तके। ‡ 'विन्दे। दथो'–इति क, ग।

स्युर्यदि व्वैकङ्कतान् नु विन्देदथो ऽअपि कार्ष्मर्यमयाः स्युर्यदि कार्ष्मर्यमयान् नु विन्देदथो ऽअपि बैल्वाः स्युरथो खादिरा अथो ऽऔदुम्बरा एते हि वृक्षा यज्ञियास्तस्मादेतेषां वृक्षाणां भवन्ति ॥ २० ॥ ६ ॥

॥ इति द्वितीयप्रपाठके षष्ठं ब्राह्मणम् [३. ३.] ॥

अथेध्मादीनां प्रोक्षणं विधत्ते— "प्रोक्षणीरध्वर्युरादत्त" इत्यादिना। "अग्नये करोतीति। अग्नौ ह्येध्म आधास्यते, अतोऽन्यर्थं प्रोक्षणेनेध्मं[1] मेध्यं कृतवान् भवतीत्यर्थः[2] ॥ १ ॥

"अथ वेदि मिति। "बर्हिषे करोतीति। 'बर्हिषे त्वा'-इति[3] मन्त्रलिङ्गात् स्तरिष्यमाणबर्हिरर्थं वेदिं शुद्धां करोति; प्रोक्षणेन बर्हिस्तरणयोग्यतां वेदेरापादयतीत्यर्थः ॥ २ ॥

"अथेति। "पुरस्ताद्ग्रन्थीति। 'पुरस्तात्' पूर्वभागे सन्नहनरज्जोः ग्रन्थिर्यथा भवति तथा आसादयतीत्यर्थः ॥

"स्रुग्भ्यः करोतीति। बर्हिष उपरि स्रुचा मासाद्यमानत्वात् तद्योग्यता मेतन्मन्त्रकरणकेन प्रोक्षणेन बर्हिषः[4] सम्पादयतीत्यर्थः[5] ॥ ३ ॥

१— "इध्मः समिन्धनात्"—इति निरु० ८. २. १। "विंशतिकाष्ठक इध्मः"—इति का० प० ५. १। अ० को० १. ४. १३।

२— अत्र मन्त्रः—वा० सं० २. १. १। का० श्रौ०सू० २. ७. १९ क।

३— मन्त्रस्तु— वा० सं० २. १. २। का०श्रौ०सू० २. ७. १९ ख।

४— "त्रेधा बर्हिः सन्नह्य पुनरेकधा"—इति का०श्रौ०सू० ५. १. २५। "बर्हिः परिबर्हणात्"—इति निरु० ८. २. ५।

५— सोऽयं मन्त्रः— वा० सं० २. १. ३। का०श्रौ०सू० २. ७. १९ ग।

अवशिष्टानां प्रोक्षणीनां[१] विनियोग माह— "अथेति। "ओषधीना मिति। स्तरणार्थं माहवनीयबर्हिर्लक्षणाना मोषधीना मित्यर्थः। सूचितं हि कात्यायनेन—"ग्रेषं मूलेषूपसिञ्चत्यदित्यै व्युन्दन मिति[२]। मन्त्रस्य[३] प्रयोजन माह— "इयं वा इति। पृथिव्याः सम्बन्धिन्यो या व्रीहियवाद्या ओषधयः, तासा मेव मूलानि आर्द्रीकरोति। "उन्दी क्लेदने"-इति[४] धातुः। अनेनोदकेन ता इमा ओषधयः आर्द्रमूला भवन्ति; यस्मादेवं तस्मादेव कारणात् ओषधीना मग्रभागेषु शुष्केष्वपि मूलभागा आर्द्रतयैव दृश्यन्त इत्यर्थः॥ ४॥

प्रस्तरस्य[५] ग्रहणं विधत्ते— "अथेति। बर्हिस्सम्बन्धिनरज्जोर्ग्रन्थिं विमुच्य 'पुरस्तात्' पूर्वदिग्भागे करोति। "विष्णोः"-इति[६] मन्त्रेण प्रस्तरं गृह्णीयात्। मन्त्रस्य प्रयोजन माह— "यज्ञो वा इति। आहवनीयसाध्यस्य यज्ञात्मकस्य 'विष्णोः' प्रस्तरमुष्टिरेव शिखारूपः 'स्रुपः' केशसङ्घातः। आहवनीयनिकटे तद्ग्रहणात् शिखा मेव तस्मिन् स्थापितवान् भवतीत्यर्थः। पुरस्ताद्ग्रहण मनूद्य प्रशंसति— "पुरस्तादिति। 'अयं' पिण्डीभावेन बद्धो मानुषः 'स्रुपः' केश-

---

१— प्रोक्षण आपः ६०—७० पृ० द्रष्टव्यम्।

२— का० श्रौ० सू० २. ७. २०।

३— मन्त्रोऽयम्— वा० सं० २. २. १। ४— रु० प० २०।

५— "कुशप्रस्तः प्रस्तर उपसन्नद्धः"-इति का० श्रौ० सू० ५. १. २६। पुष्पिता दर्भमञ्जर्यो बर्हिषः समीपे बद्धः प्रस्तरो भवतीत्यर्थः। "प्रस्तरो दर्भमुष्टिरूपः"-इति वेददीपः। अम० को० ३. ३. १६१।

६— वा० सं० २. २. २। का० श्रौ० सू० २. ७. २१।

सङ्घातः शिरसः पूर्वभागे हि भवति; अतो यज्ञस्यापि पूर्वभागे[१] स्रुपधारणाय पुरस्ताद्ग्रहणं युज्यत इत्यर्थः ॥ ५ ॥

सन्नहनरज्ज्योर्विस्रंसनं विधाय प्रशंसति— "अथेति। सन्नहनस्य विस्रंसने सति 'अस्य' यजमानस्य स्त्री 'प्रक्लृप्तं' प्रकर्षेण क्लृप्तं दशमासम्पूर्णावयवं सपत्यं 'विजायते' प्रसूयते। 'इति'-शब्दो हेतौ[२]। यस्मादेवं तस्मादित्यर्थः ॥

तस्याः सन्नहनरज्ज्योर्दक्षिणविश्लेषे स्थापनं विधत्ते— "तदिति। "नीविर्हैवेति। 'अस्य' यजमानस्य 'एषा' रज्जुर्नीविरेव भवतीत्यर्थः। नीविरूपत्वं दृष्टान्तेनोपपादयति— "दक्षिणत इवेति। लोके हि वाससः परिधाने दक्षिणपार्श्व एव हि नीविः परिकल्प्यते, तस्मात् दक्षिणश्रोणौ सन्नहनरज्जुनिधानं नीविपरिकल्पन मेव भवतीत्यर्थः ॥

सन्नहनस्योपरि दर्भान्तरैश्छादनं विधत्ते— "तत्पुनरिति। तदुपपादयति— "अभिच्छन्नेवेति। उपरि वाससा 'छन्नेव' आवृतेव हि लौकिकी नीविर्भवति, तस्मादभिच्छादनं कार्य मित्यर्थः ॥ ६ ॥

बर्हिषः स्तरणं विधत्ते— "अथेति। 'स्तृणाति' वेदिं छादयतीत्यर्थः। तत्स्तरणं प्रशंसति— "अयं वा इति। यः 'अयं' प्रस्तरः, स ऊर्ध्वबद्धकेशश्मश्रुसङ्घातात्मक स्रुपः; अथ तद्व्यतिरिक्तानि श्मश्रुप्रभृतीनि यान्यवाङ्मुखानि लोमानि, स्तीर्यमाणेन बर्हिषा 'अस्य' यज्ञस्य[३] तान्येव सम्याद्यन्त इत्यर्थः ॥ ७ ॥

१— 'पुरोभागे'—इति ठ।

२— अम० को० ३. १. ३२. ७। हे० को० अने० ७. २१, २२। मेदि० को० अव्य० २२, २३। ३— 'यजमानस्य'—इति ठ, ड।

"योषा वा इत्यादि। हविर्ग्रहणाय आगत्य ये देवाः वेदेः उपरितः[१] उपविशन्ति, ये च 'शुश्रुवांसः' प्रयोगाभिज्ञानाः[२] 'अनूचानाः' अनुष्ठातृरूपाः ऋत्विग्रूपा ब्राह्मणाः समीपे वर्त्तन्ते; स्त्रीरूपा इयं[३] वेदिः स्वयं मत्रानादृता[४] सती तेभ्यो लज्जाविशिष्टा भवति; अतस्तस्या बर्हिषा आच्छादनं अनग्नतायै सम्पद्यत इत्यर्थः ॥ ८ ॥

प्रकारान्तरेण स्तरणं प्रशंसति—"यावती वा इति ॥ ९ ॥

स्तरणस्य लक्षणतां[५] विधत्ते— "तदा इति। 'बर्हिः' निरन्तरं यथा भूमिर्न दृश्यते तथा स्तृणीयादित्यभिज्ञाः कथयन्तीत्यर्थः। एवं वदता मभिप्राय माह— "यत्र वा इति। 'अस्यै' षष्ठ्यर्थे चतुर्थी[६]; 'अस्याः' पृथिव्याः सम्बन्धिनि 'यत्र' यस्मिन् स्थाने ओषधीनां बाहुल्य मस्ति, तदेव स्थानं सर्व्वैः प्राणिभिरतिप्रयत्नेनोपजीवनीयं भवति, तस्मादुपजीवनीयत्वसिद्धये बर्हिः स्तरणं कर्त्तव्य मित्यनेनाभिप्रायेणेत्यर्थः ॥

अस्तु भूमेरुपजीवनीयतमत्वम्, तावता यजमानस्य को लाभः? तत्राह— "तदा इति। 'तस्य' बर्हिषो यः 'आहर्त्ता' यजमानः, तस्मिन्नेव 'तद्' बर्हिःस्तरणकृत मुपजीवनीयतमत्वलक्षणं फलं भवति; अनुष्ठेयक्रियाफलस्य कर्त्तृगामित्वात्। अत एव जैमिनिः

१— 'परितः'–इति ठ, ड। २— 'प्रयोगाभिज्ञाः'–इति ठ।
३— नास्तेतत् पदं ठ-पुस्तके। ४— 'मनादृता'–इति ठ।
५— 'लक्षणं'–इति ठ।
६— पा० सू० २. ३. ६. वा० १।

सूचयामास— "शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्"-इति[1]। 'आहर्त्तर्यवाधि'-इत्यधिशब्दो विभक्त्यर्थानुवादी ॥

स्तरणस्य चितत्वं विधत्ते— "चितत् स्तृणातीति। चिभिर्मुष्टिभिर्बर्हिस्त्विधातु यथा भवति तथा वेदिं छादयेत्। तत्रैकं मुष्टिं वेदेः पूर्वभागे स्तीर्त्वा, द्वितीयं मुष्टिं तन्मध्यमभागे पूर्वमुष्टिना सम्बद्धं स्तृणीयात्; ततस्तृतीयं मुष्टिं मपि वेदेरपरार्द्धे द्वितीयमुष्टिना मम्बद्धं स्तृणीयादिति। एवं स्तरणं[2] प्रत्यक् परिसमाप्तिरित्येकः पक्षः।

पक्षान्तर माह— "अथो इति। 'प्रबर्हं' प्रहृत्य प्रहृत्य प्रथममुष्टिं वेद्यपरार्द्धे स्तीर्त्वा, तस्याग्र मुद्यम्याधस्तात् तत्सम्बद्धं[3] द्वितीयं मुष्टिं स्तृणीयात्, एव मेव तृतीय मपि। एवं मुष्टित्रयस्य परस्परसम्बन्धं ऋङ्मन्त्रपादोदाहरणेन दृढ़यति— "स्तृणन्तीति। 'आनुषक्' अनुषक्तं परस्परसम्बद्धं बर्हिरध्वर्यवः स्तृणन्तीति ऋक्पादस्यार्थः[4]। 'अतः' अस्मान्मन्त्रलिङ्गात् पूर्वं मुष्टिं प्रहृत्य तस्याधस्तात् तत्संसक्त मेवापरं मुष्टिं स्तृणीयादिति भावः। अस्मिन्पक्षे स्तरणस्य प्रागपवर्गता।

कात्यायनः पक्षद्वय मपि सूचयामास[5]— "पश्चादपवर्गं प्रहृत्

१— जै० सू० ३. ७. १८; ऋ० भा० ३. ७. ८।

२— 'स्तरणस्य'-इति ठ।

३— 'मुद्यस्य तस्याधस्तात् सम्बद्धम्'-इति ठ।

४— ऋ० सं० ८. ४५. १। निरु० ६. ३. ५ द्रष्टव्यम्।

५— का० श्रौ० सू० २. ७. २६, २७।

वेति। अस्मिन्यज्ञद्वयेऽपि बर्हिर्मूलस्याधरत्वं विधाय प्रशंसति— "अधरमूल मिति ॥ १० ॥

विहितं स्तरण मनूद्य मन्त्रं विधत्ते— "स स्तृणातीति। "ऊर्ण-म्रदस मिति[1]। मन्त्रपदस्य पर्यवसित मर्थ माह— "साध्वी मिति। ऊर्णासूत्रनिर्मितकम्बलवन्मृदुभूतां त्वां हे वेदे![2] स्तृणामीति हि तस्यार्थः। तथाच 'साध्वीं' शोभनां देवेभ्यः प्रीतिकरी मित्यय मर्थः सम्पद्यत इत्यर्थः। मन्त्रस्य द्वितीयभाग मनूद्य व्याचष्टे— "खासस्था मिति। सुखेनासितु मुपवेष्टुं योग्यां 'खासस्थाम्'। एतस्य पदस्याभि-प्रायकथनं 'खासदाम्'-इति। सुखेन आसितुम्[3], आसदन मुप-वेशनं कर्त्तुं शक्या 'खासदा', ता मित्यर्थः ॥ ११ ॥

अग्नेः प्रबलीकरणं विधत्ते— "अथाग्नि मिति। 'कल्पयति' क्लृप्तं हविर्दहनसमर्थं करोतीत्यर्थः। तच्च कल्पन माहवनीयस्यैवेति प्रतिपादयति— "शिरो वा इति। देहस्य पूर्वभागो हि शिरः; अत आहवनीयोऽपि वेदेः पूर्वभागेऽवस्थानात् 'यज्ञस्य शिरः'। तथाच यज्ञस्य पूर्वार्द्धं माहवनीयं कल्पयन् शिर एव कल्पयति[4]।

तस्मिन् समये प्रस्तरस्योपरि धारणं विधत्ते— "उपर्युपरीति। अग्नेरत्यन्तसन्निकृष्टोपरिभाग इत्यर्थः। "उपर्यध्वधसः सामीप्ये"-इति[5] द्विर्वचनम्। तद्धारणं प्रशंसति— "अयं वा इति। योऽयं

१— वा० सं० २. २. ३। का० श्रौ० सू० २. ७. २२।

२— 'वेदि!'-इति ड। ३— 'आसत्तुं'-इति ठ।

४— 'माहवनीयकल्पनं यत्, शिर एव तत् कल्पयति'-इति ड।

५— पा० सू० ८. १. ७।

'स्रुपः' केशसङ्घातः शिरसि दृश्यते, अथ मेव खलु प्रस्तरः। यज्ञ-शिरस आहवनीयस्योपरि प्रस्तरं धारयन्, 'एत मेव' केशसङ्घातं तस्मिन् 'प्रतिदधाति' सन्दधाति[1] ॥ १२ ॥

परिधिपरिधानं[2] विधत्ते— "अथेति। परितो धीयन्त इति 'परिधयः'। "उपसर्गे घोः किः"-इति[3] कर्मणि कि-प्रत्ययः। तदेतत्परिधान मुपपादयितु मनुवदति— "तद्यदिति ॥

इतिहासमुखेनैतत्परिधान मुपपादयति— "यत्र वा इति। यत्र इमम् 'अग्निं' पुरा[4] 'होत्राय' होतृकर्मणे देवाः 'प्रावृणत' प्रवृत-वन्तः, 'तत्' तदानीं सोऽग्निः 'उवाच' उक्तवान्। कथ मिति, तदुच्यते— "न खल्वह मिदानी मुत्साहं करोमि, 'वः' युष्माकं होता स्यां हव्यं च वहेयम्,-इति"। यदेतद्धोतृत्वहव्यवहनादिलक्षणं कार्यं युष्माभिः प्रार्थ्यते, तत् कर्तुं नोत्सह इत्यर्थः ॥

अनुत्साहकारण मुपन्यस्यति— "त्रीन् पूर्वानिति। हे देवाः! यूयं मदीयान् पूर्वपुरुषान् त्रीन् 'प्रावृङ्क्त' प्रवृतवन्तः स्थः; ते च

१— "दर्भसङ्घातरूपत्वात् केशसङ्घातरूपा शिरोवेव"-इति वे० दी०।

२— "परितः समन्ततः स्थाप्यन्ते"-इति परिधयः। "परितः सर्वतः चतुर्दिक्षु निधानात् परिधयः"-इति पक्षे तु परिधित्वे दोषः स्यात्; अस्ति च परिधित्वं परिधिचतुष्केति सम्प्रदायः। तथाहि— "बाऊमात्राः परिधय ऋजवः सत्वचोऽव्रणाः। त्रयो भवन्त्यग्नीणाग्रा एकेषान्तु चतुर्दिग्रम्"-इति क०प्र० २. ५. १९।

३— पा० सू० ३. ३. ९२।

४— "यत्र खल्विमं हव्यवाहम् 'अग्निम्' पुरा"-इति ठ।

तत एव प्रवरणात् 'प्राधन्विषुः' प्रागमन्, प्राप्नुवन्नित्यर्थः । एतच्च प्रागाम्नातम्— "चतुर्द्धा विहितो ह वा अग्नेऽग्निराध"-इत्यत्र[1] ॥

"तान् त्वित्यादि । प्राग्-गतान्[2] 'तान्' मदीयान् पूर्वम् 'अव-कल्पयत' अवकृप्तान्[3] मूर्त्तिसामर्थ्ययुक्तान् कुरुत; 'अथ' अनन्तर मेव होता स्या मित्यादि 'यत् एतत् उत्साद्ये अहम्' एतद्विषय मुत्साहं करिष्ये। ते च देवाः 'तथेति' अङ्गीकृत्य 'एतान् अवाकल्पयन्' समर्थान् मूर्त्यादियुक्तानकुर्वन्, 'ते' चेमे 'परिधयः' सञ्जाताः ॥ १ ३ ॥

एव माख्यायिकया परिधीना मुत्पत्तिं प्रतिपाद्य, तैरग्नेः परि-धानं कार्य मित्येतदपि प्रतिपादयति— "स होति । एतद् देवान् प्रत्यग्निरुवाच[4] । 'प्रावृणक्' प्रकर्षणावर्जयत् । वषट्काराङ्गीतं मां 'यत्' येन परिधानेन हेतुना वषट्कारात्मको वज्रो न हिंस्यात्, तदेतत्परिधानं मम कुरुत; तथा च वषट्कारात्मको वज्रो मां 'न प्रवर्ष्यति' न हिंसिष्यति। एव मग्निनोक्ते देवा अपि 'तथेति' अङ्गीकृत्य तं परिधिभिः पर्यदधुः। 'अतः' देवैः परिधानकरणात् 'तम्' अग्निम् वज्रात्मको वषट्कारो नाबाधिष्ट। अतः परिधि-परिधानं अग्नेः कवचबन्धन मेव भवति । तस्मादवश्यं तत्कर्त्तव्य मिति भावः ॥ १ ४ ॥

१— २ प्र० १ ब्रा० १ क० (१२४, १२७ पृ०)।

२— 'प्रगतान्'-इति ठ, ड। ३— 'प्रवक्लांस्तान्'-इति ठ, ड।

४— 'प्रत्यग्निरवाक्षम्'-इति ठ।

अथ प्रसङ्गाद् "भुवपतये[1] स्वाहा"-इत्यादिमन्त्रैः[2] स्कन्नस्य हविषोऽभिमर्शनं विधित्सुः, परिधिरूपेणावस्थितानां भुवपत्यादि[3]-संज्ञकानां तेषां मन्त्रीणां स्कन्नद्रव्यभाक्त्वं प्रतिपादयति- "त उ हेत्यादिना। 'ते' परिधिरूपेणावस्थिताः पूर्वाग्नयः 'एतद्' वक्ष्यमाणम् 'ऊचुः' उक्तवन्तः। अस्मांश्चेत् 'इदम्' इदानीं यज्ञे (पुनः 'युङ्क्थाः'[4]) युञ्जान् कुरुथ, तर्ह्यस्माकमपि यज्ञे कश्चिद्भागोऽस्तीति ॥ १५ ॥

"तथेत्यादि। देवाश्च 'तथेति' प्रत्यगृह्णन्। प्रतिश्रुत्य चैव मन्त्रयन्त। कथमिति। 'बर्हिष्परिधि' परिधीनां बाह्यदेशे 'यद्' हविः 'स्कन्स्यति' स्कन्नं भविष्यति, 'तद् युष्मासु हुतम्' अस्तु; तत् स्कन्नं हविरसाधारणो युष्मद्भागो भवत्वित्यर्थः। अथ च 'वः' युष्माकम् 'उपर्युपरि' अत्यन्तसमीपोपरिभागे 'यद्' हविः होष्यन्ति, तद् 'वः' युष्मान् 'अविष्यति' तृप्तान् करिष्यतीति। अवतिरत्र तृप्त्यर्थः। "अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमेषु[5]"-इतिपठितत्वात्। यच्चाग्नौ होष्यन्ति, तदपि युष्माकं तृप्तिकरमस्तीति। एवं देवैः तेषां मन्त्रीणां भागो दत्तः। यस्मादेवं तस्मादिदानीमप्यग्नौ हवनादिकमेनांस्तर्पयतीत्याह- "स यदिति। 'सः'-इति व्यत्ययेन

१— 'भूपतये'-इति ठ।

२— ते च मन्त्राः वा० सं० २. २. ४, ५, ६।

३— 'भूपत्यादि'-इति ठ।

४— नास्त्येतत् पदद्वयं ठ-पुस्तकादन्यत्र।

५— भ्वा० प० ६००।

बक्तर्थे एकवचनम्[१]। तथा च बर्हिष्परिधि 'यत्' हविः स्कन्दति, तत् 'एतेषु' अग्निषु हुत मेव भवति।

स्कन्नस्य च तद्भागत्वं प्रत्यक्षतो दर्शयति— "तस्मादु हेति। यस्मादेवं परिधिरूपाग्नीनां स्कन्नं हविर्भागत्वेन परिकल्पितम्, तस्मादेव कारणात् हविः स्कन्नं स्यादिति यत्तत् 'आगः' अपराधो[२] न भवति। कुत इत्यत आह— "इमा मिति। 'ते' प्रगता अग्नयः, 'इमां' भूमिं खलु प्रविष्टाः, यच्चान्यादिकं किं मपि हविः स्कन्दति, तत्सर्वं पृथिव्या मेव प्रतितिष्ठति। एवं च तेन स्कन्नेन तत्रत्याना मग्नीनां सम्बन्धात् हविर्भविष्यतीति न स्कन्नदोषः॥ १६॥

एवम्भूतं स्कन्नं हविः परिधिरूपेणावस्थितानां भूमौ प्रविष्टाना मग्नीनां भाग इत्युपपाद्य तत्तदग्निनामधेययुक्तैर्मन्त्रैस्तस्याभिमर्शनं विधत्ते— "स स्कन्न मिति। 'तत्' तच्च एवं नामोद्देशेन अभिमर्शने हुते सति, यथा 'वषट्हुतं' वषट्कारेण प्रत्तं हविः तस्यै देवतायै हुतं भवति, एव मेव 'अस्य' यजमानस्य 'एतेषु' भुवपत्यादि[३]नामकेषु परिधिरूपाग्निषु तत् स्कन्नं हविः हुत मेव भवतीत्यर्थः॥ १७॥

तेषां परिधीना मिध्मावयवत्वं केचिन्मन्यन्ते, तेषां मत मुपन्यस्य निरस्यति[४]— "तद्वै क इत्यादिना। 'इध्मस्य'-इत्यवयवावयवि-

---

१— पा० सू० ३. १. ८५।

२— 'सोऽपराधः'—इति जादिषु, डे च।

३— 'भूपत्यादि'—इति ठ। ४—'मत मुपन्यस्यति'—इति ठ।

सम्बन्धार्था षष्ठी[1]; इध्मस्यावयवभूतानित्यर्थः। अग्निसमिन्धनाय ह्रीध्मः क्रियते, अतस्तदवयवानां समिन्धनसामर्थ्य मेव, न तु परिधानसामर्थ्य मस्तीत्यनवक्लृप्तिः। तदेतदाह— "अनवक्लृप्ता इति।

"तस्मो हैवेत्यादि। 'यस्य' यजमानस्य परिधय इत्येवं रूपेण इध्मात् पृथक्, तानेवाहरन्त्यध्वर्यवः; तस्यैव यजमानस्य एते 'अवक्लृप्ताः' परिधानलक्षणकार्यक्षमा भवन्तीत्यर्थः। यस्मादेवं 'तस्मात्' इध्मानन्तर्भूतान् 'अन्यान्' एव परिधीनाहरेयुरिति विधत्ते— "तस्मादिति ॥ १८ ॥

परिध्युपादानभूतान् वृक्षान् उत्तरोत्तरानुकल्पतयोपादेयान् विधत्ते— "ते वा इति। 'ते' खलु परिधयः पलाशशृङ्गजा भवेयुः। "ब्रह्म वै"-इत्यादि तत्प्रशंसा। ब्रह्मविषयस्य रहस्यस्य[2] श्रवणात् पलाशशृङ्गस्यावद् ब्रह्मात्मकः। तथा च तैत्तिरीयकम्— "देवा वै ब्रह्मस्रवदन्त तत् पर्ण उपाशृणोदिति[3]। अग्निवाय्वादित्यरूपेण हिरण्यगर्भस्य ब्रह्मणः[4] एवावस्थानादग्निरपि ब्रह्मात्मकः। तादृग्[5] अग्न्यात्मकत्वं च परिधीनां प्रतिपादितम्। अतोऽग्निरूपब्रह्मात्मकानां परिधीनां पलाशरूपब्रह्मविकारत्वं युक्त मित्यर्थः ॥ १९ ॥

स्पष्ट मन्यत् ॥ २० ॥ ६ [३. ३.] ॥

१— पा० २. ३. ५० सू० भा० द्रष्टव्यम्।

२— 'रहस्ये'-इति आदिषु। ३— तै० सं० ३. ५. ७. ३।

४— 'हिरण्यगर्भाख्यब्रह्मणः'-इति ठ।

५— नास्त्येतत् पदं ङ-पुस्तके।

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे तृतीयाध्याये तृतीयं ब्राह्मणम्[१] ॥

॥ इति प्रथमकाण्डे द्वितीयप्रपाठकः समाप्तः[२] ॥

१— अस्मिन् ब्राह्मणे इध्मवेदिबर्हिषां प्रोक्षणम्, बर्हिःस्तरणम्, प्रस्तरस्थापनम्, आहवनीयाग्निकल्पनम्, परिधिपरिधानारम्भश्च । तत्रेयं पद्धतिः— अध्वर्युः वेदिते आज्यस्थाली मादायान्यत्र सुगुप्ते संरक्ष्य इध्मकाष्ठान् विस्रंस्य "ब्रह्मन्निध्मं प्रोक्षिष्यामि"—इति ब्रह्माणं एच्छति। "प्रोक्ष यज्ञम्"—इति च ब्रह्मा तत्रानुजानाति । ततस्तेषां प्रोक्षणं कार्यम् । वेदेः बर्हिषाश्चैव मेव प्रोक्षणम् । ततोऽवग्निष्टैर्जलैर्बर्हिर्मूलानां प्रोक्षणञ्च । ततो यथा वेदिभूमिर्न दृश्येतैवं कृत्वा तैरेव बर्हिर्भिः आच्छादयेत् । एतदेव बर्हिस्तरणं मुच्यते । तत्स्तरणप्रकारवैविध्यं तु ऋत्विक्कृताभिनयदर्शनत एव सुगमम् । तत इध्मात् समिध मादाय ब्रह्मणो हस्तात् प्रस्तरञ्चादाय आहवनीयस्योपरि धारयन् आहवनीयाग्निं कल्पयेत् । कल्पनं चात्र हविर्दहनसमर्थीकरणम् । परिधिपरिधयस्तूक्तपूर्वः ।

२— इतोऽनन्तरं क-पुस्तके "कण्डिकाः १२२"—इति, ख-पुस्तकेऽपि तथैव, ग-घ-ङ-पुस्तकेषु नास्ति, च-पुस्तके तु "कण्डिकासङ्ख्या १२२"—इति ।

अथ

तृतीयप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

तृतीयाध्याये चतुर्थं ब्राह्मणम् ।

॥ हरिः ॐ ॥

ते वा ऽआर्द्राः स्युः । ए*तुद्वेषां जीवु मेतेन सुतेजस ऽएतेन व्वीर्य्यवन्तस्तुस्मादार्द्राः स्युः ॥ १ ॥

सु मध्यमु मेवाग्ने परिधिं पुरिदधाति । गन्धर्व्वस्त्वा व्विश्वावसुः पुरिदधातु व्विश्वस्यारिष्ट्यै युजमानस्य परिधिरस्यग्निरिडु ईडित ऽइुति† ॥ २ ॥

अथ दुक्षिणं पुरिदधाति । इुन्द्रस्य‡ बाहुरसि दुक्षिणो व्विश्वस्यारिष्ट्यै युजमानस्य परिधिरस्यग्निरिडु ऽईडित ऽइुति§ ॥ ३ ॥

अथोत्तरं पुरिदधाति । मित्रावुरुणौ त्वोत्तरतः पुरिधत्तां ध्रुवेण धुर्म्मणा व्विश्वस्यारिष्ट्यै युजमानस्य

---

* 'स्यु । रे'–इति ग । † 'इुति'–इति ख, 'इति'–इति च ।

‡ 'पुरिदधातून्द्रस्य'–इति ग । § 'इति'–इति ख, 'इति'–इति च ।

परिधिरस्यग्निरिड ईडित इत्यग्नयो हि तस्मादाहाग्नि-रिड ईडित इति* ॥ ४ ॥

अथ समिध मभ्यादधाति। सु मध्यम् मेवाग्ने परिधि मुपस्पृशति तेनैतानग्ने सुमिन्धे ऽथाग्नावभ्यादधाति तेनो ऽग्निं प्रत्युक्षꣳ सुमिन्धे ॥ ५ ॥

सोऽभ्यादधाति। व्वीतिहोत्रं त्वा कवे द्युमन्तꣳ सुमिधीमहि। अग्ने बृहन्त मध्वर इत्येतया गायच्या गायत्री मेवैतत्सुमिन्धे सा गायत्री सुमिद्वान्यानि छन्दाꣳसि सुमिन्धे छन्दाꣳसि सुमिद्वानि देवेभ्यो यज्ञं व्वहन्ति ॥ ६ ॥

अथ यां द्वितीयाꣳ समिध मभ्यादधाति। व्वसन्त मेव तया सुमिन्धे सु व्वसन्तः सुमिद्वोऽन्यान्वृतून्त्सुमिन्ध ऽऋतवः सुमिद्वाः प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति सोऽभ्यादधाति समिदसीति समिद्धि व्वसन्तः† ॥ ७ ॥

अथाभ्याधाय जपति। सूर्य्यस्त्वा पुरस्तात् पातु कस्याश्चिदभिशस्त्या इति गुप्त्यै वा ऽभितः परिधयो भवन्त्युभयतः सूर्य मेव पुरस्ताद्गोपारं करोति नेत्

---

* 'इति'–इति ख, 'इति'–इति घ।

† 'व्वसन्तः'–इति ख, 'न्तः'–इति घ।

पुरस्तान्नाष्ट्रा रक्षाꣳस्यभ्यवचरानिति सूर्यो हि नाष्ट्राणाꣳ रक्षसा मपहन्ता* ॥ ८ ॥

अथ या मेवामूं तृतीयाꣳ समिध मभ्यादधाति। अनु†याजेषु ब्राह्मण मेव तया समिन्धे सु ब्राह्मणः समिद्धो देवेभ्यो यज्ञं व्वहति ॥ ९ ॥

अथ स्तीर्णां व्वेदि मुपावर्त्तते। स द्वे तृणे ऽआदाय तिरश्ची निदधाति सवितुर्बाहूस्थ इत्ययं वै स्तुपः प्रस्तरो ऽथास्यैते भ्रुवावेवु तिरश्ची निदधाति तस्मादिमे तिरश्च्यौ भ्रुवौ क्षत्रं व्वै प्रस्तरो व्विश ऽइतरं बर्हिः क्षत्रस्य चैवु व्विशश्च व्विधृत्यै तस्मात् तिरश्ची निदधाति तस्माद्वेव व्विधृती नाम ॥ १० ॥

तत् प्रस्तरꣳ स्तृणाति। ऊर्ण‡म्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्य ऽइति साधुं देवेभ्य ऽइत्येवैतदाह यदाहोर्णम्रदसं त्वेति स्वासस्थं देवेभ्य ऽइति स्वासदं देवेभ्य इत्येवैतदाह ॥ ११ ॥

तु मभिनिदधाति। आ त्वा§ व्वसवो रुद्रा ऽआदित्याः सदन्त्वित्येते वै चया देवा यद्वसवो रुद्रा ऽआदित्या

---

* 'न्ता'–इति ख, 'न्ता'–इति च। † 'दधात्य । नु'–इति ग।
‡ 'स्तृणात्यूर्म्'–इति ग। § 'दधात्वा । त्वा'–इति ग।

ऽएते त्वासीदन्त्वित्येवैतदाहाभिनिहित एव सव्येन पाणिना भवति ॥ १२ ॥

अथ दक्षिणेन जुहूं प्रतिगृह्णाति। नेदिहु पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसा मपहन्ता तस्मादभिनिहित ऽएव सव्येन पाणिना भवति ॥ १३ ॥

अथ जुहूं प्रतिगृह्णाति। घृताच्यसि जुहूर्नामेति घृताची हि जुहूर्हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद ऽआसीदेति घृताच्यस्युपभृन्नामेत्युपभृतं घृताची ह्युपभृद्वि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद ऽआसीदेति घृताच्यसि ध्रुवा नामेति ध्रुवां घृताची हि ध्रुवा हि नाम्ना सेदं प्रियेण धाम्ना प्रियꣳ सद ऽआसीदेति यदन्युद्ध्रविः* ॥ १४ ॥

स वा ऽउपरि जुहूꣳ सादयति। अधा† ऽइतराः स्रुचः क्षत्रं वै जुहूर्विश ऽइतराः स्रुचः क्षत्र मेवैतद् विश ऽउत्तरं करोति तस्मादुपर्यासीनं क्षत्रिय मधा‡स्तादिमाः प्रजा ऽउपासते तस्मादुपरि जुहूꣳ सादयत्यध इतराः स्रुचः ॥ १५ ॥

सोऽभिमृशति। ध्रुवा ऽअसदन्निति ध्रुवा ह्यसदन्नृतस्य योनाविति यज्ञो वा ऽऋतस्य योनिर्यज्ञे ह्यसदं-

---

* 'विः'–इति च। † 'दुयत्व। ध'–इति ग। ‡ 'मुध'–इति ग, च।

स्तो व्विष्णो पाहि पाहि यज्ञं पाहि यज्ञपति मिति तद्यजमान माह पाहि मां यज्ञन्य मिति तदुष्यात्मानं यज्ञान्नान्तरेति यज्ञो वै व्विष्णुस्तद्यज्ञायैवैतत्सुव्वं परिददाति गुप्त्यै तस्मादाह तो व्विष्णो पाहीति ॥ १६ ॥ १॥

॥ इति तृतीयप्रपाठके प्रथमं ब्राह्मणम् [३. ४.] ॥

अथ परिधीना मार्द्रतां विधाय प्रशंसति— "ते वा इति । 'एतद्' आर्द्रत्वं खलु 'एषां' जीवतां जीवनलिङ्गम् । स्थावरजङ्गमादिशरीरे यत्र खल्वार्द्रत्व मस्ति, 'तेन' ते 'सतेजसः' अवयवकान्तिलक्षणेन तेजसा युक्ताः 'वीर्यवन्तः' बलवन्तश्च भवन्ति। अतः सतेजस्त्वादिसिद्धये 'ते' परिधयोऽपि 'आर्द्राः' भवेयुरित्यर्थः । आर्द्रस्य च सजीवत्वं शुष्कस्य च निर्जीवत्वं छन्दोगैराम्नायते— "अस्य सोम्य! महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेद्०—० अस्य यदेकां शाखां जीवो जहात्यथ सा शुष्यति[1]"-इति ॥ १ ॥

आहवनीयस्य पश्चिमभागे मध्यमपरिधिरेव प्रथमं परिधातव्य इति विधत्ते— "स इति । मन्त्रः[2] स्पष्टार्थ इत्यभिप्रेत्य ब्राह्मणेन न व्याख्यायते । अस्मिन् मन्त्रे, दक्षिणोत्तरपरिधिमन्त्रयोश्च, यद् "अग्निरिड ईडितः"-इति तादात्म्यप्रतिपादनम्, तावन्मात्रं व्याख्या-

---

१— सा० छा० ब्रा० ८. ११. १, २, ३ ।

२— वा० सं० २. ३. १ । का० श्रौ० सू० २. ८. १ ।

स्यते। अस्माभिस्तु संहिताया मेव मन्त्रा व्याख्याता इति न पुनस्तेऽत्र व्याख्यातव्याः[१] ॥ २ ॥

दक्षिणोत्तरपरिध्योरपि समन्त्रकं[२] परिधानं विधत्ते— "अथ दक्षिण मित्यादिना । "अग्नेयो ह्यौत्यादि । यस्मात् प्रागुक्तरीत्या परिधयः 'अग्नयः', 'तस्मात्' कारणाद् "अग्निरिड ईडितः"-इत्यग्निशब्देन परिधिरभिधीयत इत्यर्थः ॥ ३, ४ ॥

पूर्वाधारसमिधोऽभ्याधानं विधत्ते— "अथ समिध मिति । वायव्यां दिश मारभ्य आग्नेयदिग्भागपर्यन्त मविच्छिन्नधारया होमः "पूर्वाधारः" । स च यत्र परिसमाप्यते, तत्रैकां 'समिधम्' आदध्यादित्यर्थः ।

तत्र धर्मविशेष माह— "स मध्यम मेवेति । 'अग्रे' अभ्याधानात्पूर्वं 'मध्यमं परिधिं' तया समिधा संस्पृशेदित्यर्थः ।

तस्य प्रयोजन माह— "तेनैतानिति । 'तेन' उपस्पर्शनेन परिधिरूपान् 'एतान्' अग्नीन् प्रथमं 'समिन्धे'; 'अग्नौ' अभ्याधानेन 'तेन' आहवनीयरूपेण प्रत्यक्षस्याग्नेः समिन्धन मित्यर्थः ॥ ५ ॥

विहित मभ्याधान मनूद्य मन्त्रं[३] विधत्ते— "स इति । 'अस्य' अभ्याधानसाधनमन्त्रस्य गायत्रीच्छन्दस्कत्वात् छन्दसां मध्ये गाय-

---

१— यद्यपि काण्वसंहितैव सायणाचार्येण व्याख्याता (सापि नाद्यापि क्वचिदपि मुद्रिता), इदं तु ब्राह्मणं माध्यन्दिनम् ; तथापि वाजसनेय-सर्वशाखामन्त्राणा मभिन्नत्व मभिप्रेत्यैवोक्त मेव मिति ।

२— वा० सं० २. ३. २, ३ । का० श्रौ० सू० २. ८. १ ।

३— वा० सं० २. ४. १ । का० श्रौ० सू० २. ८. २ ।

आख्य मपि छन्दः प्रथमं 'समिन्धे' सन्दीपयति। समिद्धा च 'सा गायत्री' उष्णिगादीनि 'अन्यानि' चतुरुत्तराणि[1] 'छन्दांसि' सन्दीपयति; समिद्धायाश्चतुर्विंशत्यक्षराया गायत्र्यास्तत्र सर्वत्रानुगमात्। गायत्र्या 'समिद्धानि' तानि च 'छन्दांसि', 'देवेभ्यः' 'यज्ञं' 'वहन्ति' प्रापयन्ति ॥ ६ ॥

अथोत्तराधारसमिधाभ्याधानं विधत्ते— "अथ या मिति। द्वितीयाधारो हि नैर्ऋतीं दिशं मारभ्यैशानीं दिशं प्रत्यनवच्छिन्नधारया होमः; स यत्र परिसमाप्यते, तत्रैकां समिध मादध्यात्। पूर्वाधारसमिदपेक्षया 'द्वितीयाम्'-इति व्यपदेशः। 'तया' च समिधा 'वसन्तः' ऋतुः सन्दीप्यते। निगदसिद्ध मन्यत्।

अभ्याधाज मनूद्य मन्त्रं[2] विधत्ते— "स इति। "समिद्धीति। "समिधो यजति"-इति तद्विधानात्[3]। ईदृशी प्रसिद्धि रत्र[4] 'हि'-शब्देन प्रतिपाद्यते ॥ ७ ॥

एव माधारसमिदभ्याधानानन्तरं मन्त्रविशेषस्य जपं विधत्ते— "अथाभ्याधायेति। मन्त्रस्य प्रयोजन माह— "गुप्त्यै वा इति। राक्षसादिभञ्चरणनिरसनं गोपनम्। गुप्त्यर्थं हि परिधिपरिधानम्। पूर्वस्यां दिशि परिधिर्नास्ति, तथा च 'एतत्' एतेन "सूर्यस्त्वा[5]"-इति मन्त्रोच्चारणेन त मुद्यन्तं 'सूर्य मेव' यज्ञस्य रक्षितारं करोति।

१— "चतुरश्चतुरः प्राजापत्यायाः"-इति पि० छ० सू० ३. ११।

२— अत्र मन्त्रः— वा० सं० २. ५. १। का० श्रौ० सू० २. ८. ३।

३— तै० सं० २. ६. १। ४— 'ईदृशीं प्रसिद्धि मत्र'-इति जादिषु।

५— वा० सं० २. ५. २। का० श्रौ० सू० २. ८. ४।

ग्निष्टं स्पष्टम्[1]। इम मर्थं तैत्तिरीयके विस्पष्ट मामनन्ति— "परिधीन् परिदधाति रक्षसा मपहत्यै, संस्पर्शयति रक्षसा मनन्वचाराय, न पुरस्तात् परिदधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यपहन्ति"-इति[2] ॥ ८ ॥

अनुयाजप्राक्कालेऽभ्याधानायैका समिदवशेषयितव्येत्यभिप्रेत्य तस्याः समिधोऽभिधास्यमान[3] मभ्याधान मनूद्य प्रसङ्गात्तस्य प्रयोजन माह— "अथ या मिति। "अमू मिति। 'अदः'-शब्दो विप्रकृष्टार्थवाची। विप्रकृष्टेऽनुयाजप्राक्काले अभ्याधान मित्यर्थः। "ब्राह्मण मेव तयेति। "एषा ते अग्ने समित्"-इत्यादिना मन्त्रेण[4] यजमानगामिनो वर्द्धनाप्यायनादिलक्षणफलस्य प्रतिपादनात् तेनाभ्याहितया समिधा यजमानरूपं 'ब्राह्मण मेव' 'समिन्धे' सन्दीपयति। गत मन्यत् ॥९॥

एव माहवनीये कर्त्तव्याः परिधिपरिधानाद्यो विहिताः; अथ वेद्यां हविरासादनार्थं प्रस्तरस्तरणं विधित्सुस्तदर्थं विधृत्योः सादनं विधत्ते— "अथेति। बर्हिषा 'स्तीर्णां वेदिम्' 'उप'लक्ष्य आहवनीयसमीपादुपावर्त्तेतेत्यर्थः। उपावृत्य च बर्हिषः सकाशाद् 'द्वे तृणे आदाय' बर्हिष उपरि 'तिरश्ची' तिर्यगग्रे 'निदधाति' "सवितुः"-इतिमन्त्रेण[5] ॥

तदेतत् तृणनिधानं प्रशंसति— "अयं वा इति। 'प्रस्तरः' हि यज्ञस्य 'स्तुपः' केशसङ्घातः। बर्हींषि श्मश्रुप्रभृतीनि लोमानि। तथा

१— 'गतम्'-इति ठ। २— तै० ब्रा० ३. ३. ७।
३— 'विधास्यमान'-इति ठ। ४— तै० सं० २. ६. ६. १।
५— वा० सं० २. ५. ३। का० श्रौ० सू० २. ८. ५।

च प्रस्तरबर्हिषोर्मध्ये तिर्यङ्निहिते 'एते' दृणे 'भुवावेव' भ्रूस्थानीये इत्यर्थः। लोकप्रसिद्धीतद् द्रढयति— "तस्मादिति। यस्मादेवं यज्ञे केशश्मश्रुरूपेण संस्तरयोः प्रस्तरबर्हिषोर्मध्ये संस्थिते दृणे तिर्यङ्निधीयेते, 'तस्मात्' कारणात् पुरुषशरीरस्य 'भ्रुवौ' 'तिरश्चौ' दृश्येते इत्यर्थः॥

तिर्यङ्निधानस्य प्रयोजन माह— "चचं वा इति। चचियवैश्यजातिस्थानीये प्रस्तरबर्हिषौ; अतस्तयोर्विविधं धारणाय तन्तिर्यक् दृणनिधानं सम्पद्यते; इतरथा हि प्रस्तरबर्हिषोः साङ्कर्यात् चचियवैश्ययोरपि साङ्कर्यं स्यात्। यस्मादेव मेते दृणे तिर्यङ्निहिते विधारणप्रयोजने, तस्माद् अनयोः 'विधृतौ' इति 'नाम' सम्पद्यत इति निर्ब्रूते— "तस्मादिति॥ १०॥

प्रस्तरस्य समन्त्रकं स्तरणं विधत्ते— "तदिति। 'तत्' तच्च विधृत्योरुपरीत्यर्थः। प्रस्तरस्तरणमन्त्रस्तु[1] बर्हिस्तरणमन्त्रवत्[2]। तच्च स्तीर्यमाणाया वेदेरभिधेयत्वात् 'साध्वीं देवेभ्यः'—इत्येवं स्त्रीलिङ्गतया व्याख्यातः; अत्र तु प्रस्तर एवाभिधेय इति 'साधुं देवेभ्यः'—इति पुल्लिङ्गतया व्याख्यायत इत्येतावानेव विशेषः। अन्यत् पूर्ववद् योज्यम्[3]॥ ११॥

स्तीर्णस्य[4] प्रस्तरस्योपरि स्पर्शनं विधत्ते— "त मभीति।

१— वा० सं० २. ५. ४। का० श्रौ० सू० २. ८. १०।

२— वा० सं० २. २. ३। पुरस्ताद् (२१७, २२५ पृ०) द्रष्टव्यम्।

३— २२५ पृ० ३–१०पं० द्रष्टव्यम्।

४— 'स्तीर्यस्य'–इति आदिषु, ठे च।

"आ त्वा"-इतिमन्त्रेण[1] प्रस्तरस्योपरि हस्तं निदध्यादित्यर्थः। मन्त्रव्याख्यानं सुगमम् ॥

जुह्वादीनां सादनपर्यन्तं प्रस्तरस्याचारम् विधत्ते— "अभिनिहित एवेति। सव्यहस्तेन प्रस्तरः 'अभिनिहितः' संस्पृष्टः 'एव' भवेत् ॥ १२ ॥

"अथेति। 'अथ' अनन्तर मेव 'दक्षिणेन' हस्तेन 'जुहूं' प्रतिगृह्णीयात्। जुहूसादनपर्यन्तं प्रस्तरविमोको न युक्त इत्यर्थः। तस्य प्रयोजन माह— "नेदिहेति। उक्ताभिप्राय मेतत् ॥ १३ ॥

अथ जुहूः सादनं विधत्ते— "अथ जुहू मिति। जुहू मादाय अनेन मन्त्रेण[2] प्रस्तरे सादयेत्न तु ग्रहणमात्रम्; मन्त्रस्य सादनलिङ्गत्वात्। अत एवोक्तं कात्यायनेन— "जुहूं प्रतिगृह्य निदधाति, घृताचीत्येव मितरे उत्तराभ्यां प्रतिमन्त्रम्"-इति[3]। "घृताची हीति। घृत मञ्चति प्राप्नोतीति 'घृताची'। घृताचीत्येतत् प्रसिद्ध मिति हेरर्थः; 'नाम्ना' नामधेयेन, एषा स्रुक् 'जुहूर्हि' न केवलं होमसाधनत्वादित्यभिप्रायः। मन्त्रशेषो निगदसिद्ध इत्यभिप्रेत्यानुवदति— "सेद मिति।

अथोपभृतः सादनं विधत्ते— "घृताच्यस्युपभृन्नामे"त्युपभृत मिति। वाक्यशेषः पूर्ववद्योज्यः ॥

१— वा० सं० २. ५. ५। का० श्रौ० सू० २. ८. ११।

२— वा० सं० २. ६. १। का० श्रौ० सू० २. ८. १२।

३— का० श्रौ० सू० २. ८. १३।

४— वा० सं० २. ६. २। का० श्रौ० सू० २. ८. १२।

ध्रुवायाः सादनं विधत्ते— "घृताच्यसि ध्रुवा नाम्नेति[1] ध्रुवा मिति। अन्यत् पूर्ववत् ॥

स्रुग्गताज्यव्यतिरिक्तस्य हविषः सादनं विधत्ते— "प्रियेणेति। 'यद्' आज्यात् 'अन्यद्धविः' पुरोडाशादिकम्, "प्रियेण" इतिमन्त्रेण[2] तत् सादयेदिति शेषः ॥ १४ ॥

जुह्वादीनां सादने विशेष माह— "स वा इति। प्रस्तरस्यो-परि जुहू मेव सादयेत्। तस्मादधस्ताद् बर्हिषि 'इतराः' उपभृदाद्याः 'स्रुचः' सादयेदित्यर्थः। अत एवोक्तं सूचकृता— "बर्हिष्युपभृतं ध्रुवां चेति[3]। तदेतदुपर्यधः सादन मुपपादयति— "त्वचं वा इति। खातव्येन होमसाधनत्वात् जुहूः स्रुचियजातिः। उपभृदादीनां तु जुह्वद्धोमे खातव्याभावात्, प्रत्युत तत्स्थस्याज्यस्य जुह्वा मानेयत्वात् ता वैश्यजातिस्थानीयाः। निगदसिद्धः शेषः ॥ १५ ॥

यमन्त्रक मासन्नानां हविषा मभिमर्शनं विधत्ते— "सोऽभि-मृशतीति। मन्त्रप्रतीकस्यार्थः[4] प्रसिद्ध इति 'हि'-शब्देन व्याचष्टे— "ध्रुवा हीति। कर्मसमाप्तिपर्यन्तं नैश्चल्येन वेद्यां जुह्वाद्या उपसन्ना इत्यर्थः ॥

"ऋतस्य योनौ"-इत्यस्य विवक्षित मर्थं माह— "यज्ञो वा इति। 'ऋत'-शब्दः 'सत्य'-शब्दपर्यायः। सत्यफलकारणत्वात् ऋतस्य

१— या० सं० २. ६. ३। का० श्रौ० सू० २. ८. १२।

२— वा० सं० २. ६. ४। का० श्रौ० सू० २. ८. १८।

३— का० श्रौ सू० २. ८. १३।

४— मन्त्रस्तु वा० सं० २. ६. ५। का० श्रौ० सू० २. ८. १९।

योनिः 'यज्ञः'। तादृगर्थपरत्वं युज्यत इत्याह— "यज्ञे हीति। 'यज्ञे' खल्वेता जुह्वाद्याः 'असदन्' आसादिताः स्थापिताः; अतः "सतस्त्र योनौ"-इत्यनेन यज्ञप्रतिपादनं युक्त मित्यर्थः।

मन्त्रशेष मनूद्य व्याचष्टे— "ता विष्णो"-इति। फलभोक्तृतया स्वामित्वाद् 'यज्ञपति'-शब्देन यजमानो विवक्षित इत्याह— "तद्यजमान मिति। यज्ञं नयति निष्पादयतीति 'यज्ञनीः' अध्वर्युः; अतो यज्ञस्य मितिपदस्याध्वर्युपरतां व्याचष्टे— "तदध्यात्मान मिति। 'तत्' तेन 'यज्ञस्य मिति' अनेनाध्वर्युः स्वात्मानं यज्ञसकाशात् 'नान्तरेति' अन्तरितं वियुक्तं न करोति। सिद्धप्राय मन्यत् ॥ १६ ॥१[३.४.]॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथभाष्ये द्वतीयाध्याये
चतुर्थं ब्राह्मणम्[१] ॥

१— प्रथमं तावदिह परिधिपरिधानं विहितम्। तच्चैवम्— आर्द्रान् एकद्व्यौयान् बाहुमात्रान् पालाशवैकङ्कतकार्ष्मर्यबैल्वखादिरौदुम्बरान्यतमान् त्रीन् काष्ठखण्डान् सङ्गृह्य तेषु यत् स्थूलतमं तदेव मध्यमं परिधिं परिकल्प्य आहवनीयस्य पश्चात् उदगग्रं प्रथमं परिदध्यात्। ततो ऽणिष्ठं द्वितीयं परिधिं दक्षिणतः प्रागग्रं परिदध्यात्। तत उत्तरतोऽपि प्रागग्र मेव अणिष्ठतर मवग्रिष्टं परिधिं परिदध्यात्। अथैकविंशतिकाष्ठकादिध्माद् गृहीतया समिधा तूष्णीं प्रथमपरिधिं स्पृष्ट्वोत्थाय तां समिध माहवनीयेऽभ्यादध्यात्। इध्मस्यैकविंशतिकाष्ठत्वं चाम्नातं तैत्तिरीयकैः— "एकविंशति मिध्मदारूणि भवन्ति"— इति तै० ब्रा० ३. २. ७. २। ततस्तस्मादेवेध्मात् द्वितीयां

इन्धे ह वा ऽएतदध्वर्युः। इध्मेनाग्निं तस्मादिध्मो नाम समिन्धे सामिधेनीभिर्होता तस्मात् सामिधेन्यो नाम ॥ १ ॥

स ऽआह। अग्नये* समिध्यमानायानुब्रूहीत्यग्नये ह्येतत् समिध्यमानायान्वाह ॥ २ ॥

तदु हैक ऽआहुः। अग्नये† समिध्यमानाय होतरनुब्रूहीति तदु तथा न ब्रूयाद्धोता वा ऽएषु पुरा भवति युदैवैनं प्रवृणीतेऽथ होता तस्मादु ब्रूयाद्‡ग्नये समिध्यमानायानुब्रूहीत्येवꣳ ॥ ३ ॥

समिध मादाय परिधि मस्मृष्ट्वैव तत्रैवादध्यादिति समिदाधानम्। अथ उपविश्य आहवनीय मौक्षमाणो सस्वरं मन्त्रं जपेत्। ततः प्रादक्षिण्येन वेदिं प्रत्याहृत्यागत्य स्त्रीर्साया एव वेदे रुपरि मध्ये अरत्निमात्रे उत्तराग्रे साग्रे द्वे दर्भे समन्त्रपाठं निदध्यात्। तयोस्तृणयोरुपरि मूलभागे प्रागग्रं प्रस्तरं स्तृणीयात्; बर्हिर्मूलेभ्यः प्रस्तरमूलानि अभिहततराणि कुर्यादित्यर्थः। तत उभाभ्यां हस्ताभ्यां प्रस्तर मभिनिदध्याच्चेति प्रस्ताराभिनिधानम्। अभिनिधानं चेहाधःपीडनम्। अथाग्नीधा समर्पितां जुहूं दक्षिणेन पाणिना प्रतिगृह्य सव्यहस्तेनाविमुक्ते प्रस्तरे प्रागग्रां सादयेत्। ततः सव्येन वेदं गृहीत्वोपभृतं तथैव प्रतिगृह्य जुह्वा उत्तरत्र बर्हिष्येवासादयेत्। जुहूतोऽवक्रष्टां पश्चाद्वर्त्तमाना मसंस्पृष्टां ध्रुवा मुपभृत उत्तरतो विधृत्योर्ध्वयोरुपर्यासादयेदिति स्रुगासादनम् ॥

* 'ऽआहाग्नये'–इति क, ग। † 'ऽआहुरग्नये'–इति क, ग।
‡ 'ब्रूया'–इति ग। § 'ब्रूहीत्येव'–इति च।

आग्नेयीरुन्वाह। स्वयैवैन मेतद्देवतया सुमिन्धे गायत्रीरुन्वाह गायत्रं वा ऽअग्नेश्छन्दः स्वेनैवैन मेतच्छन्दसा सुमिन्धे वीर्यं गायत्री ब्रह्म गायत्री वीर्येणैवैन मेतत्सुमिन्धे ॥ ४ ॥

एकादशान्वाह। एका*दशाक्षरा वै त्रिष्टुब् ब्रह्म गायत्री क्षत्रं त्रिष्टुबेताभ्या मेवैन मेतदुभाभ्यां वीर्याभ्याꣳ सुमिन्धे तस्मादेकादशान्वाह ॥ ५ ॥

स वै त्रिः प्रथमा मन्वाह। त्रिरुत्तमां चितृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात् त्रिः प्रथमा मन्वाह त्रिरुत्तमाम् ॥ ६ ॥

ताः पञ्चदश सामिधेन्यः सम्पद्यन्ते। पञ्चदशो वै वज्रो वीर्यं वज्रो वीर्य मेवैतत्सामिधेनीरभि सम्पादयति तस्मादेतास्वनूच्यमानासु यं द्विष्यात्तु मङ्गुष्ठाभ्या मवबाधेतेदु महु ममु मवबाध ऽइति तुदेन मेतेन वज्रेणावबाधते ॥ ७ ॥

पञ्चदश वा ऽअर्द्धमासस्य रात्रयः। अर्द्धमासशो वै संवत्सरो भुवन्नेति तद्रात्रीराप्नोति ॥ ८ ॥

पञ्चदशाना मु वै गायत्रीणाम्। त्रीणि च शतानि

---

* 'न्वाहैका'–इति क, ग। ' 'रात्रयोऽर्द्ध'–इति क, ग।

षष्टिश्चाक्षराणि त्रीणि च वै शतानि षष्टिश्च संवत्सर स्याहानि तदुहान्याप्नोति तदेव संवत्सरꣳ माप्नोति ॥ ९ ॥

सप्तदश सामिधेनीः*। इष्ट्या† ऽअनुब्रूयादुपाꣳशु तस्यै देवतायै यजति यस्या ऽइष्टिं निर्व्वपति द्वादश वै मासाः संवत्सरस्य पुच्चर्त्तव ऽएष ऽएव प्रजापतिः सप्तदशः सुर्व्वं व्वै प्रजापतिस्तत्सुर्व्वेणैव तं काम मनपराधꣳ राप्नोति यस्मै कामायेष्टिं निर्व्वपत्युपाꣳशु देवतां यजत्यनिरुक्तं वा ऽउपाꣳशु सुर्व्वं वा ऽअनिरुक्तं तत्सुर्व्वेणैव तं काम मनपराधꣳ राप्नोति यस्मै कामायेष्टिं निर्व्वपत्येष इष्टेरुपचारः‡ ॥ १० ॥

एकविꣳशतिꣳ सामिधेनीः। अपि§ दर्शपूर्णमासयोरनुब्रूयादित्याहुर्द्वादश वै मासाः संवत्सरस्य पुच्चर्त्तवस्त्रयो लोकास्त्रिꣳशतिरेष ऽएवैकविꣳशो यु ऽएष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गति मेतां प्रतिष्ठां गच्छति तस्मादेकविꣳशति मनुब्रूयात् ॥ ११ ॥

ता वैता गतꣳरेवानुब्रूयाद्। यु इच्छेन्न श्रेयान्त्स्यान्न पापीयानिति याडृशाय वैव सु ते॥ऽन्वाहुस्ता-

---

* 'नीः'–इति ख। † 'नी। रिष्ट्या'–इति क, ग।

‡ 'रः'–इति च। § 'नी। रपि'–इति क, ग।

॥ 'वैव सते'–इति, 'वैव सते'–इति, 'वैव स ते'–इति च पाठाः च।

हुङ् वा ह्रैव भवति पापीयान्वा युस्यैवं व्विदुष ऽएता ऽअन्वाहुः सो ऽएषा मीमाꣳसैव नु त्वेवैता ऽअनूच्यन्ते ॥ १२ ॥

त्रिरेव प्रथमां त्रिरुत्तमा मनवानन्ननुब्रूयात् । त्रयो वा ऽइमे लोकास्तदिमानेवैतल्लोकान्सन्तनोतीमांल्लोकान्स्पृणुते त्रय ऽइमे पुरुषे प्राणा ऽएतु मेवास्मिन्नेतत्सन्तत मव्यवच्छिन्नं दधात्येतदनुवचनम्* ॥ १३ ॥

स यावदस्य व्वशः स्याद् । एव मेवानुविवक्षेत्तस्यैतस्य परिचक्षीत साम्युवान्यादुनवानन्ननुविवक्षंस्तत्कर्म व्विदृह्येत सा परिचक्षा ॥ १४ ॥

स युद्येतन्नोदाशꣳसेत । अप्युकैका मेवानवानन्ननुब्रूयात्तदेकैकयैवेमांल्लोकान्सन्तनोत्येकैकयेमांल्लोकान्स्पृणुतेऽथ युत् प्राणं दुधाति गायत्री वै प्राणः स युत् कृत्स्नां गायत्री मन्वाह तत् कृत्स्नं प्राणं दधाति तस्मादेकैका मेवानवानन्ननुब्रूयात् ॥ १५ ॥

ता वै सन्तता अव्यवच्छिन्ना ऽअन्वाह । संवत्सरस्यैवैतदहोरात्राणि सन्तनोति तानीमानि संवत्सरस्याहोरात्राणि सन्ततान्यव्यवच्छिन्नानि परिस्रवन्ते द्विषत ऽउ चैवैतद् भ्रातृव्याय नोपस्थानं करोत्युपस्थानꣳ

---

* 'वुचनꣳ'–इति ग, च । † 'से । ताप्ये'–इति क, ग ।

ह कुर्याद्यदुसन्तता अनुब्रूयात् तस्माद्वै सुन्तता अव्यवच्छिन्ना अन्वाह ॥ १६ ॥ २ ॥

॥ इति तृतीयप्रपाठके द्वितीयं ब्राह्मणम् [३. ५.] ॥

अथेध्माधानाग्नि[1]समिन्धनहेतुभूताः सामिधेनीर्विधास्यन् तासां नाम निर्वक्ति— "इन्धे ह वा इति। पञ्चदशसमिदात्मकेनानेन 'इध्मेन' अध्वर्युः 'अग्निम्' 'इन्धे ह वै' सन्दीपयति खलु। 'एतत्' -इति क्रियाविशेषणम्। 'तस्मात्' इन्धनसाधनत्वात्, तस्य 'इध्मः'— इति 'नाम' सम्पन्नम्। 'होता' च 'सामिधेनीभिः' "प्र वो वाजा"— इत्यादिभिर्ऋग्भिः[2] अग्निं 'समिन्धे'; अतः समिन्धनसाधनत्वात् तासामपि 'सामिन्धेन्यः'-इति 'नाम' निष्पन्नम्। एवं नामनिर्वचनव्याजेनेध्मेन सामिधेनीभिश्च अग्निसमिन्धनं कार्यमिति प्रतिपादितं भवति ॥ १ ॥

अथ सामिधेनीर्वाचयितुरध्वर्योः सम्प्रेषमन्त्रोच्चारणं विधत्ते— "स आहेति। इध्मेन सन्दीप्यमानाय 'अग्नये' तत्समिन्धनार्था या ऋचो वक्तव्याः, ताः सामिधेनीः 'अनुब्रूहि' इति[3] सम्प्रेषार्थः[4]। तमिमं मर्थं श्रुतिः स्वयं दर्शयति— "अग्नये ह्येतदिति ॥ २ ॥

१— "अथेध्मेनाग्नि"—इति ८।

२— ३ ब्रा० ७—९। तै० ब्रा० ३. ५. २. १—१२ (तै० सं० २. ५. ७. २.)।

३— तै० सं० ६. २. ५. ६। पुनस्तत्रैव ७. १। एवम् ऐ० ब्रा० १. ३. ५।

४— प्रैषपरिचयस्तु ऐ० ब्रा० ३. १. ६ द्रष्टव्यः।

एकीयं मत मुपन्यस्य निरस्यति— "तदु हैक इति। एकेषां मते "होतः! अनुब्रूहि"—'इति' कर्त्तुरुपादानं विशेषः ॥

ननु युक्त मेवैतत् कि मिति "न ब्रुयादिति" निषिध्यते ? तत्राह— "अहोतेति। प्रवरणात्[१] पूर्वं सामिधेनीरनुब्रुवाणस्य होढत्वं नास्ति; यदा खल्वेनं प्रवृणीते— "अग्निर्दैवो दैव्यो होता"-इति[२], 'अथ' अनन्तर मेव अमौ 'होता' भवति; अतः सामिधेन्यनुवचन-समये होढत्वाभावात् "होतरनुब्रूहि"—'इति' अपार्थकम् ॥ २ ॥

देवताविशेषविशिष्टानां सामिधेनीना मनुवचनं विधत्ते— "आग्नेयीरिति। अग्निदेवत्या ऋचः[३] सामिधेनीरनुब्रूयादित्यर्थः। तदेतदग्निदेवत्यत्वं प्रशंसति— "स्वयैवैन मिति। विहित मनुवचन मनूद्य छन्दोविशेषं विधाय प्रशंसति— "गायत्रीरिति। अग्नेर्गाय-त्रश्च प्रजापतिमुखादुत्पन्नत्वादग्निसम्बन्धिच्छन्दो 'गायत्रम्'। प्रजा-पतिमुखात् सहोत्पत्तिश्च तैत्तिरीयकैराम्नाता— "त मग्निर्देवताभ्व-सृज्यत गायत्रच्छन्दः"-इति[४]। प्रकारान्तरेण प्रशंसति— "वीर्यं गायत्रीति। त्रिष्टुब्जगतीभ्यां कर्त्तुं मशक्यस्य सोमाहरणलक्षणस्य वीर्यस्य करणाद्[५] 'गायत्री' वीर्यात्मिका। तथा सा 'गायत्री'

१— 'प्रवरात्'—इति जादिषु, ढे च।

२— सोऽयं मन्त्र इहैवोपरिष्टात् (४ प्र० २ ब्रा० ५ क०) द्रष्टव्यः।

३— "तस्य देवता (४. २. २४.)"—इत्यधिकारे "अग्नेर्ढक् (४. २. ३३.)"—इति ढकि रूप माग्नेयीत्युच्यते अग्निदेवत्या इति।

४— तै० सं० ७. १. १. ६। ५— ऐ० ब्रा० ३. १. १ द्रष्टव्यम्।

ब्रह्मरूपा। ब्रह्मशब्देन ब्राह्मणजातिर्विवक्षिता। तस्यास्च गायत्री-च्छन्दसश्च प्रजापतिमुखादुत्पत्तिसाधारण्यात्तादाक्यम्[1] ॥ ४ ॥

सामिधेनीनां सङ्ख्याविशेषं विधाय प्रशंसति—"एकादशेति। "उभाभ्यां वीर्याभ्या मिति। छन्दोद्वारा ये निर्दिष्टे ब्रह्मक्षत्रे, तयोर्यद् ब्राह्मं चाचं चोभे वीर्ये, ताभ्या मित्यर्थः ॥ ५ ॥

प्रथमोत्तमयोस्त्रिरुच्चारणं विधत्ते—"स वै त्रिरिति। विहितं त्रिरुच्चारणं स्तौति—"त्रिवृत्प्रायणा हि"-इत्यादि। "त्रिषत्या[2] हि देवाः"—इति[3] श्रुतेः, तदीया यज्ञाः प्रारम्भपरिसमाप्त्योस्त्रिरा-वृत्तियुक्ताः। अत एव ज्योतिष्टोमस्याज्यप्रउगादिशस्त्रेषु प्रथमोत्त-मयोः त्रिरावृत्तिर्दृश्यते। प्रारम्भपरिसमाप्त्योस्त्रिरावर्त्तनस्य[4] यज्ञ-लिङ्गत्वात् अत्रापि प्रथमोत्तमयोस्त्रिरावृत्तिः कार्येत्यभिप्रायः ॥ ६ ॥

"ताः पञ्चदशेति। "पञ्चदशो वै वज्र इति। पञ्चदशस्तोमस्ये-न्द्रस्य च सह प्रजापतिमुखसकाशादुत्पत्तेरिन्द्रसम्बन्धात्[5] वज्रोऽपि पञ्चदशस्तोमात्मकः। "सामिधेनीरभीति। "अभिरभागे"-इति[6] लक्षणे अभेः कर्मप्रवचनीयत्वात् "कर्मप्रवचनीययुक्ते"-इति[7] द्वितीया। शिष्टं सुगमम् ॥

अङ्गुष्ठाभ्या मवबाधेतेति। द्वेष्यं मनसा स्मृत्वा "इद मह मिति[8]

१— ऐ० ब्रा० ५. ५. ७। २— 'त्रिवृता'-इति आदिषु, ढे च।
३— तै० सं० ६. ३. १०. ३। तै० ब्रा० ३. २. ३. ८।
४— 'अत एव'-इत्यादिः 'वर्त्तनस्य'-इत्यन्तो ग्रन्थः आदिषु, ढे च नास्ति।
५— ऐ० ब्रा० ५. ५. ७। ६—पा० सू० १. ४. ९१।
७— पा० सू० २. ३. ८। ८— तै० सं० १. ६. ६. ३।

मन्त्रेण पादाङ्गुष्ठाभ्यां भूमौ पीड़येदित्यर्थः। 'अमुम्'-इत्यदःशब्दस्य स्थाने द्वितीयया तच्छाम निर्देष्टव्यम् ॥ ७ ॥

पञ्चदशसङ्ख्यां प्रकारान्तरेण प्रशंसति—"पञ्चदश वा इति। "अर्द्धमासशो वा इत्यादि। एकैकेनैवार्द्धमासेन हि 'संवत्सरः' 'भवन्' वर्द्धमानः 'एति' आगच्छति। एव मर्द्धमासरात्रिद्वारा संवत्सरसम्बन्धिन्यो या रात्रयः, ताः सर्वा आप्नोतीत्यर्थः ॥ ८ ॥

सामिधेनीना मक्षरसङ्ख्योपजीवनेन संवत्सरसम्बन्धिना सङ्ख्यां प्राप्तिं दर्शयति—"पञ्चदशाना मिति। एवं सामिधेनीभिः संवत्सरसम्बन्धिना सङ्घोरात्राणां प्राप्तत्वात् तत्समुदायात्मकः इत्थं एव संवत्सरः प्राप्तो भवतीत्याह—"तदेवेति ॥ ९ ॥

साप्तदश्यं विधत्ते—"सप्तदश सामिधेनीरिळ्या अनुब्रूयादिति। उपरिष्टाद्[१] "दर्शपूर्णमासयोः"-इति विशेषणात्, वाक्यशेषे च "तं काम मनपराधं राध्नोति"-इति कामप्राप्तिश्रवणात्[२] तद्विकृतिभूता काम्येष्टिरत्र 'इष्टि'-शब्देन विवक्षिता। अत एव आपस्तम्बो दर्श-पूर्णमासव्यतिरिक्तेष्टिपशुबन्धानां सामिधेनी-साप्तदश्यं सूचयामास—"पञ्चदश सामिधेन्यो दर्शपूर्णमासयोः, सप्तदशेष्टिपशुबन्धानाम्"-इति[३]॥ अथ तासां काम्येष्टीनां प्रधानयागस्योपांशुत्वं विधत्ते—"उपांश्विति ॥ सामिधेनी-साप्तदश्यस्य कामप्राप्तिसाधनता मुप-

---

१ — इहैवैकादशकण्डिकायाम्। २— २४६पृ० ६पं० द्रष्टव्यम्।

३— य० प० सू० ११३, ११४। श्रौ० सू० २. १९. २; ५. २२. २; ६. २६. ६; ८. २. १३ सूत्राणि चैवमर्थकानि। "सामिधेनी-विकृतौ काण्डानि विवर्द्धन्ते, प्रतिकृतिसमानासु प्रकृतिवत्"-इति च तत्रैव।

पादयति— "द्वादश वा इत्यादिना। हेमन्तशिशिरयोरेकीकरणेन[1] 'संवत्सरस्य पञ्चर्त्तवः'। एवं मासर्त्वात्मको यः संवत्सरः 'एष एव प्रजापतिः'; कथ मनयोरैक्य मित्यत आह— "सप्तदश इति। यतो मासर्तुरूपेण सप्तदशावयवसमुदायात्मकः संवत्सरः, प्रजापतिश्च "आश्रावय"-इत्यादि[2]-सप्तदशाक्षरसमुदायात्मकः; अतस्तयोः सप्तदशावयवोपेतत्वसाम्यात्तादात्म्यम्। अस्त्वेवं किं तत इत्याह— "सर्वं वा इति। 'अनपराधम्' अविकलम्।

एवं सप्तदश्यं प्रशस्य विहितं यागस्योपांशुत्व मण्यनूद्य प्रशंसन्ति— "उपांशविति। उपांशूच्चारणस्य पार्श्वस्थाना मर्थविशेषाप्रत्यायकत्वाद् अनिरुक्तत्वम्। अनिरुक्तञ्च विशेषनिरुक्तिविरहात् सर्वात्मकम्। तेन च सर्वात्मकेनानिरुक्तेनोपांशुत्वेन कात्स्न्र्येन कामप्राप्तिर्भवतीत्यर्थः॥

प्रतिपादितस्यार्थस्य सर्वेष्टिसाधारण्य मभिप्रेत्याह— "एष इति। यत् सामिधेनी-सप्तदश्य मुपांशुयजनञ्च 'एषः' सर्वस्याः 'दृष्टेः' धर्म इत्यर्थः॥ १०॥

दर्शपूर्णमासयोरेव पक्षान्तरं विधाय प्रशंसति— "एकविंशतिमिति।

"सैषा गतिरित्यादि। मासाद्यपेक्षया 'यः' 'एकविंशः' सूर्यः, 'एषः' एव 'सा' प्रसिद्धा 'गतिः'; यागदानादिभिर्धर्मैर्यद्गन्तव्यतया

१— "हेमन्तशिशिरयोः समासेन"—इति च ऐ० ब्रा० १. १. १।

२— "आश्रावयेति चतुरक्षरम्, अस्तुश्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः; एष वै सप्तदशः प्रजापतिः"—इति तै० सं० १. ५. ११।

प्रतिपाद्यते, तदात्मक इत्यर्थः । तथा 'एषा' एव 'प्रतिष्ठा'; सर्वस्यापि लोकस्याश्रयभूत इत्यर्थः । तथा च सामिधेनीना मेकविंशतिसङ्ख्यया गतिप्रतिष्ठारूपं सूर्य मेव प्राप्नोतीत्यर्थः[१] ॥ ११ ॥

इमं पक्ष मधिकारिविशेषे नियच्छति— "ता हैता इति । गता प्राप्ता यस्य श्रोः, तस्येव यजमानस्य एकविंशतिसामिधेनीः 'अनुब्रूयात्', नान्यस्येत्यर्थः ॥

गतश्रौव्यतिरिक्तस्यापीमं पक्षं कर्त्तव्यत्वेनाशङ्क्य निरस्यति— "य इच्छेदिति । 'यः' यजमानः श्रेष्ठ्यं नैकृष्ट्यञ्च न कामयेत, 'सः' यजमानः 'तादृङ् वा भवति'; 'यादृगाय' यथोपलब्धप्रकारेण नियतेन[२] 'ते' होतारः सामिधेनीः 'अन्वाहुः', तत्प्रकारविशिष्ट एव भवतीत्यर्थः । तादृक्-शब्देन सामान्येन प्रतिपादितं विशिनष्टि— "पापीयान्वेति । 'यस्य' खलु 'एवम्' अनियत मनुवचनप्रकारं 'विदुषः' यजमानस्य 'एताः' एकविंशतिसामिधेनीः 'अन्वाहुः', 'सः' 'पापीयान् वा' श्रेयान् वा भवतीत्यर्थः । "य इच्छेन्न श्रेयानित्यादिना योऽर्थः प्रतिपादितः, सा 'एषा' 'मीमांसैव' विचार एव केवलं, न तु तथानुवचनं कार्य मित्यर्थः ॥ १२ ॥

कथं तर्ह्यनुवक्तव्य मित्यत आह— "त्रिरेव प्रथमा मिति । 'एव'-शब्दो भिन्नक्रमः । प्रथमोत्तमयोः 'त्रिः' अनुवचनं कुर्वन् 'अनवान मेव' अनुच्छसन्नेव 'अनुब्रूयात्' ।

१— 'मासापेक्षया य एकविंशः सूर्यः, त मेव गतिप्रतिष्ठारूपं सामिधेनीनां मेकविंशतिसङ्ख्यया प्राप्नोति'—इति ठ ।

२— 'नियमेन'—इति ठ, ड ।

तन्तिसृणा मृचां सन्तानं लोकत्रयसन्तत्यै भवतीति स्तौति— "त्रयो वा इति। 'सन्तनोति' सन्दधाति। ततश्च 'इमान् लोकान्' परस्परसंयुक्तान् 'स्तृणुते' प्रीणयति, बलयति वा। "स्तृ प्रीति-बलयोः"-इति[1] धातुः। तिसृणां सन्ततानुवचनं प्रकारान्तरेण स्तौति— "त्रय इमे"-इति। प्राणापानव्यानात्मकाः 'त्रयः' प्राणभेदाः, प्राणापानव्यानलक्षणवृत्तित्रयविशिष्टं प्राण मेव अनवान मनुब्रुवन् 'सन्ततं' परस्परसम्बद्धम्, 'अव्यवच्छिन्नं' विच्छेदरहितं 'दधाति'। एव मेवानुवचनं कर्त्तव्य मित्यभिप्रेत्य निगमयति— "एत-दिति ॥ १३ ॥

तिस्र ऋचः सन्तत मनुवक्तुं यो न शक्नोति, तेन कथ मनुवक्तव्य मिति, तदाह— "स यावदिति। 'अस्य' होतुः 'यावत्' अनुवक्तुं 'स वशः[2] स्यात्', सा अनुवचनशक्तिः यावती, तावदि-त्यर्थः। 'एव मेव' 'अनुविवचेत्' अनुवक्तु मिच्छेत्। शक्त्यनु-रूप मेवानुच्छसनम्; शक्त्यभावे हि ऋङ्मध्येऽवसाने चोच्छ्वासे नास्ति दोष इत्यभिप्रायः ॥

तदेतत्पक्षं निरस्यति— "तस्येति। 'तस्यैतस्य' पक्षस्य 'परिचक्षा' निन्दा विद्यते। ता मेव दर्शयति— "उत सामर्थ्यवान्यादिति। 'अनवानम्' अनुच्छसन्, 'अनुविवचन्' अनुवक्तु मिच्छन्, होता 'उत' अपि 'यामि' ऋङ्मध्ये 'अवान्यात्' उच्छ्वासङ्कुर्यात्; तदा 'तत्कर्म' 'विस्रंसेत' विश्लिष्येत, शिथिलं भवतीत्यर्थः। "सा परिचक्षेति। यथाशक्त्यनुवचनपक्षे एषैव निन्देत्यर्थः ॥ १४ ॥

१— "स्तृ प्रीतिपालनयोः"—इति स्वा० प० १३। २—'खवशः'—इति ड।

तिस्र ऋचः सन्तत मनुवक्तु मग्नक्रस्य कस्तर्ह्युपाय इति तं दर्शयति— "स यदीति । 'एतद्' अनन्तरोक्तं यथाग्नक्रमनुवचनं निन्द्यायुक्तत्वात् 'सः' होता 'न' कामयेत, तदा 'एकैकाम्' ऋचं मनुच्छसमनुब्रूयात् ।

अस्मिन्नपि पक्षे पूर्वोक्तलोकचय-प्राणचय-सन्तान मुपपादयति— "तदेकैकयेति । त्रिपदा ह्येताः सामिधेन्यः ; अत एकैकस्या ऋचि पादत्रयस्य सन्ततत्वात् 'एकैकयैव' ऋचा त्रीन् 'लोकान्' सन्ततनोति। "गायत्री वै प्राण इति । गायत्र्यास्त्रिपात्त्वात्, प्राणस्य च प्राणापानव्यानलक्षणवृत्तित्रयात्मकत्वात्, त्रित्वसङ्ख्यायोगसाम्यात् तादात्म्यम्। तथा च कृत्स्नगायत्र्याः सन्ततानुवचनात्[1] कृत्स्नप्राणसन्तान मपि सिद्धतीत्यर्थः ॥ १५ ॥

एव मनुवचनस्यानवानलक्षणं धर्मविशेषं[2] विधाय सान्तत्यादिकं विधत्ते— "ता वै सन्तता इति । 'ताः' एताः सामिधेनीः 'सन्ततः' परस्परसम्बद्धाः ; अत एव 'अव्यच्छिन्नाः' विच्छेदरहिताः 'अन्वाह'।

"संवत्सरस्येत्यादि । सामिधेनीनां संवत्सरसम्बन्ध्यहोरात्ररूपता प्राक् प्रतिपादिता ; अतस्तत्सान्तत्येन 'अहोरात्राणि' अप्येवं 'सन्तानि' परस्परसम्बद्धानि कृतवान् भवतीत्यर्थः। तदेतद् दृष्टानुसारेण द्रढयति— "तानीमानीति। यस्मादेवं सामिधेनीसान्तत्येन संवत्सरसम्बधीनि 'अहोरात्राणि सन्ततानि', तस्मादेवेदानी मपि 'तानि सन्ततानि अव्यवच्छिन्नानि' पर्यावर्त्तन्त इत्यर्थः ।

१— 'सन्ततानुवचनेन'—इति ङ । २— 'धर्मं'—इति ङ ।

सन्तानुवचनस्य प्रयोजनान्तर माह— "द्विषत इति। 'द्विषते' द्वेषणं कुर्वते शत्रवे 'उपस्थानं न करोति'; सन्तानुवचनेन छिद्र-रहितत्वात्। छिद्रान्वेषणशीलाय राक्षसादये प्रवेशोपायभूतं द्वारं न प्रयच्छतीत्यर्थः ॥

विपक्षे बाध माह— "उपस्थानं हेति। उपतिष्ठते प्राप्नोति अनेनेति 'उपस्थानं' प्राप्तिसाधनद्वारम् ॥ १६ ॥ २ [३.५.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे तृतीयाध्याये पञ्चमं ब्राह्मणम्[१] ॥

१— इह हि ब्राह्मणे सामिधेनीसङ्ख्यादिकमात्रं विहितम्। वस्तुतः संहिताब्राह्मणयोः सामिधेन्य ऋच एकादशैवाम्नाताः। तासु प्रथमाया अन्तिमायाश्च त्रिस्त्रिः पाठेन पञ्चदशसङ्ख्या पूरणीया भवति (ऐ० ब्रा० १.५.२.)। सप्तदशसङ्ख्यायाः पूरणीयत्वे तु एषणाजेत्र्याद्यपरर्गद्वयस्य तासु प्रक्षेपोऽपि विधीयते (ऐ० ब्रा० १.१.१. टीप्प०) एकविंशसङ्ख्यायाः पूरणीयत्वे यस्या मप्यृचां प्रक्षेपणीयता विहिता (ऐ०ब्रा० ४.५.५.)। ताः प्रक्षेपणीयर्च एव धाय्या उच्यन्ते (ऐ० ब्रा० ३.२.७.)। तत्र धाय्ययोर्धाय्यानां वा प्रक्षेपः खलु समिद्यमान-समिद्यवत्योर्मध्ये एव भवति। ते च ऋचौ दशम्येकादश्यौ। मी० द० ३अ० ६पा० ६,१० सूत्रयोः, द्वितीयतृतीयाधिकरणयोरुक्तत्वेवाधिकरणमालायाश्चैतद्विचारः सम्यगुक्तो द्रष्टव्यः। सामिधेनीप्रयोगारम्भस्त्वेवम्— "अध्वर्युर्होतुरासनं दर्भास्तृतं गार्हपत्याहवनीययोरन्तरालेऽग्नस्य मध्यभागे वेदेः पश्चात् स्थापयित्वा 'एहि होतः'–इति होतुरामन्त्रणं करोति। ततो होतरि आचम्यागते सति अध्वर्युरिध्मादेकां समिध मादाय होतारं प्रति 'अग्नये समिध्यमानायानुब्रूहि'–इति ब्रवीति। होता च 'ब्रह्मन् सामिधेनीरनुवक्ष्यामि'–इति ब्रह्माणं पृच्छति। ब्रह्मा च 'प्रजापतयेऽनुब्रूहि, धेहि'–इत्यन्त मुपांशु पठित्वा

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ १ ॥

ब्रह्माण्डं गोमद्दस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन्[1] पञ्चमेरीं[2] स्त्रिदशतरुलताधेनुसौवर्णभूमीः।
रत्नोस्रां रुक्मवाजिद्विपमहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥

धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो[3] राजतं राजपूज्यः।
आज्योत्थं प्राज्यजन्मा[4] लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पाचमात्सिङ्गणार्यः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये प्रथमकाण्डे तृतीयाध्यायः समाप्तः ॥ ३ ॥

'ओ३ मनुब्रूहि'–इति होतारं प्रसौति। ततो होता 'कं प्रपद्ये'–इत्यादि जपति। अस्यान्ते यजमानः रुक्मं गृहीत्वा 'सन्तन्वन्निव मे ऽनुब्रूहि'–इति होतारं प्रेष्यति"–इति पद्धतिः। अस्मिन् कर्मणि आदित आरभ्य स्विष्टकृतः प्राक् सर्वं मन्त्रजातं प्रथमस्थानेन प्रयोज्यम्; स्विष्टकृत आरभ्येडामार्जनान्तं मध्यमस्वरेण, ततः प्रेषं समाप्तिपर्यन्त मुत्तमेन स्वरेणेति तन्त्रटीकायाम्।

१— 'पद्माब्धीन्'–इति ठ। २— 'सप्तसौरीं'–इति ठ।
३— 'मजडं'–इति ठ। ४— 'प्राज्यबुद्धिर्'–इति ठ।
५— युग्मकञ्चैतत् ज-ञ-ठ-पुस्तकेषु; १८१ पृष्ठेऽपि मुद्रितं द्रष्टव्यम्।

[अथ चतुर्थाध्याये प्रथमं ब्राह्मणम्]

हिङ्कृत्यान्वाहु। नासामा युज्ञोऽस्तीति वा ऽआहुर्न वा ऽअहिङ्कृत्य सामा गीयते स युद्धिङ्करोति तुद्धिङ्कारस्य रूपं क्रियते प्रणवेनैव सामो रूप मुपगच्छत्योऽम् ओ३* मित्येतेनो हास्यैष सर्व एव सुसामा यज्ञो भवति ॥ १ ॥

युद्वेव हिङ्करोति। प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तुस्मादपिगृह्य नासिके न हिङ्कर्तुः शक्नोति व्वाचा वा ऽऋचं मन्वाह व्वाक् च वै प्राणश्च मिथुनं तुदेतत्पुरस्तान्मिथुनं प्रजननं क्रियते सामिधेनीनां तुस्माद्वै हिङ्कृत्यान्वाह ॥ २ ॥

स वा ऽउपाःशु हिङ्करोति। अथ युदुच्चैर्हिङ्कुर्यादन्यतरुदेवु कुर्याद्वाच मेव तुस्मादुपाःशु हिङ्करोति ॥ ३ ॥

स वा ऽएति च प्रेति चान्वाह। गायत्री मेवैतदर्वाचीञ्च पुराचीञ्च युनक्ति पुराचुह देवेभ्यो यज्ञं व्वहत्यर्वाची मनुष्यानवति तुस्माद्वा ऽएति च प्रेति चान्वाह ॥ ४ ॥

---

* 'त्योऽ ओऽ'–इति क, 'त्यौऽ ओऽ'–इति ख, ग, छ।

युद्वेवेति च प्रेति चान्वाह । प्रेति वै प्राण एत्युदानः प्राणोदानावेवैतद्दधाति तस्माद्वा एति च प्रेति चान्वाह ॥ ५ ॥

युद्वेवेति च प्रेति चान्वाह । प्रेति वै रेतः सिच्युत एति प्रजायते प्रेति पशवो व्वितिष्ठन्त एति समावर्त्तन्ते सर्वं वा एद मेति च प्रेति च तस्माद्वा एति च प्रेति चान्वाह ॥ ६ ॥

सोऽन्वाह । प्र वो व्वाजा अभिद्यव इति तन्नु प्रेति भवत्यग्न आ याहि व्वीतय इति तद्वेति भवति ॥ ७ ॥

तदु हैक आहुः । उभयं* वा एतत्प्रेति सम्पद्यत इति तदु तदातिविद्वान्य मिव प्र वो व्वाजा अभिद्यव इति तन्नु प्रेत्यग्न आ याहि व्वीतय इति तद्वेति ॥ ८ ॥

सोऽन्वाह । प्र वो व्वाजा अभिद्यव इति तन्नु प्रेति भवति व्वाजा इत्यन्नं वै व्वाजा अन्न मेवैतदभ्यनूक्त मभिद्यव इत्यर्द्धमासा वा आभिद्यवोऽर्द्धमासानेवैतदभ्यनूक्तꣳ हविष्मन्त इति पशवो वै हविष्मन्तः पशूनेवैतदभ्यनूक्तम् ॥ ९ ॥

घृताच्येति । व्विदेघो* ह माधवो† अग्निं वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः पुरोहित

---

* 'ऊ । उभयं'–इति क, ग । † 'माधवो'–इति छ, सायणसम्मतश्च ।

आस तुस्मै ह स्मामन्त्र्यमाणो न प्रतिशृणोति नेन्मेऽग्निर्वैश्वानरो मुखान्निष्युद्याता ऽइति ॥ १० ॥

तु मृग्भिर्हुयितुं दध्रे। व्वीतिहोत्रं त्वा कवे द्युमन्तꣳ सुमिधीमहि अग्ने बृहन्त मध्वरे व्विदेघेति ॥ ११ ॥

सु न प्रतिशुश्राव। उदग्ने शुचयस्तव शुक्रा भ्राजन्त ऽईरते तुव ज्योतीꣳष्यर्चयो व्विदेघाꣳ ऽइति ॥ १२ ॥

सु ह नैव प्रतिशुश्राव। तुन्वा घृतस्नवीमह ऽइत्येवाभिव्याहरदथास्य घृतकौत्तिर्वेवाग्निर्व्वैश्वानरो मुखादुज्जज्वाल तं नु शशाक धारयितुꣳ सोऽस्य मुखान्निष्पेदे* सु इमां पृथिवीं प्रापादः ॥ १३ ॥

तर्हि व्विदेघो माथव आस। सरस्वत्याꣳ स तत एव प्राङ् दुहन्नभीयायेमां पृथिवीं तं गोतमश्च राहूगणो व्विदेघश्च माथवः पश्चाद्दुहन्त मन्वीयतुः सु इमाः सर्वा नदीरुतिददाह सदानीरेत्युत्तराद् गिरेर्निर्द्धावति ताꣳ-हैव नातिददाह ताꣳ ह स्म तां† पुरा ब्राह्मणा नु तरन्त्यनतिदग्धामग्निना व्वैश्वानरेणेति ॥ १४ ॥

तत एतर्हि। प्राचीनं बहवो ब्राह्मणास्तद्वा क्षेचतर मिवास स्रावितर मिवास्वदित मग्निना व्वैश्वानरेणेति ॥ १५ ॥

---

* 'न्निष्पेदे'—इति क, घ—M। † 'स्मैतां'—इति घ-मुद्रौ।

तदु हैतर्हि। क्षेचतर मिव ब्राह्मणा उ हि नून मेनद्यन्नैरुसिष्वदन्त्सापि जघन्ये नैदाघे सुमिवैवु कोपयति तावच्छीतानतिदग्धा ह्यग्निना व्वैश्वानरेण॥ १६ ॥

सु होवाच। व्विदेघो माथवः* क्वाहं भवानीत्युत एवु ते प्राचीनं भुवन मिति होवाच सैषाप्येतर्हि कोसलविदेहानां मर्य्यादा ते हि माथवाः† ॥ १७ ॥

अथ होवाच। गोतमो राहूगणः कथन्नु म ऽआमन्त्र्यमाणो न प्रत्यश्रौषीरिति सु होवाचाग्निर्मे व्वैश्वानरो मुखे ऽभूत्स नेन्मे मुखान्निष्पद्यातै तस्मात्ते न प्रत्यश्रौष मिति ॥ १८ ॥

तदु कथु मभूदिति। युचैव त्वं घृतस्नवीमह ऽइत्यभिव्याहार्षीस्तदेवु मे घृतकौर्त्तावग्निर्व्वैश्वानरो मुखादुदज्वालीत् तं नाशकं धारयितुः सु मे मुखान्निरपादीति ॥ १९ ॥

स युत् सामिधेनीषु घृतवत्। सामिधेनु मेव तत्सु मेवैनं तेनेन्धे व्वीर्य मेवास्मिन् दधाति ॥ २० ॥

तदु घृताच्युति। देवाञ्जिगाति‡ सुम्नयुरिति युजमानो वै सुम्नयुः स हि देवाञ्जिगीषति§ स हि देवाञ्॥

---

* 'विदेघो माधवः'–इति क्व। † 'माधवाः'–इति क्व, सा०–स०।
‡, § 'देवान् जि–'इति क्व। ॥ 'देवान्'–इति क्व।

जिघाꣳसति* तस्मादाह देवाञ्† जिगाति‡ सुम्नयुरिति सैषाग्नेयी सत्यनिरुक्ता सुर्वं वा ऽअनिरुक्तꣳ सुर्वेणैवैतत्प्रतिपद्यते ॥ २१ ॥

अग्न ऽआ याहि व्वीतय इति। तद्देति भवति व्वीतय ऽइति सुमन्तिक मिव ह वा ऽइमेऽग्रे लोका आसुरित्युन्मृश्या हैव द्यौरास ॥ २२ ॥

ते देवा ऽअकामयन्त। कथन्नु न इमे लोका व्वितराꣳ स्युः कथन्न इदं व्वरीय इव स्यादिति तानेतैरेव चिभिरक्षरैर्व्यनयन्व्वीतय ऽइति त ऽइमे व्विदूरं लोकास्ततो देवेभ्यो व्वरीयो ऽभवद्वरीयो ह वा ऽअस्मै भवति युस्यैवं व्विदुष एता मन्वाहुर्व्वीतय ऽइति ॥ २३ ॥

गृणानो हव्यदातय ऽइति। युजमानो वै हव्यदातिर्व्वृणानो§ युजमानायेत्येवैतदाह नि होता सत्सि बर्हिषीत्यग्निर्वै होतायं लोको बर्हिरस्मिन्नेवैतल्लोकेऽग्निं दधाति सोऽयु मस्मिंल्लोके॥ऽग्निर्हितः सैषेमु मेवु लोकु मभ्यनूक्ते मुमेवैतया लोकं जयति युस्यैवं व्विदुष एता मन्वाहुः ॥ २४ ॥

---

* 'जिगाꣳसति'–इति क, ख, ग, च-M। † 'देवान्'–इति छ।

‡ 'जिगाति'–इति ग। § 'गृणानो'–इति च।

॥ 'मस्मिंल्लोके'–इति क, 'मस्मिन् लोके'–इति छ।

तुन्वा समिङ्गिरङ्गिर इति। समिङ्गिर्ह्येत मङ्गिरस ऐन्धताङ्गिर इत्यङ्गिरा उ ह्यग्निर्घृतेन व्यर्द्धयामसीति तत्सामिधेनं पदꣳ सु मेवैनं तेनेन्धे व्वीर्य मेवास्मिन् दधाति ॥ २५ ॥*

बृहच्छोचा यविष्ठेति। बृहदु ह्येष शोचति समिद्धो यविष्ठेति युविष्ठो ह्यग्निस्तस्मादाह यविष्ठेति सैषैत मेवु लोक मभ्युनूक्तान्तरिक्षलोकु मेव तस्मादाग्नेयी सत्युनिरुक्तानिरुक्तो ह्येष लोकु एतु मेवैतया लोकं जयति युस्यैवं व्विदुष एता मन्वाहुः ॥ २६ ॥

सु नः पृथु श्रवाय्य मिति। अदो† वै पृथु युस्मिन् देवा एतच्छ्रवाय्यं युस्मिन् देवा अच्छा देव व्विवास-सीत्युच्छ देव व्विवासस्येतन्नो गमयेत्येवैतदाह ॥ २७ ॥

बृहदग्ने सुवीर्य मिति। अदो‡ वै बृहद्युस्मिन् देवा एतत्सुवीर्यं युस्मिन् देवाः सैषैत मेवु लोकु मभ्युनूक्तादिव मेवैतु मेवैतया लोकं जयति युस्यैवं व्विदुष एता मन्वाहुः ॥ २८ ॥

सोऽब्रवीत्। ईडेन्यो नमस्य इतीडेन्यो ह्येष नमस्यो ह्येष तिरस्तुमाꣳसि दर्शत इति तिरु इवु ह्येष तुमाꣳसि

---

* इतोऽनन्तर मिदं "घृतम् ३००"–इति च-पुस्तके।

†, ‡ 'मित्यदो'–इति क।

सुमिद्धो दद्दग्धे सु मग्निरिध्यते वृषेति सुꣳ हौध्यते वृषा वृषो अग्निः सुमिध्यत ऽइति सुꣳ हौध्यते ॥ २९ ॥

अश्वो नु देववाहन इति। अश्वो ह वा ऽएषु भूत्वा देवेभ्यो यज्ञं व्वहति यद्वै नेत्यृचो मिति तत्तस्मादाहाश्वो नु देववाहन इति ॥ ३० ॥

तुꣳ हविष्मन्त ईडत ऽइति*। हविष्मन्तो ह्येतं मनुष्या ईडते तस्मादाह तुꣳ हविष्मन्त ईडत ऽइति ॥ ३१ ॥

वृषणं त्वा व्वयं वृषन् वृषणः सुमिधीमहीति। सुꣳ ह्येन मिन्धतेऽग्ने दीद्यतं बृहदिति दीदयेवꣳ ह्येषु बृहत् सुमिद्धः ॥ ३२ ॥†

तं वा एतम्। वृषण्वन्तं त्रिच‡ मन्वाहाग्नेय्यो वा ऽएताः सुर्वाः सामिधेन्यो भवन्तीन्द्रो वै यज्ञस्य देवतेन्द्रो वृषैतेनो ह्यस्यैताः सेन्द्राः सामिधेन्यो भवन्ति तस्माद्वृषण्वन्तं त्रिच§ मन्वाह ॥ ३३ ॥

सोऽन्वाह। अग्निन्दूतं व्वृणीमह ऽइति देवाश्च वा ऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे तान्त्सुर्द्धमानान् गायत्र्यन्तरा तस्थौ या वै सा गायत्र्यासीदियं वै सा

---

* 'ईडत ऽइति'–इति ग। † इतोऽनन्तरमिह "अर्द्ध प्र० ६४"–इति ख।
‡, § 'त्रिच'–इति सायणीयपाठः, कात्यायनवार्त्तिकसम्मतश्च (पा० ६. १. ३४ वा० १)। वस्तुतः शतपथे कातीयश्रौते च सर्वत्रैव 'त्रिच'–इत्येव।

पृथिवीयꣳ हैव तदन्तरा तस्थौ तु ऽउभय ऽएवु व्विदुाञ्च-क्रुर्यतरान् वै न इयु मुपावर्त्स्यति ते भविष्यन्ति परेतरे भविष्यन्तीति तु ा मुभय ऽएवोपमन्त्रयाञ्चक्रिरेऽग्निरेवु देवानां दूत ऋास सहुरक्षा इत्यसुररक्षस मसुराणाꣳ साग्नि मेवानुप्रेयाय तस्मादुन्वाहाग्निं दूतं वृणीमह ऽइति स हि देवानां दूत ऋासीद्धोतारं व्विश्ववेदस मिति ॥ ३४ ॥

तदु हैकेऽन्वाहुः । होता यो व्विश्ववेदस इति नेदर मित्यात्मानं ब्रुवाणीति तदु तथा नु ब्रूयान्मानुषꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य युन्मानुषं नेद्यृद्धं यज्ञे करवाणीति तस्माद्युथैवऽर्च्चा*नूक्त मेवु† मेवानुब्रूयाद्धो-तारं व्विश्ववेदस मित्येवास्य यज्ञस्य सुक्रतु मित्येष हि यज्ञस्य सुक्रतुर्यदग्निस्तस्मादाहास्य यज्ञस्य सुक्रतु मिति सेयं देवानुपावर्त्त ततो देवा ऋभवन् परासुरा भवति ह वा ऽआत्मना परास्य सपत्ना भवन्ति यस्यैवं व्विदुष एता मन्वाहुः ॥ ३५ ॥

तां वा ऽऋष्टमी मनुब्रूयात् । गायत्री वा ऽएषा निदा-नेनाष्टाक्षरा वै गायत्री तस्मादष्टमी मनुब्रूयात् ॥ ३६ ॥

---

* 'वर्च्चा'–इति क, ख । † नैतत् पदं च-पुस्तके ।

‡ 'सुक्रतुर्य'–इति, 'सुक्रतुर्य'–इति च पाठौ च-पुस्तके ।

तद्वैके। पुरस्ताद्धाय्ये दधत्युन्नं धाय्ये मुखत इदु मन्नाद्यं दधा इति व्युदन्तस्तदु तथा न कुर्यादुनवरुद्धा ह तस्यैषा भवति यः पुरस्ताद्धाय्ये दधाति दशमी वा हि तर्ह्येकादशी वा सम्पद्यते तस्यो ह्वैवैषावरुद्धा भवति यस्यैता मष्टमी मन्वाहुस्तस्मादुपरिष्टादेव धाय्ये दध्यात् ॥ ३७ ॥

समिध्यमानो ऽध्वर इति। अध्वरो वै यज्ञः समिध्यमानो यज्ञ इत्येवैतदाहाग्निः पावक ईड्य इति पावको ह्येष ईड्यो ह्येष शोचिष्केशस्तु मीमह इति शोचन्तीव ह्येतस्य केशाः सुमिद्वस्य सुमिद्वो ऽग्न आहुतेत्युतः प्राचीनꣳ सर्व मिध्म मभ्यादध्याद्युदन्युत्स-मिधोपदङ्क्ष इव ह्येतद्धोता यद्वा ऽन्युत्समिध इध्म-स्यातिरिच्यतेऽतिरिक्तं तद्यद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ हास्य तद् भ्रातृव्य मभ्यतिरिच्यते तस्मादुतः प्राचीनꣳ सर्व मिध्म मभ्यादध्याद्युदन्युत्समिधः ॥ ३८ ॥

देवान्यक्षि स्वध्वरेति। अध्वरो वै यज्ञो देवान्यक्षि सुयज्ञियेत्येवैतदाह त्वꣳ हि हव्यवाडसीत्येष हि हव्यवाड् यदग्निस्तस्मादाह त्वꣳ हि हव्यवाडसीत्या जुहोता दुव-स्यताग्निं प्रयत्यध्वरे व्वृणीध्वꣳ हव्यवाहन मिति सम्प्रेष्यत्येवैतया जुहुत च यजत च यस्मै कामाय

समैन्धिष्ट* तत् कुरुतेत्येवैतदाहाग्निं प्रयत्यध्वर ऽइत्यध्वरो वै यज्ञोऽग्निं प्रयति यन्न ऽइत्येवैतदाह व्वृणीध्वꣳ हव्यवाहन मित्येष हि हव्यवाहनो यदग्निस्तस्मादाह व्वृणीध्वꣳ हव्यवाहन मिति ॥ ३९ ॥

तं वा ऽएतम्। अध्वरुवन्तं चिच† मन्वाह देवान् ह वै यज्ञेन युजमानान्त्सपत्ना असुरा दुधूर्षाञ्चक्रुस्ते दुधूर्षन्त एव नु शेकुर्धूर्वितुं ते पुराबभूवुस्तस्माद्यज्ञो ऽध्वरो नाम दुधूर्षन् ह वा ऽएनꣳ सपत्नः पुराभवति युस्यैवं व्विदुषोऽध्वरुवन्तं चिचु‡ मन्वाहुर्य्यावदेव सौम्येनाध्वरेणेष्ट्वा जुयति तावज्जयति ॥ ४० ॥ ३ ॥

॥ इति तृतीयप्रपाठके तृतीयं ब्राह्मणम् [४. १.] ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, त महं वन्दे विद्यातीर्थमहेश्वरम् ॥ ४ ॥

अथ तस्मिन् सामिधेन्यनुवचने धर्मविशेषं विधत्ते– "हिङ्कृत्येति। 'हिं'–इति शब्द मुच्चार्येत्यर्थः[१]। "नासामेत्यादि । सामरहितस्य

---

* 'न्धिड्ढ्वं'–इति च पाठः च-पुस्तके । † २९४ए० ‡–ऽ टीप्पन्यौ द्रष्टव्ये ।
१—" 'हूरम्'–इति स हिङ्कारः"–इति सा० छा० ब्रा० ४. ८. १ ।

अयज्ञत्वात्, हिङ्कारप्रणवयोः सामावयवत्वात्[१], सामिधेनीषु तत्करणेन सामिधेनीयुक्तः सर्वोऽपि सामवान् यज्ञः सम्पद्यत इत्यर्थः। 'ओ३म्-ओ३म्'—इति वीप्सया सर्वासु सामिधेनीषु स्थितस्य प्रणवस्यानुकरणम् ॥ १ ॥

"यद्देवेत्यादिः हिङ्कारस्तुतिः। तस्य प्रतिज्ञातं प्राणात्मकत्वमुपपादयति— "प्राणो वा इति[२]। हिङ्कृत्यानुवचनम्। मिथुनसम्पत्त्या स्तौति— "वाचा वा इत्यादिना। नासिकास्थप्राणात्मको हिङ्कारः, तन्निर्वर्त्यत्वात्; ऋक् च वागात्मिका, तया उच्चार्यमाणत्वात्। 'प्राणश्च वाक् च' 'एतत्' एकं 'मिथुनम्'; स्त्रीपुंसरूपत्वात्। अतः सामिधेनीनां 'पुरस्ताद्' यजमानस्य पुत्रपौत्रादिप्रजननिमित्तं 'हिङ्कृत्य' अनुवचनेन 'मिथुन मेव क्रियते' इत्यर्थः[३] ॥ २ ॥

"अन्यतरदेवेति। उच्चैर्हिङ्कारस्योच्चारणे हि सोऽपि वाचैव निर्वर्त्यत इति तदात्मक एव स्यान्न प्राणात्मकः; तथा च मिथुनसम्पत्तिर्न स्यादित्यर्थः ॥ २ ॥

सामिधेनीनां लिङ्गविशेषं विधत्ते— "स वा एति चेति। आ इति 'एति'; प्र इति 'प्रेति'। अत्र 'इति'-शब्देन प्रकृतविपर्यासशङ्कया एतौ शब्दावर्थपरत्वात् प्रत्याय्य 'अर्वाची'-शब्दपरतया

१— तथाहि "लोकेषु पञ्चविधं सामोपासीत"—इत्यादि (४ प्र० २–७ ख०), "अथ सप्तविधस्य; वाचि सप्तविधं सामोपासीत"—इत्यादि च (४ प्र० ८–२१ ख०) सा० छा० ब्रा०।

२— "प्राणो हिङ्कारः"—इत्यादि सा० छा० ब्रा० ४. ७. १।

३— सा० छा० ब्रा० ४. १२. १, २ द्रष्टव्यम्।

व्यवस्थाप्येते । तथा च आङुपसर्गयुक्ताः प्रोपसर्गयुक्ताश्च ऋचोऽनुब्रूयादित्यर्थः ॥

तदेतल्लिङ्गद्वयं प्रयोजनकथनेन प्रशंसति— "गायत्री मेवेति । आङुपसर्गो ह्याभिमुख्ये वर्त्तते[1], अतस्तेन 'अर्वाचीम्' अभिमुखीं युनक्ति । परेतः प्रेत इति पर्यायतया दर्शनात् 'प्र'-शब्दस्य पराङ्मुखत्वेऽपि वृत्तिरस्ति[2], अतोऽत्र 'प्र'-शब्देन पराङ्मुखत्ववाचिना पराङ्मुखी मेव तां 'युनक्ति' इत्यर्थः ।

एव मुभयथा योजनस्य प्रयोजन माह— "पराच्यहेति । यतो देवयजनान्निष्क्रम्य 'पराची' पराङ्मुखी, अनिवर्त्तमानैव गायत्री द्युलोकं प्रति 'यज्ञं' वोढुं शक्नोति ; सा तु सन्निधानात् 'मनुष्यान्' रचितुं शक्नोति ; अतो लिङ्गद्वययुक्ता एवानुवक्तव्याः ॥ ४ ॥

तदेतल्लिङ्गद्वयं विधाय प्रशंसति— "यद्वेवेत्यादिना । "प्रेति वै प्राण इति। 'प्र'-शब्दस्य परागञ्चनार्थत्वात्, प्राणस्य च परागवृत्तित्वादुभयोस्तादात्म्यम् । "एत्युदान इति। आकारस्याभिमुख्यार्थत्वात् उदानस्य अन्तःप्रवेशवृत्ति[3]रूपत्वात्तादात्म्यम् ॥ ५ ॥

"यद्वेवेति शेषः । "प्रेति वै रेतः सिच्यत इति । सिच्यमानस्य रेतसः पराङ्मुखप्रवृत्तेः 'प्र'-शब्दस्य तस्य च तादात्म्यम् । अपत्यरूपेण जायमानस्य अभिमुख मावर्त्तनादाभिमुख्यवाचिन आकारस्य

१— निरु० १. १. ५ ; १. २. ३ ; ३. ३. ४ ; ५. १. ६ ।

२—"प्रपरेत्येतस्य प्रातिलोम्यम्"—इति निरु० १. १. ५ ।

३— 'अन्तःप्रविग्रहवृत्ति'—इति ड ।

तादात्म्यम्। "प्रेति पशव इत्यादि। पशूनां तृणादिभक्षणाय यदनं प्रति पराग् गमनम्, तत् 'प्र'-शब्दार्थः[१]; यच्च सायं समागमनम्, तदाकारस्यार्थः[२]। किं बहुना 'सर्वम्' अपि 'इदं' जगत् प्रगमन-स्वभाव मावर्त्तनस्वभावञ्च; तस्मादेतल्लिङ्गद्वय मनुवचने सम्पादनीय मित्यर्थः ॥ ६ ॥

तदेतदुदाहरणेन दर्शयति— "सोऽग्नाहेति। "प्र वो वाजा इति। एषा 'प्र'-शब्दलिङ्गयुक्ता सामिधेनी[३]। "अग्न आ याहीत्या-ङुपसर्गलिङ्गयुक्ता[४] ॥ ७ ॥

अनयोर्लिङ्गयोरैक्य माशङ्क्य निरस्यति— "तदु हेति। "आया-हि"-इत्यनेन यदस्मान् प्रत्याभिमुख्यगमनं प्रतिपादितम्, 'तत्' स्वर्गवासि-देवापेक्षया परागमन मेवेति 'एति'-लिङ्ग मपि 'प्रेति'-लिङ्गं 'सम्पद्यत इति' एकीयमताभिप्रायः। 'तत्' एतत् 'आति-विज्ञान्यं' (न[५]) ज्ञानपथातिवर्त्ति। "आयाहि"-इत्युक्ते यस्मादागमन मेव शीघ्रं बुद्धावारोहति, न तु प्रगमनम्; तस्मात् 'प्रेति'-सम्पत्तिः[६] दुरधिगमेत्यर्थः। लिङ्गद्वयं तथैव व्यवस्थित मित्यभि-प्रेत्यानुवदति— "प्र व इति ॥ ८ ॥

विहित मनुवचन मनूद्य प्रथमतोऽनुवक्त्या मृचं विधाय तत्य-दानि व्याचष्टे— "सोऽग्नाहेत्यादिना। अत्र 'वाजाः'-'इति' पदेन

१— निरु० १. १. ५। २— निघ० ४. २. ३२।

३— तै० ब्रा० ३. ५. २. १; सं० २. ५. ७. २।

४— तै० ब्रा० ३. ५. २. २; सं० २. ५. ८. १–११।

५— 'न'–इति पदं ठ-ड–पुस्तकयोर्नास्ति।

६— 'सप्रतिपत्तिः'–इति ज, झ, ट,।

'अन्नं' विवक्षितम्; वाजयति बलयतीति तच्छब्दव्युत्पत्तेः। अतः एतत्पदोच्चारणेन 'अन्न मेव' 'अभ्यनूक्तम्' अभिलक्ष्यानुवचनं कृतं भवति। "वस्तोः, द्यौः, भानुः, वासरम्"-इत्यहर्नामसु पाठात्[१] 'द्यु'-शब्दो दिनवचनः। द्यून् दिवसान् अभिगता इति व्युत्पत्त्या 'अभिद्यवः', 'इति' अनेन 'अर्द्धमासाः' उच्यन्त इति व्याचष्टे— "अर्द्धमासा वा अभिद्यवः"-इति। "पशवो वै हविष्मन्तः"-इति। क्षीरदध्याज्यादिहविर्जनकत्वाद् भाविना हविषा तद्वन्त इत्यर्थः ॥९॥

"घृताच्येति। 'घृत'-शब्दोच्चारणस्याग्निमभिमन्थनेऽतिप्रथित मानुकूल्य माख्यायिकया दर्शयति— "विदेघो ह माधव इत्यादिना। 'माधवः'[२] मधुनाम्नः पुत्रो 'विदेघः'[३] नाम राजा; स च स्वमुखे विश्वनरहितम् 'अग्निं' धारयामास। रहूगणस्य पुत्रो 'गोतमः' नाम ऋषिः, तस्य राज्ञः 'पुरोहितः'। स च राजा तेन ऋषिणा आह्वयमानः 'तस्मै' न प्रत्युत्तरं ददौ। केनाभिप्रायेणेति चेत्, उच्यते— यद्यहं वदिष्यामि, मदीयात् 'मुखात्' सोऽग्निर्निष्पद्येत? नैव निष्पद्यता मित्यनेनाभिप्रायेणेत्यर्थः ॥ १० ॥

"त मग्निरित्यादि। स च ऋषिः ऋक्मन्त्रैस्तस्य मुखगत मग्निं स्तुवन् 'तं' विदेघ माह्वातुं निश्चितवान्। निश्चित्य च

१— निघ० १ अ० ९ ख० १, २, ३, ४।

२— क्वातिरिक्तमूलपुस्तकेषु 'माधवः'-इत्येव पाठो दृश्यते, तथैव दृष्टो वेवरेणापि सर्वत्रैव; तन्न ज्ञाने माधवपाठः कुतो लब्धः सायणाचार्येणेति।

३— शतपथेऽन्यत्र तु सर्वत्रैव 'विदेह'-शब्दः श्रुतः (१. ४. १. १७; १४. ६. ११. ६; ७. २. ३०.) एकत्रैवेह श्रूयते विदेघ इति।

"वीतिहोत्रम्"-इति[1] मन्त्रेण आजुहाव । एवं स्तुतोऽग्निः तन्मुखे तूष्णी मेव स्थितवान् ॥ ११ ॥

"स न इति । 'सः' विदेघोऽपि 'न' प्रत्युवाच । पुनरपि 'सः' ऋषिः "उदग्ने शुचयः"-इति[2] मन्त्रेणाग्निं स्तुवन् क्रोधेन विदेघ माकारयामास । 'विदेघाः'-इति स्तुतिः असूयार्था[3] ॥ १२ ॥

"स ह नैवेति । एव मपि प्रतिश्रवणाभावे "तन्त्वा घृतस्नवी-महे"—'इति' इमा मेव ऋचम्[4] अग्नि मभिलक्ष्योक्तवान् । 'सः' चाग्निः मन्त्रगतघृतशब्दोच्चारणसमये एव माधवस्य मुखसकाशादूर्ध्वं ज्वलितोऽभूत् । 'तम्' अग्निं 'धारयितुं' सोऽपि 'न शशाक'; ज्वालाधिक्येन दाहकत्वात् । 'सः' च मुखान्निर्गतः सन् 'पृथिवीं' प्राप्तवान् ॥ १३ ॥

"तर्हीति । तस्मिन् समये माधवश्च तापशमनाय 'सरस्वत्यां' नद्यां निमग्नोऽभूत् । 'सः' अग्निस्तस्मात् स्थानादारभ्य 'प्राङ् दहन्' 'इमां' सर्वां 'पृथिवीम्' अभितो व्याप्नोत् । माधवगोतमावुभावपि 'दहन्तं' 'तम्' अग्निं 'पश्चात्' अनुजग्मतुः । 'सः' च दहन्नग्निः पृथिव्यां यावत्यो नद्यः सन्ति, ताः 'सर्वा नदीः' अतिशयेन 'ददाह' शोषयामास । 'प्राचीनं' दहतोऽस्य पुरस्तात् 'सदानीरा' नाम नदी 'उत्तरात्' उदक्प्रवाहा 'एति' गच्छति । तया च व्यवहितः सोऽग्निः, एनम्

१— वा० सं० २. ४. १ ; का० श्रौ० सू० २. ८. २ ।

२ — तै०सं० १. ३. १४. २८ ; ४. ४६. १३ ; ५. ५. १२ ; २. ४. १४. ११ ।

३— पा० सू० ८. २. १०३ । ४— ऋ० सं० ५. २६. २ ।

अग्निम्, सापि निःशेषेण धारयति, इतस्ततो गमनं निवार्य धारितवतीत्यर्थः। स चाग्निः 'तां' नदीं मितरनदीवत् 'नाति-दद्राह'। अत एव 'सदा' सर्वदा 'नीरं' जलं मस्या मस्तीति व्युत्पत्त्या 'सदानीरा'-इत्युच्यते। तथा च निघण्टुः(?)— "करतोया सदानीरा बाऊदा सैतवाहिनीति[1]। 'तां ह' नदीं 'पुरा' तद्दह-नोत्तरकाले 'ब्राह्मणाः' 'न तरन्ति' न स्पृशन्ति। अग्निदाहा-भावेनाविशुद्धत्वादिति हेतुं माह— "अनतिदग्धेति ॥ १४ ॥

"तत एतर्हीति। 'ततः' तस्या नद्याः 'प्राचीनं' प्राग्देशम् 'एतर्हि' इदानीं 'बहवो ब्राह्मणाः' निवसन्ति। अत्यन्तसंयोगे द्वितीया[2]। प्राग्देशः सर्वोऽपि ब्राह्मणवास इत्यर्थः। 'तत्' च स्थानम् 'अचेचतर मिव' अतिशयेन निवासायोग्य मिव 'आस' बभूव। तथा 'स्रावितरं' भग्नभाण्डे निक्षिप्तनीरवत्तद्देशेऽनुष्ठितं यज्ञदानादिक मतिशयेन 'स्रावि' स्रवणशीलं फलप्रदानासमर्थं बभूवेत्यर्थः। तच्च हेतुं माह— "अस्वदित मिति। यतो 'वैश्वानरेणाग्निना' 'अस्व-दितम्' अनास्वादितम्, अतस्तत्स्थान मपवित्र मित्यर्थः ॥ १५ ॥

अस्य दोषस्य परिहार माह— "तदु हेति। 'एतर्हि' एतस्मिन् समये 'तत्' अपि स्थानं 'चेचतरं' निवासयोग्य मेव भवति। कुत इत्यत आह— "ब्राह्मणा उ हीति। 'नूनम्' इति निश्चये[3]; 'हि' यस्मात् 'एनत्' स्थानं ब्राह्मणाः 'यज्ञैरसिष्वदन्' यज्ञानुष्ठानैः

१— ऋम० को० १. १०. ३३। २— पा० सू० २. १. २९।

३— "नून मिति विचिकित्सार्थीयः"—इति निरु० १. २. ४।

अग्निना आस्यादित मक्षपत, तस्मादित्यर्थः। 'सा' च नदी 'जघन्ये' निकृष्टे सर्वरसवर्जिते 'नैदाघे' ग्रीष्मसम्बन्धिकालेऽपि सम्यक् 'कोपयति' बडवजलतया प्रकुपिता भवति। 'तावत्' पर्यन्ते हि काले 'वैश्वानरेणाग्निना' 'दग्धा'; तदा च तं निवारयितुं तस्याः प्रकोपो जात इत्यर्थः ॥ १६ ॥

"स होवाचेति। एवं सर्वेषु देशेषु दग्धेषु 'सः' च माधवः अग्निं सेव प्रतीच्य 'उवाच'— 'क्व' कुत्र देशे 'अहं भवानि' निवसेयम्? 'इति' पृष्टे सोऽग्निरेनम् 'उवाच'। किमिति। 'अतः' अस्याः नद्याः 'प्राचीनं' यद् 'भुवनं' भूमिः, एतदेव 'ते' तव निवासोऽस्त्विति। अत एव कारणात् एतस्मिन्नपि काले 'सैषा' सदानीरा नदी कोसलदेशस्य च विदेहदेशस्य च मर्यादात्वेन दृश्यते। 'हि' यस्मादेवं माधवायाग्निरदात्, तस्मात् 'ते' विदेहदेशाः अपि 'माधवाः' इत्युच्यन्ते ॥ १७ ॥

उक्तं वृत्तान्तं गोतमेन पृष्टः सन् विदेहोऽनुवदति— "अथ होवाचेत्यादिना। परोक्षत्वात्पूर्वं श्रुतिवाक्ये लिट्-प्रयोगः[१]। गोतम-माधवयोः प्रश्नप्रतिवचनरूपवाक्ये तु भूताद्यतनत्वाल्लुङ्-प्रयोगो[२] विशेषः ॥ १८,१९ ॥

एवं प्रासङ्गिकं परिसमाप्य प्रकृते योजयति— "स यदिति। यस्माद् घृतशब्दोच्चारणेनाग्निः प्रज्वलितो बभूव, तस्मात् कारणात् 'सामिधेनीषु' 'यद्' 'घृत'-प्रातिपदिकयुक्तं पदम्, 'तत्' 'सामिधेन सेव' अग्निसमिन्धनहेतुर्भवतीत्यर्थः ॥ २० ॥

१— पा० सू० ३. २. ११५। २— पा० सू० ३. २. ११०।

तस्माद् घृताच्चेतत्पदं सामिधेनीषु युक्ततर मिति निगमयति— "तद्वितिं। तैत्तिरीयकेऽपि नृमेधपुरुच्छेपसंवादोदाहरणे घृतवत्य-दस्याग्निजननहेतुत्वं प्रतिपादितम्— "यत्समावद्विद्व कथा त्व मग्नि मजीजनो मात्र मिति; सामिधेनीना मेवाहं वर्णं वेदेत्यब्रवीद् यद्; घृतवत्यद मनूच्यते, स आसां वर्णः"-इति[1]। "यजमानो वा इत्यादि। 'सुम्नं' सुखं स्वर्गादिलक्षण मात्मन इच्छतीति[2] 'सुम्नयुः' यजमानः। जिगातीत्यस्याभिप्राय माह— "जिगीषतीति। जेतु मिच्छतीत्यर्थः।

ननु "गा स्तुतौ"-इति[3] धातुः, कथं तस्य जिगीषतीति व्याख्यान मित्यत आह— "स हीति। 'हि' यस्मात् यजमानो देवान् स्तुत्वा 'जिघांसति' 'हन्तुं' प्रभु मिच्छति। हन्तिरत्र गत्यर्थः। 'तस्मात्' जिगीषतीति युज्यत इत्यर्थः। "अज्झनगमां सनि"-इति[4] सनि दीर्घत्वम्। "सर्वं वा अनिरुक्त मिति। यस्मामविज्ञेषैरनिरुक्तम्, तत्सर्वात्मक मित्यर्थः ॥ २१ ॥

"अग्न आ याहीति। "वीतये"-इति पदं व्याख्यातु मितिहास माह— "समन्तिक मिवेति। सन्निहिततर मिवेत्यर्थः। सन्निकर्ष मेवाभिनयेन दर्शयति— "इत्युन्मृश्येति। यथोर्ध्वबाहुना शाखायं स्पृश्यते, 'इति' एव मेव द्यौरपि हस्तस्पृश्येव बभूवेत्यर्थः ॥ २२ ॥

"ते देवा इति। "वितरां स्तुरिति। अतिशयेन विप्रकृष्टा भवेयुरित्यर्थः। "वरीय इवेति। 'उरुतरं' विस्तीर्णतर मेव एतत्

१— तै० सं० २. ५. ८. ५।
२— पा० सू० ३. १. ८।
३— धा० पा० जु० प० २३।
४—पा० सू० ६. ४. १९।

चिरूपं स्थानं केन प्रकारेण स्यादित्यर्थः। विश्लिष्टा इतिः 'वीतिः', तथा च 'वीतये'-इत्यस्य विविधमानायेत्यर्थो भवति। एतद्चरचय-प्रयोगात् चयः 'इमे लोकाः' परस्परं 'विदूरं' विप्रकर्षं प्राप्ता इत्यर्थः। "एता मन्वाऽऽरिति। 'वीतये'-इतिपदेन युक्ताम् "अग्न आयाहीत्यादिका मित्यर्थः ॥ २३ ॥

अस्या ऋचो द्वितीयं पाद मनूद्य व्याचष्टे— "गृणान इति। हविषो दानाद् 'हव्यदातिः = यजमानः' ॥

अस्या ऋचोऽनुवचनं भूलोकजयहेतुत्वेन प्रशंसति— "अग्निर्वै होतेत्यादिना ॥ २४ ॥

तृतीयां सामिधेनी मनूद्य व्याचष्टे— "तन्वेति[1]। 'अङ्गिरसः' महर्षयो यत् 'समिद्भिः' अग्निम् 'ऐन्धत' समिद्ध मकुर्वन्[2], तस्मादग्निरपि 'अङ्गिर इति' सम्बोध्यते। तदेतन्नाम अग्नेः प्रसिद्ध मित्याह—"अङ्गिरा उ होति। "इतरे येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्निति[3] अङ्गिरसा मङ्गारपरिणामरूपत्वात् 'अङ्गिरः'-शब्दाभिधेयता। अग्निरप्यङ्गाररूप इति युक्तं तस्याप्यङ्गिरत्व मित्यर्थः ॥ २५ ॥

"इहच्छोचेति। "यविष्ठो ह्यग्निरिति। 'यविष्ठः' युवतमः नित्यतरुणः; अजरामरत्वात् ॥

अस्या ऋचोऽनुवचन मन्तरिक्षलोकजयहेतुत्वेन प्रशंसति— "मै-

१—तै० ब्रा० ३. ५. २. ३ ; सं० २. ५. ८. १–११ ।

२— तेषां वर्णनम् ऐ०ब्रा० ६. ५. ८–९-खण्डयोरद्रष्टव्यम्। वस्तुतस्तु "एत मु एवाङ्गिरसं मन्यन्तेऽङ्गानां यद्रसः"–इति सा० छा० ब्रा०३. २. १० ।

३— ऐ० ब्रा० ३. ३. ९ । निरु० ३. २. ५ । निघ० ५. ५. ११ ।

षेति। "एत मेव"-इति सामान्योक्तं विवृणोति— "अन्तरिक्षेति। ऋचोऽन्तरिक्षलोकस्य साम्य माह— "तस्मादिति ॥ २६ ॥

चतुर्थीं सामिधेनी मनूद्य द्युलोकजयहेतुत्वेन व्याचष्टे— "स न इत्यादिना[1]। 'अदः' विप्रकृष्टं द्युस्थानं खलु 'पृथु' विस्तीर्णम्। तद्विशिनष्टि— "यस्मिन्निति। 'यस्मिन्' लोके 'देवाः' सर्वे वसन्ति, तत् स्थान मत्र 'पृथु'-शब्दवाच्यम्। देवनिवासत्वादेव 'एतत्' 'अवाच्यं' श्रवणीयं प्रशस्यम्। पादान्तर मनूद्य व्याचष्टे— "अच्छा देवेति। देवोषितं द्युलोकरूपं स्थानम् 'अच्छ' अभिलक्ष्य 'विवासषि' प्रकाशयेत्यर्थः। प्रकाशनञ्च प्राप्त्यर्थ मित्यभिप्रेत्य व्याचष्टे— "एतन्नो गमयेति ॥ २७ ॥

"दृहदग्न इति। "अदो वा इति। सर्वत्र हि विशेष्यरहितः 'इदं'-शब्दो भूलोकवचनः, 'अदः'-शब्दश्च द्युलोकवचनः ॥ २८ ॥

ऋगन्तरस्य[2] अनुवचनं विधत्ते—"सोऽग्नावाहेति। 'ईड्यः' स्तोतव्यः, 'नमस्यः' नमस्कर्त्तव्य इत्यय मर्थः। प्रसिद्ध इति हेरर्थः। द्वितीयं पाद मनूद्य व्याचष्टे— "तिरस्तमांसीति। 'एषः' खल्वग्निः समिद्धः सन् 'तमांसि' तिरस्कृत्यैव दृश्यते। अनेन 'दर्शतः'-इतिपदस्य कर्मणि व्युत्पत्तिर्दर्शिता। "स मग्निरिध्यते"-इत्यादि निगदसिद्धम् ॥ २९ ॥

"अश्वो नेति। "अश्वो न देववाहनः"-इत्यत्र[3] 'न'-शब्दस्य निषेधार्थत्व माशङ्क्य विवक्षित मर्थं दर्शयति— "यदा इति। 'ऋचि' ऋङ्मन्त्रे 'यत्' 'न-इति' पदम्, तत् 'ओम्-इति' अङ्गीकारार्थतया

१— तै० ब्रा० ३. ५. २. ४ ; सं० २. ५. ८. १–११।

२, ३— तै० ब्रा० ३. ५. २. ५, ६ ; सं० २. ५. ८. १–११।

प्रतिपत्तव्यम्। "एवम्परमोम्यदम्"-इति हि निघण्टुः(?)[१]। 'अश्वो ह वा एष भूत्वा' अश्वरूप मास्थायेति यावत् ॥ २० ॥

"तꣳ हविष्मन्त इति। "हविष्मन्तो ह्येत मित्यादि। चरुपुरोडाशादीनि 'हवींषि' मन्यान्त, तद्युक्ता ऋत्विग्यजमानाः तानि हवींषि देवान् प्रापयितु मग्निं स्तुवन्तीत्यर्थः। "ईड स्तुतौ"-इति धातुः[२] ॥ २१ ॥

"वृषण्वेत्यादि[३]। निगदसिद्धम्। "दीद्यतं बृहत्"-इत्यत्र दीद्यच्छब्दस्याभिप्राय माह— "दीदयेवेति। "दीदयति" दीप्तिकर्मा, छान्दसो धातुः[४]। पूर्वाभिः समिद्धः स च 'एषः' अग्निरस्मिन् समये 'बृहत्' अधिकं 'दीदयेव' दिदीप इतीव। 'हि' यतो 'दीद्यतं' दीप्यमानं त्वा मित्यग्निविशेषणं युक्त मित्यर्थः ॥ २२ ॥

"ईडेन्यः"-इत्यस्य ऋचस्य वृषण्वच्छब्दायात मुपजीव्य प्रशंसति— "तं वा इत्यादि। अग्निविशेषणभूतेनापि 'वृषन्'-शब्देन इन्द्रोऽप्युपस्थाप्यते; 'वृषन्'-शब्दस्य तन्नामधेयत्वात्। अतो 'वृषन्'-शब्दयुक्तस्य ऋचस्यानुवचनादितरयज्ञवत् सामिधेनीना मपीन्द्रसम्बन्धः सिद्धतीत्यर्थः ॥ २३ ॥

१—"ओ मेवं परमं मते"—इति ऋम०को० ३. ४. १२। "ओ३ मित्यचः प्रतिगर एवं तथेति गाथाया ओ मिति वै देवं तथेति मानुषम्"—इति ऐ०ब्रा० ७. ३. ६। "प्रणवे चाभ्युपगमे चापाङ्क्तौ च मङ्गले"—इति मे० अथ० ५१।

२—धा० पा० अदा० आ० ६।

३—तै० ब्रा० ३. ५. ३. ७; सं० २. ५. ८. १–११।

४—निघ० १. १६. ४; निरु० १०. २. ६।

सामिधेन्यन्तरस्य[१] अनुवचनं विधत्ते— "सोऽब्राहेति। अग्नेर्दैव-दूतत्व मुपपादयितु मितिहास माह— "देवाश्च वा इति। 'तान्' मिथः 'स्पर्द्धमानान्' देवासुरान् 'अन्तरा' तेषा मुभयेषां मध्यत इत्यर्थः। "अन्तरान्तरेणेति[२] द्वितीया। "इयं वा इत्यादि। योत्स्य-मानांस्तानुभयविधान् निवारयितुं गायत्री मध्ये प्रादुर्भूता 'सेयं पृथिव्येव' इय मेव खलु पृथिवी तेषा मुभयेषां मध्यवर्त्तिनी। युक्तं चैतत्;— मेरोरग्रभागे हि अमरावती नाम नगरी, तस्यां हि देवाः; तथा मेरोरधस्ताद्भागे च यत् दरासुखं नाम नगरम्, तस्मिन् चासुरा निवसन्ति। तयोर्मध्ये पृथिवी वर्त्तत इति। 'ह'-शब्दयोगा-दस्ति शास्त्रप्रसिद्धिः[३]। "यतरान्वा इति। "किं यत्तदोर्निर्द्धारणे"-इति[४] यच्छब्दात् डतरच्। 'उपावर्त्स्यति' उपावृत्ता भविष्यति। 'उपमन्त्रयाञ्चक्रिरे' रहस्यं दूतमुखेनाङ्गतवन्त इत्यर्थः। "मचि गुप्तभाषणे"-इति[५] धातुः; लिट्; प्रत्ययान्तलादाम् प्रत्ययः[६]।

तस्मिन्नुपमन्त्रणे देवानां को दूतः, को वा असुराणा मित्युभयं विविनक्ति— "अग्निरेवेति। 'सहरक्षाः' नाम यत् 'असुररक्षसम्' असुरविरोधि रक्षः। समासान्तो 'अ'-प्रत्ययः[७]। 'रक्षः'-शब्दस्य

१— तै० ब्रा० ३. ५. २. ८; सं० २. ५. ८. १–११।

२—पा० सू० २. ३. ४।

३— अवैदिक मिदं वर्णन मिति सुधीभिः खलूपेक्षणीय मेव।

४— पा० सू० ५. ३. ९२। ५— धा० पा० चु० आ० ४५।

६— पा० सू० ३. १. ३५, ३६।

७— "अनसन्तान्नपुंसकाच्छन्दसि"—इति पा० सू० ५. ४. १०३।

नियतनपुंसकत्वात् समासान्तस्यापि तथात्वम्। "स हि देवाना मिति। 'हि' यस्मादुक्तरीत्या 'अग्निं दूतं वृणीमहे-इति' अनुवचनं युक्त मित्यर्थः। द्वितीयपाद मनूद्य तत्र पाठान्तर मुपन्यस्य दूषयति— "होतार मित्यादिना ॥ ३ ४ ॥

"तद्धिति। "होता यो विश्ववेदस इति" पाठान्तर मनुभ्रुवता मभिप्राय माह। यद्यपि होतार मिति 'होतृ'-शब्दो द्वितीयान्तः, तथापि 'होता अरम्' इत्यपि श्रुतिसामान्यात् प्रतीयते। स च 'अरं'-शब्दः 'अलं'-शब्दपर्यायः। "वाल-मूल-लघ्वल मङ्गुलीनाम्"-इति[1] लत्वस्य विकल्पितत्वात्। 'अरं'-शब्दोऽत्र निवारणार्थः। 'आत्मानं' निवारणविशिष्टं 'नेत्' नैव 'ब्रवाणि'-इत्यनेनाभिप्रायेणेत्यर्थः। "होता यः"-इति पाठे तु न ईदृशी विरुद्धा प्रतिपत्तिरस्ति ॥

तत्पक्षनिराकरणं "तदु तथेत्यादि। स्पष्टम्। "होतारम्"-इत्यार्षपाठं परित्यज्य "होता यः"-इतिपाठविपरिणामस्य मनुष्यबुद्धिप्रभवतया मानुषत्वम्[2]। यथैव वेदे पठितम्, तथैवानुवक्तव्य मित्युपसंहरति— "तस्मादिति। कीदृग्विधं तर्हि वेदे पठित मिति तदाह— "होतार मिति। 'एव'कारः पक्षान्तरव्युदासार्थः ॥

प्रकृत मितिहासशेष मुपसंहरति— "सेय मिति। देवासुराणां

१— पा० सू० ८. २. १८. वा० २ ("वा लो र मापद्यते")।

२— तदित्थं मन्त्रेषु स्वाभिप्रेतप्रार्थनादिप्रकाशनायापि वैदिकशब्दानां परिवर्त्तनादिकं सर्वत्रैव निषिद्ध मिति सूचितम्।

मध्ये वर्त्तमाना या गायत्री, 'सेयं' रक्षस्र माङ्कता सती 'देवान्' एव 'उपावर्त्तते' उपाजगाम। 'ततः' गायत्र्या उपावर्त्तनात् 'देवाः' 'अभवन्' अजयन्। 'असुराः' तु तत्सम्बन्धविरहात् 'परा'भूताः॥

उक्तेतिहासज्ञानपुरःसर मेतां गायत्रीं प्रयुञ्जानस्य फल माह— "भवतीति। 'आत्मना' स्वयं 'भवति' भूष्णुः, समर्थो भवति। 'अस्य' च शत्रवः 'पराभवन्ति' इत्यर्थः॥ ३५॥

अष्टसङ्ख्योपजीवनेन प्रशंसति— "तां वा इति। 'निदानेन' मूलकारणेन विचार्यमाणा ऋगक्षरात्मिका 'एषा गायत्री', सापि प्रतिपादम् 'अष्टाक्षरा'; या च अष्टसङ्ख्या, तत्पूर्त्तिहेतुत्वादयेषा विशेषतो 'गायत्री'-इति। ताम् 'अष्टमी मनुब्रूयात्' इत्यर्थः॥ ३६॥

यत्र सप्तदश सामिधेन्यः, तत्र "पृथु पाजाः"-"तं सबाधः"-इति द्वे धाय्याख्ये[1] ऋचौ[2] सामिधेनीषु प्रक्षेप्तव्ये। तयोः स्थानं पूर्वोत्तर-पक्षाभ्यां दर्शयति— "तद्वैक इति। 'पुरस्तात्' अष्टम्याः पूर्वं मित्यर्थः।

तथा कुर्वता मभिप्राय माह— "मुखत इति। अन्नञ्च तदाद्यञ्च 'अन्नाद्यम्' 'इदं' धाय्यारूपं 'मुखतः' मुखप्रदेश एव 'दधः' धारयामः 'इति वदन्तः'॥

तदेतदेकीयं मतं दूषयति— "तदु तथेति। 'अनवक्लृप्ता' असमर्था ऊर्द्धं द्वयोर्धाय्ययोः प्रक्षेपात्। "अग्निं दूतम्"-इत्यष्टमी,

---

१— "धाय्य-सान्नाय्य-निकाय्य-धाय्या मानर्हविर्निवाससामिधेनीषु"-इति पा० सू० ३. १. १२९। 'धीयतेऽनया समिदिति धाय्या ऋक्'-इति तत्र कौ०। ऐ० ब्रा० ३. २. ७, १३; ३. ७। तै० सं० २. २. १०. २।

२— ऋ० सं० ३. २७. ५, ६।

'दशमी' सम्पद्यते; तथा चाष्टमीत्वभङ्गेन "गायत्री वा एषा निदानेन"-इतिप्रतिपादित[1]'गायत्री'तिपदविरहादसमर्थं[2] स्यात्।

तथा समिद्धमानवती-समिद्धवत्योर्मध्ये हि धाय्ये प्रक्षेप्तव्ये; सा च समिद्धमानवती सामधेनीनां पञ्चदश्यां नवमी, सा च सप्तदश्यां त्वत्कर्षात् 'एकादश्यां सम्पद्यते'। उभयत्र 'वा'-शब्दस्यार्थः। कथं तर्हि अवक्रन्निरित्यत आह—"तस्या हेति। 'यस्य' यजमानस्य सा सामिधेनीषु "अग्निं दूतम्"-इत्येषा अष्टमी; 'तस्यैषा' ('अवक्रन्ना') अवक्रन्निः, समर्था 'भवति' इत्यर्थः।

कुत्र तर्हि धाय्ययोः प्रक्षेप इति तदाह—"तस्मादिति। अष्टम्याः 'उपरिष्टात्' समिध्यमानवती-समिद्धवत्योर्मध्ये एव 'धाय्ये' प्रक्षिपेत्। उक्तं ह्यापस्तम्बेन—"समिध्यमानवतीं समिद्धवतीञ्चान्तरेण पृथुपाजवत्यौ धाय्ये दधाति"-इति[3]। आश्वलायनोऽप्यसूत्रयत्—"तृतीयस्यां सामिधेन्यावापते प्रागुपोत्तमायाः पृथुपाजा अमर्त्य इति द्वे धाय्ये इत्युक्त एते प्रतीयात्"-इति[4] ॥ ३७॥

एवं सप्तमीं विधाय प्रशंसति—"समिद्धमान इति[5]। निगदसिद्ध मेतत्। "शोचन्तीव ह्येतस्येति। दीप्यमानस्याग्नेः ये ऊर्ध्वमुखा ज्वालाविशेषाः, ते केशाः; ते च 'शोचन्ति' दीप्यन्ते; 'इव'-

---

१— पुरस्तादिहैव द्रष्टव्यम् (२६५ पृ० १७ पं०)।

२— 'गायत्रीति पद्य मसमर्थं'—इति ड।

३— आप० श्रौ० सू० २. १२. ५।

४— आ० श्रौ० सू० २. १. २६. (ऋ० सं० ३. २७. ५, ६.)।

५— तै० ब्रा० ३. ५. २. ६; सं० २. ५. ८. १–११।

ग्रच्छोऽवधारणे; 'ग्रोचिषः' दीप्यमानाः केशा यस्येति 'ग्रोचिष्केशः' इत्यर्थः ॥

दग्धस्याः सामिधेन्याः प्रागेवेध्मग्रेषस्य सर्वस्य ग्रग्नावभ्याधानं विधत्ते—"समिद्धो ग्रग्न इत्यादिना[1]। तस्या दग्धस्याः सामिधेन्याः 'प्राचीनं' प्राक्। "विभाषाञ्चेरदिक् स्त्रियाम्"-इति[2] स्वार्थिकः ख-प्रत्ययः। "यदन्यत्समिधः इति। ग्रनुयाजार्थायाः 'समिधः' 'यत् ग्रन्यत् तत्' सर्वं मित्यर्थः ॥

ग्रस्मिन्नेव समये दग्धग्रेषस्य सर्वस्याभ्याधानं कुतो हेतोरित्याग्रङ्ग्य हेतु माह— "ग्रपवृङ्क्त इवेति। 'एतत्' एतर्हि, ग्रस्मिन् समये होता 'ग्रपवृङ्क्ते इव' ग्रग्नेः समिन्धनं परिसमापयतीव। "समिद्धो ग्रग्न ग्राहुतेति। समिन्धनस्य भूतत्वप्रतिपत्तेः, समिन्धनहेतुत्वाच्च, सर्वस्येध्मस्य समिद्भावस्थायाः प्रागेवाभ्याधानं युक्त मित्यर्थः ॥

प्रागनभ्याधानदोष माह— "यद्वा ग्रन्यदिति। ग्रनुयाजसमिद्-व्यतिरिक्तं 'यत्' दग्धसम्बन्धि काष्ठं समिद्भावस्थायां वर्त्तते, 'तत् ग्रतिरिक्तम्'। तच्च ग्रचुवर्द्धनहेतुरित्यपि। "समिद्धो ग्रग्न ग्राहुत"-इत्यतः प्रागेवेध्मग्रेषः सर्वोऽपि प्रक्षेप्यः। ग्रत एव कात्यायनेनोक्तम्— "समिद्ध इति प्रागतः सर्व मिध्म मेकवर्ज मनुयाजाग्नेत्"-इति[3] ॥ २८ ॥

"देवान् यक्षीत्यादि। निगदसिद्धम्।

ग्रन्तिमां सामिधेनीं मनूद्य व्याचष्टे—"ग्रा जुहोतेति। "ग्रा

१— तै० ब्रा० ३. ५. २. १०; सं० २. ५. ८. १-११।

२— पा० सू० ५. ४. ८। ३— का० श्रौ० सू० ३. १. ११।

जुहोत दुवस्यतेति[1] अध्वर्युप्रमुखा ऋत्विजः सम्बोध्य हवनादिकार्ये प्रेर्यन्ते; अतः प्रोक्षणीरासादयेत्यादिवदयं मन्त्रः सम्प्रेषरूप एव ॥

आ जुहोत दुवस्यतेति पदयोरर्थं माह—"जुहुत च यजत चेति। जुहुतेत्यत्र 'त'-शब्दस्य "तप्तनप्तनथनाश्च"-इति[2] तबादेशे गुणे च सति जुहोतेति रूपं भवति। 'दुवस्यतिः' परिचरणार्थः[3] 'दुवस्यत' परिचरत, यजतेत्यर्थः ॥

तात्पर्यार्थं माह— "यस्मै कामायेति। फलसाधनतया काम्यमानाय 'यस्मै' यागहोमादिकर्मणे हे ऋत्विजः! 'समेन्धिद्धम्' अग्निसमिन्धनम् अक्तद्धम्[4]। सोऽग्निः समिद्धः सम्पन्नः; अतोऽस्मिन् समये 'तत्कुरुतेत्येव' एवंरूप मर्थं मन्त्रो ब्रूत इत्यर्थः। "अग्निं प्रयतौत्यादि स्पष्टम् ॥ ३८ ॥

ढचस्याध्वरशब्दयुक्तत्वं प्रशंसितु मनुवदति— "तं वा इति। "समिद्धमानो अध्वरः"-इत्यादिक मृक्त्रय मध्वरशब्दोपेत मनुब्रूयात्। "दुधूर्षाञ्चक्रुरिति। धूर्वितु मिच्छां कृतवन्त इत्यर्थः। "धुर्वी हिंसायाम्"[5]-इत्यस्मात् सनि, वलोपे, प्रत्ययान्तत्वादाम् प्रत्ययः[6]। 'दुधूर्षन्तः' 'ते' असुराः देवान् 'धूर्वितुं' हिंसितुं 'न शेकुः' न शक्ताः; प्रत्युत 'परा'हता एव 'बभूवुः'। 'तस्मात्' अहिंसाहेतुत्वात् 'अध्वरः'-इति यज्ञस्य नाम सम्पन्नम् ॥

१— तै० ब्रा० ३. ५. २. ११; सं० २. ५. ८. १–११।
२— पा० सू० ७. १. ४५। ३— निघ० ३अ० ५ख० ५पदम्।
४— 'अक्तधत'–इति ङ। ५— धा० पा० भ्वा० प० ५७३।
६— पा० ३. १. ७सू० सन्, ६. १. ६६सू० वलोपः, ३. १. ३५ आम्।

एवं पुराकृत्त मुदाहृत्यैतद्दिदुषः फल माह— "दुधूर्षन् हेति। "यावद्वेवेति। 'अध्वर'-शब्दो हि सोमयागे रूढः; स चाच दर्शपूर्ण-मासविषये मन्त्रेण प्रस्तूयत इति सोमयागेन यावदेव फलं प्राप्नोति, तावद्दर्शपूर्णमासयागेनापि प्राप्नोतीत्यर्थः ॥ ४० ॥ ३ [४. १.] ॥

इति श्रीसायणार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे चतुर्थाध्याये प्रथमं ब्राह्मणम्[१] ॥

एतद्व वै देवा अग्निं गुरिष्टे* युञ्जन्। युङ्क्तोत्त्व इदुन्नो हव्यं व्वहेति तु मेतद् गुरिष्टे† युक्तोपामदन्वीर्य-वान्वै त्व मस्युलं‡ वै त्व मेतस्मा असीति व्वीर्यं समा-दुधतो युथेद मुष्येतर्हि ज्ञातीनां यं गुरिष्टे§ युञ्जन्ति तु मुपमुदन्ति व्वीर्यवान्वै त्व मस्युलं॥ वै त्व मेतस्मा

१— अस्मिन् ब्राह्मणे सामिधेनीप्रयोगारम्भप्रकारो विहितः, तन्मन्त्राणां कूटपदादिव्याख्यानानि च ज्ञापितानि। तत्रायं पद्धतिः— होत्रा उपांशु चिर्हिङ्कृत्य प्र वो वाजा इत्यासु ऋक्षु मध्यमखरेणानूच्यमानासु यजमानः पादाङ्गुष्ठाभ्यां भूमि मधः पीडयति; अध्वर्युस्त्व स्फ्य मादाय तिष्ठन् सामिधेनीनां प्रणवे-प्रणवे एकैक मिध्मकाष्ठ माहवनीये ऽभ्यादधाति। 'समिद्यमानो अध्वरे'-इत्यस्या ऋचः प्रणवे 'समिद्धो अग्ने'-इत्यतः प्राक् एक मिध्मकाष्ठं परिधिष्यावधिष्टानां पञ्चानां काष्ठानां सहैव प्रक्षेपं कुर्यात् ॥

*, †, § 'गरिष्टे'-इति ख, ग। ‡, ॥ 'मस्युलं'-इति क, ग।

ऽअसीति व्वीर्यं समादधतः स यदुत ऊर्द्ध मन्वाहोपस्तौत्येवैन मेतद्वीर्य मेवास्मिन् दधाति* ॥ १ ॥

अग्ने महां२॥† ऽअसि ब्राह्मण भारतेति। ब्रह्म ह्यग्निस्तस्मादाह ब्राह्मणेति भारतेत्येष हि देवेभ्यो हव्यं भरति तस्माद् भरतोऽग्निरित्याहुरेषु उ वा ऽइमाः प्रजाः प्राणो भूत्वा बिभर्त्ति तस्माद्देवाह भारतेति‡ ॥ २ ॥

अथार्षेयं प्रवृणीते। ऋषिभ्यश्चैवैन मेतद्देवेभ्यश्च निवेदयत्ययं महाव्वीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥ ३ ॥

परस्तादर्व्वाक् प्रवृणीते। परस्ताद्ध्यर्व्वाच्यः प्रजाः प्रजायन्ते ज्यायसस्पतय ऽउ चैवैतं निह्नुत ऽइदꣳ हि पितेवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्व्वाक् प्रवृणीते ॥ ४ ॥

सु ऽआर्षेयु मुक्ताह। देवेद्धो मन्विद्ध ऽइति। देवा ह्येत मग्र ऽऐन्धत तस्मादाह देवेद्ध ऽइति मन्विद्ध ऽइति मनुर्ह्येत मग्र ऽऐन्ध तस्मादाह मन्विद्ध ऽइति§ ॥ ५ ॥

ऋषिष्टुत ऽइति। ऋषयो‖ ह्येत मग्रे स्तुवंस्तस्मादाहुऽर्षिष्टुत ऽइति ॥ ६ ॥

---

* 'ति'–इति ख। † 'महां२'–इति क, ख; 'महाꣳ'–इति ग।
‡ 'ति'–इति ख। § 'ति'–इति ख। ‖ 'ऽइत्यृषयो'–इति ग।

व्विप्रानुमदित ऽइति। एते* वै व्विप्रा यद्दुषय ऽएते ह्येतु मन्वुमदंस्तुस्मादाह व्विप्रानुमदित ऽइति ॥ ७ ॥

कविशस्त ऽइति। एते† वै कवयो यद्दुषय ऽएते ह्येत मुशꣳसंस्तुस्मादाह कविशस्त ऽइति ॥ ८ ॥

ब्रह्मसꣳशित ऽइति। ब्रह्मसꣳशितो ह्येष घृताहवन ऽइति घृताहवनो ह्येषः ॥ ९ ॥

प्रणीर्यज्ञानाꣳ रथीरध्वराणा मिति‡। एतेन§ वै सर्व्वान् यज्ञान् प्रणयन्ति ये च पाकयज्ञा ये चेतरे तुस्मादाह प्रणीर्यज्ञाना मिति ॥ १० ॥

रथीरध्वराणा मिति। रथो ह वा एष भूत्वा देवेभ्यो यज्ञं व्वहति तुस्मादाह रथीरध्वराणा मिति ॥ ११ ॥

अतूर्त्तो होता तूर्णिर्हव्यवाडिति। नु ह्येतꣳ रक्षाꣳसि तरन्ति तुस्मादाहातूर्त्तो होतेति तूर्णिर्हव्यवाडिति सुर्व्वꣳ ह्येष पाप्मानं तरति तुस्मादाह तूर्णिर्हव्यवाडिति ॥ १२ ॥

आस्प्राचं जुहूर्देवाना मिति। देवपाचं वा ऽएष युदग्निस्तुस्मादग्नौ सुर्व्वेभ्यो देवेभ्यो जुह्वति देवपाचꣳ

---

* 'ऽइत्येते'–इति ग।
† 'ऽइत्येते'–इति ग।
‡ 'ति'–इति ख।
§ 'मित्येतेन'–इति ग।

ह्येष प्राप्नोति ह वै तस्य पाचं यस्य पाचं प्रेष्यति* य ऽएवु मेतद्वेद ॥ १३ ॥

चमसो देवपान ऽइति। चमसेन ह वा ऽएतेन भूतेन देवा भक्षयन्ति तस्मादाह चमसो देवपान ऽइति ॥ १४ ॥

अरां २॥† ऽइवाग्ने नेमिर्द्देवांस्त्वं परिभूरसीति। यथारान्नेमिः सर्व्वतः परिभूरेवन्त्वं देवान्त्सर्व्वतः परिभूरसीत्येवैतदाह ॥ १५ ॥

आवह देवान्यजमानायेति। तदस्मै यज्ञाय देवानावोढवा ऽआहाग्निं मम ऽआवहेति तदाग्नेयायाज्यभागायाग्निं मावोढवा ऽआह सोम मावहेति तत्सौम्यायाज्यभागाय सोम मावोढवा ऽआहाग्निं मावहेति तद्व ऽएष ऽउभयुचाच्युत ऽआग्नेयः पुरोडाशो भवति तस्मा ऽअग्निं मावोढवा ऽआह ॥ १६ ॥

अथ यथादेवतम्। देवां २॥ ऽआज्यपां २॥‡ ऽआवहेति तत्प्रयाजानुयाजानावोढवा ऽआह प्रयाजानुयाजा वै देवा ऽआज्यपा ऽअमुꣳ होचायावहेति तदमुꣳ

---

* 'प्रेष्यति'–इति च। † 'अरां२'–इति क, ख; 'अराꣳ२'–इति ग, छ। ‡ 'देवां२ ऽआज्यपां२'–इति क, ख; 'देवाꣳ ऽआज्यपाꣳ२'–इति ग; 'देवाँ ऽआज्यपाँ'–इति छ।

Pariçiṣṭa Parvan, (Text) Fasc. 1–5 @ /6/ each	Rs.	1	14
Prākṛita-Paingalam, Fasc. 1–5 @ /6/ each		1	14
Pṛithivīrāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
ta Lakṣanam, (Text) Fasc. 1		1	8
ara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, asc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmani (English) Fasc. 1–2 @ /12/ each		1	8
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmani, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, asc. 1–12 @ /6/ each		14	10
Trikānda-Mandanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-3 @ /6/ each ...		1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. I		0	6
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Viṣnu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Alamgirnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/		1	8
Āin-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–5 @ 1/ each		5	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of 'Āzādi, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each		1	2
Isābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each		18	2
Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each		1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...		7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ...			
Nukhbatu-l-Fikr, (Text) Fasc. 1			
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each			
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārikh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārikh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn. (Text) Fasc. 1–5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ...		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11). 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members			
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar „ „	8	0
16.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899	4	0
	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

18-1-1901.

Books are supplied by V-P.P.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 988.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ.

VOL. I, FASCICULUS IV.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

	Rs.	
Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	1	8
Advaitachinta Kaustubhe, Fasc. 1	0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/	7	8
Anu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each	1	14
Aphorisms of Śāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–2	0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Fasc. 1–4	1	8
*Caturvarga Chintāmani (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each	19	14
Çlokavartika, (English) Fasc. 1–2	1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–15 @ /6/ each ...	4	8
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–2	0	12
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1–4	1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–8 @ /6/ each ...	3	0
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each	4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each	4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/	1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/	1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...	5	4
Nyayabinduṭīkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0

होचायावोढवा ऽआह स्वं महिमान मावहेति तत्स्वं महिमान मावोढवा ऽआह व्वाग्वा ऽअस्य स्वो महिमा तद्वाच मावोढवा ऽआहा च व्वह जातवेदः सुयुजा च यजेति तद्या ऽएवैतद्देवता ऽआवोढवा ऽआह ता ऽएवैतदाहा चैना वहानुद्या* च यजेति यदाह सुयुजा च यजेति ॥ १७ ॥

स वै तिष्ठन्नन्वाह । अन्वाह† ह्येतदसौ ह्यनुवाक्या तदसावेवैतद्भूत्वान्वाह तस्मात्तिष्ठन्नन्वाह ॥ १८ ॥

आसीनो याज्यां यजति । इयꣳ‡ हि याज्या तस्मान्न कश्चन तिष्ठन् याज्यां यजतीयꣳ हि याज्या तदियु मेवैतद्भूत्वा यजति तस्मादासीनो याज्यां यजति ॥ १९ ॥ ४ ॥

॥ इति तृतीयप्रपाठके चतुर्थं ब्राह्मणम् [४. २.] ॥

सामिधेन्यनुवचनानन्तर मग्ने महाँ असीति[1] निगदस्यानुवचनं[2] विधित्सुस्तत्प्रतिपाद्यायाः प्रशंसायाः कर्त्तव्यतां तदुपोद्घातत्वेन

---

* 'नुद्या'—इति ख, सायणीयभाष्यपुस्तकेषु च बहुषु ।

† 'न्वाहान्वाह'—इति ग । ‡ 'यजतीयꣳ'—इति ग ।

१— तै० ब्रा० ३. ५. ३. १ ; सं० २. ५. ९. १ ।

२— निगदानां यजुष्ट्वाधिकरणम्— मी० द० २अ० १पा० ३८—४५ सू ; न्या० मा० २. १. १३ अधि० द्रष्टव्यम् ।

प्रतिपादयति—"एतद्ध वा इति। 'गरिष्ठे' गुरुतमे। "प्रियस्थिरेत्यादिना गुरुशब्दस्य गरादेशः[1]। हविर्वहनार्थं गुरुतमे तस्मिन् होढत्वे योजयित्वा तस्योत्साहं जनयितुम् 'उपामदन्' अस्तुवन्। "वीर्यवान् वै"-इत्यादिः स्तुतिप्रकारः। अनया च स्तुत्या 'तम्' अग्निं 'वीर्ये' सम्यक् स्थापितवन्तः। इदं लौकिकेन दृष्टान्तेन प्रतिपादयति—"यथेद मिति। निगदस्यानुवचनं विधत्ते—"स यदिति। 'अतः' अस्मात्, सामिधेन्यनुवचनादित्यर्थः॥ १॥

अनुवक्तव्यं निगदं पठित्वा पदशो व्याचष्टे—"अग्ने महानित्यादिना। "स चेधात्मानं व्यकुरुताग्निं तृतीयं वायुं तृतीयम्"-इत्यादिश्रुतेः[2] अग्निवाय्वादित्यात्मना ब्रह्मणस्त्रेधावस्थानात् "ब्रह्म ह्यग्निः"-इति तादात्म्यप्रतिपादनम्। 'तस्माद्' ब्रह्मणो जातत्वाद् 'ब्राह्मणेति' अग्निः स्तूयते इत्यर्थः। 'भारत'-इति पदं मनुष्य द्वेधा निर्ब्रूते—"एष ह्येत्यादिना॥ २॥

"अथार्षेय मित्यादि। होढकर्तृकप्रवरविधिः॥ ३॥

तत्र धर्मविशेष माह—"परस्ताद्वागिति। तस्मिन्नार्षेयप्रवरणे कूटस्थ मृषि मारभ्य तत्पुत्रपौत्रादिक्रमेणार्वाचीनं वरणं कर्त्तव्यम्। यथा आङ्गिरसबार्हस्पत्यभारद्वाजेत्यादि। तथा च 'ज्यायसः' भावपरो निर्देशः; ज्यैष्ठ्यस्य 'पतय एवैतत् निह्नुते' अनेन प्रवरणेन निवेदयति। स्पष्ट मन्यत्॥ ४॥

१— पा० सू० ६. ४. १५७।

२— "अग्निः, स चेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयम्"-इति तृतीयोपरिष्टात् १०. ६. ५. ३.।

"देवेद्धः"-इत्यादि-निवित्पदानाम्[1] अनुवचनं विधत्ते— "स आर्षेय मुक्केति। तानि पदानि क्रमेण व्याचष्टे— "देवा ह्येत मित्यादिना। स्पष्टोऽर्थः ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

"आस्याच मिति। आस्यरूपं पात्रम् 'आस्याचम्'। "देवपात्रं वा इति। अग्नौ प्रक्षिप्तस्य हविषो देवैरद्यमानत्वादग्नेर्देवपात्रत्वम् ॥

एतद्वेदितुः फलं माह— "प्राप्नोति ह्येति। 'यस्य' खलु भोज्यस्य वस्तुनः सम्बन्धि 'पात्रं' 'प्रेप्सति'[2] प्राप्तुमिच्छति, तद्वस्तुसम्बन्धि 'पात्रं' 'प्राप्नोति' एवं वेदितेत्यर्थः ॥ १३ ॥ १४ ॥

"अरा२॥ऽइवेति। "यथारान्नेमिरिति। (यथा) चक्रस्य नाभौ नेम्याञ्च संयोजिताः कीलकाः 'अराः', तान् 'यथा' 'नेमिः' परितो वर्त्तमानान् व्याप्नोति, तद्वद् 'देवान्' अग्निरपि संव्याप्नोतीत्यर्थः ॥ १५ ॥

निवित्पदानन्तरं वक्तव्य मावाहननिगद मप्यनूद्य पदशो व्याचष्टे— "आवह देवानित्यादिना[3]। "देवानावोढवा इति। आङ्पूर्वाद्वहतेः

१— यजुर्निवित्पदान्येकादश, ऋङ्निवित्पदानि तु द्वादश; सन्ति च ऋग्यजुषोः पाठभेदाः। ऋग्वेदीयनिवित्पदानि ऋक्परिशिष्टीयनिविदध्याये पठितानि (१. १–१२), ऐतरेयब्राह्मणे च प्रपञ्च विहितानि (२. ५. १, २.)। यजुर्निवित्पदानि तु तैत्तिरीयब्राह्मणे समाम्नातानि (३. ५. ३. १–११), तैत्तिरीयसंहितायाञ्च तानि विहितानि (२. ५. ६. २–१२.); इहापि प्रपञ्चेव व्याख्यायन्ते।

२— 'प्रेप्स्यति'–इति ज, झ, ट। मूलेऽप्येव मेव पाठभेदः।

३— आवाहननिगदमन्त्रास्तु त्रयोदश। आम्नातास्तेऽपि तैत्तिरीयब्राह्मणे ३. ५. ३; विहिताश्च ते तत्संहितायाम् २. ५. ६. ७, ८।

स्वार्थे तवैन्-प्रत्ययः[१]; यष्टव्यान् देवान् आवोढु मानेतु मित्यर्थः। "आवह देवान्"-इति सामान्योक्तस्य आवाहनस्य विवरणम् "अग्निमग्न आवह"-इत्यादि निगदसिद्धम् ॥ १६ ॥

"अथ यथादेवत मिति। दर्शपूर्णमासयोरुभयत्र योऽग्निः पुरोडाशदेवता, तदावाहनानन्तरं निर्वापसमये यस्यै-यस्यै देवतायै येन क्रमेण निरूप्तम्, तेनैव क्रमेण तस्याः सर्वस्याः देवतायाः "अग्नीषोमावावह"-इत्यादिवाक्यैरावाहनं कार्य मित्यर्थः ॥

"देवाँ२॥ऽआज्यपानिति। प्रयाजानुयाजदेवतावाहनं विवक्षित मिति व्याचष्टे— "तत्प्रयाजानुयाजानिति। कर्म्मवाचिना प्रयाजानुयाजशब्देन तत्सम्बन्धिनो देवा लक्ष्यन्ते। ते हि हविर्भागाङ्गीकाराय वोढव्याः। तेषा माज्य मेव हि भागः; "यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तद्, यदुपभृति प्रयाजानुयाजेभ्यस्तत्"-इति[२] जौहवौपभृतयोराज्ययोस्तद्धविष्त्वश्रवणात्[३] ॥

१— पा० सू० ३. ४. ६। २— २०१ पृ० ८, ६ कण्डिके द्रष्टव्ये।

३— "त्रयस्त्रिंशद्वै देवाः सोमपाः, त्रयस्त्रिंशदसोमपाः। अष्टौ वसवः, एकादश रुद्राः, द्वादशादित्याः, प्रजापतिश्च, वषट्कारश्चैते देवाः सोमपाः; एकादश प्रयाजाः, एकादशानुयाजाः, एकादशोपयाजाः; एतेऽसोमपाः पशुभाजनाः"-इति ऐ० ब्रा० २. २. ८। तत्र वसूनां अष्ट नामानि तै०आर० १. ६. १, वायूना मेकादश नामानि च तत्रैव १. ६. ४, आदित्यानां द्वादश नामानि च० उप० ३. ६. ५, निघ० ५. ६, निरु० १२. ११-३० द्रष्टव्यानि। प्रयाजानां परिचयस्तु तै० ब्रा० ३. ६. २, ३; तथा अनुयाजाना मपि तत्रैव ३. ६. १३, १४; एव मुपयाजानान्तु तै० सं० १. ५. ११, ६. ४. १।

"अग्निं होत्राय"-इत्यनेन खिष्टकृतोऽग्नेरावाहनं विवक्षितम् ॥

"खं महिमान मिति। देवताया अग्नेः खभूतो वाग्रूपो 'महिमा'; तस्यावाहनम् "आवह जातवेदः"-इतिवाक्येन ॥

प्राक्प्रतिपादितस्याज्यभागादिदेवतानां सर्वासा मावाहनस्य निगमनम्— "सुयजा च यजेति"-इति। अस्य व्याख्यानम्— "अनुष्ठ्या च यजेति"-इति। 'अनुष्ठ्या'[1] अनुक्रमेण, सम्यगित्यर्थः ॥ १७ ॥

यदेतत्सामिधेन्यादिक मनुवचनादि, तत्सर्वं तिष्ठतैव वक्तव्य मिति विधत्ते—"स वा इति। कुत इत्यत आह—"अन्वाह होत-रिति। अनुवाक्या हि द्युलोकरूपा तिष्ठतश्च द्युलोकसम्बन्धो भवति; अतोऽनुवाक्या[2] तावत्तिष्ठतैवानुवक्तुं योग्या; अनुवचनसाम्यात्सामि-धेन्यादिक मपि तिष्ठतैव पठितुं युक्त मित्यर्थः ॥ १८ ॥

याज्यायां विशेष माह— "आसीनो याज्या मिति। 'हि' यस्मात् 'द्यौः' पृथिव्यात्मिकैव 'याज्या'[3], तस्मात् याज्यापाठस्तिष्ठता

१— 'अनुष्ठ्या'-इति पाठो मद्दृष्टेषु डातिरिक्तेषु सर्वेष्वेव सायणभाष्य-पुस्तकेषु; डा० वेवर-दृष्टभाष्यपुस्तकेषु चैव मेव।

२,३— "सर्वेषा मग्नेऽग्नेऽनुवाक्यास्ततो याज्याः"-इति आश्व० श्रौ० सू० ३. ७. ३। "पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति; जातानेव भ्रातृव्यान् प्रणुदते। उपरिष्टाल्लक्ष्मा याज्या; जनिष्यमाणानेव प्रतिनुदते"-इति तै० सं० २. ६. २. ३। "मन्त्रप्रतिपाद्याया देवताया नामधेयं लक्ष्म; तद् यस्या ऋचि पूर्वार्द्धे विद्यते, सा पुरोऽनुवाक्या; तन्नाम यस्या मुत्तरार्द्धे विद्यते, सा याज्या। तद्यथा— 'अग्निर्मूर्द्धा'-इति पूर्वार्द्धे-ऽग्निशब्दः, 'शिक्षा मग्ने चक्षसे'-इत्युत्तरार्द्धेऽग्निशब्दः"-इति च तत्र सा० भा०। "हूयति वा अनुवाक्यया, प्रयच्छति याज्यया •—• सा

न कर्त्तव्यः; 'आसीनश्च' सन्निकर्षविशेषात् पृथिवीरूपापन्नो भवति; तदिय मित्युक्तम्— "इय मेवैतद् भूलेति ॥ १९ ॥ ४ [४. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे चतुर्थाध्याये द्वितीयं ब्राह्मणम्[१] ॥

यो ह वा ऽग्निः सामिधेनीभिः सुमिद्धः। अतितरा॒ꣳ* ह वै स इतरस्मादग्नेस्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥ १ ॥

स यथा ह्वैवाग्निः। सामिधेनीभिः सुमिद्धस्तपत्येव॒ꣳ ह्वैव ब्राह्मणः सामिधेनीर्विद्वाननुब्रुवंस्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥ २ ॥

या पुरस्ताल्लक्षणा सानुवाक्या स्यात् ०—० अथ योपरिष्टाल्लक्षणा सा याज्या स्यात्"—इति चैवैवोपरिष्टात् ७. २. १७—१९। "पुरोऽनुवाक्या देवतास्मरणार्था, याज्या च हविःप्रदानार्था"—इति हि कात्या० श्रौ० १. ८. ९ सू० वृ०।

१— अस्मिन् ब्राह्मणे प्रवरनिगदमन्त्रपदानां मावाहननिगदमन्त्रपदानाञ्च पाठविधानव्याख्यानान्यामातानि, याज्यानुवाक्ययोरासनोपदेशोऽस्माभातः। तत्र चाहवनीयस्योत्तरत उपविश्य दक्षिणं जान्वाच्य "वृणीध्वं हव्यवाहनोऽग्निम्"—इति ब्रुवतैव होत्रा प्रवरमन्त्रपाठः कार्यः॥

* 'सुमिद्धोऽतितरा॒ꣳ'—इति ख। 'सुमिद्धो। ऽतितरा॒ꣳ'—इति ग।

सोऽब्राह्। प्र व ऽइति प्राणो वै प्रवान् प्राणु मेवैतया सुमिन्धेऽग्न ऽआयाहि व्वीतय ऽइत्यपानो वा ऽएतवानपानु मेवैतया सुमिन्धे बृहच्छोचा यविष्ठ्येत्यु-दानो वै बृहच्छोचा ऽउदानु मेवैतया सुमिन्धे ॥ ३ ॥

सु नः पृथु श्रवाय्य मिति। श्रोचं वै पृथु श्रवाय्यꣳ श्रोचेणु हीदु मुरु पृथु शृणोति श्रोच मेवैतया सुमिन्धे ॥ ४ ॥

ईडेन्यो नमस्य ऽइति। व्वाग्वा ईडेन्या* व्वाग्घीदꣳ सुर्व्व मौट्टे व्वाचेदꣳ सुर्व्व मौडितं व्वाच मेवैतया सुमिन्धे ॥ ५ ॥

अश्वो नु देववाहन ऽइति। मनो वै देववाहनं मनो हीदं मनस्विनं भूयिष्ठं व्वनीवाह्यते मन ऽएवै-तया सुमिन्धे ॥ ६ ॥

अग्ने दीद्यतं बृहदिति। चक्षुर्व्वै दीदयेव चक्षुरेवैतया सुमिन्धे ॥ ७ ॥

अग्निन्दूतं व्वृणीमह ऽइति। य ऽएवायं मध्यमः प्राणु ऽएतु मेवैतया सुमिन्धे सा हैषान्तस्था प्राणाना मतो ह्यन्यु ऽऊर्द्ध्वाः प्राणा ऽअतोऽन्ये ऽवाञ्चोऽन्तस्था ह भव-

---

* 'ईडेन्यो'-इति क, ग।

त्यन्तस्या मेनं मन्यन्ते यु ऽएव मेता मन्तस्यां प्राणानां व्वेद ॥ ८ ॥

शोचिष्केशस्तु मीमह ऽइति। शिश्नं वै शोचिष्केशः शिश्नꣳ हीदꣳ शिश्निनं भूयिष्ठꣳ शोचयति शिश्नमेवैतया सुमिन्धे ॥ ९ ॥

सुमिद्धो ऽअग्न ऽआहुतेति। यु ऽएवाय मुवाङ् प्राणु एतु मेवैतया सुमिन्ध ऽआजुहोता दुवस्यतेति सुर्व्व मात्मानꣳ सुमिन्ध ऽआ नखेभ्योऽथो लोमभ्यः ॥ १० ॥

स युद्येनं प्रथमायाꣳ सामिधेन्या मनुव्याहुरेत्। तं प्रति ब्रूयात् प्राणं व्वा ऽएतदात्मनोऽग्नावाधाः प्राणेनात्मन ऽआर्त्तिं मारिष्यसीति तथा हैव स्यात् ॥ ११ ॥

युदि द्वितीयस्या मनुव्याहुरेत्। तं प्रति ब्रूयादपानं व्वा ऽएतदात्मनोऽग्नावाधा अपानेनात्मन ऽआर्त्तिं मारिष्यसीति तथा हैव स्यात् ॥ १२ ॥

युदि तृतीयस्या मनुव्याहुरेत्। तं प्रति ब्रूयादुदानं व्वा ऽएतदात्मनोऽग्नावाधा उदानेनात्मन ऽआर्त्तिं मारिष्यसीति तथा हैव स्यात् ॥ १३ ॥

युदि चतुर्थ्या मनुव्याहुरेत्। तं प्रति ब्रूयाच्छ्रोचं व्वा ऽएतदात्मनोऽग्नावाधाः श्रोचेणात्मन ऽआर्त्तिं मारिष्यसि बधिरो भविष्यसीति तथा हैव स्यात् ॥ १४ ॥

युदि पञ्चम्या मनुव्याहुरेत् । तं प्रति ब्रूयाद्वाचं व्वा ऽएतदात्मनोऽमावाधा व्वाचात्मन ऽआर्त्तिं मारिष्यसि मूकी भविष्यसीति तथा हैव स्यात् ॥ १५ ॥

युदि षष्ठ्या मनुव्याहुरेत् । तं प्रति ब्रूयान्मनो वा ऽएतदात्मनोऽमावाधा मनसात्मन ऽआर्त्तिं मारिष्यसि मनो मुषिगृहीतो मोमुघ*श्चरिष्यसीति तथा हैव स्यात् ॥ १६ ॥

युदि सप्तम्या मनुव्याहुरेत् । तं प्रति ब्रूयाच्चक्षुर्व्वा ऽएतदात्मनोऽमावाधाश्चक्षुषात्मन ऽआर्त्तिं मारिष्यस्यन्धो भविष्यसीति तथा हैव स्यात् ॥ १७ ॥

युद्यष्टम्या मनुव्याहुरेत् । तं प्रति ब्रूयान्मुध्यं व्वा ऽएतत् प्राणु मात्मनोऽमावाधा मुध्येन प्राणेनात्मन ऽआर्त्तिं मारिष्यस्युद्ध्मायी† मरिष्यसीति तथा हैव स्यात् ॥ १८ ॥

युदि नवम्या मनुव्याहुरेत् । तं प्रति ब्रूयाच्छिश्नं व्वा ऽएतदात्मनोऽमावाधाः शिश्नेनात्मन ऽआर्त्तिं मारिष्यसि क्लीवो भविष्यसीति तथा हैव स्यात् ॥ १९ ॥

युदि दशम्या मनुव्याहुरेत् । तं प्रति ब्रूयादुवाच्यं वा

---

* 'मोमुघ'–इति चातिरिक्तेषु ; 'मोमुग'–इति च वृत्तौ डा० वेवरेण ।

† 'स्युद्ध्माय'–इति चातिरिक्तेषु ; 'स्युद्ध्माय'–इति च वृत्तौ डा० वेवरेण ।

ऽएतत् प्राणु मात्मनोऽमावाधा ऽश्ववाचा प्राणेनात्मन ऽआर्त्तिं मारिष्यस्युपिनद्धो मरिष्यसीति तुथा हैवु स्यात् ॥ २० ॥

युद्येकादश्या मनुष्याहुरेत्। तं प्रति ब्रूयात् सुर्व्वं व्वा ऽएतदात्मान मम्मावाधाः सुर्व्वेणात्मनार्त्तिं मारिष्यसि क्षिप्रेऽमुं लोकु मेष्यसीति तुथा हैवु स्यात् ॥ २१ ॥

स युथा हैवाग्निꣳ। सामिधेनीभिः सुमिद्ध मापद्यार्त्तिं न्येत्येवꣳ हैवु ब्राह्मणꣳ सामिधेनीर्व्विद्वाꣳस मनुब्रुवन्त* मनुष्याहृत्यार्त्तिं न्येति ॥ २२ ॥ ५ ॥

॥ इति तृतीयप्रपाठके पञ्चमं ब्राह्मणम् [४. ३.] ॥

सामिधेनीभिर्ऋग्भिः समिद्धस्याग्नेः लौकिकाग्निसकाशादतिशय माह— "यो ह वा इति। यस्मादतिशयेन 'तपति', अतः राक्षसादिभिः 'धर्षितुं' हिंसितुं, (मर्षितुं) स्प्रष्टुं न शक्य इत्यर्थः ॥ १ ॥

समिद्वाग्निदृष्टान्तेन एवंवेदितुर्होतुरपि तददनुवचनं कुर्वतो यथोक्तविशेषापत्तिर्भवतीत्याह— "स यथेति। 'अनवधृष्यः'-'अनवमृष्यः'-इत्युभयत्र धृषेर्मृशेश्च[1] "ऋदुपधाच्चाकृपिचृतेः"-इति[2] कर्मणि क्यप् ॥ २ ॥

---

* 'व्विद्वाꣳसꣳ समनुब्रुवन्त'-इति च।

१— 'मर्षेश्च'-इति जादिष्वपपाठः। "धृष प्रसहने"-इति धा० चु० प० ३१५। "मृष आमर्शने"-इति धा० तु० प० १४२। 'आमर्शनं स्पर्शः'-इति सि० कौ०। २— पा० सू० ३. १. ११०।

अथैताः सामिधेनीः प्रत्येकं तत्तल्लिङ्गोपन्यासेन प्राणापानओषादिकरणग्रामविशिष्टात्मसंस्कारहेतुतया प्रशंसति— "सोऽग्नाइहेत्यादिना। "प्राणो वै प्रवानिति। प्रगमनयुक्तत्वात्[१] 'प्राणः' 'प्र'शब्दवान्। प्राणवृत्तिर्हि दृढापिङ्गलाभ्यां प्राचीनं निर्गच्छति, अतः ('एतया') प्रशब्दोपेतया प्रथमया सामिधेन्या[२] प्रगमनवन्तं[३] 'प्राण मेव' 'यमिन्धे' दीपयति। एव मुत्तरत्रापि योज्यम्॥

"अपानो वा एतवानिति। बहिर्निर्गतस्य वायोरात्माभिमुखी वृत्तिर्ह्यपानः; अत आगमनविशिष्टत्वात् 'अपानः' आकारोपसर्गवानित्यर्थः[४]॥

"उदानो वै बृहच्छोचा इति[५]। 'बृहत्' अधिकं 'शोचते' दीप्यत इति 'बृहच्छोचाः' अग्निः; उदानवायुरपि देहस्योत्क्षेपणात् अधिकतेजोयुक्तः; अतो 'बृहच्छोचाः'-इतिशब्देन 'उदानः' उपस्थाप्यते॥ २॥

१— 'प्राग्गमनयुक्तत्वात्'-इति ङ।

२— "प्र वो वाजा अभिद्यवः। हविष्मन्तो घृताच्या। देवाञ्जिगाति सुम्नयुः"-इति प्रथमा सामिधेनी 'प्रवती', 'प्रेतिलिङ्गा' वा। तै० ब्रा० ३. ५. २. १। ३— 'प्राग्गमनवन्तं'-इति ङ।

४— "अग्न आ याहि वीतये। गृणानो हव्यदातये। नि होता सत्सि बर्हिषि"-इति द्वितीया सामिधेनी 'आवती', 'एतिलिङ्गा' वा। तै० ब्रा० ३. ५. २. २।

५— "तं त्वा समिद्भिरङ्गिरः। घृतेन वर्द्धयामसि। बृहच्छोचा यविष्ठ्य"-इति तृतीया सामिधेनी 'गौर्वती'। तै० ब्रा० ३. ५. २. ३।

"स न इति। "ओचं वै पृथु अवाय्य मिति[1]। 'पृथु' विस्तीर्णं अवणसाधनं 'पृथु अवाय्यम्'। अनेन शब्देन ओचेन्द्रियं विवक्षित मित्याह— "ओचेण हीति। 'उरु'-इति पृथुशब्दव्याख्यानम् ॥ ४ ॥

"ईडेन्य इति। "वाग्वा ईडेन्येति। "ईडेन्यो नमस्यः"—इत्यृचि[2] 'ईडेन्य'-शब्देन वाग् विवक्षिता। कथ मेतदित्याशङ्क्योपपादयति— "वागिति। 'वाग्' एव खल्विदं 'सर्वं' जगत् 'ईष्टे' स्तौति। "ईड़ स्तुतौ"-इति धातुः[3]। यचाप्यन्यः स्तोता, तचापि वाचैव करण-भूतया सर्वं मीड़ितं भवति। ईष्टे ईड्यते अनयेति वा कर्तृकरण-व्युत्पत्त्या 'ईड़ेन्य'-शब्दस्य वाग्वाचकत्व मवगन्तव्य मित्यर्थः ॥ ५ ॥

"अश्वो न इति। "मनो वै देववाहन मिति। "अश्वो न देववाहनः"-इति[4] 'देववाहन'-शब्दो मनस उपलक्षकः। 'हि' यस्मात् 'मनः' 'मनस्विनं' पुरुषं 'भूयिष्ठम्' अत्यधिकं 'वनी-वाह्यते' भृशं वहति, देवान् शीघ्रं प्रापयति; अतो देववाहनं मन इत्यर्थः ॥ ६ ॥

"अग्ने दीद्यत मिति। "चक्षुर्वै दीद्येवेति। 'चक्षुः' इन्द्रियं

१— "स नः पृथु अवाय्यम्। अच्छा देव विवाससि। वृष्टदमे सुवीर्यम्"-इति चतुर्थी सामिधेनी 'पृथुवती'। तै० ब्रा० ३. ५. २. ४।

२— "ईडेन्यो नमस्यस्तिरः। तमाꣳसि दर्शतः। समग्निरिध्यते वृषा"-इति पञ्चमी सामिधेनी 'नमस्वती'। तै० ब्रा० ३. ५. २. ५।

३— धा० अदा० आ० ६।

४— "वृषो अग्निः समिध्यते। अश्वो न देववाहनः। तꣳ हविष्मन्त ईडते"-इति षष्ठी सामिधेनी 'हविष्मती'। तै० ब्रा० ३. ५. २. ६।

हि रूपादिप्रकाशकत्वात् "अग्ने दीद्यतम्"-इति[1] दीद्यच्छब्देन दीप्तिवाचिनोपस्थाप्यते ; अतो ऽनया चक्षुःसमिन्धनम् ॥ ७ ॥

"अग्निं दूत मिति[2]। "य एवायं मध्यमः प्राण इति। प्राणापानादिपञ्चवृत्त्याश्रयभूतो 'यः' क्रियाशक्त्यात्मको देहमध्येऽवस्थितः 'प्राणः', तस्य समिन्धनम् "अग्निं दूतम्"-इत्यनया। दूतो ह्यग्निः सर्वेषां देवानां मुखम्, तथा प्राणोऽपीति, तेन समिन्धनस्योपपत्तिः ॥

"सा वैषान्तस्थेत्यादि। 'सैषा' "अग्निं दूतं वृणीमहे"-इति सामिधेनी, मध्यमप्राणरूपेण प्राणापानादिसंस्तूयमानानां मन्यासां मृचाम् 'अन्तस्था' अन्तरवस्थिता भवति। 'अन्ये' हि 'प्राणाः' चक्षुःश्रोत्रादयः 'अतः' अस्मात्प्राणादारभ्य 'ऊर्ध्वाः' चरन्ति ; पायूपस्थादयः 'अन्ये' प्राणाः 'अतः' अस्मान्मध्यमात् प्राणादेवारभ्य 'अवाञ्चः' अवाङ्मुखा अन्तरवस्थिता भवन्ति ॥

एवं वेदितुः फलं माह— "अन्तस्था मिति। 'अन्तस्थाम्' अन्तरवस्थितां प्राणदेवता मित्यर्थः ॥ ८ ॥

के पुनरेतेषां मध्येऽवाञ्चोऽन्तस्थाः प्राणा इति, तान् दर्शयति— "ग्रोचिष्केशस्त मीमहे इत्यादिना[3]। "ग्निश्चं वै ग्रोचिष्केश मिति।

१— "वृषणं त्वा वयं वृषन्। वृषाणः समिधीमहि। अग्ने दीद्यतं बृहत्"-इति सप्तमी सामिधेनी 'वृषणवती'। तै० ब्रा० ३. ५. २. ७।

२— "अग्निं दूतं वृणीमहे। होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्"-इति अष्टमी सामिधेनी 'दूतवती'। तै० ब्रा० ३. ५. २. ८।

३— "समिद्यमानो अध्वरे। अग्निः पावक ईड्यः। ग्रोचिष्केशस्तमीमहे"-इति नवमी सामिधेनी 'समिद्यमानवती'। तै० ब्रा० ३. ५. २. ९।

तदुपपादनम्— "ग्निश्चं होति। अभिलषितस्त्रीविरहे अतिग्रयेन शोकहेतुत्वात् 'शोचिष्केश'-शब्देन 'ग्निश्चं' पुंश्चलनं लक्ष्यते। तथा च एतच्छब्दोपेतयर्चा आनन्दनव्यापारस्य उपस्थाख्यस्येन्द्रियस्य समिन्धनं शतं भवतीत्यर्थः ॥ ९ ॥

"समिद्धो अग्न इति[1]। "य एवाय मवाङ् प्राण इति। 'प्राण'-शब्द इन्द्रियवचनोऽवाङ्मुखः; अपानाख्य मिन्द्रिय मित्यर्थः ॥

"सर्व मात्मान मिति। उक्तेन्द्रियसङ्गात मापादमस्तकव्याप्तं जीवात्मान मेव उत्तमया सामिधेन्या[2] 'समिन्धे'। तस्या आत्मनश्च उक्तरीत्या सर्वोपरि वर्त्तनं साम्यम् ॥ १० ॥

एव मेकादश सामिधेनीः[3] प्रत्यृचं लिङ्गविशेषोपन्यासेन प्राणापानादीनां समिन्धनहेतुतया प्रशस्य तत्र तदनुवचनसमये ग्रपतो देवस्य प्राणापानादिवियोजनहेतुत्वेन प्रशंसति— "स यद्येन मिति। 'प्रथमायां सामिधेन्याम्' अनूच्यमानायाम् 'एनं' होतारं 'यदि' देवः 'अनुव्याहरेद्' ग्रपेत्। "अनुव्याहारः ग्रापः"-इति हि धूर्त्तस्वामी भाष्यकारः[4]। 'तम्' अनुव्याहरन्तं 'प्रति' होता

१— "समिद्धो अग्न आहुत। देवान् यक्षि स्वध्वर। त्वꣳ हि हव्यवाडसि"-इति दशमी सामिधेनी 'समिद्धवती'। तै० ब्रा० ३. ५. २. १०।

२— "आजुह्वाना दुवस्यत। अग्निं प्रयत्यध्वरे। इळीध्वꣳ हव्यवाहनम्"-इत्येकादशी सामिधेनी 'उत्तमा'। तै० ब्रा० ३. ५. २. ११।

३— आसा मेव सामिधेनीनां व्याख्यानानि पुरस्तादाम्नातानि (३ ब्रा०)।

४— आपस्तम्बीययज्ञपरिभाषादिश्रौतसूत्रेषु एतत्कृतभाष्याणि त्वद्यापि मापस्थन्त एव, शतपथस्याप्येतत्कृतं भाष्यं सायणादिभिरवलोकितं

'ब्रूयात्',— 'एतत्' एतर्हि 'आत्मनः' स्वसम्बन्धिनं 'प्राणं' हे ग्नयो! 'अग्नौ' 'आधाः' निहितवानसि। 'ते' तव 'प्राणेन' निमित्तेन ('आत्मनः') स्वात्मनः ('आर्त्तिं') पीड़ां प्राप्स्यसीति[1]। एवं चोक्ता प्रतिवचने कृते तस्य देव्यस्य यथोक्तं 'तथैव' सत्यं भवेत्। स्त्रियां च प्राणापानादिप्रतिपादकत्वं प्रागेव प्रतिपादितम्[2]। एव मुत्तरत्रापि योजना। अर्थो निगदसिद्धः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

"यदि षष्ठ्या मिति। "मनो मुषिग्रहीत इति। मनसो मोषणं विपरिलोपः, तेन ग्रहीतः, अत एव अतिग्रथेन मूढः चरिष्यसीत्यर्थः ॥ १६ ॥ १७ ॥

"यद्यष्टम्या मिति। "उद्ध्मायेति। 'उद्ध्मानम्' ऊर्द्धं श्वसनम्, तत्प्राप्येत्यर्थः ॥ १८ ॥ १९ ॥

"यदि दशम्या मिति। "अपिनद्धो मरिष्यसीतीति। 'अपिनद्धः' बन्धनयुक्त इत्यर्थः ॥ २० ॥

"यद्येकादश्या मिति। "क्षिप्रेऽमुं लोक मिति। 'क्षिप्रे' अल्प एव काले, कालविलम्ब मन्तरेण 'अमुं' द्युलोकं गमिष्यसीत्यर्थः ॥ २१ ॥

स्यात्। इहैवोपरिष्टात् पुनरपि ६. १. १८; पुनः ४. ५. २. १३। कातीयश्रौतव्याख्यानेऽप्येव मेव २५. १०. १५।

१— "ऋ गतिप्रापणयोः"—इत्यस्य रूपं मूले श्रुतम् 'आरिष्यसि'—इति; अस्य चेदं प्रतिवचनं प्राप्स्यसीति।

२— २९५ पृ० १–४ पं० द्रष्टव्यम्।

एवं सामिधेनीरनुब्रुवतो होतुरग्निसमानत्वात् तद्दृष्टान्तत्वेन होत्रापकारिणः प्रतिपादिता सार्त्तिं निगमयति—"स यथेति। 'सामिधेनीभिः' करणैः 'समिद्ध मग्निं' प्राप्य 'यथा आर्त्तिं' 'ऋेति' नितरां प्राप्नोति, तथैव 'सामिधेनीः' विदुषो होतुर्दैर्घ्यस्य तदनुव्याख्यानिमित्ता मुक्तविधां पीड़ां प्राप्नोतीत्यर्थः ॥२२॥ ५ [४.३.] ॥

इति श्रीमायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे चतुर्थाध्याये तृतीयं ब्राह्मणम्[1] ॥

तं व्वा ऽएतु मग्निꣳ सुमैन्धिषत। सुमिद्धे देवेभ्यो जुहवामेति तस्मिन्नेते ऽएव प्रथमे ऽआहुती जुहोति मनसे चैव व्वाचे च मनश्च ह वै* व्वाक् च युजौ देवेभ्यो यज्ञं व्वहतः ॥ १ ॥

स युदुपाꣳशु क्रियते। तन्मनो देवेभ्यो यज्ञं वहत्यथ युदाचा निरुक्तं क्रियते तदाग्देवेभ्यो यज्ञं वहत्येतद्वा इदं द्वयं क्रियते तुदेते ऽएवैतत् सुन्तर्प्पयति तृप्ते प्रीते देवेभ्यो यज्ञं व्वहात ऽइति ॥ २ ॥

१— अस्मिन् ब्राह्मणे सामिधेनीमन्त्राणां एथक्-एथक् मन्त्रसंवादाः, तत्तत्पाठव्याघातकारिणां एथक्-एथक् दोषाश्चाम्नाताः।

* 'चैव'—इति च।

स्रुवेण त माघारयति। यं मनस ऽआघारयति व्वषा हि मनो व्वषा हि* स्रुवः ॥ ३ ॥

स्रुचा त माघारयति। यं व्वाचु ऽआघारयति योषा हि व्वाग् योषा हि स्रुक् ॥ ४ ॥

तूष्णीं त माघारयति। यं मनस ऽआघारयति न स्वाहेति चनानिरुक्तꣳ हि मनो ऽनिरुक्तꣳ ह्येतद् यत् तूष्णीम् ॥ ५ ॥

मन्त्रेण त माघारयति। यं व्वाचु ऽआघारयति निरुक्ता हि व्वाङ् निरुक्तो हि मन्त्रः ॥ ६ ॥

आसीनस्त माघारयति। यं मनस ऽआघारयति तिष्ठंस्तं यं व्वाचे मनश्च ह यं व्वाक् च युजौ देवेभ्यो यज्ञं व्वहतो यतरो वै युजोर्हसीयान् भवत्युपव्वहं वै तस्मै कुर्व्वन्ति व्वाग्वै मनसो ह्रसीयस्युपरिमिततर मिव हि मनः परिमिततरेव हि व्वाक् तद्वाचु ऽएवैतदुपव्वहं करोति ते सयुजौ देवेभ्यो यज्ञं व्वहतस्तस्मात् तिष्ठन् वाच ऽआघारयति ॥ ७ ॥

देवा ह वै यज्ञं तन्वानाः। ते† ऽसुरराक्षसेभ्य ऽआसङ्गाद् बिभयाञ्चक्रुस्त ऽएतद्दक्षिणतः प्रत्युदश्रय-न्नुच्छ्रित मिव हि व्वीर्यं तस्माद्दक्षिणतस्तिष्ठन्नाघारयति

---

* 'हि'–इति घ। † 'तन्वानास्ते'–इति क, ग।

स युदुभयुत ऽआघारयति तुस्मादिदं मुनश्च व्वाक् च समानु मेव सन्तानेव शिरो ह वै यज्ञुस्यैतयोरन्यतरु आघारयोर्मूल मन्यतरुः ॥ ८ ॥

स्रुवेण त मुाघारयति। यो मूलं यज्ञुस्य स्रुचा त मुाघारयति यः शिरो यज्ञुस्य ॥ ९ ॥

तूष्णीं त मुाघारयति। यो मूलं यज्ञुस्य तूष्णी मिवु ह्यीदं मूलं नो ह्युच व्वाग्वुदति ॥ १० ॥

मुन्त्रेण त मुाघारयति। यः शिरो यज्ञुस्य व्वाग्घि मुन्त्रः शीर्ष्णो ह्येय मुधि वाग्वुदति ॥ ११ ॥

आसीनस्त मुाघारयति। यो मूलं यज्ञुस्य निषण्ण मिवु ह्यीदं मूलं तिष्ठंस्त मुाघारयति यः शिरो यज्ञुस्य तिष्ठतीवु ह्यीदꣳ शिरः ॥ १२ ॥

सु स्रुवेण पूर्व्व माघारु माघार्याहु। अग्निु* मग्नीत्सु-म्मृहीति युथा धुर मध्यूहेदेवं तद्यत्पूर्व माघारु माघारु-यत्यध्युह्य हि धुरं युञ्जन्ति† ॥ १३ ॥

अथ सुम्मार्ष्टि। युनुक्त्येवैन मेतद्युक्तो देवेभ्यो यज्ञं व्वहादिति तुस्मात् सुम्मार्ष्टि परिक्रामꣳ सुम्मार्ष्टि परि-क्रामꣳ हि योग्यं युञ्जन्ति त्रिस्त्रिः सुम्मार्ष्टि चिदृद्धि यज्ञः ॥ १४ ॥

---

* 'माघार्याहाग्नि'–इति क, ग।

† 'यञ्जन्ति'–इति, 'यञ्जन्ति'–इति च च-पुस्तके।

स सुम्भार्ष्टि। अग्ने व्वाजजिद्वाजं त्वा सरिष्यन्तं (त्वा*) व्वाजजितꣳ सुम्भाज्मीति यज्ञं त्वा व्वक्ष्यन्तं (व्वा†) यज्ञियꣳ सुम्भाज्मीत्येवैतदाहाथोपरिष्टात्तूष्णीं चिस्तघुथा युक्ता प्राजेत्प्रेहि व्वहेत्येव मेवैतत् कुशयोपक्षिपति प्रेहि देवेभ्यो यज्ञं‡ व्वहेति तस्मादुपरिष्टात्तूष्णीं चिस्त-घुदेतदन्तरेण कुर्म्म क्रियते तस्मादिदं मनश्च व्वाक् च समानु मेव सन्नानेव ॥ १५ ॥ ६ ॥

॥ इति तृतीयप्रपाठके षष्ठं ब्राह्मणम् [४· ४·] ॥

अथाघाराख्यौ होमौ विधातुं सिद्ध मर्थं मनुवदति—"तं वा एत मिति। 'तम् एतम्' प्रकृत माहवनीयम् 'अग्निम्' 'समैन्धिषत' सम्यग् दीप्त मकुर्वन्। केनाभिप्रायेणेति त माह— "समिद्ध इति। 'तस्मिन्' सन्दीप्तेऽग्नौ 'एते एव' मुखे आघाररूपे 'आज्यती' वाङ्मनसयोरर्थं 'जुहोति'। कुतः? 'मनश्च वाक् च' इत्युभौ 'युजौ' मिथुनीभूतौ सन्तौ 'देवेभ्यः' यज्ञमभिलक्ष्य हविः प्रापयत इति' ॥ १ ॥

---

* च-पुस्तकमात्रेऽयैतदधिकं पदम्।

† ख-पुस्तकमात्रेऽयैतदधिकं पदम्। ‡ 'यज्ञं'—इति ग, च।

१—ङ-पुस्तकमात्र मवलम्ब्यैतदिह सायणीयं भाष्यं सम्पादितम्; ज-पुस्तके त्वस्यैवं भाष्यम्— "तं वा एत मिति। 'समैन्धिषत' सन्दीपितवन्तः। यजमानः प्रयोक्तृत्वेन, अध्वर्युरिध्माधानेन, ब्रह्मा समिधेन्यनुज्ञया, होतानुवचनेन। किमर्थम्? 'समिद्धे' सति आज्यती होष्याम इति। 'तस्मिन्' समिद्धे 'एते एव' पूर्वोत्तराघारलक्षणे 'प्रथमे आज्यती' 'जुहोति'; न तावदन्यां काञ्चिदन्यदेवताम्। आध्यात्मिकाभ्यां

तयोः क्रमेण हविःप्रापण मुच्यते— "स यदिति। 'यत्' एतत् इदम् 'उपांशु' निरुक्तरूप माज्यतिद्वयं 'क्रियते', एतदेव 'तत्' आज्यतियुग्मम् 'एते' मनोवाचौ सन्तर्पयति। शेषं सुगमम्[1] ॥ २ ॥

स्रुवस्रुग्भ्यां क्रमेणाघारौ कर्त्तव्याविति विधत्ते— "स्रुवेणेति। मनसो हि कामोत्पत्तिद्वारा वृषत्वम्, इति तयोः साम्यम्; अतो मनःसम्बन्धिन आघारस्य स्रुवसाध्यत्वम्; वाक्स्रुचोः स्त्रीत्वं समानम्, अतो वाक्सम्बन्धिन आघारस्य स्रुक्साध्यत्वं युक्त मित्यर्थः ॥ ३ ॥ ४ ॥

अथैतयोराघारयोः क्रमेण अमन्त्रकत्व-समन्त्रकत्व-लक्षणौ गुणौ विधत्ते— "तूष्णी मित्यादिना। "खाहेति चनेति। 'चन'-शब्दोऽप्यर्थे[2]; खाहेत्यपि शब्दं न ब्रूयादित्यर्थः। मनोदेवत्याघारस्य तूष्णीकत्वं युक्त मिति प्रतिपादयति— "अनिरुक्तं हीति। निगदसिद्ध मन्यत् ॥ ५ ॥ ६ ॥

रूपाभ्यां प्रजापति मिव दर्शयन्नाह— "मनसे चैव वाचे चेति। किं कारणम्? ताभ्यां प्रथम मिति। "मनश्च ह वै वाक् चेति। 'युजौ' युज्येते इति, योक्तव्यौ इत्यर्थः। युक्तौ च तौ अग्नौ वहत इत्यभिप्रायः ॥ १ ॥ स्यादिदं हरि स्वामिनः?। ऋादिपुस्तकेषु साख्येवाच भाष्यम्; ठ-पुस्तके त्वितः पूर्वत एव सप्तमाध्यायीयद्वितीयब्राह्मणं यावत् भाष्यं त्रुटितम्; ढ-पुस्तकेऽप्येतद्भाष्याभावः।

१— ञ-पुस्तके त्वस्यैवं भाष्यम्— "स यदुपांशुमिति। किं पुनर्यज्ञस्य, कोऽत्र वहति?। वोढव्यविभागायाह— "एतद्वा इद मिति। द्वित्वावधारण मिद मेव 'द्वयं क्रियते' यच्च वाचो — — यच्च तद्विपरीत मिति ॥ २ ॥ अन्यान्यादर्शपुस्तकविवरणन्तु इहापि पूर्ववदेव।

२— 'चनेति निपातो निपातसमाहारो वा'—इति (हरिस्वामिनः?) ञ।

उपवेग्रनावस्थानलक्षणौ गुणौ क्रमेणाघारयोर्विधत्ते— "आसी-नस्य मिति। "तिष्ठंस्तं यं वाच इति। 'आघारयति'—इत्युभयघानु-षङ्गः। स्रुचाघारस्य[1] तिष्ठता होतव्यत्व मुपपादयति— "मनस्य ह वै वाक् चेत्यादिना। 'युजौ' रथावयवे युगे अश्वादिवद् युक्तौ भूतेत्यर्थः। "यतरो वा इत्यादि। लोके हि रथादिषु युक्तयो-रश्वयोर्मध्ये 'यतरः' खलु 'ह्रसीयान्' अतिशयेन ह्रस्वोऽल्पकायो 'भवति', तस्य साम्येन वहनाय 'उपवहं' वहः खन्धप्रदेशः तस्योपरि श्लिष्ट मौचित्यकरं दारुमयं स्थूलपीठकादिकं लौकिकाः कुर्वन्ति। यस्मादेवं लोके, तस्मादल्पविषयत्वेन अपरिमितविषयान्मनसो ह्रसीयस्या वाचः स्थितिक्रियाविशिष्टाघारेणौचित्यकरम् 'उपवह मिव' एतद्भवति। अतः 'ते' वाङ्मनसे उभे अपि 'सयुजौ' समान-वहनप्रदेशे भवत इत्यर्थः॥ ७॥

स्रुग्घ्याघारस्य आहवनीय-दक्षिणभाग-स्थितिलक्षण-धर्मविशेषं विदधाति— "देवा ह वा इत्यादिना। "दक्षिणतः प्रतीति। आहवनीयस्य दक्षिणभागे असुरान् प्रत्युच्छ्रितवन्तः। कथ मुच्छ्राय-स्तेषा मित्यत आह— "उच्छ्रित मिव ह्येति। 'उच्छ्रितं' पर्वतादिकम्, त मिव वीर्य मपि दुरासदम्। तादृशवीर्ययोगात्तेषा मुच्छ्रितत्व मित्यर्थः॥

अथाघारयोर्दक्षिणोत्तरपरिधिसन्धि मारभ्यैव उभयतः करणं विधत्ते— "स यदिति। 'उभयतः' दक्षिणत उत्तरतश्चेत्यर्थः।

१— 'स्रुग्घ्याघारस्य'—इति आदिषु।

"समान मेव सन्नानेवेति। मनश्च वाक् चेत्येतदुभयं समानविषयं समानाश्रय मेव 'सद्' भवदपि 'नानेव' भिन्न मिव भवतीत्यर्थः॥

"स्रुवेण त आघारयतीत्यादिकं प्राग्विहितं[1] प्रकारान्तरेण स्तौति— "शिरो ह वै यज्ञस्येत्यादिना। अर्थो निगदसिद्धः॥ ८॥ ९॥

मूलत्वेन शिरस्त्वेन स्रुक्स्रुवयोस्तदुपजीवनेन तूष्णीकत्वं निरुक्तत्वं च प्राग्विहित[2] मनूद्य प्रशंसति— "तूष्णीं त मित्यादिना। "तूष्णी मिव ह्येति। लोके हि यद्दृचादीनां मूलं तत् 'तूष्णी मिव हि' अदृश्यमानत्वात्। एतदेवोपपादयति— "नो ह्येवेति। 'न' 'उ' खलु 'अत्र' मूलविषये शब्दव्यापारो ऽस्ति, दूरे दृष्टिविषयत्वम्। अतो मूलभूताधारस्य लौकिकमूलवत् तूष्णीकत्वं युक्त मित्यर्थः॥ १०॥

"मन्त्रेणेति। "वाग्घि मन्त्र इत्यादि। वागिन्द्रियसाध्यत्वात् तदात्मको मन्त्रः। सा च वाक् 'ग्रीर्षाः' उपरि तालोष्ठपुटादि-व्यापारेण शब्दं सुधारयति, अतो वागात्मकस्य 'यज्ञस्य' 'शिरः'-श्रुतौ[3] आधारसम्बन्धो युक्त इत्यर्थः॥ ११॥

प्राग्विहितयोरासीनस्थितयोरपि[4] मूलशिरस्त्वोपजीवनेन प्रशंसा क्रियते— "आसीनस्य मित्यादिना। "निषण्ण मिव ह्यौद मिति। 'इदं' वृक्षादिमूलं 'निषण्ण मिव हि' एकत्रोपविष्ट मिव हि भवति; खातत्वेन चाचल्यविरहात्। अतो मूलभूतस्याधारस्यासन-

---

१— इहैव तृतीयकण्डिकादिकं द्रष्टव्यम् (३०५, ३०८ पृ०)।

२— इहैव पञ्चमकण्डिकादिकं द्रष्टव्यम् (३०५, ३०८ पृ०)।

३— "'शिरः'-श्रुतौ'—इति ङ। ४— इहैव सप्तमी कण्डिका द्रष्टव्या।

समन्त्रो युक्त इत्यर्थः। "तिष्ठतीव ह्येद मिति। 'हि' यतः 'इदं' मनुष्यादीनां 'शिरः' 'तिष्ठतीव' अस्तीति, स्थितिक्रियाविशिष्ट मिवोर्द्ध मिव दृश्यते, अतः शिरस्संस्तस्याधारस्य तिष्ठता कर्त्रा निष्पादनं युक्त मित्यर्थः॥ १२॥

एव माधारयोः प्रतिनियतधर्मान् विधाय अनुष्ठानक्रम माह— "स स्रुवेणेति। पूर्वाधारानन्तरं, नोत्तराधारः; अपि तु "अग्निं मग्नीद्"—इति[1] आग्नीध्रं प्रति सम्प्रेषं ब्रूयात्। तस्य चाय मर्थः— हे 'अग्नीत्' आग्नीध्र! आहवनीयाख्यम् 'अग्निं' 'सम्मृङ्धि' सम्मार्जनं कुर्विति॥

विधित्सितस्य सम्मार्जनस्याधारानन्तर्य्य मुपपादयति— "यथेति। अनडुहः स्कन्धदेशे 'यथा' 'धुरम्' युगधुरम् 'अध्यूहेत्' योजयेत्, एव मग्नौ धुरोऽध्यूहन मेव पूर्वाधारहोमेन क्रियते। अस्मिन्नर्थे लोकप्रसिद्धिं माह— "अध्युह्यन्ति। 'हि' यतः रथादिवहने अनडुदस्यादिकं योज्यमानास्तदीयस्कन्धस्योपरि युगधुरम् 'अध्युह्य' पश्चात् पाग्रैः 'युञ्जन्ति' बध्नन्ति; अतो धुरोऽध्यूहनस्थानीयः पूर्वाधारहोम इत्यर्थः॥ १३॥

अग्निसम्मार्जनं विधाय प्रशंसति— "अथेति। 'एनम्' अग्निं हविर्वहनाय सम्मार्जनेन युनक्तीत्यर्थः। सम्मार्जने धर्मविशेषं विधत्ते— "परिक्राम मिति। परिक्रम्य-परिक्रम्य तत्तत्परिधिदेशं गत्वा तदनुसारेणाग्निं 'सम्मार्ष्टि'। अत एवोक्तं कात्यायनेन— "दक्षसव्यहविरनु-

---

१— का० औ० सू० ३. १. १२। प्रजापतिर्देवता, तेन स्वाहाकाराभावः।

परिधि सम्मार्ष्ट्यग्ने वाजजिदिति[1] चिस्रिः परिक्रामम्"— इति[2]। तत्रापि लोकप्रसिद्धिं मुदाहरति— "परिक्रामं हीति। एकैकस्मिन् परिधौ सम्मार्जनस्य चिरावृत्तिं विधाय प्रशंसति— "चिस्रिरिति। "नित्यवीप्सयोः"—इति[3] द्विर्वचनम् ॥ १४ ॥

विहितं सम्मार्जनमनूद्य मन्त्रं विधत्ते— "स सम्मार्ष्टीति। मन्त्रस्याभिप्राय माह— "यज्ञं लेति। यज्ञसाधनत्वाद्धविरत्र यज्ञ-शब्दाभिधेयम्। यज्ञसाधनं हविर्लक्षणं मन्त्रं देवेभ्यो 'वक्ष्यन्' वहनं करिष्यन्नि मिति, "वाजं वरिष्यन्तम्"-इतिपदद्वयस्यार्थः। 'वाज-जितम्'—इत्यस्य व्याख्या 'यज्ञियम्'—इति। वाजं यज्ञसाधनं हविर्लक्षणं मन्त्रं जयतीति 'वाजजित्'; तथाच 'यज्ञं' यज्ञसाधनं हविरर्हतीति 'यज्ञियम्' इति शब्दार्थः सम्पद्यते ॥

उपरिष्टात् सम्मार्जनं विधत्ते— "अथेति। परिधिक्रियानुसारेण परितोऽग्निं सम्मृज्य, तदनन्तरं अग्नेः 'उपरिष्टात्' 'तूष्णीं' 'चिः' सम्मृज्यात्। तदेतत् स्तौति— "तद्यथेति। 'तत्' तथा सति 'यथा' खलु लोके युगधुरे अनड्वाहं संयोज्य, 'प्रेहि' प्रगच्छ, वोढव्यं भारं 'वह' इत्येवं वदत् 'कशया' ताड़नेन 'प्राजेत्' प्रेरयेत्। एवं कशयोपक्षेपण मेव तदुपरि सम्मार्जन मित्यर्थः। स्पष्ट मन्यत् ॥

स्रौवस्रुगाज्याधारयोर्मध्येऽनुष्ठानं सम्मार्जनस्य प्रशंसति— "तद्य-दिति। मनोवाक्संस्तुतयोरनयोराघारयोर्मध्ये सम्मार्जनस्य करणात्

१— वा० सं० २. ७. १। एतन्मन्त्रस्य महीधरकृतं भाष्यं द्रष्टव्यम्।
२— का० श्रौ० सू० ३. १. १३। सम्मार्जनेन विरजस्कं मुज्वलं करोति।
३— पा० सू० ८. १. ४।

तद्भवधाने सति 'मनश्च वाक् च' एतदुभयं ('समान मेव') समानविषयं समानाश्रय मपि 'नानेव' भिन्न मिव भवति ॥ १५ ॥ ६ ॥ [४. ४.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे चतुर्थाध्याये चतुर्थं ब्राह्मणम्[1] ॥

॥ इति प्रथमकाण्डे तृतीयप्रपाठकः समाप्तः[2] ॥

१— एतस्मिन् ब्राह्मणे पूर्वाधारस्य, ततोऽग्निसम्मार्ज्जनस्य च विधिः। तत्रेयं पद्धतिः।— स्रुवेणाज्यस्थाल्या आज्यं गृहीत्वा उत्तरं परिधि मन्ववहृत्य प्रजापतिं मनसा ध्यायन् अग्नेरुत्तरप्रदेशे ऋजुं दोर्घं सन्ततं प्राञ्चम् "इदं प्रजापतये"—इति पूर्वं माधार माधारयति। ततोऽग्नीधे स्रुचं मिध्मसन्नहनं च समर्पयन् "अग्निं मन्थीत् सम्मृष्टि"—इति अग्नीधं प्रेष्यति। ततोऽग्नीत् स्रुचं सव्ये गृहीत्वा अग्निं प्रदक्षिणीकृत्य दक्षिण-परिधिसन्निधौ स्थित्वा इध्मसन्नहनैर्दक्षिणपरिधिपार्श्वेऽग्निं त्रिः प्राक् सम्मार्ष्टि। तत्र "अग्ने वाजजित्"—इति सकृत्, द्विस्तूष्णीम्। एव मेव मध्यमपरिधिपार्श्वे, उत्तरपरिधिपार्श्वे चेति।

२— इतोऽनन्तरं क-पुस्तके "काण्डो १२८"—इति, ख-पुस्तकेऽपि तथैव, च-पुस्तके तु "कण्डिकासङ्ख्या १२०"—इति। वस्तुतोऽत्र प्रपाठके षट्सु ब्राह्मणेषु सर्वकण्डी-सङ्कलनया १२८ एव सङ्ख्या लभ्यते। तद्यथा— १ ब्रा० १६ क०—२ ब्रा० १६ क०—३ ब्रा० ४० क०—४ ब्रा० १६ क०—५ ब्रा० २२ क०—६ ब्रा० १५ क०=१२८ क०॥

अथ

चतुर्थप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

चतुर्थाध्याये पञ्चमं ब्राह्मणम् ।

॥ हरिः ॐ ॥

सु स्रुचोत्तर माधारु माधारयिष्यन् । पूर्वेण स्रुचा-वञ्जलिं निदधाति नमो देवेभ्यः स्वधा पितृभ्य इति तद्देवेभ्यश्चैवैतत् पितृभ्यश्चार्त्विज्यं करिष्यन्निह्नुते सुयमे मे भूयास्त मिति स्रुचावादत्ते सुभरे मे भूयास्तं भर्त्तुं व्वाꣳ शकेय मित्येवैतदाहास्कन्न मद्य देवेभ्यः आज्यꣳ सुष्मियास मित्यविक्षुब्ध मद्य देवेभ्यो यज्ञं तनवा ऽइत्येवैतदाह ॥ १ ॥

अद्ब्रिणा व्विष्णो मा त्वावक्रमिष मिति । यज्ञो वै व्विष्णुस्तस्मा ऽएवैतन्निह्नुते मा त्वावक्रमिष मिति व्वसुमती मग्ने ते छाया मुपस्थेष मिति साध्वी मग्ने ते छाया मुपस्थेष मित्येवैतदाह ॥ २ ॥

व्विष्णो स्थान मसीति । यज्ञो वै व्विष्णुस्तस्येव ह्येतदन्तिकं तिष्ठति तस्मादाह व्विष्णो स्थान मसीतीत

ऽइन्द्रो व्वीर्य मक्षणोदित्युतो हीन्द्रस्तिष्ठन् दक्षिणतो नाष्ट्रा रुक्षाꣳस्यपाहंस्तस्मादाहेत इन्द्रो व्वीर्य मक्षणोदित्यूर्ध्वोऽध्वर ऽआस्थादित्यध्वरो वै यज्ञ ऽऊर्ध्वो यज्ञ ऽआस्थादित्येवैतदाह ॥ ३ ॥

अग्ने व्वेहीचं व्वेहूत्य मिति । उभयं* व्वा ऽएतदग्निर्हेवानाꣳ होता च दूतश्च तदुभयं व्विष्टि यद्देवाना मसुीत्येवैतदाहावतां त्वां द्यावापृथिवी ऽअव त्वं द्यावापृथिवी ऽइति नाच तिरोहित मिवास्ति स्विष्टकृद् देवेभ्य इन्द्र आज्येन हविषाभूत् स्वाहेतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्र ऽआज्येनेति व्वाचे वा ऽएतु माघार माघारयतीन्द्रो व्वागित्यु वा ऽआहुस्तस्मादेवाहेन्द्र ऽआज्येनेति ॥ ४ ॥

अथासꣳस्पर्शयन्त्सुचौ पर्येत्य । ध्रुवया सुमनक्ति शिरो वै यज्ञस्योत्तर आघार ऽआत्मा वै ध्रुवा तदात्मन्येवैतच्छिरः प्रतिदधाति शिरो वै यज्ञस्योत्तर ऽआघारः श्रीर्व्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽर्ध्वस्य श्रेष्ठो भवत्यसावमुष्यार्ध्वस्य शिर ऽइत्याहुः ॥ ५ ॥

युजमान ऽएव ध्रुवा मनु । योऽस्मा ऽअरातीयति सु ऽउपभृत मनु स युद्वोपभृता समञ्ज्याद्यो युजमानाया-

---

* 'मि । त्युभयं'–इति ग ।

रातीयुति तस्मिञ्छ्रेयं दध्यात् तद्यजमान ऽएवैतच्छ्रेयं दधाति तस्माद् ध्रुवया सुमनक्ति ॥ ६ ॥

स सुमनक्ति। सञ्ज्योतिषाज्योतिरिति ज्योतिर्व्वा ऽइतरस्या माज्यं भवति ज्योतिरितरस्यां ते ह्येतदुभे ज्योतिषी सङ्क्लृप्ते तस्मादेवꣳ सुमनक्ति ॥ ७ ॥

अथातो मनसश्चैव व्वाचश्च। अहं भद्र ऽउदितं मनश्च ह वै व्वाक् चाहं भद्र ऽऊदाते ॥ ८ ॥

तꣳ ह मन ऽउवाच। अहु मेव त्वच्छ्रेयोऽस्मि न वै मया त्वं किञ्चनानभिगतं व्वदसि सा यन्मम त्वं कृतानुकरानुवर्त्मास्यहु मेव त्वच्छ्रेयोऽस्मीति ॥ ९ ॥

अथ ह व्वागुवाच। अहु मेव त्वच्छ्रेयस्यस्मि। यद्वै त्वं व्वेत्थाहं तद्विज्ञपयाम्यहꣳ सुज्ञपयामीति ॥ १० ॥

ते प्रजापतिं प्रति प्रश्न* मेयतुः। सु प्रजापतिर्मनस ऽएवानूवाच मन ऽएव त्वच्छ्रेयो मनसो वै त्वं कृतानुकरानुवर्त्मासि श्रेयसो वै पापीयान् कृतानुकरो ऽनुवर्त्मा भवतीति ॥ ११ ॥

सा ह व्वाक् पुरोक्ता व्विसिष्मिये। तस्यै गुर्भः पपात सा ह व्वाक् प्रजापतिं मुवाचाहव्यवाड्वाहं तुभ्यं भूयासं यां मा परावोच ऽइति तस्माद्यत्किञ्च प्राजापत्यं

---

* 'प्रतिप्रश्नं'–इति च (अव्ययीभाव इति डा० वेबरः)।

यत्तु क्रियत ऽउपाꣳश्वेव तत् क्रियतेऽहव्यवाड्ढ* व्वाक् प्रजापतय ऽआसीत् ॥ १२ ॥

तद्वैतद्देवाः । रेतश्चुर्मन् वा युस्मिन् वा† बभ्रुस्तद्व सं पृच्छन्त्यचैव‡ त्याꣳदिति ततोऽचिः सम्बभूव तस्माद्-प्याचेय्या योषितैनुस्येतुस्यै हि योषायै व्वाचो देवताया ऽएते सम्भूताः ॥ १३ ॥ १ ॥

॥ इति चतुर्थप्रपाठके प्रथमं ब्राह्मणम्§ [४. ५.] ॥

अथ स्रुच्याधारस्य प्रयोगः प्रतिपाद्यते— "स स्रुचेत्यादिना । "पूर्वेण स्रुचाविति । जुह्वुपभृतोः पूर्वभाग इत्यर्थः । समन्त्रकस्य[१] अञ्जलिनिधानस्य प्रयोजन माह— "तद्देवेभ्य इति । 'आर्त्विज्यं करिष्यन्' तदतिक्रमजनित मपराधं तन्त्रमस्कारेण 'निह्नुते' प्रमथतीत्यर्थः ॥

समन्त्रकं जुह्वुपभृतोरादानं विधत्ते— "सुयमे इति[२]। एतस्य

---

* 'ऽहव्यवाड्ढ'—इति क, ख, च ।

† 'चुर्मन् वान्यस्मिन्'—इति सा०—सम्मतः ।

‡ 'चैव'—इति च-पाठः, डा० वेवरेण बङ्गपुस्तकेषु दृष्टश्च ।

§ सायणाचार्यमतेऽत्रैव चतुर्थाध्यायपरिसमाप्तिः ।

१— तत्र मन्त्रः— वा०सं० २. ७. २ । का०श्रौ०सू० ३. १. १५ । "तस्मा-दञ्जलिकरणस्थानाद् दक्षिणास्यां द्वितीय मञ्जलि मुत्तानं करोति स्वधा पितृभ्य इति (वा० सं० २. ७. ३.) मन्त्रेण"—इति च तत्र प० ।

२— वा० सं० २. ७. ४ । का० श्रौ० सू० ३. १. १६ क ।

मन्त्रभागस्य विवक्षित मर्थं माह— "सुभरे इति। सुष्ठु मनुनियन्तुं भर्त्तुं शक्ये 'सुयमे' हे जुह्वपभृतौ! युवा मीदृश्यौ 'भूयास्तम्'। 'भर्त्तुं वां शकेयम्'—इति तात्पर्यार्थकथनम्। मन्त्रस्य द्वितीय-भाग मनूद्य व्याचष्टे— "अस्कन्न मग्नेति[1]। यत् जुह्वपभृतोः स्थित माज्यम्, तत् 'अस्कन्नं' यथा भवति तथा 'सम्भ्रियासम्' सम्भर्त्तुं शक्तो भूयास मिति मन्त्रवाक्यस्यार्थः। तदिद माह— "अविच्छुन्ध मग्नेति। आज्यस्य स्कन्दने हि यज्ञस्य विच्छेदः स्यात्, स च माभूदित्येवं प्रार्थ्यत इत्यर्थः॥ १॥

लिङ्गदेवातिक्रमणे विनियोगः सिद्ध इत्यभिप्रेत्य केवलं मन्त्र मनूद्य व्याचष्टे— "अङ्घ्रिणेति[2]। हवीरूपेण वेद्या मवस्थितो यज्ञोऽत्र 'विष्णु'-शब्देन विवक्षितः। दक्षिणातिक्रमवेलायां तस्यातिक्रमशङ्का माभूदिति तदभावः प्रतिपाद्यते— हे 'विष्णो' हवीरूप यज्ञ! 'त्वा' त्वां 'मा अवक्रमिषम्' अवज्ञया त्वां नातिक्रमामि, अपि तु होमार्थं तत्रापराधो यथा न भवति तथैव सञ्चरदेशेनातिक्रमा-मीत्यर्थः। एतल्लिङ्गकल्पित मेव विनियोगं कात्यायनः सूचयामास— "दक्षिणातिक्रामत्यङ्घ्रिणा विष्णविति, परिधीनपरेण सञ्चरः"-इति[3]।

स्रुग्व्याघारहोमार्थं यद्दक्षिणतोऽवस्थानम्, तदपि मन्त्रलिङ्ग-सिद्ध मित्यभिप्रेत्य तं मन्त्र मनूद्य व्याचष्टे— "वसुमती मिति[4]।

१— वा० सं० २. ८. १। पूर्वकण्डिकास्थातस्यैवापरांशोऽयम्।

२— वा० सं० २. ८. २। का० श्रौ० सू० ३. १. १६ ख।

३— का० श्रौ० सू० ३. १. १७। सर्वार्थोऽयं सञ्चरो नोत्तराघारमात्रे।

४— वा० सं० २. ८. ३।

'वसुमतीं' धनवतीं वासयोग्यां 'साध्वीं' त्वदीयां 'छायां' हे अग्ने! 'उपस्थेषम्' उपेत्य तिष्ठेय मित्यर्थः ॥ २ ॥

मन्त्रशेष मनूद्य व्याचष्टे— "विष्णोरिति। "तस्येव खेतदिति। यज्ञात्मको हि विष्णुरित्याहवनीये निष्पद्यते। यच्च स्थित्वा अध्वर्युर्जुहोति, तच्च। तस्मान्निक मिति नेदीयस्त्वव्यपदेशः। एतस्मिन्नर्थे मवस्थाने मन्त्रस्य विनियोगं कात्यायनः सूचितवान्— "वसुमती मित्यवस्थायेति"-इति[1]।

"इत इन्द्र इत्यादेः स्थानान्तस्य मन्त्रस्य[2] होमे विनियोगो लिङ्गसिद्ध इत्यभिप्रेत्य तं मन्त्रं भागशो नूद्यव्याचष्टे— "इत इन्द्र इति। 'हि' यस्मात् अस्मिन् स्थाने तिष्ठन्निन्द्रः दक्षिणदिगवस्थितान् राक्षसादीन् 'अपाहन्', अतः कारणात् 'इत इन्द्रो वीर्यं मद्यणोदिति' मन्त्रभागे इन्द्रस्तुतिः। द्वितीयभाग मनूद्य व्याचष्टे— "ऊर्द्धोऽध्वर इति। इन्द्रवीर्येण राक्षसादीनां बाधितत्वात् निर्विघ्नो 'यज्ञः' ऊर्द्धं प्रवृत्त इत्यर्थः ॥ २ ॥

भागान्तर मनूद्य व्याचष्टे— "अग्ने वेरिति[3]। हे अग्ने! 'होत्रं' होतृकर्म 'वेः' बुद्ध्यस्व। तथा 'दूत्यं' दूतकर्म 'वेः' बुद्ध्यस्व 'इति' मन्त्रवाक्यार्थः। "विद् ज्ञाने"—इत्यस्मात्[4] छान्दसो लङ्[5] सिपि

१— का० श्रौ० सू० ३. १. १९। "ईशानाभिमुखः स्थित्वा"—इति व०।

२— वा० सं० द्वितीयाध्यायीयाष्टमकण्डिकायास्चतुर्थभागत आरभ्य नवम-कण्डिकाया आद्यभागं यावदयं मन्त्रः। का० श्रौ० सू० ३. २. १।

३— वा० सं० २. ९. १। ४— धा० अदा० प० ५४।

५— पा० सू० ३. ४. ६।

"दृश्व[1]"—इति दकारस्य ह्रस्वे वेरिति रूपम्। इमं मर्थं माह—"उभयं वा इत्यादिना। 'देवानाम्' अर्थे आत्मनो यद् दूतत्वं होतृत्वं च अङ्गीकृतवान् 'असि', 'तत् उभयं' 'विद्धि' जानीहीत्यर्थः। "अवतान्त्वेत्यादि निगदसिद्धम्।

अग्निमं भाग मनूद्य व्याचष्टे— "खिष्टकृदिति। 'देवेभ्यः' देवाना मर्थं सोऽग्निः 'खिष्टकृत्' शोभनयागस्य कर्त्ता। हे अग्ने! त्वं यस्मादेवं भवसि, तस्मादनेन 'आज्येन हविषा' आज्यतेन 'इन्द्रः' सङ्गतः 'अभूत्' भवतु, 'खाहा' खाऽऽत मिद माज्य मस्त्विति मन्त्रवाक्यार्थः। "इन्द्रो वै यज्ञस्येत्यादि स्पष्टम्॥

ननु "मनसे चैव वाचे वेति द्वितीयाघारस्य वाग्देवतार्थत्वं प्रागाम्नातम्[2], तदिन्द्रार्थत्वे विरुद्धमत इत्याशङ्क्य, तयोस्तादात्म्य माह—"इन्द्रो वागित्यु वा आऽऽहरिति। वाच इन्द्रेण व्याप्ततत्वात् तत्तादात्म्यम्। अत एव तैत्तिरीयके "इमां नो वाचं व्याकुर्वित्युपक्रम्याम्नातम्—"ता मिन्द्रो मध्यतोऽवक्रम्य व्याकरोदिति[3]। एषा प्रसिद्धिरत्र 'वै'-शब्देन द्योत्यते। "तस्मादेवाहेति। वाच इन्द्रस्य भेदाभावादपीत्यर्थः॥

१— पा० सू० ८. २. ७५।

२— एतत्पूर्वब्राह्मणस्य प्रथमकण्डिकायाम् (३०४ पृ०)।

३— तै० सं० ६. ४. ७. ५— "वाग् वै पराच्यव्याकृतावदत्, ते देवा इन्द्र मब्रुवन् इमां नो वाचं व्याकुर्विति, सोऽब्रवीद् वरं वृणै, मह्यं चैवैष वायवे च सह गृह्णाता इति, तस्मादैन्द्रवायवः सह गृह्यते, ता मिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्, तस्मादियं व्याकृता वागुच्यते"—इति।

अस्य मन्त्रस्य सिद्धसिद्धं होमे विनियोग मसूचयत् कात्यायनः— "इत इन्द्र इति जुहोतीति[1] ॥ ४ ॥

होमानन्तरं प्रत्याक्रम्य ध्रुवासमञ्जनं विधत्ते— "अथेति। "ध्रुवयेति। ध्रुवा मित्यर्थः। तदाह कात्यायनः— "असंस्पर्शयन्स्रुचावेत्य जुह्वा ध्रुवाꣳ समनक्तीति[2]। तदेतत् समञ्जनं प्रशंसति— "शिरो वा इति। उत्तराधारस्य यज्ञशिरस्त्वं प्राक् प्रतिपादितम्[3]। ध्रुवास्रुवाज्यस्य सर्वयज्ञसाधारण्यात् यज्ञस्य मध्यदेह एव ध्रुवा[4]; आधारशेषस्य तस्यां समञ्जनात् 'शिरः' एव तस्मिन् 'प्रतिदधाति' इत्यर्थः ॥

यज्ञशिरस्त्व मुपजीव्य श्रीरूपत्वेन आघारं प्रशंसति— "शिरो वा इति। शिरसः श्रीत्वोपपादनम्— "श्रीर्हि वै"-इति। 'हि'-शब्दद्योतितां प्रसिद्धिं लोके श्री मिति शिरस्त्वं व्यवहारेणाविष्करोति। "तस्मादिति। 'अर्द्धस्य' देशभागस्य ग्रामादेः 'यः श्रेष्ठो भवति', 'अमुष्य' ग्रामादेः 'असौ' देवदत्तः 'शिरः' 'इति' लौकिकाः कथयन्ति ; अतः शिरसः श्रीरूपत्वम् ॥ ५ ॥

किं तत इत्याह— "यजमान एवेत्यादिना। 'ध्रुवा मनु' अनोः कर्मप्रवचनीयत्वम्[5], "कर्मप्रवचनीययुक्ते"-इति द्वितीया[6]। ध्रुवाभागो यजमान इत्यर्थः। 'अस्मै' यजमानाय 'यः' 'अरातीयति' अरातिः

१— का० श्रौ० सू० ३. २. १ ("जुहोत्युत्तराधारम्")।

२— का० श्रौ० सू० ३. २. २।

३— पुरस्तादिदंवाध्याये षष्ठे ब्राह्मणे द्वादशी कण्डिका द्रष्टव्या (१०६ ए०)।

४— 'आत्मा'-इत्यस्यैवार्थो 'मध्यदेहः'-इति कृतः।

५— पा० सू० १. ४. ८४। ६— पा० सू० २. ३. ८।

ग्रचुरिवाचरति, 'सः' उपभृद्भागः । 'उपभृता'-इति द्वितीयार्थे तृतीया[1] । स्पष्ट मन्यत् ॥ ६ ॥

विहितं समञ्जन मनूद्य मन्त्रं विधत्ते— "स समनक्ति[2]। "सञ्ज्योतिषा ज्योतिरिति[3] । मन्त्रगतज्योतिःशब्दद्वयस्यार्थ माह— "ज्योतिर्वा इति । ध्रुवापेक्षया 'इतरा' जुहूः, तस्यां यत् 'आज्यम्', तत् तृतीयान्तज्योतिःशब्दार्थः; जुहूपेक्षया 'इतरा' ध्रुवा, तस्यां यत् 'आज्यम्', तत् प्रथमान्तज्योतिःशब्दार्थः । एते चाज्यज्योतिषी क्रमेण सूर्याग्न्यात्मके; तदुभये समञ्जनेन 'सङ्गच्छेते' सङ्गते एव भवत इत्यर्थः[4] ॥ ७ ॥

प्राजापत्यस्य पूर्वाधारस्योपांशुत्वं प्रतिपादयितुं मनोवाग्भ्यां कृतं संवाद मुपन्यसितुं प्रतिजानीते— "अथात इति । 'अथ'-शब्दोऽधिकारार्थः; 'अतः' परम्, 'अहं भद्रे' निमित्ते, अह मेव भद्रः, अह मेव भद्र इति स्व-स्वोत्कर्षविषये, 'मनसो वाचश्च' यदुक्तं वचनम्, तदधिक्रियत इत्यर्थः । त मेवेतिहास मुदाहरति— "मनश्चेति । 'अहं भद्रे' आत्मीयोत्कर्षविषये 'ऊदाते' विवादं चक्रतुः । वदेः किति लिटि यजादित्वात् सम्प्रसारणम्[5] ॥ ८ ॥

१— पा० सू० २. १. ८५ ।

२— जुह्वा ध्रौवाज्यमध्ये विन्दुं पातयतीत्यर्थः ।

३— वा० सं० २. ६. २ । का० श्रौ० सू० ३. २. १ ।

४— "गच्छता मित्यध्याहारः । 'ज्योतिषा' ध्रुवास्थिताज्यरूपज्योतिषा सह 'ज्योतिः' जुह्वां सिच्यमान माज्यरूपं ज्योतिः 'सं'गच्छताम्"-इति महीध० भा० । ५— पा० सू० ६. १. १५ ।

तत्र मनसो वाक्य मुदाहरति— "तद्धेति । श्रेयस्त्वकारण माह— "न वा इति । हे वाक्! 'त्वं' 'मया' मनसा अविषयीकृतं 'किम्' अपि 'न वदसि'; अतो विषयीकृत मेव वदसि । 'सा त्वं' 'मम' 'कृतानुकरा' मया यत्कृतं तदेवानुकुर्वती 'अनुवर्त्मा' अनुगन्त्री भवसीत्यर्थः ॥ ९ ॥

अथैतस्य प्रत्युत्तर माह— "अथ वागुवाचेति । हे मनः! 'अहं मेव' त्वत्तः सकाशात् 'श्रेयसी' । कुतः? 'यत् वै त्वं' यद्वस्तु त्वं 'वेत्थ' जानासि, 'अहं तद् विज्ञपयामि' तदन्तर्गतविषयं परेषां विविधं प्रतिपादयामि; तत् 'सञ्ज्ञपयामि' सम्यक् ज्ञपयामि, प्रतिपादयामि । यतो विज्ञापन-सञ्ज्ञापन-साध्यं ममैव, अतस्त्वत्तः श्रेयसीत्यर्थः ॥ १० ॥

"ते प्रजापति मिति । एवं विवदमाने 'ते' मनश्च वाक् च 'प्रश्नं प्रति प्रजापतिम्' 'एयतुः' जग्मतुः । 'सः' च 'मनस एव' 'अनु'कूलम् 'उवाच' । तद्वाक्य मुदाहरति— "मन एवेति । कृतानुकरत्वस्य निष्कर्षहेतुत्वं लोकप्रसिद्धया दर्शयति— "श्रेयसो वा इति ॥ ११ ॥

"सा हेति । एवं प्रजापतिनोक्ते 'सा' वाक् 'परा'जितत्वेन 'उक्ता', 'विषिषिषिये' विगतसंज्ञया भग्नवीर्या बभूव । तस्मात् पराभवात् तस्या वाचो यो 'गर्भः' देवमनुष्यादीना मुत्पत्तिहेतुः, सोऽपि 'पपात' । 'सा वाक्' पराजयेन खिन्ना सती 'प्रजापतिम्' 'उवाच' उक्तवती । किं मिति । हे प्रजापते! 'तुभ्य महम्' 'अहव्यवाड्' हव्यवहनस्य अहेतुभूतैव 'भूयासम्', 'यां मा' 'परा'जितत्वेनोक्तवानसि। यस्मादेवं

वाचोक्तम्, 'तस्मात्' एव कारणात् यज्ञसम्बन्धि 'यत् किम्' अपि प्रजापतिदेवताकं कर्म, 'तत्' सर्वं वाग्व्यापारविरहेण 'उपांशवेव क्रियते'। 'अहव्यवाड्डि'-इति प्रागुक्तार्थस्मारणम्[१] ॥ १२ ॥

स पतितो वाचो गर्भः कथ मासीदिति तदिदानी मनुसन्धत्ते— "तद्धैतदिति। 'तत्' 'ह' खलु 'एतत्' वाचः सकाशात्पतितं 'रेतः', 'चर्मन्' चर्मणि 'अन्यस्मिन् वा' यस्मिन् कस्मिंश्चित्पात्रे देवाः 'बभुः' धृतवन्तः। भूत्वा च 'तत्' प्रतिदिवसं 'पृच्छन्ति'— "अत्रैव त्याऽदितीति। 'अत्र' अस्मिन् पात्रे किं 'त्यऽत्' एतत्प्रसिद्धं रेतः कथम्भूतम्? विचारयन्त इत्यर्थः। "विचार्यमाणानाम्"—इति[२] श्रुतिः। यस्माद्देवैर्विचारितम्, 'ततः' तस्मात् स गर्भो 'अचिः सम्बभूव'; अत्रैव त्यदित्यचिरिति शब्दव्युत्पत्तिरित्यर्थः। यतो गर्भाशयात् स्रुतो गर्भः अचिः सम्पन्नः, 'तस्मात्' स्रुतगर्भा रजस्वला स्त्री नाम्ना 'आत्रेयी'—इत्याख्यायते[३]। तया 'योषिता' सह सम्भाषणादिकं कुर्वन् पुरुषः 'एनस्वी' भवति। तैत्तिरीयकेऽप्याम्नातम्— "तस्मान्मलवदासक्ता न संवदेत, न सहासीत"-इति[४]।

१— "वाक् च मनसश्चौयेता मह्यं देवेभ्यो हव्यं वहामीति वागब्रवीत्"-इत्यादि चाचोपाख्यान माम्नातम् तै० सं० २. ५. ११।

२— पा० सू० ८. २. ९७।

३— "—अथ रजस्वला। स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि"-इति अम० को० २. ६. २०। मनुव्याख्यायां कुल्लूकभट्टेन तूक्तम्-"आत्रेयी च रजस्वला ऋतुस्नातोच्यते, 'रजस्वला स्नुतस्नाता मात्रेयीम्'-इतिवसिष्ठस्मरणात्"-इति।

४— तै० सं० २. ५. १. ५।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ ४ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसौरीं स्त्रिदशतरुलताधेनुसौवर्णभूमीः ।
रत्नोस्रां रुक्मवाजिद्विपमहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।
आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पात्रसात्सिङ्गणार्यः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीहरिहरमहा-
राजसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये प्रथम-
काण्डे चतुर्थाध्यायः समाप्तः ॥ ४ ॥

[अथ पञ्चमाध्याये प्रथमं ब्राह्मणम्]

स वै प्रवरायाश्रावयति। तद्यत् प्रवरायाश्रावयति यज्ञो वा ऽआश्रावणं यज्ञ मभिव्याहृत्याथ होतारं प्रवृणा ऽइति तस्मात् प्रवरायाश्रावयति ॥ १ ॥

सु इध्मसन्नहनान्येवाभिपद्याश्रावयति। स यद्वा-नारभ्य यज्ञ मध्वर्युराश्रावयेद् वेपनो वा ह स्यादन्यां व्वार्त्ति मार्च्छेत् ॥ २ ॥

तद्वैके। व्वेदेस्तीर्णायै बर्हिरभिपद्याश्रावयन्तीध्मस्य वा शुकल मपच्छिद्याभिपद्याश्रावयन्तीदं व्वै किञ्चिद्यज्ञ-स्येदं यज्ञ मभिपद्याश्रावयाम ऽइति व्वदन्तस्तदु तथा न कुर्यादेतद् वै किञ्चिद्यज्ञस्य यैरिध्मः सन्नद्धो भव-त्यग्निꣳ सम्मृजन्ति तद्वेव खलु यज्ञ मभिपद्याश्रावयति तस्मादिध्मसन्नहनान्येवाभिपद्याश्रावयेत् ॥ ३ ॥

सु ऽआश्राव्य। यु एवु देवानाꣳ होता तु मेवाग्रे प्रवृणीतेऽग्नि मेव तदमुये चैवैतद्देवेभ्यश्च निह्नुतें यदहा-ग्रेऽग्निं प्रवृणीते तदमुये निह्नुते ऽथ यो देवानाꣳ होता त मग्रे प्रवृणीते तदु देवेभ्यो निह्नुते ॥ ४ ॥

सु ऽआह। अग्निर्दैवो* दैव्यो होतेत्यग्निर्हि देवानाꣳ

* 'ऽआहाग्निर्दैवो'–इति ग।

होता तस्मादाहाग्निर्हैवो दैव्यो होतेति तदग्नये चैवै-तद्देवेभ्यश्च* निह्नुते यदहाग्रेऽग्नि माह तदग्नये निह्नुते ऽथ यो देवानाꣳ होता त मग्र ऽआह तदु देवेभ्यो निह्नुते ॥ ५ ॥

देवान्यक्षद्विद्वांश्चिकित्वानिति। एष† वै देवाननु-विद्वान् युदग्निः सु ऽएनाननुविद्वाननुष्ठा‡ यक्षदित्येवै-तदाह ॥ ६ ॥

मनुष्वद्भरतवदिति। मनुर्ह वा ऽअग्रे यज्ञेनेजे तदनु-कृत्येमाः प्रजा यजन्ते तस्मादाह मनुष्वदिति मनोर्यज्ञ ऽइत्यु वा ऽआहुस्तस्मादेवाह मनुष्वदिति ॥ ७ ॥

भरतवदिति। एष§ हि देवेभ्यो हव्यं भरति तस्मा-द्भरतोऽग्निरित्याहुरेषु ऽउ वा ऽइमाः प्रजाः प्राणो भूत्वा बिभर्त्ति तस्मादेवाह भरतवदिति ॥ ८ ॥

अथार्षेयं प्रवृणीते। ऋषिभ्य॥श्चैवैन मेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥ ९ ॥

परस्तादर्व्वाक् प्रवृणीते। परस्ताद्ध्यर्व्वाच्यः प्रजाः

---

* 'चैव देवेभ्यश्च'–इति च। † 'नित्येष'–इति ग।

‡ 'अनुष्ठा'–इति ख, ङा०–वेवर-दृष्टे C-पुस्तके च।

§ 'दित्येष'–इति ग। ॥ 'प्रवृणीत ऋषिभ्य'–इति ग।

प्रजायन्ते ज्यायसस्पुतय ऽउ चैवैतन्निह्नुत ऽइदꣳ हि पितैवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात् परस्तादर्व्वाक् प्रवृणीते ॥ १० ॥

सु ऽआर्षेयु मुक्काह । ब्रह्मखदिति ब्रह्म ह्यग्निस्तस्मादाह ब्रह्मखदित्या च व्वक्षदिति तद्या ऽएवैतद्देवता ऽआवोढवा ऽआह ता ऽएवैतदाहा च व्वक्षदिति ॥ ११ ॥

ब्राह्मणा ऽअस्य यज्ञस्य प्रावितार ऽइति । एते* वै ब्राह्मणा यज्ञस्य प्रावितारो येऽनूचाना ऽएते ह्येनं तन्वत ऽएत ऽएनं जनयन्ति तदु तेभ्यो निह्नुते तस्मादाह ब्राह्मणा ऽअस्य यज्ञस्य प्रावितार ऽइति ॥ १२ ॥

असौ मानुष ऽइति । तदिमं मानुषꣳ होतारं प्रवृणीतेऽहोता हैषु पुरायैतर्हि होता ॥ १३ ॥

स प्रवृतो होता जपति । देवता ऽउपधावति यथानुष्या देवेभ्यो व्वषट्कुर्याद् यथानुष्या देवेभ्यो हव्यं व्वहेद् यथा न ह्वलेदेवं देवता ऽउपधावति ॥ १४ ॥

तच्च जपति । एतच्चा† देव सवितर्वृणत ऽइति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविताग्निꣳ होत्रायेति तदग्नये चैवैतद्देवेभ्यश्च निह्नुते यदहाग्रेऽग्नि

* 'ऽइत्येते'–इति ग । † 'जपत्येतच्चा'–इति ग ।

माह तदग्नये निह्नुतेऽथ यो देवानाꣳ हौता त मुग्र ऽआह तदु देवेभ्यो निह्नुते ॥ १५ ॥

सहु पित्रा वैश्वानरेणेति । संवत्सरो वै पिता वैश्वानरुः प्रजापतिस्तत्संवत्सरायैवैतत्प्रजापतये निह्नुते ऽग्ने पूषन् बृहस्पते प्र च व्वद प्र च यजेत्यनुवक्ष्यन्वा ऽएतद् यक्ष्यन् भवति तदेताभ्य ऽएवैतद्देवताभ्यो निह्नुते यूय मनुब्रूत यूयं यजतेति ॥ १६ ॥*

व्वसूनाꣳ रातौ स्याम । रुद्राणा मुर्व्वायाꣳ स्वादित्या ऽअदितये स्यामानेहस ऽइत्येते वै चया देवा यद्वसवो रुद्रा ऽआदित्या ऽएतेषा मभिगुप्तौ स्यामेत्येवैतदाह ॥ १७ ॥

जुष्टा मद्य देवेभ्यो व्वाच मुद्यास मिति । जुष्ट मद्य देवेभ्योऽनूच्यास मित्येवैतदाह तद्वि सुम्नꣳ यो जुष्टं देवेभ्योऽनुब्रुवत् ॥ १८ ॥

जुष्टां ब्रह्मभ्य ऽइति । जुष्ट मद्य ब्राह्मणेभ्यो ऽनूच्यास मित्येवैतदाह तद्वि सुम्नꣳ यो जुष्टं ब्राह्मणेभ्योऽनुब्रुवत् ॥ १९ ॥

जुष्टां नराशꣳसायेति । प्रजा वै नरस्तत्सुर्व्वाभ्यः प्रजाभ्य ऽआह तद्वि सुम्नꣳ युश्च व्वेद युश्च नु साध्नु-

---

* इतोऽनन्तर मिदꣳ 'शतम् । ४००'–इति च-पुस्तके ।

न्वोचत्साध्वन्वोचदित्येव विसृज्यन्ते युदद्य होतृवर्ये* जिह्मं चक्षुः परापतत् अग्निष्टत् पुनराभियाज्जातुवेदा विचर्षणिरिति युथा यानुग्रेऽमून् होत्राय प्रावृणत ते प्राधन्वन्नेवं यन्मेऽच प्रवरेणामायि तन्मे पुनराप्याय-येत्युवैतदाह तुथो ह्यस्यैतत् पुनराप्यायते ॥ २० ॥

अथाध्वर्युं चाग्नीधं च सम्मृशति। मनो वा अध्वर्यु-र्वाग्घोता तन्मनश्चैवैतद्वाचं च सन्दधाति ॥ २१ ॥

तच जपति। षण्मोर्वीरुरुहसस्पान्वग्निश्च पृथिवी चापश्च वाजश्चाहश्च रात्रिश्चेत्येता मा देवता अार्त्ते-र्गोपायन्त्वित्युवैतदाह तस्यो हि नु ह्वलास्ति यु मेता देवता अार्त्तेर्गोपायेयुः ॥ २२ ॥

अथ होतृषदन मुपावर्त्ततें। सु होतृषदनादेकं तृणं निरस्यति निरस्तः परावसुरिति परावसुर्ह† वै नामा-सुराणाꣳ होता स तु मेवेतुद्धोतृषदनान्निरस्यति ॥ २३ ॥

अथ होतृषदन मुपविशति। इद‡ महु मर्व्वावसोः सदने सीदामीत्यर्व्वाव्वसुर्व्वै नाम देवानाꣳ होता तस्यैवैतत् सदने सीदति ॥ २४ ॥

तच जपति। विश्वकर्म्मस्तनूपा असि मा मोदो-

---

* 'होत्रवर्ये'–इति च च-पुस्तके। † 'परावसुर्ह'–इति च।

‡ 'उपविशतीद्'–इति ग।

षिष्टं* मा मा हिꣳसिष्ट मेषु वां लोक इत्युद्ङेजत्य-न्तरा वा ऽएतदाहवनीयं च गार्हपत्यं चास्ते तदु ताभ्यां निह्नुते मा मोदोषिष्टं* मा मा हिꣳसिष्ट मिति तथा हैन मेतौ नु हिꣳस्तः ॥ २५ ॥

अथाग्नि मीक्षमाणो जपति। विश्वे देवाः शास्तन मा युयेह होता वृतो मनवै युन्निषद्य। प्र मे ब्रूत भाग-धेयं यथा वो येन पथा हव्य मा वो व्यहानीति यथा येभ्यः पक्वꣳ स्यात् तान् ब्रूयादनु मा शास्त युथा व ऽआहरिष्यामि यथा वः परिवेक्ष्यामीत्येव मेवैत-देवेषु प्रशासन मिच्छतेऽनु मा शास्त युथा वोऽनुष्या व्यषट्कुर्या मनुष्या† हव्यं व्यहेय मिति तस्मादेवं जपति ॥ २६ ॥ २ ॥

॥ इति चतुर्थप्रपाठके द्वितीयं ब्राह्मणम् [५. १.] ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे, त मह वन्दे विद्यातीर्थमहेश्वरम् ॥ ५ ॥
चतुर्थे सामिधेन्यादिराघारान्तः प्रदर्शितः।
प्रयोगः, पञ्चमेऽध्यस्मिन् प्रवरादिर्निरूप्यते ॥

---

* 'मोदोषिष्टं'—इति च च-पुस्तके। † ३२८ पृ० ‡-टीप्पनी द्रष्टव्या।

तत्र दैवहोत्रार्षेयमानुषहोतॄणां वरणं विवक्षुरादौ तदङ्गतया आश्रावणं विधत्ते— "स वै प्रवरायाश्रावयतीति। 'सः' अध्वर्युः प्रवरार्थम् 'आश्रावयति' आश्रावयेत्। विहित माश्रावणं प्रशंसति— "तद्यत् प्रवरायेत्यादिना। आश्रावणस्य यज्ञनिर्वर्त्तकत्वात् यज्ञत्वम्। "अथ होतार मिति। दैवं होतारम्, अग्नि मित्यर्थः ॥ १ ॥

आश्रावणाङ्गतयेध्मबन्धन-दर्भाणां ग्रहणं विधत्ते— "स दृध्म-सन्नहनान्येवेति। 'एव'कारो वक्ष्यमाणपक्षद्वयनिरासार्थः।

विपक्षे बाध माह—"स यद्धेति। यज्ञावयवस्य कस्यचिदनन्वालम्भे सति निरालम्बनत्वेन 'वेपनः' कम्पनशीलो 'वा स्यात्'; 'अन्यां वा' पतनादिलक्षणाम् 'आर्त्तिम्' प्राप्नुयात् ॥ २ ॥

तत्र केषाञ्चित् पक्ष मुपन्यस्यति— "तद्वैक इति। "स्तीर्णाया इति। "षष्ठ्यर्थे चतुर्थी[1]"। तेषा मभिप्राय माविष्करोति— "इदं वा इति। स्तरणसमिन्धनलक्षणस्य कार्यस्य करणात् 'इदं' बर्हिरा-दिकं 'यज्ञस्य' 'किञ्चित्' अङ्गम्। स्पष्ट मन्यत् ॥

तन्निराकरोति— "तदु तथेति।

पक्षान्तराद्स्य विशेष माह— "एतद्वा इति। दृध्मसन्नहनाग्नि-समार्जनलक्षण-कार्यद्वयकरणाद् 'एतत्' दृध्मसन्नहनात्मक मेव 'यज्ञस्य' 'किञ्चित्' प्रधान मङ्गम्; अतस्तद्धारणपक्ष एव श्रेया-नित्यर्थः। अत एव कात्यायनः आदाविध्मसन्नहनान्येवाभिधाय[2]

१— पा० २. ३. ६२ सू० वा० १।

२— का० श्रौ० सू० १. ३. १४, १५, १६, १७ सूत्राणि द्रष्टव्यानि। "अष्टादशेध्मं परिधिवत्ताग्राम्, एकविंशतिं वा"—इति च तत्रैव (१८, १९, सू०)। परिधिवत्ताख्यिहैवोक्तपूर्वाः (२प्र० ६ब्रा० १९, २०क०)।

पश्चात् पश्चान्तरं निर्हिदेश—"इध्मसन्नहनान्यादायोआवये[1]त्याहा-सुश्रौषडित्यग्नीद् वेदिबर्हिरिध्मप्रकल्प मपच्छिद्यैके"-इति[2] ॥ २ ॥

अथ देवहोतुरग्नेर्वरणं विधत्ते—"स आआग्नेति। 'अग्ने' आर्षेय-होढवरण-मानुषहोढवरणाभ्यां पूर्वम्। देवहोतारं विग्रिनष्टि—"अग्नि मेवेति ॥

वरणस्य प्रयोजन माह—"तदग्नय इति। 'निङ्कुते' "नि+ङ्कुङ् अपनये[3]"। अपनेतव्यस्याच तदसत्कारप्रयुक्तोऽपराधः। तस्य क्रिय-माणत्वादग्नेर्निङ्कवः। कथं देवानां निङ्कवः स्यादिति तं प्रकारं विभज्य दर्शयति—"यदहाग्नेऽग्नि मित्यादिना। अग्नेर्दैवहोढत्वेन देवसम्बन्धात् तद्वरणेन तेषा मपि निङ्कव इत्यर्थः ॥ ४ ॥

अत्र मन्त्रपाठ एवाग्नेर्वरण मित्याह—"स आहेति। तथैव कात्यायनोऽप्याह—"अथ प्रहृणीतेऽग्निर्दैवो दैव्यो होतेत्यादिना[4]।

१—"ब्रह्मन् प्रवरायाआवयिष्यामीति ब्रह्माण मामन्त्र्य आआवय-ओआवय-आवय-ओमाआवयेति वा ऽऽआवयति"-इति आप० औ० सू० २. १५. ३। अत एव तै०-सं०-भाष्ये चाह सायणः-"'आआवय'-इत्यय मेव पाठोऽत्रत्यः (तैत्तिरीयग्राखीयः); 'ओ-आवय, आवय, ओमाआवय'-इति च त्रयं ग्राखान्तरीयम्"-इति (तै० सं० १. ६. ११.)।

२—का० औ० ३. २. ३, ४, ५ सूत्राणि।

३—अदा० आ० १०७२ धातुर्निपूर्व इत्यर्थः।

४—का० औ० सू० ३. २. ७।

प्रवरविधिप्रेषार्थवादे यो देवानां निरुक्तः सङ्क्षेपविवरणाभ्यां मुक्तः, तं मन्त्रपदतात्पर्याभिधानद्वारेणापि प्रतिपादयते— "अग्निर्होत्यादिना। अग्नेर्देवहोतृत्वसमर्थनेन[1] ॥ ५ ॥

द्वितीयं मन्त्रभागं मनूद्य व्याचष्टे— "देवान् यच्चदिति। 'विद्वान्'-इत्यनेन यष्टव्यदेवतापरिज्ञानम्, 'चिकित्वान्'-इति परिज्ञातस्यार्थस्याविस्मरणम्। अग्नेस्तथाविधज्ञानवत्त्वं "विद्वाँ आ वक्षि विदुषो नि षत्सि"-इत्यादिमन्त्रेषु[2] प्रसिद्धम्। 'अनुष्ठ्या' अनुक्रमेणेत्यर्थः[3] ॥ ६ ॥

१— "अग्निर्दैवो दैव्यो होता देवान् यक्षद् विद्वांश्चिकित्वान् मनुष्वद् भरतवदमुवदमुवद् ब्रह्मण्वदा च वक्षद् ब्राह्मणा अस्य यज्ञस्य प्रावितारो ऽसौ मानुषः"—इत्येष मन्त्रः प्रवरनिगद उच्यते। वरणार्थो निगदस्तत्रणो मन्त्र इति तदर्थः। तस्यास्यामुवदित्यन्त आद्यो भाग इह विहितः, उत्तरभागस्त्वनुपद मेवोपरिष्टाद् विधास्यते। तत्रापि भरतवदित्यन्तो दैवहोतृवरणे विनियुज्यते, अमुवदित्यादिरार्षेयवरणे, असाविति मानुषवरणे इति विवेकः। इमे भागाः आप० श्रौ० २. १५. ५-११-१४-सूत्रेषु च प्रपञ्च विहिताः।

२— ऋ०स०३. १४. २ ऋचोऽपरार्द्ध एषः।

३— " 'अनुष्ठु'-इत्येतदव्ययं सम्यक्-शब्दसमानार्थं सुष्ठिति यथा। सम्यक् अनुक्रमेण। 'अपदुःसुषु स्थः (उ० १. २५.)'—इति विधीयमानः कु-प्रत्ययो बहुलवचनात् तिष्ठतेरनुपूर्वादपि भवति"—इति ऋ० स० १. ९४. ३ भाष्ये सायणः। " 'अनुष्ठुया' × × × सुपां सुलुगिति (पा० सू० ७. १. ३९.) तृतीयाया याजादेशः"—इति च ऋ० स० ४. ४. १५ भाष्ये स एवाह।

"मनुष्वदिति। तृतीयमन्त्रभागगतस्य 'मनुष्वत्'-पदस्य सामर्थ्यलभ्योऽर्थः "तदनुक्रत्येत्यादिः। अय मर्थः।— यथा मनुः स्वकीये यज्ञे देवान् अनुक्रमेणेष्टवान्, एवम् 'इमाः प्रजाः' अपि 'यजन्ते'। तद्वदग्निरपि होता भूत्वा यजत्वित्यर्थः॥

तस्यैवाभिप्रायान्तर माह— "मनोर्यज्ञ इत्यादिना। 'इति'-शब्दोऽप्यर्थे, 'वै'-शब्दः प्रसिद्धौ। अस्मिन् पक्षे 'मनुष्वत्'-इति "तत्र तस्येव"-इति[1] षष्ठ्यर्थे वतिः। यस्मात् 'मनोर्यज्ञ इति' 'आज्ञः' सर्वे जनाः, अतो मनोर्यागकर्तृत्वम्; मनोर्यज्ञ इवास्मिन् यज्ञेऽपि देवान् यजत्वित्यर्थः। "नभोऽङ्गिरोमनुषां वत्युपमज्ञानम्"—इति[2] भ-मज्ञया पदमज्ञाया लाभावः॥ ७॥

"भरतवदितीति। भरतशब्दस्याग्न्यभिधायकत्वे द्वेधा व्युत्पत्तिं दर्शयति— "एष होत्यादिना॥ ८॥

यजमानस्यार्षेयवरणं विधत्ते— "अथार्षेय मिति। 'अथ' दैवहोतृवरणानन्तरम्, 'आर्षेयम्' ऋषीणां सम्बन्धिनं त मध्वर्युः 'वृणीते' वरणं कुर्यात्, "अमुवदमुवत्"-इति[3] कौर्त्तयेत्। तत्प्रयोजन माह— "ऋषिभ्यश्चेति। 'यः' यष्टु मुपक्रान्तवान् 'अयं' यजमानः शारीरश्रुताध्ययनसम्पत्त्या हि महासामर्थ्यवानित्येतदमुवदमुवदिति पुरातनप्रसिद्धऋषिदृष्टान्तेन गम्यते, अतस्तेभ्योऽस्य यजमानस्य सामर्थ्य

१— पा०सू० ५. १. ११६। २— पा० १. ४. १८ सू०वा० ३।

३— "अमुवदमुवदित्यत्र सर्वनामस्थाने यजमानसम्बन्धीनि पूर्वजभूतानि परस्मात् पितृस्थानीयादर्वाचि पितृ-तत्पुत्र-तत्पौत्ररूपाणि त्रीणि आर्षेयाणि ऋषेरपत्यानि वृणीते"—इति का०श्रौ० ३. २. ७ सू०या०वृ०।

मावेदितं भवति। अचाग्नाधाने देवतापरिग्रहात् तत्सन्निधानं सिद्ध मित्यभिप्रेत्य 'ऋषिभ्यश्चैवैन मेतद्देवेभ्यश्च'-इत्युक्तम् ॥ ९ ॥

विहित मार्षेयवरण मवरोहेण कर्त्तव्य मिति विधत्ते— "परस्तादर्वागित्यादिना। "ज्यायसस्पतय इति। 'ज्यायान्' वृद्धः, पूर्व मित्यर्थः, तस्य पतिः ततोऽपि ज्येष्ठः, पूर्वपुरुषः। प्रत्येकविवक्षयैकवचनप्रयोगः; यः पूर्वः-पूर्वः तस्मै-तस्मै, तत्तन्नामग्रहणेन निरूपं कृतवान् भवतीत्यर्थः ॥

परस्तादर्वाम्वरण मुपपादयति— "इदं हीति। पिता, पुत्रः, पौत्रः,—इत्यनेनैव क्रमेणोत्पत्तिरिति यत्, 'इदं हि' लोकसिद्धम्; अतस्तदनुसारेण आर्षे वरणेऽपि पूर्वपूर्वपुरुष मारभ्य अर्वाक् मेव युक्त मित्यर्थः। तथाच कात्यायनः प्रवराभिधानसमये अवरोहक्रमेणैव वरण माह— "भृगुवच्छ्यवनवदप्नवानवदौर्ववज्जमदग्निवदित्यादिना ॥ १० ॥

"स आर्षेय मिति। प्रवरशेषस्य प्रथमभाग मनूद्य व्याचष्टे— "ब्रह्मणवदिति। 'ब्रह्म' परिवृढं कर्म[1], तत्साधकत्वाद् 'अग्निः' अपि 'ब्रह्म'; स यथा आवहति, तद्वदित्यर्थः। "आ च वक्षदिति। 'या एव देवताः' 'आवोढुम्' आकांक्षातुम् "अग्नि मग्न आवह"-इत्यादिना 'आह' होता, 'ता एव' आवहन्तिति ॥ ११ ॥

तन्मन्त्रवाक्य माह— "ब्राह्मणा इति। साङ्गवेदाध्यायिनः 'अनूचानाः' 'ये' सन्ति, त एवाच 'ब्राह्मण'-शब्दाभिधेया ऋत्विजः; ते

१— "ब्रह्म परिवृढं सर्वतः"-इति निरु० १. ३. ३।

'प्राविताराः' कर्त्तारः। अवतिरत्र क्रियावचनः। "तन्वते"-इत्यस्य तात्पर्याभिधानं 'जनयन्ति'—इति। यस्मादेतद्भागपाठात् तेभ्यो निश्चवः कृतो भवति, तस्मादयं मन्त्रभागः पठनीय इत्यर्थः ॥ १२ ॥

आर्षेयवरणानन्तरं मानुषहोतृवरणं कर्त्तव्यम्, तच्च मन्त्रपाठ एव तद्वरणमित्याह— "असाविति। 'तत्' तेन "असौ"-इतिमन्त्रपाठेन। असावित्यत्र होतुर्नाम प्रथमान्तं निर्दिश्येत्। तथाच कात्यायनः— "असौ मानुष इति होतृनामग्रहणम्"-इति[1]। 'अहोता'-इति छेदः[2]। 'एतर्हि' एतस्मिन् मन्त्रलक्षणे वरणे सति ॥ १३ ॥

१— का० श्रौ० सू० ३. २. १२। अस्यैव वृत्तौ याज्ञिकदेवेन हि विहितस्य कृतस्य प्रवरमन्त्रस्यैव मर्थः कृतः—" 'अग्निः' अयं 'देवः', न मानुषः, न भूतमात्र मचेतनम्। 'दैव्यः' देवैरपि पुरस्कृतः सम्भावितशक्तिः। 'होता' साधुज्ञाता। य ईदृशो होता, सः 'देवान्' 'यक्षत्' यजतु, ('आ च वक्षत्') आवहतु च। त मग्निं होतारं वृणे इत्यर्थः। 'विद्वान्' जानानः। यथा यज्ञ च यज्ञियो-ऽनादौ संसारेऽभ्यस्तकर्मेत्यर्थः। कथम्? 'चिकित्वान्' चेतनावान्, अविस्मरणशीलः। सोऽधुनापि अप्रमत्तः सन् 'मनुष्वत्' मनोरिव। यथा स्वायम्भुवादेर्मनोर्यज्ञेऽग्निना देवा इड्याः, तथाऽस्यापि यजमानस्य यज्ञे यजत्वित्यर्थः। 'भरतवत्' भरतो मानवो वर्षाधिपतिः, तस्येव। वसिष्ठादिर्यजमानस्य पूर्वजो मन्त्रदृक्, तस्येव। ब्रह्मा सर्वेषां पूर्वजः, तस्येव। 'आ च वक्षत्' आवहतु च। यद्यपि चैव मग्निरेवात्र होता, तथापि ब्राह्मणा अस्य यज्ञस्य प्रकर्षेण 'अवितारः' रक्षि-तारः। × × ×। 'असौ' देवदत्तो यज्ञदत्तो वा 'मानुषः' होता, 'यक्षत्, आ च वक्षत्'—इति वर्त्तते"—इति।

२— मूले "प्रहृतीतेऽहोता"—इत्यत्र बोधम्।

इत्थं मध्वर्युकर्तृकं होत्वरणमभिधाय तस्य स्वं जपं विधत्ते—"स प्रवृतो होता जपतीति। "देवता उपधावतीति जपप्रयोजनकथनम्; 'तस्मात्' मन्त्रे सति पित्रग्न्यादीनां श्रवणात्। उपधावनप्रकारं योजयित्वा दर्शयति—"यथानुष्ठ्येति। यथा याज्यासमये होता वषट्कर्त्तव्यदेवता अनुदिश्य-अनुदिश्य वषट्करोति, यथा वा अग्निस्थं तं देव मुद्दिश्य हव्यं वहति, तथाच स यज्ञो यथा 'न क्लमेत्' न श्लथेत्, न भ्रंश्येत; एवं स होता देवेभ्य उपधावनं कृतवान् भवति ॥ १४ ॥

"तत्र जपतीति। 'तत्र' तस्मिन् वरणाख्ये कर्मणि। मन्त्रभागस्याय मर्थः— हे 'सवितः' सकलकर्मानुज्ञातः! 'देव!' 'एतत्' एतेन मम वरणेन मद्व्याजेन 'त्वा' त्वा मेव 'वृणते' अध्वर्यवः। 'तत्' तेन मन्त्रपाठेन सवितुरनुज्ञा लब्धा भवति। 'हि'-शब्देन "सविता वै प्रसवाना मीशे"[1]—इत्यादिश्रुतिप्रसिद्धिर्द्योत्यते ॥

"अग्निꣳ होचायेतीति। होतुः कर्म 'होत्रं' स्व-स्व-मन्त्रपाठादि; तत् होत्रं कर्तुम् 'अग्निं' वृणते; न तु मा मित्यर्थः ॥

मन्त्रगतं यत् 'अग्नि'-पदम्, यच्च तद्विशेषणं 'देवहोत्र'-पदम्, तदुभयं पूर्ववद् विभज्य प्रशंसति— "तदग्नय इत्यादिना ॥ १५ ॥

"अग्न इत्यादि। विश्वे च ते नराश्च विश्वनराः, तेषां सम्बन्धी 'वैश्वानरः'; स च पालनात् 'पिता' उच्यते; तेन सह, अग्निं वृणत इति पूर्वत्र सम्बन्धः। वैश्वानरात्मकं देव मग्निं च वृणत इत्यर्थः[2] ॥

१— ऐ० ब्रा० १. ३. ५।

२— मन्त्रस्वयमिहैवाम्नातो वाजसनेयिनाम्। एवमुत्तरत्रापीह यद्यत्र।

वैश्वानरशब्दस्याग्नौ प्रसिद्धेश्चाभिमत मर्थं माह— "संवत्सरो वा इति। "संवत्सरो वै प्रजापतिः"-इतिश्रुतेः[१] संवत्सरस्य प्रजापतित्वम्; तस्यैव सकलमनुष्योत्पादकत्वेन सम्बन्धात् वैश्वानरत्वम् ॥

"अग्ने पूषन्नितिमन्त्रभागस्याभिप्राय माह— "अनुवक्ष्यन् वा इति। होता ह्यनुवाक्याः पठिष्यन्, याज्याभिः 'यक्ष्यन्' च 'भवति'; 'तत्' एतदनुवचनं यजनस्यैव 'एताभ्यः' अग्न्यादि-'देवताभ्यः' निरुक्तवाय भवति। प्र च वद, प्र च यजेति प्रवचनयजनयोस्तेष्वारोपः। इम मेव निरुक्तिं विशदयति— "यूय मिति ॥ १६ ॥

"वसूना मिति। रातिर्दानम्, तस्यां भवेम; धनं लभेमहीत्यर्थः। "रुद्राणाम् उर्वायाम्"-इति। उरुत्वे तेषां यन्महत्त्वम्, तस्मिन् स्यामेति सम्बन्धः। 'स्वादित्याः' तेषा सुपसदनेन सुप्रीताः आदित्याः वयम् 'अदितये' देवमात्रे, एतन्नामिकायै देवतायै वा 'अनेहसः' अपापिनः, अनपराधिनो भवेम, अथवा दितिः खण्डनं नाम्नः[२], तदभावाय चिरकालजीवनाय भवेमेत्यर्थः ॥

अत्र मन्त्रविवक्षया "चया देवाः"-इत्युक्तम्, पृथक् पृथक् प्रार्थनायाः पर्यवसितं फलं माह— "एतेषा मिति ॥ १७ ॥

मन्त्रभागे विशेष्यभूतस्य वाक्शब्दस्य अर्थं 'उद्यासम्' इत्यत्र वदिधातुनैव उपात्त मित्यभिप्रेत्य तद्विशेषणीभूतं 'जुष्टाम्'-इति पदं क्रियाविशेषणतया व्याचष्टे— "जुष्टा मित्यादिना। अत्र केवलोऽपि वदिरुच्चारणार्थं वर्त्तते। किं मनेन वाचो जुष्टत्वप्रार्थनयेति तदुपपादयति— "तद्धीति। 'यो जुष्टम्' 'अनुब्रवत्' अनु-

१— ऐ० ब्रा० ३. २. ७। २— निरु० ४. ४. १, २; ११. ३. १, २।

ब्रूयात्, 'तत्' तदीयं कर्म 'समृद्धम्' इत्यर्थः। ब्रुञो लेट्यडागमः[१]। एव मुत्तरवाक्ययोरपि योजना ॥ १८ ॥

'ब्रह्मभ्यः'-इति ब्रह्मशब्दस्य ब्राह्मणजातिरर्थ इति व्याष्टे— "जुष्टां ब्रह्मभ्य इति ॥१९॥

"जुष्टां नराशंसायेति। यथा सर्वेऽपि नराः 'आ' सर्वतः शंसन्ति, तथाविधशंसनाय 'जुष्टां' प्रियां मित्यर्थः। अत्र साधारणेन नराणां यो जोष आशंसितः, स युक्त एवेत्याह— "प्रजा वै नर इत्यादिना। न केवलं तद्धि होत्रज्ञाना मेव संज्ञापोऽपेक्षितः, अपि तु यो जुष्टां वाचं जानाति, यश्च न, स सर्वैरप्यं साधुः उक्तवा- नित्येवंरूपया वाचा 'विसृज्यन्ते' उच्चार्यन्ते तदेव समृद्ध मित्यर्थः ॥

इमानि मन्त्रवाक्यानि व्याख्याय ऋगात्मकं मन्त्रं व्याख्यातुं साकाङ्क्षेनानुवदति— "यदग्नेति। मन्त्रस्याय मर्थः।— 'होत्रवर्ये' होत्रवरणे निमित्तभूते सति[२] 'यत्' 'चक्षुः' अङ्गम् ('जिह्वां') अंशोपरोधेन कुटिलं ('परापतत्') सन्निपतेत्, 'तत्' विशेषेण द्रष्टा 'अग्निः' पुनराभरतु। चक्षुर्वत्प्रधानं होत्रस्याङ्गं यद्दृष्ट मभूत्, तदग्निः समाद्धालिति तात्पर्यार्थः। मन्त्रस्य तात्पर्यार्थं प्रदर्श्यते— "यथेत्यादिना। पुरा 'यान् अग्ने अग्नीन् होत्राय' वृतवन्तः, 'ते' 'प्राधक्वन्' प्रगता नष्टा अभवन्; 'एवम्' इदानीं 'मे' मदङ्गं

१— धा० अदा० उ० ३४। पा० ३. ४. ७ सू०, ३. ४. ९४ सू०।

२— 'होत्रवर्ये'-इति ऋ० सं० १. ३१. ३। "होत्रा त्रियत इति होत्रवर्यो यज्ञः"-इति तत्र सा० भा०।

'प्रवरेण' निमित्तेन 'अमायि' हिंसित मभूत्; तत्समाधत्स्वेत्युक्त मिति ॥ २० ॥

अथ वृतस्य होतुः सम्मार्ग्नं विधत्ते— "अथाध्वर्यु मिति। सम्मार्ग्नेनेष्टं विवक्षुः अनयोः सम्मार्ग्ने कारण माह— "मनो वा इति। अध्वर्योः कर्त्तव्यविषयस्य मनोव्यापारस्य बाहुल्यात् मनोरूपत्वाभिधानम्। याज्यापुरोनुवाक्यादिकेवलवाग्व्यापारात् होतुर्वागात्मकता, तदुभयात्मकत्वाद् यज्ञस्य; तयोः सम्मार्ग्नेन मनोवाचोः सन्धानं कृतं भवति। संसर्ग्नप्रकार माश्वलायन माह— "अंसेऽध्वर्यु मन्वारभेत पार्श्वस्थेन पाणिना आग्नीध्र मङ्गदेशेन"-इति[1] ॥ २१ ॥

तत्र जपतीति। अन्वारब्धेन जपितव्यं मन्त्रं सतात्पर्यं माह— "वरुणोर्वीरित्यादिना। अग्न्यादीना मुरुत्वं लोकसिद्धम्। 'एताः' मां दुरितात् पान्त्विति तस्यार्थः। 'अंहः'-शब्दस्य तात्पर्याभिधानम् "आर्त्तेरिति। आर्त्तिर्नाग्नः। अग्न्यादीनां प्रत्यक्षदेवतात्वात् तद्रुचितस्य नाग्नाभावः प्रसिद्ध इत्याह— "तस्मो होति ॥ २२ ॥

"अथेति। सम्मार्ग्नदेशात् 'होत्रषदनं' प्रत्यागच्छेत्। उत्तरवेदिश्रोणेर्होत्रषदनम्। 'सः' होता तस्मात् सदनात् 'एकं तृणं' "निरस्तः"-इतिमन्त्रेण निरस्येत् ॥

परावसोर्निरसने कारण माह— "परावसुर्हेति। 'परा' परागतं 'वसु' यज्ञाख्यं धनं यस्मात्, स तथोक्तः[2] ॥ २३ ॥

"अथ होत्रषदन इति। उपवेशनमन्त्र माह— "इद मह

१— आश्व० श्रौ० सू० १. ३. २५, २६। सव्येन वेति तच्छेषः।

२— साङ्ख्या० श्रौ० सू० १. ६. ६। 'पराग्वसुः'-इति कौषी० ३. १३७।

मिति। 'अर्वा' अर्वाक् अभिमुखं 'वसु' यज्ञाख्यं धनं यस्य, स तथोक्तः[१], 'तस्य' ; यौदत्यचेति 'सदनं' स्थानम्। तच्च संस्थितिभावनया स्वयमपि तत्सदृशो भवतीत्यभिप्रायः ॥ २ ४ ॥

तत्रोपविष्टस्य मन्त्रजपं विधत्ते— "तवेति। हे विश्वकर्मन्! कृत्स्नविषयव्यापारं करोतीति विश्वकर्मा, 'तनूपाः' तनोः पाता, महादेव! त्वं शरीरस्य पाता भवसि। उपवेशनस्थानादीषत् उत्तरतस्थलनं समन्त्रकं विधत्ते— "मा मेति। तस्याय मर्थः।— हे उभावग्नी! युवां 'मा' माम् 'उत्' उत्कृष्ट माधिक्येन 'मा उषिष्टं' दाहं माकार्षम्। "उष दाहे"-इति[२] धातुः। अस्यैव तात्पर्य माह— 'मा हिंसिष्टम्'-इति। यतः 'एषः' 'लोकः' 'वां' सम्बन्धि स्थानम्, अतो हेतोर्मा माहिंसिष्ट मिति प्रार्थना युक्ता। होत्रषदनात् 'उदङ्' उदङ्मुखः 'एजति' "एजृ कम्पने[३]", जपन् कम्पते। "अन्तरा वा इत्यादिना दाहप्रसङ्गप्रदर्शनम् ॥ २ ५ ॥

अथ समन्त्रकं[४] जपं विधत्ते— "अथाग्नि मित्यादिना। मन्त्रस्याय मर्थः।— हे 'विश्वे देवाः!' 'दृह' यज्ञे होत्रत्वेन 'वृतः' अहं 'यथा' येन प्रकारेण, 'यथा' येन च 'पथा' मार्गेण, 'वः' 'हव्यम्' 'आ' समन्ताद् 'वहानि' प्रापयानि; तदुभयं 'मे' अस्याय मन्त्रम्

१— वा० सं० १५. १९. 'अर्वाग्वसुः'-इति। "पर्जन्यो वा उपरि तत्यत्तमाहोपरीत्युपरि हि पर्जन्योऽथ यदर्वाग्वसुरित्याहातो ह्यर्वाग्वसुः दक्षिरन्नं प्रजाभ्यः प्रदीयते"-इतीहैवोपरिष्टात् (८. ३. ६. २०.)।

२— धा० ग्वा० प० ६९६। ३— धा० भ्वा० प० २३४।

४— ऋ० सं० १०. ५२. १।

'प्रब्रूत'। एतन्मन्त्रस्यार्थं लोकदृष्टान्तप्रदर्शनपुरःसरं विशदयति— "यथा येभ्य इत्यादिना। 'यथा' लोके कश्चित् पाचकः तत्स्वामिनं पृच्छति— 'पक्वम्' अन्नं यथा आनेष्यामि, यथा वा आनीतं पाचे समर्पयामीति। एवम्प्रकारप्रश्नस्य लोके दृष्टत्वात् उक्त मनुज्ञापनप्रार्थन मित्यर्थः। दार्ष्टान्तिके योजयति— "एव मेवैतदिति। 'अनुख्या' आनुपूर्व्येण 'वषट्कुर्याम्' वषडिति शब्दं ब्रूयाम्। 'वषड्'-शब्दो हविःप्रदानसाधनः[१]; "स्वाहाकारेण वा वषट्कारेण वा देवेभ्योऽन्नं प्रदीयते"—इतिश्रुतेः[२]। सिद्ध मन्यत् ॥ २६ ॥ २ [५. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे पञ्चमाध्याये प्रथमं ब्राह्मणम्[३] ॥

१— "यस्यै देवतायै हविर्गृहीतं स्यात्, तां ध्यायेद् वषट् करिष्यन्"—इत्यादि ऐ० ब्रा० ३. १. ८। उद्धृतश्चैतद्वचनं निरुक्ते (८. ३. ७.)। "वौ३षडिति वषट्कारः"—इति आश्व० श्रौ० सू० १. ५. १५। अतएव तै० सं० १६. ११ भाष्ये सायणोऽप्याह—"वषट्कारेण वौषडित्येवंरूपो मन्त्रो विवक्षितः"—इति।

२— "यजतिजुहोतीनां को विशेषः? तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोनुवाक्यावन्तो यजतयः, उपविशद्धोमाः स्वाहाकारप्रदाना जुहोतयः"—इति का० श्रौ० १. २. ५, ६, ७ सू०।

३— अस्मिन् ब्राह्मणे प्रवरविधावाश्रावणादिक माम्नातम्। तत्प्रवृत्तिश्चैवम्।— अध्वर्युर्होतारं प्रादक्षिण्येन मुक्त्वोत्तर मपरेण प्राङ्मुखो हौत्रासनहवनान्यादाय 'ओ३श्रावय'—इत्याह। ततोऽग्नीत् दक्षिणा-

अग्निर्होता व्वेत्त्व*ग्नेर्होत्रं† मिति । अग्निर्‡रिदꣳ होता व्वेत्त्वित्येवैतदाहाग्नेर्होत्रं मिति तस्यो हि होत्रं व्वेत्तु प्रावित्रं मिति यज्ञो वै प्रावित्रं व्वेत्तु यज्ञ मित्येवैतदाह साधु ते यजमान देवतेति साधु ते यजमान देवता यस्य तेऽग्निर्होतेत्येवैतदाह घृतवती मध्वर्यो स्रुच मास्यस्वेति तदध्वर्यु§ मसौति स यदेका मिवाह ॥ १ ॥

यजमान ऽएव जुहू मनु । योऽस्मा ऽअरातीयति सु ऽउपभृत मनु स यद् वै ऽइव ब्रूयाद् यजमानाय द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्यादुत्तैव जुहू मन्वाद्य उपभृत मनु स यद् वै ऽइव ब्रूयादवु ऽआद्यं प्रत्युद्यामिनं कुर्यात् तस्मादेका मिवैवाह ॥ २ ॥

मुखोऽध्वर्यु मुत्तरेण स्थितः स्फ्यसन्नहने पाणौ कृत्वा 'अस्तु श्रौ३षट्'–इति प्रत्याह । ततो गृहीतसन्नहन एवाध्वर्युः 'अग्निर्देवो दैव्यः'–इत्यादिराह । ततः परस्तादर्वाञ्चि यजमानस्य त्रीणि प्रवरनामधेयान्याह । तद्यथा–'कश्यपवदवत्सारवन्नैध्रुववदिति । एतदनन्तर मेव 'ब्रह्मणवदा च वक्षद् ब्राह्मणा अस्य यज्ञस्य प्राविताराऽमुकगर्मा होता मानुषः'–इति होटनामग्रहण मुचैरुपांशु वा कर्त्तव्यम् । ततो होता 'देव सवितरित्यादिकं जपित्वा उत्थाय अध्वर्यु मन्वीक्ष्य चांसयोः प्रादेशेन सम्मृशति । होत्रा सम्मृष्टौ तौ चोपविशत इति ॥

* 'वेत्व०'–इति क, ख, ग, ङा०-वेवर्-वृत्तश्च । † 'हौत्र'–इति सा०-सम्मतः ।

‡ 'मित्यमु'–इति ग । § 'दक्षु'–इति च ।

देवयुवं विश्ववारा मिति*। उप†स्तौत्येवैना मेतन्मह-यत्येव यदाह देवयुवं विश्ववारा‡ मितीडामहै देवाँ३§ ऽईडेन्यान् नमस्याम नमस्यान् युजाम यज्ञियानितीडा-महै तान् देवान् यु ऽईडेन्या नमस्याम तान्यु नमस्या युजाम यज्ञियानिति मनुष्या वा ऽईडेन्याः पितरो नमस्या देवा यज्ञियाः ॥ ३ ॥

या व्वै प्रजा यज्ञे ऽनन्वाभक्ताः। पुराभूता वै ता ऽएव मेवैतद्या ऽइमाः प्रजा ऽअपराभूतास्ता यज्ञ ऽआभजति मनुष्याननु पशवो देवाननु व्वयाꣳस्योषधयो व्वनस्पतयो युदिदं किञ्चैव मु तत्सुर्व्वं यज्ञ ऽआभक्तम् ॥ ४ ॥

ता वा ऽएताः। नव व्याहृतयो भवन्ति नवेमे पुरुषे प्राणा ऽएतानेवास्मिन्नेतद्दधाति तस्मान्नव व्याहृतयो भवन्ति ॥ ५ ॥

यज्ञो ह देवेभ्योऽपचक्राम। तं देवा ऽअब्रुवमन्त्रयन्ता नः शृणुप न आवर्त्तस्वेति सोऽस्तु तथेत्येव देवानुपाव-वर्त्त तेनोपावृत्तेन देवा ऽअयजन्त तेनेष्टेदमभवन् युदिदं देवाः ॥ ६ ॥

---

*, ‡ 'देवयुवं विश्ववारा मिति'–इति च। † 'मित्युप'–इति ग।

§ 'देवाꣳ१'–इति क, 'देवाꣳ२'–इति ख, 'देवाँ२॥'–इति च।

स यदाश्रावयति । यज्ञु मेवैतदनुमन्त्रयत ऽश्रा नः शृणुष न ऽश्रावर्त्तस्वेत्यथ युत्प्रत्याश्रावयति यज्ञु ऽएवैतदुपावर्त्ततेऽस्तु तथेति तेनोपाहृत्तेन रेतसा भूतेनऽर्त्विजः सम्प्रदायं चरन्ति युजमानेन परोऽक्षं युथा पूर्षपाचेण सम्प्रदायं चरेयुरेव मनेनऽर्त्विजः सम्प्रदायं चरन्ति* तद्वाचैवैतत्सम्प्रदायं चरन्ति व्वाग्घि यज्ञो व्वागु हि रेतस्तदेतेनैवैतत्सम्प्रदायं चरन्ति† ॥ ७ ॥

सोऽनुब्रूहीत्येवोक्ताध्वर्युः । नाप‡व्याहरेन्नो ऽएव होतापव्याहरेदाश्रावयत्यध्वर्युस्तदग्नीधं यज्ञु ऽउपावर्त्ततेु ॥ ८ ॥

सोऽग्नीन्नापव्याहरेत् । आ§ प्रत्याश्रावणात् प्रत्याश्रावयत्यग्नीत् तत्पुनरध्वर्युं यज्ञु ऽउपावर्त्ततेु ॥ ९ ॥

सोऽध्वर्युर्न्नापव्याहरेत् । आ यजेति व्वुक्तोर्यजेत्येवाध्वर्युर्हौत्रे यज्ञु सम्प्रयच्छति ॥ १० ॥

स होता नापव्याहरेत् । आ¶ वषट्कारात् तं** वषट्कारेणाग्नावेव योनौ रेतो भूतु सिञ्चत्यग्निर्व्वै योनिर्यज्ञस्य स तुतः प्रजायत ऽइति नु हविर्यज्ञेऽथ सौम्येऽध्वरे ॥ ११ ॥

---

*, † 'चरन्ति'–इति च । ‡ 'ध्वर्युर्नाप'–इति ग ।
॥ "काण्डस्यार्द्धम् । ४१९"–इतीह च-पुस्तकेऽधिकः पाठः ।
§, ¶ 'हरेदा'–इति ग । ** 'सु'–इति सा०-सम्मतः ।

स वै ग्रहं गृहीत्वाध्वर्युः । नापव्याहरेद्दोषाकुरणादुपावर्त्तध्व मित्येवाध्वर्युरुन्नातृभ्यो यज्ञꣳ सम्प्रयच्छति॥१२॥

तु ऽउन्नातारो नापव्याहरेयुः। ओत्तमाया ऽएषोत्तमेत्येवोन्नातारो ह्येव यज्ञꣳ सम्प्रयच्छन्ति ॥ १३ ॥

स होता नापव्याहरेत् । आ* वषट्कारात्तं व्वषट्कारेणाग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्व्वै योनिर्यज्ञस्य स ततः प्रजायते ॥ १४ ॥

स युद्य सोऽपव्याहरेत् । यं† यज्ञ ऽउपावर्त्तते यथा पूर्णपात्रं परासिञ्चेदेवꣳ ह स यजमानं परासिञ्चेत् स यत्र हैव मृत्विजः संविदाना यज्ञेन चरन्ति सुर्व्व मेव तत्र कल्पते न मुह्यति तस्मादेव मेव यज्ञो भर्त्तव्यः ॥ १५ ॥

ता वा ऽएताः । पञ्च व्याहृतयो भवन्त्यो श्रावयास्तु श्रौषड् यज ये यजामहे व्वौषडिति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्त्तवः संवत्सरस्यैषैका यज्ञस्य मात्रैषा सम्पत् ॥ १६ ॥

तासाꣳ सप्तदशाक्षराणि । सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञ ऽएषैका यज्ञस्य मात्रैषा सम्पत् ॥ १७ ॥

---

* 'हरेदा'–इति ग । † 'हरेद्यं'–इति ग ।

ओ श्रावयेति वै देवाः । पुरोवातꣳ सस्रजिरेऽस्तु श्रौषडित्यभ्राणि समञ्जावयन् यजेति विद्युतं ये यजामह ऽइति स्तनयित्नुं वषट्कारेणैव प्रावर्षन् ॥ १८ ॥

स यदि वृष्टिकामः स्यात्* । यदौष्ठ्या वा युजेत दर्शपूर्णमासयोर्वैव ब्रूयाद् वृष्टिकामो वा ऽअस्मीति तुचो ऽअध्वर्युं ब्रूयात् पुरोवातञ्च विद्युतञ्च मनसा ध्यायेत्यभ्राणि मनसा ध्यायेत्यग्नीधꣳ स्तनयित्नुञ्च वर्षञ्च मनसा ध्यायेति होतारꣳ सर्व्वाण्येतानि मनसा ध्यायेति ब्रह्माणं व्वर्षति हैव तुच युचैव मृत्विजः संविदाना यज्ञेन चरन्ति ॥ १९ ॥

ओ श्रावयेति वै देवाः† । विराज मभ्याजुहवुरस्तु श्रौषडिति वत्स मुपावासृजन् यजेत्युदनयन्‡ ये यजामह ऽइत्युपासीदन् वषट्कारेणैव विराज मदुहतेयं वै विराड़स्यै वा ऽएष दोह ऽएवꣳ ह वा ऽअस्मा ऽइयं विराट् सर्व्वान् कामान् दुहे य ऽएवꣳ मेतं विराजो दोहं व्वेद ॥ २० ॥ ३ ॥

॥ इति चतुर्थप्रपाठके तृतीयं ब्राह्मणम् [५. २.] ॥

---

* 'स्याद्'–इति ग ।

† 'देवा'–इति ग ।

‡ 'यजेत्युदजयन्'–इति घ ।

अथ स्रुगादापननिगदं नवधा विभज्य व्याचिख्यासुराद्यं भाग मनूद्य तस्यार्थं माह— "अग्निर्होतेति[1]। वेदितव्यस्य मन्त्रे अनिर्देशात् 'इदम्'-इति तत्कर्मप्रदर्शनम्। दैव्यो 'होता अग्निः' 'इदम्' अनुष्ठेयं कर्म 'वेत्तु' जानातु। एतन्मन्त्रवाक्यं 'वेत्तिति' किम्? आह— इदं 'हौत्रं' कर्म। जानात्वित्याह, किं तदेदनेनेति तस्य हौत्रेण प्रतिनियतं सम्बन्धं माह— "अग्नेरिति। 'तस्य उ हि' तस्यैव हि। स च सम्बन्धनियम एवकारार्थेन 'उ'-शब्देन द्योत्यते।

द्वितीयभागे 'प्रावित्र'-शब्दार्थं माह— "यज्ञो वा इति। प्रकर्षेणावतीति 'प्रावित्रः' यज्ञः। अवतेरित्रप्रत्ययः[2]। यज्ञापरिज्ञाने हौत्रज्ञान मपि व्यर्थ मिति तज्ज्ञान माशास्यते।

तृतीयभागे सामान्येन निर्दिष्टां यजमानदेवतां विशिष्य व्याचष्टे— "साधु त इति। हे 'यजमान'! 'ते तव 'देवता' 'साधु' साध्वी। कथं साधुत्वम्? कैषा सा? तदाह— "यस्य त इति[3]। होतृत्वगुणकोऽग्निरेव तव देवतेत्याह स्म मन्त्रवाक्यम्।

१— "अग्निर्होतेति स्रुगादापनं प्रयाजेषु सन्निधेः"—इति का० श्रौ० सू० ३. २. १५। श्रुतश्चैष तैत्तिरीयाम्नाये— तै० ब्रा० ३. ५. ४. १; सं० २. ५. ६। तत्रत्यपाठश्चैवम्— "(१) अग्निर्होता वेत्त्वग्निः। (२) होत्रं वेत्तु प्रावित्रम्। (३) स्रुचो वयम्। (४) साधु ते यजमान देवता। (५) घृतवती मध्वर्यो स्रुच मास्यस्व। (६) देवायुवं विश्ववाराम्। (७) ईडामहे देवाꣳ ईडेन्यान्। (८) नमस्याम नमस्यान्। (९) यजाम यज्ञियान्"—इति। एष एव मन्त्रः स्रुगादापननिगद उच्यते।

२— "अग्नित्रादिभ्य इत्रौत्रौ"—इति उ० ४. १७५।

३— तै० सं० २. ५. ६ भाष्ये उक्तम्— "त मिमं ग्राखान्तरपाठं दूषयतीत्यादि। स च पाठस्तत्रान्यविध एवोद्धृत इति न शतपथीयः।

चतुर्थभागे वाक्यार्थस्य स्पष्टत्वात्तात्पर्यं माह— "घृतवती मिति। घृतपूर्णां 'स्रुचम्' 'आसञ्च' हस्ते धारयेत्यर्थः। अनेन अध्वर्यवे अनुज्ञां दत्तवान् भवति[1]। "उपसर्गादस्यत्यूह्योर्वा वचनम्"-इत्यात्मनेपदम्[2]। मन्त्रे 'स्रुचम्'-इत्येकस्या एव निर्देशं द्विवनिर्देशपक्षनिन्दापुरःसरं द्रढयति— "स यदित्यादिना। 'सः' होता 'एका मिव' स्रुच मित्येका मेव ब्रूयात् ॥ १ ॥

"यजमान एवेति। 'जुहू मनु' जुहूा अनुकूलः, तदभिमानीत्यर्थः। 'यः' च यजमानस्य 'अरातीयति' ग्राचव मिच्छति, 'सः' 'उपभृत मनु' उपभृतोऽनुकूलः। यत एव मतो होता यदि 'द्वे इव' जुहूपभृतावास्यस्येत्येवं 'ब्रूयात्', तदा 'यजमानाय' द्वेष्टारं ग्रचुं 'प्रत्युद्यामिनं' प्रतिकूलोद्योगवन्तं 'कुर्यात्'। तथा च तैत्तिरीयकम्— "यजमानदेवत्या वै जुहूः, भ्रातव्यदेवत्योपभृत्"-इति[3]। दोषान्तरोपन्यासेनापि द्विवचनं निषेधति— "अन्नमेवेति। 'आद्यः' अदनीयो व्रीहियवादिपदार्थः; तम् 'अत्र' यजमानाय प्रतिकूलं कुर्यात् ॥ २ ॥

"देवयुव मिति। देवानिच्छतीति 'देवयुः'। "क्याच्छन्दसि"-इत्युप्रत्ययः[4]। विश्वैरपि देवैर्वरणीया 'विश्ववारा'। आभ्यां स्रुग्विशेष्यते। 'एनां' स्रुचम् एतद् 'उपस्तौत्येव' श्लाघयत्येव। अत्र न कश्चिदपूर्वोऽर्थोऽभिधीयत इति सापि किमर्थं स्तूयत इत्यत आह— 'एतत्' 'महयत्येव' पूजयत्येव। 'यदाह' यदेतदाक्यं मन्त्र आहेत्यर्थः ॥

१— का० श्रौ० सू० ३. २. १६। २— पा० ७. १. ७ सू० वा० २।
३— तै० सं २. ५. ६. ३। ४— पा० सू० ३. २. १७०।

निगदस्य सप्तमादिभागत्रयं पृथक्-पृथग् व्याख्यातु मनुवदति— "ईडामहा इत्यादि। 'ये' देवाः 'ईड्याः' स्तुत्याः, स्तुतिभाजना इत्यर्थः; 'ये' च 'नमस्याः' नमस्कार मिच्छन्ते; ये च ('यज्ञियाः') यष्टव्याः हविर्भाजः; 'तान्' सर्वान् अविशेषेण स्तुति-नमस्कार-यागैः 'ईडामहै' पूजयामहै इति सङ्ग्रहार्थः। 'ईड्यान्'-इति "ईड स्तुतौ"-इत्यस्य[1] 'केन्य'-प्रत्ययः। ईड्यादीन् प्रशंसति— "मनुष्या वा इत्यादिना। कुशलादिस्तुतिमात्रेण प्रायेण परितुष्यन्त इति[2] 'ईड्याः'[3] मनुष्याः', "नमस्कारो हि पितृणा मितिश्रुतेः[4] 'नमस्याः' पितरः, हविःप्रदान मन्तरेणापरितोषाद् 'देवाः यज्ञियाः' ॥ ३ ॥

"यजाम यज्ञियानितीतिकीर्त्तने यज्ञस्य प्रुद्धिस्तुतया यागं तदनुप्रवेशेन प्रशंसति— "या वा इत्यादिना। देवमनुष्यात्मकासु प्रजासु मध्ये 'याः' प्रजाः' यष्टव्यत्वेन यज्ञ मन्वभजन्। तत्प्रकार माह— "मनुष्यानन्विति। 'मनुष्यान्' 'अनु'सृत्य 'पशवः' गवाद्याः क्षीरोधस्साधनत्वेनानुप्रविष्टाः। 'देवान्' 'अनु'सृत्य 'वयांसि' पक्षिणोऽनुप्रविष्टाः; "वसन्ताय कपिञ्जलानालभते"-इतिश्रुतेः[5]। अथ वा एकहायनप्रभृति-पञ्चदशहायनान्ताः 'पशवो वयांसि', तान्यनुप्रविष्टानीत्यर्थः। तान्यनुप्रवेशाच्चरुपुरोडाशाः, यूपादियज्ञ-साधनद्वारेणौषधिवनस्पत्यादयः। किं बहुना 'यत् किं चेदं' प्रतीयमानं वस्तु अस्ति, 'तत्' 'सर्वम् उ' सर्वं मध्येव मेव 'द्वारि'

१— धा० अदा० आ० ८। २— 'प्रायेण परितोषात्'—इति ठ।
३— "औणादिक एन्य-प्रत्ययः"—इति ऋ० सं० १. ७६. ५ सा० भा०।
४—°तै० ब्रा० ३. ३. १०. ८। ५— वा० सं० २४. २०. १।

द्वारया यज्ञ मनुप्रविष्ट मेव। अतो यज्ञसंस्थगर्भवतां न कदाचित् पराभवोऽस्ति, तदसंस्पृष्टं च न किञ्चिदस्तीति यज्ञस्तुतिः ॥ ४ ॥

निगदविभागगतां नवसङ्ख्यां[१] प्रशंसति— "ता वा इति। 'व्याहृतयः' उक्तवाक्यानि। तानि च 'नव'; सप्त शीर्षण्याः[२], द्ववावाञ्चाविति[३]। 'प्राणाः' अपि 'नव'[४]। तदेतेन नवविभागकरणेन 'अस्मिन्' यजमाने 'पुरुषे' 'एतान्' प्राणान् 'एव' स्थापितवान् भवति ॥ ५ ॥

अथाश्रावणप्रत्याश्रावणे विधातु माख्यायिका माह— "यज्ञो हेति। पुरा किल 'यज्ञः' केनचिद्व्याजेन 'देवेभ्यः' अपक्रान्तवान्। 'तं देवाः' 'अन्वमन्त्रयन्त' अनुनयेनाकृषन्त।— हे यज्ञ! 'नः' अस्माकं वचनं 'शृणु', 'नः' अस्मान् ('उपावर्त्तस्व') प्रतिनिवर्त्तस्व। उपावर्त्तेति गुणश्छान्दसः। यद्वा, उपावर्त्तन मुपावर्त्तः। आवर्त्तनाभावे यागासम्भवात्तस्य साधनत्वव्यपदेशः। 'देवाः' यजमानाः 'अयजन्त'। भाविगत्या तेषां देवत्वव्यवहारः। 'देवाः'-इति 'यदिदं' देवत्व मस्ति, 'एतत्' तस्यानुष्ठानेन 'अभवन्' प्राप्तवन्त इत्यर्थः ॥ ६ ॥

१— "अग्निर्हीता नव"—इति तै० ब्रा० ३. ५. ४।

२— "सप्त वै शीर्षन् प्राणाः"—इति ऐ० ब्रा० १. ३. ६; ३. १. ३।

३— " 'अवाञ्चः' नाभेरधस्ताद् वर्त्तमाना अपानवाय्वादयः"—इति ऐ० ब्रा० १. ३. ६ सा० भा०।

४— "नव वै पुरुषे प्राणा"—इति तै० सं० ३. ५. १०. ५। "शिरोऽवस्थितेषु सप्तसु छिद्रेषु, अधोऽवस्थितयोश्च द्वयोश्छिद्रयोः सञ्चरन्तः प्राणा नवसङ्ख्याकाः"—इति तत्रैव सा० भा०।

इदानीं माश्रावणं विधत्ते— "स यदिति। यस्मादेवं, तस्मात् 'सः' अध्वर्युराश्रावयेत्[१]। 'एतत्' एतेन यज्ञ मेवानुमन्त्रितवान् भवतीति तत्प्रकारप्रदर्शनम्। "आ न इति। यत एतदेवं, तस्मात्। "आ नः शृणु"—इत्यस्य आश्रावणार्थत्वात्[२] ॥

अथ प्रत्याश्रावणं[३] विधत्ते— "अथ यदिति। तेन अग्नीध्रकर्तृकेन प्रत्याश्रावणेन 'तथास्त्विति' प्रतिनिवृत्तिः कृता भवति; प्रत्याश्रवण मन्त्रस्य उक्तार्थप्रतीतेः ॥

आश्रावणादि वषट्कारान्त मध्वर्यादेः स्व-स्व-समये मौनं विधित्सुराह— "तेनेति। 'तेन' प्रत्यावृत्तेन 'रेतसा भूतेन' बीजभूतेन। स्वर्गाख्यफलोदयात् बीजत्वं यज्ञस्य। ('ऋत्विजः') अध्वर्यादयः स्वस्मिन्नाश्रितं यज्ञं 'सम्प्रदायं' सम्यक् प्रदाय-प्रदाय, एकोऽन्यस्मै सोऽप्यन्यस्मा इत्येवम्प्रकारेण 'चरन्ति' अनुतिष्ठन्ति। 'यजमानेन' 'परोक्षं' न मनपेक्ष्य तस्य तत्र व्यापाराभावात्। परस्परसमर्पणे दृष्टान्त माह— "यथेति। यथा जलैरापूर्णं घटादि-पात्रं गृहान्तर्गतप्रभूतभाण्डपूरणसमये परस्परहस्तेन सञ्चरन्ति, तद्वत्। एतदेव विभिनष्टि— "तदाचैवेति। 'तत्' तदा 'वाचैव' वाग्रूपेणैव, आश्रावणादिवाच मन्त्ररूपेण यज्ञाग्निदीक्षितस्य यज्ञत्वव्यपदेशः। अस्त्वेवं किं तत आह— "वाग्घीति। वाचा मन्त्रात्मिकया यज्ञस्योत्पत्तेः तस्या रेतस्त्वम्। "तदित्याद्युपसंहारः ॥ ७ ॥

१— ओ श्रावयेत्यस्याश्रावणसञ्ज्ञा।

२— इहास्मात एव एव आश्रावणार्थोऽनुवाक्यामन्त्रः।

३— अस्तु श्रौषडित्यस्य प्रत्याश्रावणसञ्ज्ञा।

अथ यद्भक्षेणोक्तं यज्ञसम्प्रदानं विग्रिंषमध्वर्यादेः स्व-स्व-कालेषु मौनं विधत्ते— "सोऽनुब्रूहीत्यादिना। 'सोऽध्वर्युः' होतारं प्रति 'अनुब्रूहीत्युक्त्वैव'[1] तत्समनन्तर मेव 'नापव्याहरेत्' प्रस्तुतानुपयोगि वचनं न ब्रूयात्।

'होता' अपि अनुवचनद्वारेण[2] वाग्यूपयज्ञस्य स्वस्मिन् ममावेशात् 'नो एव अपव्याहरेत्'।

पुनः 'अग्नीधं' प्रति 'अध्वर्युः' यदा 'आश्रावयति[3]', तदानीं स वाग्यज्ञः तं प्राप्नोति; अतः 'सः' अपि 'न अपव्याहरेत्' स्व-प्रत्याश्रावणावधि।

सः ('अग्नीत्') यदा 'अध्वर्युं' प्रति प्रत्याश्रावयेत्, तदैव 'यज्ञः' पुनः आगच्छेत्; अतः 'सः' अपि 'अध्वर्युः' 'आ यजेति' यजेति[4]वचनावधि 'न अपव्याहरेत्'।

अथ पुनः 'अध्वर्युः' यदा 'यजेति' स्व-वाग्यज्ञं 'होत्रे सम्प्रयच्छति', तदा प्राप्तयज्ञः 'सः' 'होता' वषट्कारपर्यन्तं 'नापव्याहरेत्'।

"स वषट्कारेणेति। 'सोऽध्वर्युः' होत्रुक्तेन 'वषट्कारेण' हविः-प्रदानसाधनेन 'अग्नौ' योनिभूते 'रेतोभूतं' हविः 'सिञ्चति' प्रयच्छति। यस्माच्च उत्पद्यते तत्तस्य योनिरिति प्रसिद्धिः 'वै'-शब्देन उच्यते। उक्तं वाङ्नियमं विषयविशेषे व्यवस्थापयति— "त्रिति। अत्र सूत्रम्— "अनुब्रूहीत्युक्त्वा नापव्याहरेद्धोता याऽऽश्रावणात्,

---

१— अनुब्रूहीति अनुवाक्यापाठार्थो होत्रुप्रैषः।

२— अनुवाक्यापाठेनेति यावत्। ३— "श्रो आवयेत्युक्त्वेत्यर्थः।

४— यजेति याज्यावषट्कारपाठार्थो होत्रुप्रैषः।

आआवितेऽग्नीद्रा प्रत्याश्रावणात्, प्रत्याआवितेऽध्वर्युरा होत्रप्रेषात्, होता ऽऽवषट्कारादिति[1] ॥

अथ सोमविषयं वाङ्नियमं प्रतिजानीते— "अथ सौम्येऽध्वरे"-इति ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

"स वा इत्यादि। 'अध्वर्युः' ग्रहग्रहणादनन्तरम् 'आ उपाकरणात्'[2] यदा च उद्गातारः स्तोत्रं प्रारभेरन्, तावत् 'नापव्याहरेत्'। यदा 'अध्वर्युः उपावर्त्तध्व मिति' ब्रूयात्, तदानीं तस्य यज्ञस्थान् ('उद्गातॄन्') प्राप्नोति, 'ते उद्गातारः' अपि ('आ उत्तमायाः') 'नापव्याहरेयुः' तत्प्रभृत्युत्तमस्तोत्रीयापर्यन्तं[3] न वदेयुः। यदा च 'एषा' अन्तिमा स्तोत्रीयेति 'उद्गातारः' प्रज्ञापयन्ति, 'होता' अपि तदा प्रभृति 'नापव्याहरेत्' 'आ वषट्कारात्'। "तं वषट्कारेणेत्यादि पूर्ववत्। अत्र सूत्रम्— "सोमे च ग्रहं ग्रहीष्यन्नुपाकरणात्"-इति[4]। उत्तमस्तोत्रीयां प्रस्तुत्य होतुरेवेति ब्रुवन्त उद्गातारः[5] ग्रंसिष्यते होत्रे यज्ञं प्रयच्छन्ति[6], तदा प्रभृति वषट्कारपर्यन्तं होता नापव्याहरेत्[7] ॥ १२ ॥ १३ ॥ १४ ॥

१— का० श्रौ० सू० ३. ३. १३—१६। अपव्याहारो लौकिकवदनम्।

२— ऐ० ब्रा० २. २. ५. ५; तै० सं० ६. ४. ३. १; आप० श्रौ० सू० १२. ३. १४, १५; आश्व० श्रौ० सू० ४. १३. १–६; का० श्रौ० सू० ६. १. १०.–इत्येतेषु प्रातरनुवाकोपाकरणं विहितं द्रष्टव्यम्।

३— तिसृषु ऋक्षु एकं स्तोत्रियं साम गीयते सामगैः। तच्चान्त्या ऋक् उत्तमस्तोत्रीया भवति। विशेषतस्तु छन्दोभाष्यावतरणाम्, ऐ० ब्रा० ३. २. १२ ३. ४. ४ इत्यादौ च द्रष्टव्यम्।

४— का०श्रौ० ३. ३. १७। ५— उद्गात्प्रस्तोत्प्रतिहर्त्तार इत्युद्गातारः।

६— का०श्रौ० ३. ३. १८ द्रष्टव्यम्। ७— का०श्रौ० ३. ३. १९ द्रष्टव्यम्।

उक्तवाङ्नियमाभावे बाध माह— "स यद्धेति। सोमयागे तस्य ग्रहणादि-प्रदानावधि-काले 'यं यज्ञे उपावर्त्तते', 'सः' 'यद्' यदि 'अपव्याहरेत्', 'सः' 'यजमानं परासिञ्चेत्'। अत्र दृष्टान्तः।— 'यथा' 'पूर्णपात्रम्' अभिमतप्रदेशे घटादिषु प्रक्षेप मकृत्वा अन्यत्र 'परासिञ्चेत्', तादृगेव तत्। अपव्याहारेण यज्ञ-भंगे सति स्वर्गाख्यफलभंगाद् यजमान एव परासिक्तो भवति। उक्तवैपरीत्ये को गुण इत्याह— "स यत्रेति। एवं सर्वेऽध्वर्यादयः क्रमेण 'यत्र' यज्ञे 'संविदानाः' ऐकमत्यं प्राप्ताः स्व-स्व-कर्त्तव्य मेकाग्रेण जानन्तोऽनुतिष्ठन्ति, 'तत्र' तस्मिन् यज्ञे 'सर्व मेव' अङ्ग-जातं 'कल्पते' फलजननसमर्थं भवति। एवं सत्येकोऽप्यृत्विक् 'न मुह्यति' स्वानुष्ठेयं न विस्मरति; अपव्याहारात्मकविक्षेपासम्भवात्॥

निगमयति— "तस्मादिति। 'एव मेव' अध्वर्यादिभिः यज्ञ-सम्प्रदानक्रमेण 'यज्ञः' 'भर्त्तव्यः' पोषयितव्यः॥ १५॥

आश्रावणादिपञ्चक मनूद्य प्रशंसति— "ता वा इति। व्याहृयन्त इति 'व्याहृतयः' वाक्यानि। तानि आश्रावयेत्यादिकानि। पञ्चसङ्ख्यास्ति, 'यज्ञोऽपि पाङ्क्तः'; धानाः करम्भ इत्यादिहविर्गत-पञ्चसङ्ख्यायोगात्[1]। अतः सङ्ख्यासाम्यद्वारा व्याहृतिपञ्चको यज्ञः अस्तु। ततः किमित्यत आह— "पाङ्क्तः पशुरित्यादिना। चत्वारः पादाः, शिर एक मिति वा, लोमत्वङ्मांसास्थिमज्जभेदेन वा,

---

१— "धानाः करम्भः परिवापः पुरोळाशः पयस्येवेष वै यज्ञो हविः-पाङ्क्तः"—इति ऐ० ब्रा० २. ३. ६।

पशोः पाङ्क्तत्वम्। हेमन्तशिशिरयोरेकत्वेन[1] 'पञ्चर्त्तवः संवत्सरस्य'। अयं यज्ञो व्याहुतिपञ्चकद्वारा पशुसंवत्सररूपाभ्यां शब्दाभ्यां परिमितो भवतीत्यर्थः। 'एषा' पशुसंवत्सरात्मिका 'यज्ञस्य' 'एका' 'मात्रा' दृयत्ता। प्रकारान्तर मपेक्ष्योक्तम्— "एषा सम्पदिति। सङ्ख्याद्वारा सम्पादितसम्पद्भिर्यज्ञस्य विभुत्व मित्यर्थः ॥ १६ ॥

आश्रवणादिकं स्ववाक्यगतसङ्ख्याद्वारेण प्रशस्य, तद्गताचरसङ्ख्यापि प्रशंसति— "तामा मिति। "श्रो श्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम्, यजेति द्व्यक्षरम्, ये यजामह इति पञ्चाक्षरम्, द्व्यक्षरो वषट्कारः"-इति[2] सप्तदशाक्षरता; प्रजापतिरपि मासनुंगतसङ्ख्या सप्तदशः। यज्ञस्रष्टृत्वात्सोऽपि यज्ञः। 'एषा' अक्षरसङ्ख्याप्राप्ता प्रजापत्यात्मकत्वलक्षणा 'यज्ञस्य सम्पत्' ॥ १७ ॥

विहितेष्वाश्रावणादिषु दृष्ट्याख्यफलाय तत्र विशेषं विवक्षुस्तदुपोद्घात माह— "श्रो श्रावयेतीति। 'अस्तु श्रौषट्'-'इति' अनेन 'अभ्राणि' उदक्सञ्चरणसमर्थान् मेघान् 'समञ्जावयन्' सर्वत्र व्याप्तानकुर्वन्। 'सस्रजिरे'-इति सर्वत्र सम्बन्धः। एव मुत्तरत्रापि उद्देशिना मनुद्देशिनां च पूर्वपूर्वाभाव उत्तरोत्तरानुदयात् कार्यकारणभावाभिधानम्। अत उक्तवैपरीत्ये न तथा ग्रहणीयम्। 'स्तनयित्नु'-शब्दः स्तनयतीति व्युत्पत्त्या मेघवाची[3], तथापि तस्य पृथगभिधानाद्य स्तननमात्र मभिधत्ते ॥ १८ ॥

१— "सप्तदशो वै प्रजापतिः द्वादश मासाः पञ्चर्त्तवो हेमन्तशिशिरयोः समासेन, तावान्त्संवत्सरः; संवत्सरः प्रजापतिः"-इति ऐ०ब्रा० १.१.१।

२— तै० सं० १. ६. ११. १। 'आश्रावयेति'-इति तत्र पाठः।

३— उ० १. २६; पा० सू० ६. ३. ५५। अम० को० १. १. २. ८।

अथौपोद्घातिक माह— "स यदीति । 'सः' यजमानो 'यदि वृष्टिकामः स्यात्', स एव 'यदीच्छा' सौर्यादिकया फलान्तरसाधनभूतया 'यजेत', तत्र प्रकृतिभूतयोः 'दर्शपूर्णमासयोर्वा एव ब्रूयात्' ऋत्विजः! 'वृष्टिकामः' अहम् 'अस्मीति' । कं प्रति किं ब्रूयादिति तद्विभज्याह— "तत्रो इत्यादिना । 'तत्र' तेष्वेव कर्मसु 'अध्वर्युम्' ('ब्रूयात्')— आआवणसमये पुरोवातविद्युतोर्ध्वानं 'मनसा कुर्यात्' इति ; मनोव्यतिरेकेण ध्यानासम्भवात्, एकाग्रमना इत्यर्थः । एव मुत्तरवाक्येष्वपि योज्यम् । आग्नीध्रहोत्रोः प्रत्येकस्य व्याहृतिद्वये सम्भवात् एकैकस्य द्वयोर्द्वयोर्ध्वानम् ; "सर्वै ब्रह्मा"-इति[1] ब्रह्मणः सर्वकर्म्मव्यानुसन्धानस्मरणात् सर्वविषयध्यानाभिधानम् । एव मङ्गेषु ध्याने सति वृष्टिफलं नियत मेवेत्याह— "वर्षति त्वेवेति । 'संविदानाः' फलविषये परस्पर मैकमत्यं प्राप्ताः ॥ १८ ॥

प्रकारान्तरेणाआवणादिपञ्चकं प्रशंसति— "ओ आवयेतीति । यद्पुरोडाशादिना विशेषेण राजत इति 'विराट्' वेद्यात्मिका पृथिवी[2], सा धेनुत्वेन प्रकल्प्यते ; "सा मे धुक्ष्व यजमानाय कामान्"-इत्यादिमन्त्रेषु दोहनसाधनत्वश्रवणात् । तां विराड्धेनुम् ओ आवयेत्यनेन अभिमुख माकृषन् 'वत्स मुपावासृजन्' स्तनपानाय वत्सस्य कण्ठगतं पाशं व्यस्रंषयन् । 'यजेति' अनेन तम् 'उदनयन्' अपरिवीतं वत्स मूर्द्ध मूधसोऽभिमुख मनयन् । 'उपा-

---

१— य० प० सू० २२ । ऐ० ब्रा० ५. ५. ८ अपि द्रष्टव्यम् ।

२— वा० सं० १३. ४२ कण्डिका आलोच्या ।

सीदन्' दोहाय गोः समीपे स्थितः। 'वषट्कारेण' हविःप्रदान-साधनेन ताम् 'अदुहत' दोहनेनेमं यज्ञ मुदपादयन्नित्यर्थः॥

विराट्शब्द माह—"इयं वा इति। 'इयं' पृथिव्येव खलु 'विराट्'। उक्त मर्थं समर्थयते—"अस्यै वा इति। 'एषः' उक्तो 'दोहः' 'अस्यै वै' अस्या वेद्यात्मिकायाः पृथिव्याः सम्बन्धी खलु; चरुपुरोडाशादियज्ञसाधनानां तस्या एवोत्पत्तेः॥

उक्तार्थवेदनं प्रशंसति—"एवं ह वा इति। 'यः' एतदा-श्रावणादिकम् 'एवं' दोहात्मकतया 'वेद' जानाति 'अस्यै' अस्याः उक्तार्थं वेदित्रे 'इयं विराट्' पृथिवी 'सर्वान्' धनादिकान् 'कामान्' 'दुहे' प्रयच्छतीति॥ २०॥ ३॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे पञ्चमाध्याये द्वितीयं ब्राह्मणम्[१]॥

१—अस्मिन् ब्राह्मणे स्रुगादापनमन्त्रस्य विधिव्याख्ये आश्रावणादिपञ्चक-विधिनियमौ च विदधौ। तत्रेयं पद्धतिः—"यदा होता 'अग्निर्होता वेत्त्विति स्रुगादापनं पठति, तदा अध्वर्युरुभाभ्यां पाणिभ्यां जुहू मुप-मृत उपरि पूर्ववन्निधाय, घृतवतीं मित्यस्मिन् शब्दे होत्रा उक्ते, जुहू-मभृतावादाय हवींष्युत्तरेण परिधीनपरेण सव्येन पादेन वेदेर्दक्षिणे भागे गत्वा, ईशानाभिमुखः स्थित्वा, आश्राव्य, अस्तु श्रौषडिति प्रत्युक्ते, समिधो यजेति होतारं प्रति ब्रूयात्; ततो जुहूं प्राचीं नवतार्य, वषट्कारेण सह वा, वषट्कारकृते वा, समिद्धतमे वह्नेः प्रदेशे जुह्वास्य-तृतीयांशं जुहोति"—इति। आश्रावणादिपञ्चकव्याख्यानमन्त्रेव

ऋतवो ह वै प्रयाजाः । तस्मात्* पुच्छ भवन्ति पुच्छ ह्यृतवः ॥ १ ॥

देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिर ऽएतस्मिन् यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माक मयं भविष्यत्यस्माक मयं भविष्यतीति ॥ २ ॥

माह सायणः— "एतेषु पञ्चसु मन्त्रेषु, आद्यस्य मन्त्रत्रयस्य विनियोग मापस्तम्बोऽध्वर्युकाण्डे दर्शयति— "ब्रह्मन्०—०सार्वत्रिकम्"—इति (श्रौ० सू० १. १५–१८.)। × × × । हे आग्नीध्र! यज्यमाणदेवतां प्रति तुभ्य मिदं दीयत इत्याभिमुख्येन आवयेत्यध्वर्युणोक्ते सति, स आग्नीध्रः 'अस्तु'–इत्यङ्गीकृत्य 'औषट्'–इतिशब्देन आवयति। हे देवाः! तद्विषय मिदं हविर्दानं ग्रहणतेत्यर्थः। हे होतः! 'यज' याज्यां पठेत्यर्थः। इतरस्य तु मन्त्रद्वयस्य विनियोग माश्वलायनो होटकाण्डे दर्शयति— "आगूर्याज्यादिरनूयाजवर्जम्। येऽयजामह इत्यागूः। वषट्कारोऽन्त्यः सर्वत्र"–इति (आश्व० १. ५. ४, ५, ६.)। सर्वे, 'ये' वयं होतारोऽध्वर्युणा यजेति प्रेषिताः, ते वयं 'यजामहे' याज्यां पठामः। वषट्कारशब्देन "वौषट्"–इत्येवंरूपो मन्त्रो विवक्षितः। तत्राश्वलायन उदाहृत्य दर्शयति— "येऽयजामहे समिधः। समिधो अग्न आज्यस्य व्यन्तूऽ। वौऽषडिति वषट्कारः"–इति (श्रौ० सू० १. ५. १५.)। हविर्दीयत इति तस्य (वौषडित्यस्य) ग्रहस्यार्थः"–इति (तै०सं०१.६.११.२ सा० भा०)। आगूः = प्रतिज्ञा। अम० को० १. ५. ५। आगूःकरणन्तु ऐ० ब्रा० २. ४. ४ द्रष्टव्यम्॥

* 'प्रयाजास्तुस्मात्'–इति ग। गादिषु केषुचित् पुस्तकेषु काण्डिकादिभागपार्थक्यं कृतं न दृश्यते क्वापि; तदेवं पदाविच्छेदकृताः पाठ-

तुतो देवाः। अर्च्चन्तः श्राम्यन्तश्चेरुस्त ऽएतान् प्रयाजान् ददृशुस्तैरयजन्त तैर्ऋतूनसंवत्सरं प्राजयन्नृतुभ्यः संवत्सरात् सपुत्रानन्तरायंस्तस्मात् प्रजयाः प्रजया ह वै नामैतद्यत्प्रयाजा ऽइति तुथो ऽएवैष ऽएतैऽर्ऋतूनसंवत्सरं प्रजयत्यृतुभ्यः संवत्सरात् सपुत्रानन्तरेति तस्मात् प्रयाजैर्यजते ॥ ३ ॥

ते वा ऽआज्यहविषो भवन्ति। व्युज्यो वा ऽआज्य मेतेन वै देवा व्युज्येणाज्येनऽर्तूनसंवत्सरं प्राजयन्नृतुभ्यः संवत्सरात् सपुत्रानन्तरायंस्तुथो ऽएवैष ऽएतेन व्युज्येणाज्येनर्तूनसंवत्सरं प्रजयत्यृतुभ्यः संवत्सरात् सपुत्रानन्तरेति तुस्माद्दाज्यहविषो भवन्ति ॥ ४ ॥

एतद्वै संवत्सरस्य स्वं पयः। यदाज्यं तत्स्वेनैवैन मेतत्पयसा देवाः स्व्यकुर्व्वत तुथो ऽएवैन मेष ऽएतत् स्वेनैव पयसा स्वीकुरुते तुस्माद्दाज्यहविषो भवन्ति ॥ ५ ॥

स युचैव तिष्ठन् प्रयाजेभ्य ऽआश्रावयेत्। तुत ऽएव नापक्रामेत् सङ्गामो वा ऽएषु सन्निधीयते युः प्रयाजैर्यजते यतरो वै सुंयत्तयोः* पराजयते ऽप वै सु क्राम†त्य-

---

भेदास्तेषु सन्ति सर्वत्रैव। ते च सुधीभिः स्वय मेवोहनीया इत्यल मिहैदृग्रूपाठप्रदर्शनेनेति।

* 'सुंगतयोः'–इति, 'संयतयोः'–इति वा स्यात् सा०-सम्मतः।

† 'सुंक्राम'–इति क, ख, च, M-पुस्तके डा०-वेवर्-दृष्टश्च।

भितरा मु वै जुयन् क्रामति तस्माद्भितरा मभितरा मेव क्रामे*द्भितरा मभितरा माहुतीर्जुहुयात् ॥ ६ ॥

तद्दु तथा नु कुर्यात्। युचैव तिष्ठन् प्रयाजेभ्य ऽआश्रावयेत् तत ऽएव नापक्रामेद् युचो ऽएव सुमिद्ध-तमं मन्येत तदाहुतीर्जुहुयात् समिद्धहोमेनु ह्येव सुमृद्धा† ऽआहुतयः ॥ ७ ॥

सु ऽआश्राव्याह। समिधो यजेति तद्वसन्तꣳ सुमिन्धे सु व्वसन्तः सुमिद्धोऽन्यान्दृतून्त्समिन्ध ऽऋतुव्रः सुमिद्धाः प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति तद्देव खलु सुर्व्वान्दृतून्निराहाथ यज-यजेत्येवोत्तरानाहाजामितायै जामि ह कुर्याद् यत् तनूनपातं यजेडो यजेति ब्रूयात् तस्माद् युज-यजेत्येवोत्तरानाह ॥ ८ ॥

स वै समिधो यजति। व्वसन्तो वै समिद् वसन्तु मेव तद्देवा ऽअवृञ्जत व्वसन्तात्सपत्नानन्तरायन् वसन्तम्वैवैषु ऽएतद् वृङ्क्ते व्वसन्तात् सपत्नानन्तरेति तस्मात् समिधो यजति ॥ ९ ॥

अथ तनूनपातं यजति। ग्रीष्मो वै तनूनपाद्ग्रीष्मो ह्यासाम्प्रजानां तनूस्तपति ग्रीष्म मेव तद्देवा ऽअवृञ्जत

---

* 'मभितरा माक्रामे'–इति ग, स्यात् सा०-सम्मतश्च।

† 'समिद्धा'–इति स्यात् सा०-सम्मतः पाठः।

ग्रीष्मात् सपत्नानन्तरायन् ग्रीष्मम्वेवैषु ऽएतद् दृङ्क्ते ग्रीष्मात् सपत्नानन्तरेति तस्मात्तनूनुपातं यजति ॥ १० ॥

अथेडो यजति। व्वर्षा वा ऽइड इति हि व्वर्षा ऽइडो युदिदं क्षुद्रꣳ* सरीसृपं ग्रीष्महेमन्ताभ्यां नित्यक्तं भुवति तुद्वर्षा ईडितु मिवान्न मिच्छुमानं चरति तुस्माद्वर्षा ऽइडो व्वर्षा ऽएव तद्देवा ऽअृद्दृञ्जत व्वर्षाभ्यः सपत्नानन्तरायन् वर्षा ऽउ ऽएवैषु ऽएतद् दृङ्क्ते व्वर्षाभ्यः सपत्नानन्तरेति तुस्मादिडो यजति ॥ ११ ॥

अथ बर्हिर्यजति। शरद्वै बर्हिरिति हि शरद्बर्हिर्या ऽइमा ऽओषधयो ग्रीष्महेमन्ताभ्यां नित्यक्ता भुवन्ति ता व्वर्षा व्वर्द्धन्ते ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरे तुस्माच्छरद्बर्हिः शरद मेव तद्देवा ऽअृद्दृञ्जत शरदः सपत्नानन्तरायञ्छरदम्वेवैषु ऽएतद् दृङ्क्ते शरदः सपत्नानन्तरेति तुस्माद्बर्हिर्यजति ॥ १२ ॥

अथ स्वाहा-स्वाहेति यजति। अन्तो वै यज्ञस्य स्वाहाकारोऽन्त ऋतूनाꣳ हेमन्तो व्वसन्ताद्धि पराङ्ङो-ऽन्तेनैव तदुन्तं देवा ऽअृद्दृञ्जतान्तेनान्तात् सपत्नानन्तरायन्नन्तेनो ऽएवैषु ऽएतदुन्तं दृङ्क्ते ऽन्तेनान्तात् सपत्नानन्तरेति तुस्मात् स्वाहा-स्वाहेति यजति ॥ १३ ॥

---

* 'क्षुल्लकं'—इति सा०-सम्मत इत्यलिखद् डा-वेवरः।

तद्वा ऽएतत्। व्यसन्तु ऽएव हेमन्तात् पुनरसुरेतस्मा-द्धोष पुनर्भवति पुनर्ह वा ऽअस्मिंल्लोके भवति यु ऽएव मेतद्वेद ॥ १४ ॥

स वै व्यन्तु व्वेत्विति यजति। अजामितायै जामि ह कुर्याद् युद्यन्तु-व्यन्त्विति वैव युजेद् वेतु-वेत्विति वा व्यन्त्विति वै योषा व्वेत्विति व्वृषा मिथुन मेवैतत् प्रजननं क्रियते तस्माद् व्यन्तु-व्वेत्विति यजति ॥ १५ ॥

अथ चतुर्थे प्रयाजे समानयति बर्हिषि। प्रजा वै बर्ही रेत ऽआज्यं तत्प्रजास्वेवैतद्रेतः सिच्यते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्त्तम्प्रजायन्ते तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥ १६ ॥

सङ्गमो वा ऽएषु सन्निधीयते। युः प्रयाजैर्यजते यतरं वै संयत्तयोर्म्मित्र मागच्छति* सु जयति तदेतदुप-भृतोऽधि जुहूं मित्र मागच्छति तेन प्रजयति तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥ १७ ॥

यजमान ऽएव जुहू मनु। योऽस्मा ऽअरातीयति सु ऽउपभृत मनु यजमानायैवैतद्विषन्तं भ्रातृव्यं बलिꣳ हारयत्युत्तैव जुहू मन्वाद्य ऽउपभृत मन्वत्र ऽएवैतदाद्यं बलिꣳ हारयति तस्माच्चतुर्थे प्रयाजे समानयति ॥ १८ ॥

---

* 'र्म्मित्र मागच्छति'–इति क, ग; 'र्म्मित्र आगच्छति'–इति च वेवरः।.

स वा ऽअनवमृश्यन्त्समानयति । स युद्यावमृशेद् युजमानं द्विषता भ्रातृव्येनावमृशेदत्तार मास्येनावमृशेत् तस्मादनवमृश्यन्त्समानयति ॥ १९ ॥

अथोत्तरां जुहू मध्यूहति । युजमान मेवैतद् द्विषति भ्रातृव्येऽध्यूहत्यत्तार मास्येऽध्यूहति तस्मादुत्तरां जुहू मध्यूहति ॥ २० ॥

देवा ह वा ऽऊचुः । हन्त व्विजित मेवानु सुव्वं यज्ञꣳ सꣳस्थापयाम यदि नोऽसुररक्षसान्यासुजेयुः सुꣳस्थित ऽएवु नो यज्ञः स्यादिति ॥ २१ ॥

तु ऽउत्तमे प्रयाजे । स्वाहाकारेणैव सुव्वं यज्ञꣳ समस्थापयन्त्स्वाहाग्नि मिति तदाग्नेय माज्यभागꣳ समस्थापयन्त्स्वाहा सोम मिति तत्सौम्य माज्यभागꣳ समस्थापयन्त्स्वाहाग्नि मिति तद्यु ऽएषु ऽउभयुचाच्युतु ऽआग्नेयुः पुरोडाशो भवति तꣳ समस्थापयन् ॥ २२ ॥

अथ यथादेवतꣳ । स्वाहा देवा ऽआज्यपा ऽइति तत्प्रयाजानुयाजान्त्समस्थापयन् प्रयाजानुयाजा वै देवा ऽआज्यपा जुषाणो ऽअग्निराज्यस्य व्वेत्विति तदग्निꣳ स्विष्टकृतꣳ समस्थापयन्नग्निर्हि स्विष्टकृत् सु ऽएषोऽप्येतर्हि तथैव यज्ञः सुन्तिष्ठते युथैवैनं देवाः समस्थापयंस्तस्मादुत्तमे प्रयाजे स्वाहा-स्वाहेति यजति यावन्ति हवीꣳषि

भवन्ति व्विजित मेवैतदनु सुव्वं यज्ञꣳ सुꣳस्थापयति तस्माद्यदुत ऽऊर्ध्वं व्विलोम यज्ञे क्रियेत न तदाद्रियेत सुꣳस्थितो मे यज्ञ ऽइति ह व्विद्यात् सु हैषु यज्ञो यातयामेवास युथा व्युषट्कृतꣳ हुतꣳ स्वाहाकृतम् ॥ २३ ॥

ते देवा ऽअकामयन्त । कथं न्विमं यज्ञं पुनराप्याययेमायातयामानं कुर्याम तेनायातयाम्ना प्रचरेमेति ॥ २४ ॥

स युज्जुह्वा माज्यं परिशिष्ट मासीत् । येन यज्ञꣳ समस्थापयंस्तेनैव यथापूर्व्वꣳ हवीꣳष्यभ्यघारयन् पुनरेवैनानि तदाप्याययन्नयातयामान्यकुर्व्वन्नयातयाम ह्याज्यं तस्मादुत्तमं प्रयाज मिष्ट्वा यथापूर्व्वꣳ हवीꣳष्यभिघारयति पुनरेवैनानि तदाप्याययत्ययातयामानि करोत्ययातयाम ह्याज्यं तस्माद्युस्य कुस्य च हविषोऽवद्युति पुनरेव तदभिघारयति स्विष्टकृत ऽएव तत्पुनराप्याययत्ययातयाम करोत्युथ यदा स्विष्टकृतेऽवद्युति न ततः पुनरभिघारयति नो हि ततः काञ्चन हविषोऽग्नावाहुतिꣳ होष्यन् भवति ॥ २५ ॥ ४ ॥

॥ इति चतुर्थप्रपाठके चतुर्थं ब्राह्मणम् [५. ३.] ॥

प्रयाजानुपरिष्टाद् विधास्यति ; तत्रादौ तद्गतां सङ्ख्यां विधत्ते—"ऋतवो ह वा इति। यस्मात् 'ऋतवः' हेमन्तशिशिरयोरेक्येन 'पञ्च', अतस्तदात्मका अपि 'प्रयाजाः' 'पञ्च' कर्त्तव्याः[१] ॥ १ ॥

निर्वचनद्वारेण प्रशंसितु माख्यायिका माह— "देवास्चेति। स्पर्द्धाया विषयं दर्शयति— "एतस्मिन्निति। 'एतस्मिन्' दर्शपूर्णमासात्मके 'यज्ञे' 'प्रजापतौ'। आश्रावयास्तुश्रौषड्त्यादिसप्तदशात्मकस्य प्रजापतेर्यज्ञरूपत्वात्[२] 'यज्ञे प्रजापतौ'-इति सामानाधिकरण्यम्। स च सर्वोत्पादकत्वात् 'पिता' ; तस्य च 'संवत्सरः प्रजापतिः'-इतिश्रुतेः[३] संवत्सरात्मकत्वम्। उक्तरूपे प्रजापतौ 'अथ मस्माक मेव भविष्यति, अस्माक मेवेति' स्पर्द्धा मकुर्वन् ॥ २ ॥

"ततः इति। ते 'देवाः' 'अर्च्यन्तः' तत्पूजयन्तः, 'आम्यन्तः' आत्मानं क्लेशयन्तः 'चेरुः' अन्वतिष्ठन्, तत्साधन मन्वतिष्ठन्। 'तत एतान् प्रयाजान्' प्रजापतिजयलाभोपायत्वेन दृष्ट्वा, 'तैः' दृष्ट्वा ; तत्फलभूतान् 'ऋतून्', तद्वारा 'संवत्सरं' च 'प्राजयन्'। जितेभ्यः तेभ्यः सकाशात्

१— "'समिद्धो अग्न आज्यस्य'-इत्यादिमन्त्रसाध्याः पञ्च प्रयाजाः, 'देवं बर्हिः'-इत्यादिमन्त्रसाध्याः त्रयोऽनुयाजाः"-इति ऐ० ब्रा० १. २. ५ सा० भा०। एतदप्याम्नात मैतरेयके—"प्राणा वै प्रयाजानुयाजास्ते य इमे शीर्षन् प्राणास्ते प्रयाजा येऽवाञ्चस्तेऽनुयाजाः"-इति १. ३. ६। इहापीत उत्तरस्मिन् ब्राह्मणे "प्राणा वै समिधः"-इति।

२— पुरस्तात् द्रष्टव्यम् (३४८ पृ० १३-१८ पं०)।

३— ऐ० ब्रा० २. २. ७ द्रष्टव्यम्। पुनस्तत्रैव तत उत्तरम् —"संवत्सरः प्रजापतिः, सोऽस्य सर्वस्य प्रजनयिता"-इति च २. ५. ७।

स्व-'सपत्नान्' असुरान् विरहितान् अकुर्वन्। 'तस्मात्' प्रजय-साधनत्वात् एते 'प्रजयाः-प्रजयाः'-इत्येतदस्ति, 'एतन्नाम'तः 'प्रयाजाः' खलु। यथा देवाः, 'तथा' एव 'एषः' इदानीन्तनोऽपि यजमानः 'एतैः' प्रयाजैः ऋतुसंवत्सरजयद्वारा स्व-भ्रातॄन् ऋतुसंवत्सरैर्व्यव-हितान् करोति ॥ ३ ॥

"ते वा इति। हूयत इति 'हविः' द्रव्यम्, तत्तेषा माज्यात्मकं कर्त्तव्यम्। सपत्नघातकत्वात् तदाज्यस्य वज्रत्वम्। 'वै'-शब्देन सूचितां वज्रत्वप्रसिद्धिं सुपपादयति,— यतः 'एतेन' ह्याज्येन प्रयाजयागद्वारा सपत्नानजयन्, अतोऽस्य वज्रत्वं सिद्धं मित्यर्थः। "तथो"-इत्यादिः दृष्टान्तः ॥ ४ ॥

प्रकारान्तरेणाज्यद्रव्यकत्वं प्रशंसति— "एतद्वा इति। आज्य मिति यदस्ति, 'एतत्' खलु संवत्सरस्य 'खं पयः'। प्रतिनियतधनरूपं चीरम्; पयःकार्यत्वादाज्य मपि पयः; गोमहिष्यादीनां संवत्सर-पर्यन्तं प्रायेण दोहात्मत्त्वम्। 'तत्' तस्मात् 'देवाः' पूर्वम् 'एनं' प्रजापतिं 'खेनैव' स्वद्रव्यभूतेनैव 'पयसा' 'स्व्यकुर्वत' स्वकीय-धनवत्तां मगमयन्। 'तथा' एवेदानी मपि यजमानः प्रयाजा-नाज्येन यजन् प्रजापतिं मेव स्वद्रव्यतां करोति। अतस्तेषा माज्य-हविष्कत्वंप्रशस्तम्[१] ॥ ५ ॥

प्रयाजहोमविषये स्थाननियम माह— "स यत्रैवेति। 'प्रया-जेभ्यः' प्रयाजार्थं 'यत्रैव' प्रदेशे स्थितः 'आश्रावयेत्', 'ततः' पश्चात्

१— "आज्येन प्रयाजा इज्यन्त आज्येन पत्नीसंयाजाः। × × ×। पञ्च प्रयाजा इज्यन्ते चत्वारः पत्नीसंयाजाः"—इति तै० सं० २. ६. १०।

नापक्रामेत्'। अनपक्रमे कारण माह— "सङ्ग्रामो वा इति। 'यः प्रयाजैः यजते', अयं युद्धाय 'सङ्ग्रामः सन्निधीयते'। अतो युद्धाय 'सङ्गतयोः'[१] मध्ये 'यः पराजयते', 'सोऽपक्रामति' पश्चात्पलायते। तस्मादपक्रमणं न युक्त मित्यर्थः॥

अथ पुरोऽभिक्रमणपक्ष मुपन्यस्य निराकरोति— "अभितरा-न्विति। 'जयन्' कश्चिज्जिगीषुः 'अभितरा मु वै' शत्रोरत्यन्त मभिमुखं खलु 'क्रामति'। यस्मादेवं 'तस्मात्' प्रयाज मभिमुख मभिमुख मीषदीषत्पुरस्तादाक्रामेत्। आक्रमणानुसारेण अग्नावपि ईषदीषत्पुरस्तादाक्रम्य 'जुहुयात्'॥ ६॥

अमुं पक्षं निषेधति— "तर्हि इति। तर्हि कथ मित्याशङ्क्य पूर्वोक्त मेव पक्षं निगमयति— "यश्चैवेति। आश्रावणस्य प्रदानाङ्ग-तया तयोः प्रदेशैक्यलाभादित्यभिप्रायः॥

पक्षान्तर माह— "यश्चो एवेति। आहवनीयमध्ये यस्मिन्नेव प्रदेशेऽग्निं प्रज्वलितं मन्येत, तत्र पश्चापि 'आज्ञतीर्जुहुयात्'। 'हि' यस्मात् समिद्धाग्निदेशहोमात् 'आज्ञतयः' अपि 'समिद्धाः' प्रदीप्ताः, फलजननसमर्थाः स्युः; अतोऽय मेव पक्षः श्रेयान्॥ ७॥

आश्रावणानन्तरं कर्त्तव्य माह— "स इति। हे होतः! समि-न्नामिका अग्निमूर्त्तीः प्रति तासां यागाय याज्यां पठेति प्रेषार्थः[२]।

१— 'संयतयोः'—इति भ। संयत्तयोरित्यस्यैव स्याद्याख्यान मिदम्।

२— "अध्वर्युप्रेषितो मैत्रावरुणः प्रेष्यति प्रैषैर्होतारम्, होता यजत्या-प्रीभिः प्रैषलिङ्गाभिः"—इति आश्व० श्रौ० सू० ३. २. ४, ५। आप्रियः प्रयाजास्तेषत्यनर्थान्तरम्। तथाहि "अथाप्रीभिर्यजन्ति"—इत्याद्यास्मात्यत इहैवोपरिष्टात् (शत० ब्रा० ३. ८. १.)।

तेन प्रैषेण साक्षाद् 'वसन्तम्' एव 'समिन्धे' दीप्तं करोति। न केवलं तस्यैव समिन्धनम्, अपि तु तद्द्वारा सर्वेषा मण्डूनां समिन्धनं कृतं भवति। तथा च सति सर्वे ऋतवः स्व-स्व-कालोचिताः 'प्रजाः' सर्वा अण्डुत्पादयन्ति, तदुपजीवनाय 'ओषधीश्च पचन्ति'। "तदेवेति। यस्मादेव कारणात् वसन्तसमिन्धनेन स्वय मपि समिद्धाः सन्तः प्राण्डुत्पादन मोषधिपाकं चैव कुर्वन्ति, तस्मादसन्तः समिद्धोऽन्यान् ऋतून् समिन्ध इति 'सर्वान् ऋतून् निराह'॥

समिधागवदितरेषा मपि नामनिर्देशपूर्वकत्वप्रसक्तौ तन्निवारयति— "अथ यज-यजेति। तदनिर्देशस्य प्रयोजन माह— "अजामिताया इति। अनतिरेकाय। "जाम्यतिरेकनाम"-इति यास्कः[1]। एकस्मिन् प्रथमे समिधागे नामनिर्देशे सतीतरेषा मण्डूहयितुं प्रक्यत्वेन निर्देशप्रायत्वात् पुनर्नामनिर्देशे 'जामि' भवेत्। जामित्वपच मुद्राहृत्य प्रदर्शयति— "जामि हेति। अतस्तूनूनपात्प्रभृतीन् 'यज-यजेति' एव ब्रूयात्॥ ८॥

"ऋतवो ह वै"-इत्यत्र[2] सङ्ख्यो विहिताः, पञ्च प्रयाजाः[3];

१— निरु० ४. २. ४। 'पुनरुक्तनामेत्यर्थः'-इति तद्वृत्तिः। "जामि वा एतद् यज्ञे क्रियते, यत् समानीभ्या मृग्भ्यां समानेऽहन् यजतीति'-इति ऐ० ब्रा० ३. ५. २। २— क० १ (३६१ ए० १ पं०)।

३— "पञ्च प्रयाजान् यजतीतीयं पञ्चसङ्ख्या, प्रयाजाना मुत्पत्तिग्रिष्टा; नव प्रयाजान् यजतीति, एकादश प्रयाजान् यजतीति नवैकादशसङ्ख्या बाधायोगाद् वैकृती सङ्ख्या, अभ्यासेनैव पूरणीया"-इति या० सू० (का० श्रौ० सू० ३. ३. ८.)। तदासां पञ्चप्रयाजाऊतीनां प्रकृता-

तेष्वेकैकं विधाय प्रशंसति— "स वै समिध इत्यादिना। अत्र समिदादीनां वसन्ताद्यात्मतया स्तुतौ सङ्घातस्य मेव साधारणम्, कारणविशेषस्तु तत्र प्रदर्श्यते— "वसन्तो वा इत्यादि। वसन्तेऽपि निखिलवृक्षाणां कुसुमाद्युद्गमेन प्रदीप्ततास्तीति समिधो वसन्तत्वाभिधानम्। अतः 'तत्' तेन समिद्यागेन 'वसन्त मेव अवृञ्जत' स्वैर्लब्धत्वात् असुरेभ्यः तं वर्जित मकुर्वन्। तस्माद् 'वसन्तात्' 'अपक्षान्' असुरान् 'अन्तरायन्'। यद्येषा नास्ति, तेन तेऽन्तर्हिता इति प्रसिद्धम् ॥

पुरातनवृत्तान्तप्रदर्शनस्य प्रयोजन माह— "वसन्तमिति। 'उ' अपि च, इदानी मपीत्यर्थः। 'एतत्' एतेन समिद्यागेन 'वसन्त मेव वृङ्क्ते' वर्जयति, स्वसपक्षेभ्य इत्यर्थः[१]। सिद्ध मन्यत्। एव मुत्तरवाक्यान्यपि योज्यानि ॥ ८ ॥

"अथ तनूनपात मित्यादि। ग्रीष्मस्य तनूनपात्त्वाभ्यं दर्शयति— "ग्रीष्मो हीति। अस्य सकलप्रजाशरीरतापकत्वेन तनूनां पालकत्वात्

वनुष्ठानप्रकार आपस्तम्बेनैवं दर्शितः – "पञ्च प्रयाजान् प्राचो यजति, प्रति दिशं वा; समिधः पुरस्तात्, तनूनपातं दक्षिणतः, इडः पश्चाद्, बर्हिरुत्तरतः, स्वाहाकारं मध्ये"–इति श्रौ० सू० २. १७. १, २।

१— "समिधो यजति, वसन्त मेवर्तूना मवरुन्धे"–इति तै० सं० २. ६. १. १। "प्राणा वै समिधः"–इत्यादि च ऐ० ब्रा० २. १. ४। इहत्य-समिद्-व्याख्याया माह यास्कः—"यज्ञेध्म इति कात्थक्यः, अग्निरिति शाकपूणिः"–इति ८. २. २। समिद्यागमन्त्रस्तु – "समिधो अग्न आज्यस्य वियन्तु (व्यन्तु)"–इति तै० ब्रा० ३. ५. ५. १।

तनूनपात्त्वम् ; अतो अर्थतः साम्याद् 'ग्रीष्मः तनूनपात्'[१]। ग्निष्टं पूर्ववत् ॥ १० ॥

"अथेड इत्यादि। इड इत्येतद्देवता यजेत। इडो वर्षात्वेनोपचारे स्त्रीत्वं बहुलञ्च बीजम्। उक्तं साम्यं समर्थयते— "इति ह्येति। 'हि' एवं खलु 'इडा वर्षा'। कथ मिति तत्राह— 'यदिदं क्षुद्रकम्' प्राणिजात मित्यर्थः। 'सरीसृपं' क्षुद्रजन्तुगोधादिकम्। 'ग्रीष्महेमन्ताभ्यां' निमित्ताभ्यां 'नित्यक्तं' नितरां परित्यक्तशरीरं क्षीणं 'भवति' ; हिमे सर्वपदार्थानां शीतेनार्त्तत्वात्, ग्रीष्मे रसानां शोषणादिति भावः। 'तत्' सर्वं 'वर्षाः' द्वितीयाबहुवचनान्ताः, प्रति 'ईडित मिव' अहो विनष्टप्रायं सत् इदानीं पुनस्त्वेष्टत इति सर्व्वैः प्रशंसित मिव 'अन्नं' स्त्रोचितं तृणजलादिरूपं 'इच्छमानम्' इच्छां कुर्वत्, इतस्ततः 'चरति' ; वर्षासु तृणजलादिसमृद्धिसम्भवात्। यस्मादेवं 'तस्माद्' वर्षाणा मिडूपत्व मुक्त मित्यर्थः ; इष्यत इतीडिति 'इट्'-शब्दव्युत्पत्तेर्वर्षास्वपि सम्भवात्[२]। ग्निष्टं पूर्ववत् ॥ ११ ॥

१— "तनूनपातं यजति, ग्रीष्म मेवावरुन्धे"—इति तै० सं० २. ६. १. २। "प्राणो वै तनूनपात्"—इत्यादि ऐ० ब्रा० २. १. ४। तनूनपाद्-व्याख्याया माह यास्कः— "आज्य मिति कात्थक्यः, अग्निरिति शाकपूणिः"—इति ८. २. २। तनूनपाद्यागमन्त्रस्तु— "तनूपादग्न आज्यस्य वेतु"—इति तै० ब्रा० ३. ५. ५. २।

२— "इडो यजति, वर्षा एवावरुन्धे"—इति तै० सं० २. ६. १. ३। "अन्नं वा इळः"—इत्यादि ऐ०ब्रा० २. १. ४। इड्-व्याख्याया माह यास्कः— "इळ ईट्टेः स्तुतिकर्मणः इन्धतेर्वा"—इति ८. २. ४। इड्यागमन्त्रस्तु— "इडो अग्न आज्यस्य वियन्तु (यन्तु)"—इति तै० ब्रा० ३. ५. ५. ३।

"अथ बर्हिरित्यादि। "वर्षा इति। उक्तप्रकारेण विनष्टाः, ता 'ओषधयः' वर्षासु प्रवृद्धाः सत्यः, 'ग्रसदि' प्राप्तायां 'बर्हिषः' आस्तीर्णस्य 'रूपम्' प्राप्नुवन्ति। तत् कुत इत्यत आह— 'आस्तीर्णाः' अनुक्रमणसामान्येन आस्तृतदर्भवत् 'ग्रेरे' ग्रेरते। 'तस्मात्' उपपादितात् हेतोः 'ग्रसद् बर्हिः'[1] ॥ १२ ॥

"अथ स्वाहेत्यादि। अन्त्यप्रयाजे 'स्वाहाग्निं', 'स्वाहा सोमम्' -इति[2] स्वाहाकृतिरस्ति; तां देवतां यजेति स्वाहाकारेण हविःप्रदानात्, तत्प्रदानस्य च यागत्वात्, तस्य तद्देवत्वम्। हेमन्तोऽपि वसन्ताद्यृतुना मन्त्रिमः। तदेवोपपादयति— 'हि' यस्माद् 'वसन्तात्' 'परार्ध्यः' परस्मिन् अर्द्धे भागे भवः। 'अन्तेन' स्वाहाकारेण 'अन्तं' हेमन्तम् मनुरेभ्यः 'अदृञ्जत'[3]। गत मन्यत् ॥ १३ ॥

१— "बर्हिर्यजति, ग्रसद मेवावरुन्धे"—इति तै० सं० २. ६. १.५। "पशवो वै बर्हिः"—इत्यादि ऐ०ब्रा० २. १. ४। बर्हिर्व्याख्याया माह यास्कः— "बर्हिः परिवर्हणात्"—इति ८. २. ५। बर्हिर्यागमन्त्रस्तु"— "बर्हिरग्न आज्यस्य वेतु"—इति तै० ब्रा० ३. ५. ५. ४।

२— "स्वाहाग्निम्, स्वाहा सोमम्, स्वाहाग्निम्, स्वाहा प्रजापतिम्, स्वाहाग्नीषोमौ, स्वाहेन्द्राग्नी, स्वाहेन्द्रम्, स्वाहा महेन्द्रम्, स्वाहा देवाꣳ आज्यपान्, स्वाहाग्निꣳ होत्रा जुषाणाः, अग्न आज्यस्य वियन्तु (व्यन्तु)"—इति स्वाहाकृतयः। तै० ब्रा० ३. ५. ५. ५।

३— "स्वाहाकारं यजति, हेमन्त मेवावरुन्धे"—इति तै० सं० २. ६. १. ६। "स्वाहाकृतीर्यजति, प्रतिष्ठा वै स्वाहाकृतयः"—इत्यादि ऐ० ब्रा० २. १. ४। स्वाहाकृति-व्याख्याया माह यास्कः— "स्वाहाकृतयः। स्वाहेत्येतत्— सु आहेति वा, स्वा वागाहेति वा, स्वं प्राहेति वा, स्वाऽऽकृतं हविर्जुहोतीति वा"—इति ८. ३. ५। स्वाहाकृतियागमन्त्रास्तु—"स्वाहाग्निम्"—इत्याद्याः तै० ब्रा० ३. ५. ५. ५।

हेमन्तस्यान्तिमत्वं प्रकारान्तरेण प्रशंसति— "तद्वा इति। 'तत्' वक्ष्यमाणप्रकारं 'वै' खलु 'एतत्', तदिदमपि हेमन्तप्राशस्त्यं मस्तीत्यर्थः। किं तदेतत्? 'वसन्त एव' 'पुनः' ऋत्वारम्भे आवर्त्तमानः सन्, 'हेमन्तात्' स्व-पूर्वभाविनः सकाशात् 'पुनरसुः' पुनः-प्राप्त-प्राणो 'भवति'। कथ मित्यत आह— "एतस्मादिति। उक्तार्थवेदनं प्रशंसति— "पुनर्ह वा इति ॥ १४ ॥

प्रयाजमन्त्रेषु तद्देवतावद्भूत्वैकत्वप्रयुक्तं 'व्यन्तु'-'वेतु'-इति बहुत्व मेकत्वं वास्ति, तदनूद्य प्रशंसति— "स वै व्यन्त्विति। उक्तो 'जामि'-शब्दार्थोऽसकृत्। ऐकरूप्येण व्यन्त्विति वा वेत्विति वा पाठे सति पुनरुक्तता मनसि अनादरः स्यात्, अतस्तत् 'जामि' अधिकं भवति। प्रकारान्तरेण तदेव प्रशंसति— "व्यन्त्विति वा इति। एकस्य पुंसो जायावद्भूत्वसम्भवेऽपि स्त्रियास्त्वेक एव पतिरिति नियमाद् व्यन्तु-वेतु इति योषा-वृषणौ; अतः 'एतत्' एतेन तथाविधपाठेन अस्य पुत्रस्योत्पादनं 'मिथुन मेव' सम्पादितवान् भवति ॥ १५ ॥

तैत्तिरीयके "यदुपभृति प्रयाजानुयाजेभ्यस्तदिति[1] यदुभयार्थं माज्यग्रहण मुक्तम्[2], तस्य विभाग माह— "अथ चतुर्थ इति। 'चतुर्थे' बर्हिराख्ये 'प्रयाजे' होतव्ये सति, उपभृतः सकाशात् जुह्वां 'समानयति' आज्यम्[3]। एतत् प्रशंसति— "प्रजा वा इत्यादिना। प्रजानां पुत्रादिद्वारा उपरिबर्हणसम्भवात् बर्हिष्त्वम्।

१—तै० ब्रा० ३. ३. ६। २— इहाप्यानातम् २प्र० ५ब्रा० द्रष्टव्यम्।
३— "उपभृतो जुह्वा मानयति"—इति का० श्रौ० सू० ३. २. २२।

तस्मात्स्य वृष्ट्यादिद्वारा प्रजादिरूपेणोत्पत्तेराज्यं रेतः; अतो बर्हिर्व्यानयनात् 'प्रजासु' 'रेतः' सिक्तं भवति। 'सिक्तेन रेतसा' रेतोभूतेनाज्येन 'इमाः' परिदृश्यमानाः 'प्रजाः' 'अभ्यावर्त्तम्' अभ्यावृत्याभ्यावृत्य कर्मवशाद् देहसम्बन्धं प्राप्नुवन्ति। "तस्मादित्युपसंहारः ॥ १६ ॥

जुह्वा सुपभृतः प्राप्तं माज्यं मित्रप्राप्त्यात्मना प्रशंसति— "सङ्ग्रामं इति। 'यः' च 'प्रयाजैः' संसृष्टोऽध्वर्युः, तेन सङ्ग्राम एव सन्निधापितो भवति। अतः 'संयत्तयोः' युद्धाय प्रयतमानयोर्मध्ये 'यतरम्' एव योद्धारं 'मित्रं' सखायं साहाय्यं कर्त्तुम् 'आगच्छति', 'स जयति' इति लोके प्रसिद्धम्; एवम् 'उपभृतः' सकाशात् 'जुह्वं' जुह्वगतं माज्यं 'मित्रं' सत् 'आगच्छति'; 'तेन' मित्रप्राप्तिकारणेन 'जयति'। 'तस्मात् समानयति' ॥ १७ ॥

"यजमान एव जुहू मिति। "अत्तैव जुहूम्"-इत्याज्यानयनार्थवादद्वयम् "अध्वर्यो! स्रुचं मासस्व"-इत्येतस्य ब्राह्मणवद् व्याख्येयम्[1]। उपभृतः सकाशादाज्यस्य आनेता अध्वर्युः, ग्रहोः सकाशाद् 'बलिम्' उपायनद्रव्यं मदनीयं मन्त्रं दात्रे यजमानाय प्रदापितवान् भवतीति सङ्ग्रहार्थः ॥ १८ ॥

आज्यसमानयनसमये उपभृदवमर्शने विपत्ते बाधदर्शनेन निषेधति— "स वा इत्यादिना। "अत्तार माद्येनेति। अत्तुरन्नस्यावमर्शो युक्तः, तद्वैपरीत्येन 'आद्येन' अन्नेनावमर्शने भोक्तुर्यजमानस्य प्रतिकूलं कृतवान् भवति ॥ १९ ॥

१— पुरस्तादिहैव ३ ब्रा २ क० (२४५, २५१ पृ०) द्रष्टव्यम्।

"अथोत्तरा मिति। 'उत्तराम्' उपभृदुपरितनीं कृत्वा 'जुहूम्' 'अध्यूहति' विधारयेत्। स्पष्ट मन्यत् ॥ २० ॥

आज्यभागादिदेवतां तदनुक्रमेण निर्दिश्य स्वाहाकारेण तच्च स्तोतु माख्यायिका माह— "देवा ह वा इति। कृत्स्नयज्ञसमाप्तु-पायपरिज्ञानद्योतनार्थो निष्प्रक्रमं ह प्रयाजलाभहर्षद्योतनार्थो वा 'ह्न्त'-शब्दः। 'ह्न्त! विजित मेव' प्रयाजपञ्चक मपि असुरविघात मन्तरेण स्वाधीनं कृत मेव। 'अनु' तदनुसृत्य एतस्मिन्नेवान्यप्रयाजे 'सर्वं' प्रयाजव्यतिरिक्त सकल मपि 'यज्ञं' 'संस्थापयाम' इति। तेषा मभिप्रायं दर्शयति— "यदि न इति। 'यदि' समापनात् प्रागेव असुरा राक्षसाश्च 'नः' अस्माकं यज्ञम् आगच्छेयुः, तर्हि तस्य भङ्गः स्यात्; अतः प्रागेव समापित एवास्त्विति तेषा मभिप्रायः ॥ २१ ॥

"त इति। एवं विधार्थं 'उत्तमे प्रयाजे' 'स्वाहाकारेणैव' स्वाहा-स्वाहेत्युक्त्वैव 'सर्वम्' अवशिष्टं 'यज्ञं' 'ममस्थापयन्'। तत्प्रकारं विभज्य दर्शयति— "स्वाहाग्नि मितीत्यादिना। 'उभय-त्राच्युतः आग्नेयः पुरोडाशः'-इति। "यदाग्नेयोऽष्टाकपालो-ऽमावास्यायां च पौर्णमास्यां चाच्युतो भवतीति श्रुत आग्नेयोऽष्टा कपालः पुरोडाशो दर्शे पौर्णमास्यां च नित्य इत्यर्थः ॥ २२ ॥

"अथ यथादेवत मिति। पौर्णमास्या ममावास्यायां च विष्णुः, अग्नीषोमौ, प्रजापतिश्चेति विकल्पिता उपांशुयाजदेवताः[1], एका-

---

१— "विष्णुर्वा"-इत्यादि का०श्रौ०सू० ३. ३. २५। व्यवस्थितविकल्पोऽयम् सन्नयतोऽग्नीषोमौ असन्नयतो विष्णुरिति (सङ्का० १. ३.१६–१८.)। सान्नाय्ये=दार्ध्रिके दधिपयसी, तदनुतिष्ठन्=सन्नयन्निति।

दशकपालदेवताः, अग्नीषोमौ, अमावास्यायां चोभयत्र साधारणः; अष्टाकपालदेवोऽग्निः, इन्द्राग्नी एकादशकपालदेवता, दधिपयो देवते इन्द्रमहेन्द्राविति या दर्शपूर्णमास-प्रधानदेवताः सन्ति, ता अनतिक्रम्य (तत्तद्देवता अनतिक्रम्य[1]) तत्तद्देवताकं यागं समस्थापयत्-इत्यर्थः। अत्र देवताना मनियतत्वात् यथादेवत मिति सङ्क्षेपाभिधानम् ॥

'आज्यपाः'[2] 'प्रयाजानुयाजा देवाः'[3] समिदाद्याः स्वाहान्ताः[4]। तेभ्यः इदं हविः स्वाकृत मस्त्विति तस्यार्थः। "जुषाणो अग्निः"-इत्यत्र[5] 'स्विष्टकृदग्निः' विवक्षितः; स्विष्टकृत्त्वाभावे जोषस्यैवासम्भवात्। तेन 'स्विष्टकृत मग्निं' तद्देवताकं यागं 'समस्थापयन्' इत्यर्थः; सकलकर्मन्यूनातिरेकपरिहारायाग्नौ स्विष्टकृद्धोमस्यानुष्ठेयत्वात्। सैषा प्रसिद्धिः "अग्निर्हीति 'हि'-शब्देनोच्यते ॥

१— ठ-पुस्तके नास्त्येषोऽंशः।

२— "आज्येन प्रयाजा इज्यन्ते"-इति तै० सं० ६. ३. ११. १५।

३— "एकादश प्रयाजाः, एकादशानुयाजाः, एकादशोपयाजाः; — एतेऽसोमपाः पशुभाजनाः"-इति ऐ० ब्रा० २. २. ८।

४ — समिधः, तनूनपात् नराशंसो वा, इळः, बर्हिः, दुरः, उषासानक्ता, दैव्याहोतारा, तिस्रोदेव्यः (इड़ा, सरस्वती, भारती) त्वष्टा, वनस्पतिः, स्वाहाकृतयः इति। ऐ० ब्रा० २. १. ४; तै० ब्रा० ३. ६. ३; निरु० ८ अ० २, ३ पा०; निघ० ५. २. २–१३।

५— "जुषाणोऽग्निराज्यस्य वेतु"-इति, "जुषाणः सोम आज्यस्य वेतु"-इति च; द्वावेतौ आज्यभागयोर्याज्यामन्त्रौ। आम्नाताविमौ तै० ब्रा० ३. ५. ६. २, ३। ऐतरेयकेऽपि विहितौ (१. २. ६.)।

विभज्याख्यानस्य तात्पर्यं माह— "यथैवेति । 'यथा' कृत्स्नोऽपि 'यज्ञः' समाप्तो भवति, तथा 'देवाः' प्रतिपादितप्रकारेणाज्यप्रयाज एव 'समस्थापयन्' । यदर्थं माख्याधिकाच प्रपञ्चिता, तदिदानीं सार्थवाद माह— "तस्मादिति । 'यावन्ति हवींषि' आज्यभागादि-खिष्टकृदन्तानि, तानि सर्वाणि प्रयाजयागेनैव समादितवान् भवति ॥

समापनफल माह— "तस्माद् यदत ऊर्ध्व मिति । 'तस्मात्' समापनाद्धेतोः 'अतः' अन्यप्रयाजात् 'ऊर्ध्वं' 'विलोम' न्यूनं विपरीतप्रकारं वा, यदि 'क्रियेत', तद्विषय मादरं न कुर्यात्,— तत्कथं समादध्या मिति चिन्तां न कुर्यादित्यर्थः । किन्तु 'यज्ञः संस्थितः' एव 'इति' जानीयात् । 'स एषः' उक्तविधो 'यज्ञः', 'अयातयामेव' अगतसार एव ; 'यथा' अपेक्षानतिक्रमेणैव यतो वषट्कारादिना उक्त आसीत्, अतो यातयामत्व-शङ्का नास्तीत्यर्थः । अथवा अपेक्षितस्य वषट्कारादेरसत्त्वात् 'स एषः' शिष्टः 'यज्ञः' 'यातयामेव' निर्गतसार एव ॥ २३ ॥

अथ देवैः कृत मवशिष्टस्य यातयामत्वपरिहारं दर्शयति— "ते देवा इति । केवलेनाङ्गेन फलानिष्पत्तेरवश्यं प्रधान मनुष्ठेयम् ; तच्च गतसार मभूत् ; अतः कथं तत्परिक्रियत इति तेषां कामना ;— गतसारं हि 'पुनराप्याययेम' इति । कस्यस्य प्रसङ्ग इति, त माह— "अयातयामान मिति । यामपर्यन्त मवस्थित मग्नादिकं यथा नीरसं भवति, एव मय मपीति ; गतरसत्वसाम्यादस्यापि यातयामत्वम् ॥ २४ ॥

अत्र तैर्दृष्ट मुपायं दर्शयति— "स यदिति । 'सः'-दृत्यनर्थको वाक्यालङ्कारार्थः । 'आज्यं' 'जुह्वां' 'परिशिष्टं' प्रयाजहोमेभ्योऽवशिष्ट मभूत् । उपयुक्तादन्यः शेषः ; अतोऽस्याज्यस्य क्वचिदुपयोग इति तं दर्शयति— "येनेति । यं प्रति यस्य रसो निर्गतः, तस्य तत एव हि आप्यायन मुचित मिति संस्थापितावशेषाज्योपादानाभिधानम् । "यथापूर्व मिति । आग्नेयोऽग्नीषोमीयादिति हविषां पूर्वं-पूर्वं मनतिक्रम्येत्यर्थः ॥

अभिघार मेवाप्यायन मित्याह— "पुनरेवेति । आज्येन आप्यायन मेवायातयामत्वकरणम् । आज्यस्यायातयामत्वप्रसिद्धिः 'हि'-शब्देनोच्यते । यदर्थं पुराडुक्ताभिधानम्, तदिदानीं विधत्ते— "तस्मादुक्तम मिति । अन्यचावक्तशेषस्य यातयामत्वपरिहाराय पुनरभिघारणप्रदर्शनेनाज्यस्यायातयामत्वं समर्थयते— "तस्मादिति । "यस्य कस्य चेति । चरोः[1] पुरोडाशस्य वा, आज्यव्यतिरिक्तस्य 'हविषः' अवक्त मिति शेषः, तम् अवक्तशेष मित्यर्थः । अवशिष्टस्य शिष्टकृत्युपयोगात् 'तत्' तेनाभिघारणेन खिष्टकृत मेवाप्यायितवान् भवति,— आप्यायनेन तदवशिष्टम् 'अयातयामं करोति'; शेषाभिघारणस्य अवक्तहविषोऽभिघारणात् ॥

साधारणत्वशङ्कां व्युदसितुं व्यतिरेक माह— "अथ यदेति । 'खिष्टकृते' खिष्टकृदर्थं 'यदा' एतत्साधारणं स्यात्, तदा 'ततः' खिष्टकृतोऽवशिष्टस्याभिघारणात् न तानि आप्याययेदित्यर्थः ॥

अनभिघारणे हेतु माह— "नो हीति । 'ततः हविषः'

१— 'पशोः'—इति ठ ।

सकाशात् 'काञ्चन' प्रधानस्य अङ्गस्य वा सम्बन्धिनीम् आकृतिम् अध्वर्युः 'होष्यन्' भवति । अतोऽभिधारणस्याप्याप्यायनार्थत्व मिति सिद्धम् ॥ २५ ॥ ४ ॥ [५.३.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे पञ्चमाध्याये तृतीयं ब्राह्मणम्[1] ॥

१— "अत्र यद्यपि शतपथे अविशेषेण श्रुतम्—"अथ तनूनपातं यजति"—इति (३।३ ए० १७ पं०), परन्तु शाखान्तरेऽस्ति विशेषोऽपि । तथाहि—'राजन्याश्चिवध्रस्यवसिष्ठवैश्वश्वनकानां कण्वकाण्वपसङ्कृतीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषाम्'—इति कात्या० श्रौ० ३. ३. ८ सू० ६० । "वसिष्ठश्वनकानां नाराशंसः । अत्रीणां चैके"—इति का० श्रौ० सू० १६. ६. ८, ६ । "नराशंसो अत्र आज्यस्य वेत्विति द्वितीयो वसिष्ठश्वनकाना मश्चिवध्रस्यानां कण्वसङ्कृतीनां राजन्यानां प्रजाकामानां च"—इति साङ्खा० १. ७. ३। "तान्येतान्येकादशाप्रीसूक्तानि । तेषां वासिष्ठमात्रेयं वाध्रश्वं गार्त्समद मिति नाराशंसवन्ति, मैधातिथं दैर्घतमसं प्रैधिक मित्युभयवन्ति, अतोऽन्यानि तनूनपात्वन्ति"—इति चाह यास्कः (निरु० ८. ३. ७.) आपस्तम्बस्तु—"नराशंसो द्वितीयः प्रयाजो वसिष्ठश्वनकानाम्, तनूनपादितरेषां गोत्राणाम्"—इत्येवाह (श्रौ० सू० १) आश्वलायनेन त्विह बह्वन्युक्तानि, तानि तत्रैव द्रष्टव्यानि (श्रौ० सू० ३. २. १–८.)। प्रयाजयागदेवताविचारोऽप्यस्ति । तत्र यास्केन हि "किन्देवताः प्रयाजानुयाजाः"—इत्युपक्रम्य बहु विचारानन्तरम् "आग्नेया

स वै समिधो यजति। प्राणा वै समिधः प्राणानेवै-तत्समिन्धे प्राणैर्ह्ययं पुरुषः समिद्धस्तस्मादभिमृशेति ब्रूयाद्युद्युपतापी स्यात्स युद्युष्णः स्यादेव तावच्छꣳसेत समिद्धो हि स तावद्भवति युद्यु शीतः स्यान्नाशꣳसेत तत्प्राणानेवास्मिन्नेतद्दधाति तस्मात्समिधो यजति ॥ १ ॥

अथ तनूनपातं यजति। रेतो वै तनूनपाद्रेत ऽएवै-तत्सिञ्चति तस्मात्तनूनपातं यजति ॥ २ ॥

अथेडो यजति। प्रजा वा ऽइडो यदा वै रेतः सिक्तं प्रजायतेऽथ तदीडितमिवान्न मिच्छमानं चरति तत्प्रै-वैतज्जनयति तस्मादिडो यजति ॥ ३ ॥

अथ बर्हिर्यजति। भूमा वै बर्हिर्भूमान मेवैतत्प्र-जनयति तस्मार्द्बर्हिर्यजति ॥ ४ ॥

अथ स्वाहा-स्वाहेति यजति। हेमन्तो वा ऽऋतूनाꣳ स्वाहाकारो हेमन्तो ह्येमाः प्रजाः स्वं व्वꣳ मुपनयते तस्माद्धेमन् म्लायन्त्योषधयः प्र वनस्पतीनां पलाशानि मुच्यन्ते प्रतितरा मिव व्वयाꣳसि भवन्त्यधस्तरा मिव

इति तु स्थितिः"—इति निर्गीतम् (निरु० ८. ३. ६, ७.)। एतद-वलम्ब्य मीमांसादर्शनेऽपि बह्वनि सूत्राणि रचितानि (२. २. २ ; ३. १. १६, २० ; ३. ३. ११ ; ४. १. ३३–३६ ; ४०, ४१ ; ५. २. १६ ; ६. २. ५६, ६० ; १०. १. १४, १५.)। एतान्येवावलम्ब्याष्टावधि-करणान्यारचितानि माधवाचार्येण जैमिनीयन्यायमालाया मिति ॥

व्वयाꣳसि पतन्ति व्विपतितलोमेव पापः पुरुषो भवति हेमन्तो हीमाः प्रजाः स्वं व्वश मुपनयतें स्त्री ह वै त मुर्द्वं कुरुते श्रियेऽन्नाद्याय युस्मिन्नुर्द्वे भुवति यु ऽएव मेतद्वेद ॥ ५ ॥

देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते दण्डैर्धनुर्भिर्नु व्यजयन्त ते हाव्विजयमाना ऽऊचुहन्त व्वाच्येव ब्रह्मन् विजिगीषामहै स यो नो व्वाचं व्याहृतां मिथुनेनु नानुनिक्रामात्स सुर्व्वं पुराजयाता ऽअथ सुर्व्व मितरे जयानितिं तथेति देवा ऽअब्रुवंस्ते देवा ऽइन्द्र मब्रुवन् व्याहरेति ॥ ६ ॥

स ऽइन्द्रोऽब्रवीत् । एको ममेत्यथास्माक मेकेतीतरे ऽब्रुवंस्तदु तुन्मिथुन मेवाविन्दन्मिथुनꣳ ह्येकश्चैका च ॥ ७ ॥

द्वौ ममेतीन्द्रोऽब्रवीत् । अथास्माकं द्वे ऽइतीतरे ऽब्रुवंस्तदु तुन्मिथुन मेवाविन्दन्मिथुनꣳ हि द्वौ च द्वे च ॥ ८ ॥

त्रयो ममेतीन्द्रोऽब्रवीत् । अथास्माकं तिस्र ऽइतीतरेऽब्रुवंस्तदु तुन्मिथुन मेवाविन्दन्मिथुनꣳ हि त्रयश्च तिस्रश्च ॥ ९ ॥

चत्वारो ममेतीन्द्रोऽब्रवीत् । अथास्माकं चतस्र ऽइतीतरेऽब्रुवंस्तदु तुन्मिथुन मेवाविन्दन्मिथुनꣳ हि चत्वारश्च चतस्रश्च ॥ १० ॥

पुञ्च ममेतीन्द्रोऽब्रवीत्। तुत इुतरे मिथुनं नाविन्दन्नो ह्युत ऽजङ्गे मिथुन मुस्ति पुञ्च-पञ्चेति ह्येवैतदुभुयं भुवति ततोऽसुराः सुर्व्वं पुराजयन्त सुर्व्वस्माद्देवाऽअसुरानुजयन्त्सुर्व्वस्मात्सपुत्नानुसुरान्निरभजन् ॥ ११ ॥

तुस्मात्प्रथमे प्रयाजु ऽइष्टे ब्रूयाद्। एको ममेत्येका तुस्य यु मह्ं द्वेष्मीति युद्यु नु द्विष्याद्योऽस्मान् द्वेष्टि युञ्च व्वयं द्विष्म ऽइति ब्रूयात् ॥ १२ ॥

द्वौ ममेति द्वितीये प्रयाजे। द्वे तुस्यु योऽस्मान् द्वेष्टि युञ्च व्वयं द्विष्म ऽइति ॥ १३ ॥

त्रयो ममेति तृतीये प्रयाजे। तिस्रस्तुस्यु योऽस्मान् द्वेष्टि युञ्च व्वयं द्विष्म ऽइति ॥ १४ ॥

चत्वारो ममेति चतुर्थे प्रयाजे। चुतस्रस्तुस्यु योऽस्मान् द्वेष्टि युञ्च व्वयं द्विष्म ऽइति ॥ १५ ॥

पञ्च ममेति पञ्चमे प्रयाजे। न तुस्य किञ्चनु योऽस्मान् द्वेष्टि युञ्च व्वयं द्विष्म ऽइति स पुञ्च-पञ्चेत्येव भुवन् पुराभवुति तुथास्य सुर्व्वꣳ सुंवृङ्क्ते सुर्व्वस्मात्सपुत्नान् निर्भजति यु ऽएवु मेतद्वेद ॥ १६ ॥ ५ ॥

॥ इति चतुर्थप्रपाठके पञ्चमं ब्राह्मणम् [५. ४.] ॥

Pariçiṣṭa Parvan, (Text) Fasc. 1–5 @ /6/ each	Rs.	1	14
Prākṛita-Paingalam, Fasc. 1–6 @ /6/ each		2	4
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–2 @ /12/ each		1	8
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-3 @ /6/ each ...		1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1		0	6
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Ṭhi S'iñ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13	0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Ālamgirnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/		1	8
Āin-i-Akbari, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–5 @ 1/ each		5	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each		13	2
Maghazi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each		1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs. 5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...	... 12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...	... 7	2
Ma'āṣir-i-'Ālamgīri, (Text), Fasc. 1–6 @ /6/ each ...	... 2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	... 0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	... 1	14
Ṭabaqāt-i-Nāṣiri, (Text) Fasc. 1–5 @ /6/ each	... 1	14
Ditto (English) Fasc. 1–14 @ /12/ each ...	... 10	8
Ditto Index	... 1	0
Tārīkh-i-Firūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Firūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	... 3	0
Wis o Rāmīn. (Text) Fasc. 1–5 @ /6/ each	... 1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	... 0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	... 50	0
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4. Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
Introduction to the Maithili Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S B.*, 1882)	4	0
5. Anis-ul-Musharrahin	3	0
6. Catalogue of Fossil Vertebrata	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9. Jawāmiu-l-'ilm ir-riyāẓi, 168 pages with 17 plates, 4to. Part I ...	2	0
10. Khizānatu-l-'ilm	4	0
11. Mahābharata, Vols. III and IV, @ 20/ each	40	0
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13. Sharaya-ool-Islām	4	0
14 Tibetan Dictionary, by Csoma de Kőrös	10	0
15. Ditto Grammar " "	8	0
16. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18. Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each ...	... 29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra	... 5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

20-6-1901.

Books are supplied by V-P.P.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 996.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ.

VOL. I, FASCICULUS V.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs. 1	8
Advaitachinta Kaustubhe, Fasc. 1	0	6
*Agni Purāna, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/	7	8
Anu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each	1	14
Aphorisms of Śāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3	1	2
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...	6	0
Çatapatha Brāhmaṇa, Fasc. 1–5	1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each	19	14
Ślokavartika, (English) Fasc. 1–2	1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–15 @ /6/ each ...	4	2
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each	5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3	1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1–4	1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpodyōta, (Text) Fasc. 1–9 @ /6/ each	3	6
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each	4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each	4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/	1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/	1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...	5	4
Nityacarapaddhati Fasc. I (Text)	0	6
Nyayabinduṭika, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0

अथ प्रयाजान् प्रकारान्तरेणानूद्य प्रशंसति— "स वा इत्यादिना। 'एतत्' एतेन समिद्यागेन यजमानस्य 'प्राणानेव' समिन्धितवान् भवति। प्राणानां समिद्भूत्व मुपपादयति— "प्राणैर्हीति। 'अयं पुरुषः' चेचज्ञः। प्राणोपाध्यभावे शरीरमम्बन्धायोगात् तेषां पुरुषमभिव्यनहेतुत्वम्। सेषा प्रसिद्धिः 'हि'-शब्देनोच्यते ॥

समिधः प्राणत्वसमर्थनाय प्रासङ्गिकं नैमित्तिक मभिमर्शन माह— "तस्मादिति। यजमानो ज्वरादिना उपतापवान् 'यदि स्यात्', तदाध्वर्युः समिद्यागसमये प्राणप्राबल्यायात्मना 'अभिमृशेति' यजमानं 'ब्रूयात्'। 'स यदि' 'उष्णः' औष्ण्यवानित्यर्थः। 'तावत् आशंसेत' अस्योपतापः शाम्यत्विति; समिद्यागेषु प्राणदेवता मनुध्यायन् कामयेत। 'तावता' तदाशंसनमात्रेणैव 'समिद्धः' प्रवलः प्राणो गतोपतापो 'भवति' एव। तापाभावे तन्न कर्त्तव्य मित्याह— "यद्धिति। यस्मादेवं तस्मात् 'प्राणा एव समिधः'-इति सिद्ध मित्यर्थः। "तत्प्राणानित्याद्युपसंहारः ॥ १ ॥

"अथ तनूनपात मिति। 'रेतसः' सप्तमधातोः शरीरावष्टम्भकत्वेन तनूनां पालनात् तनूनपात्त्वम्; अतस्त्यागेन स-प्राणे यजमाने 'रेत एव' स्थापितवान् भवति ॥ २ ॥

"अथेड इति। दुह्यन्तीडोऽन्नानि; तदुपजीवनेन प्रजाना मिड्यत्वम्। एतदेवोपपादयति— 'यद्' 'आसिक्तं रेतः' 'प्रजायते' उत्पद्यते, 'तद्' एव 'ईडितं' सर्वैः प्रशस्यमानम् 'अन्नम्' दक्षन् 'चरति', 'तत्' तेन दुह्यागेन 'एतत्' रेतः 'जनयति' प्राणिरूपेणोत्पादितवान् भवति ॥ ३ ॥

"अथ बर्हिरिति। बृंहतेर्वृद्ध्यर्थाद् 'बर्हिः'-शब्दः; अतो 'बर्हिर्भूमा' खलु; अतः प्रजायमान मेतेन बर्हिर्योगेन बहुकृत मुत्पादयति ॥ ४ ॥

"अथ खाहेत्यादि। यः खाहाकाराख्यः प्रयाजः, स 'ऋतूनां हेमन्तः' अन्तिमत्वसाम्यात्। 'हेमन्तः' खलु 'इमाः' सर्वा अपि 'प्रजाः' स्वकीयं 'वशं' प्रापयति; इतरर्त्तुषु तथाविधप्रजापीडाभावात्। अत एव च यास्को हेमन्तपर्याय-हिमशब्द मिच्छन् व्युत्पादयत्— "हिमं पुनर्हन्तेः"-इति[1]। वशीकरणप्रकारं स्पष्टं प्रदर्शयति— "तस्मादित्यादिना। वशीकृतत्वाद्धेतोः 'हेमन्' हेन्नि, हेमन्ते हिमोपघातेन 'ओषधयः' वनस्पतयश्च म्लाना गलितपर्णाश्च भवन्ति। तथा 'वयांसि' पक्षिणः 'प्रतितरा मिव' अत्यन्तं प्रतिकूला इव, हिमोपहतपक्षत्वात् उपचीणा इवेत्यर्थः; 'अधस्तरा मिव' पक्षाणां प्रच्यवनादूर्द्ध्वङ्क्तु मशक्ता इव अधः आ'पतन्ति'। 'पुरुषः' सर्वोऽपि 'विपतितलोमेव' प्लुप्तलोमेव कदर्थिताङ्गो 'भवति'॥

उपसंहरति— "हेमन्तो ह्येति। 'य एव मेतत्' कृत्स्नस्यापि हिमवशीकृतत्वं 'वेद', 'सः' वेदिता यस्मिन् 'अर्द्धे' अर्द्धभागे[2] देशे 'भवति', सः 'तम्' 'अर्द्धं' देशं 'श्रियेऽन्नाद्याय च स्वीकुरुते खलु' स देशो धनकनकादिश्रिया, अन्नेन च समृद्धेस्तदधीनो भवतीत्यर्थः ॥ ५ ॥

१— "हेमन्तः हिमवान्। हिमं पुनर्हन्तेर्वा हिनोतेर्वा"—इति निरु० ४. ४. ६। कथ मेतेन 'हिम'—शब्दस्य हेमन्तपर्यायत्वम् ?।

२— भूगोलकस्योपरितनार्द्धभागेऽधस्तनार्द्धभागे वेत्यस्माकम्।

दृत्थं प्रयाजान् प्रग्रस्य तदनुमन्त्रणमन्त्रान्[१] विधातु माख्यायिका माह— "देवाश्च वा असुराश्चेति। 'प्राजापत्याः' प्रजापतेः पुत्राः 'देवाः असुराश्च उभये' स्पर्द्धिता, परस्परं दण्डधनुरादिभिर्हननसाधनैः विजयं नालभन्त; सामर्थ्यस्य समानत्वात्। जयोपायपरिज्ञानहर्षद्योतनार्थो 'हन्त'-शब्दः। विजयप्राप्त्यै दृत्थम् 'ऊचुः',— 'वाच्येव ब्रह्मन् विजिगीषामहै' वाग्रूपे एव मन्त्रे विवदमानाः जेतु मिच्छामहै दृति। 'नः' अस्माकं 'वाचम्' अस्मन्निरुक्तं पुंलिङ्गवचनं 'मिथुनेन' स्त्रीलिङ्गान्तप्रतिवचनाभिधानेन मिथुनं कृत्वा 'न अनुनिक्रामात्' अनुक्रमेण न निष्क्रामेत्, नितरां न आक्रामति; 'स सर्वं' 'पराजयाते' पराजयं प्राप्नुयात्। 'अथ' 'सर्वं' जेतव्यम् 'इतरे' मिथुनेन वक्तारः, जेतृपक्षादन्ये सर्व्वेऽपि 'जयान्' जयेयुः। एवं सङ्केते कृते सति 'तथेति' अङ्गीकृत्य श्रेष्ठत्वात् 'इन्द्रं व्याहर दृत्यब्रुवन्' ॥ ६ ॥

"स इन्द्र दृति। 'सः' एव मुक्तः 'इन्द्रोऽब्रवीत्',— 'एकः' पुत्रो 'ममेति' अस्मिति शेषः। 'अथ' 'इतरे' असुराः 'अब्रुवन्',— 'अस्माक मेका दृति' लिङ्गसामर्थ्यात् पुत्रीति गम्यते। अथ श्रुतिस्तेषां वचनप्रतिवचनस्य तात्पर्यं माह— 'तदु' तदा 'तत्' तेन एव मभिहितत्वात् 'मिथुन मेव' प्रतिज्ञाविरोधेन 'अविन्दन्' लब्धवन्तः। तत्कथ मिति, तदुच्यते— 'एकश्चैका च' मिलित्वा 'मिथुनं हि'; लोके स्त्रीपुरुषयोर्मिथुनत्वव्यवहारात् ॥ ७ ॥

"द्वौ ममेत्यादि। त्रयः पर्यायाः एव मेव योज्याः[१] ॥ ८, ९, १० ॥

१— का० श्रौ० सू० ३. ३. २। "ऊतस्य प्रयाजस्यानुमन्त्रणं यजमानेन कर्त्तव्यम्; आत्मगामिवाक्यत्वात्" इति भट्टदेवः।

"पञ्चम मेतीति। अथ 'इन्द्रः पञ्चम मेत्यब्रवीत्'; 'तत्' 'इतरे' असुराः 'मिथुनं नाविन्दन्'; लिङ्गद्वयेऽपि रूपाविशेषात्। अलाभे कारणं श्रुतिरेवाह— "नो हीति। 'हि'-शब्दसूचित मर्थ माह— "पञ्च-पञ्चेति। स्त्रियाः पुंसश्चोभयोरप्यभिधानं पञ्च-पञ्चेत्येव, न व्यावर्त्तको रूपभेदोऽस्ति; 'ततः' पञ्चप्रभृतीनां मिथुनत्वस्यालाभात् 'असुराः' 'सर्वं' विवादास्पदं जेयम् 'पराजयन्त' जेतुं नाशक्नुवन्नित्यर्थः। अतो 'देवाः' 'सर्वस्मात्' अपि जयविषयात् 'असुरान् अजयन्'। जयशब्दार्थं माह— "सर्वस्मात्सपत्नानसुरान्निरभजन्निति ॥ ११ ॥

इदानीं मर्थवादमिद्धं प्रयाजानुमन्त्रणमन्त्रान् प्रति प्रयाजं विभज्य योजयति— "तस्मादित्यादिना। यस्मादिन्द्रेणैको ममेत्युक्तम्, असुरैणैका ममेत्युक्तम्, 'तस्मात्' 'प्रथमे प्रयाजे' 'एको मम' —इत्यादि 'ब्रूयात्'। एवं द्वितीयादिष्वपि—'द्वौ मम', 'द्वे तस्य' इत्यादि द्रष्टव्यम्। 'यं' च 'अहं' 'द्वेष्मि' अहं यस्य द्वेषं करोमि, 'तस्य' 'एका' पुत्री स्यादिति ब्रूयादिति प्रथमप्रयाजानुमन्त्रणमन्त्रशेषस्यार्थः। पुत्र्याः रक्षणप्रदानादौ बहुतरदुःखसम्भवात् तच्छ्चोराग्रा स्यात्। यदि कस्मै चिदपि द्वेषं न कुर्यात्, तदा "योऽस्मानित्यादि ब्रूयात्। वस्तुतो द्वेषाभावेऽपि रागादिभिर्द्वेषाचरणात् तन्निबन्धनं द्वेष मभिप्रेत्य 'यं च वयं द्विष्मः'— इत्यभिधानम् ॥ १२। १३। १४। १५ ॥

१— "एको ममैका तस्य, योऽस्मात् द्वेष्टि यञ्च वयं द्विष्म इत्येवं मिथुनैर्यथासङ्ख्यम्"—इति का० श्रौ० सू० ३. ३. ३।

"पञ्च ममेतीति। 'पञ्चमे प्रयाजे पञ्च ममेति' ब्रूयात्। पूर्ववद्। द्वेष्टरि विपरीतफलकामनायां प्राप्तायां माह— "न तस्य किञ्चनेति[1]। 'तस्य' द्वेषकृतः ग्रचोः 'किञ्चन' पञ्च पुत्राः पञ्च कन्या वा स्युरिति 'न' ब्रूयादित्यर्थः। असुरैः पञ्चसङ्ख्यायां मिथुनरूपस्य वचनस्यादर्शनादिति भावः। उक्तार्थज्ञानं प्रशंसति— "पञ्चपञ्चेत्येवेति। 'सर्वं' 'संवृङ्क्ते' वर्जयति, स्वयं तत्प्राप्नोतीत्यर्थः ॥ १६ ॥ ५ ॥ [५. ४.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे पञ्चमाध्याये चतुर्थं ब्राह्मणम्[2] ॥

१— का० श्रौ० सू० ३. ३. ४।

२— "एतच्चानुमन्त्र्यां त्यागानन्तरं हविःप्रक्षेपे च कृते कर्त्तव्यम्। त्यागाश्च मान्त्रवर्णिकीभ्यः समिदादिदेवताभ्यः कार्याः। तत्रेयं पद्धतिः— 'इदं समिद्भ्यो न मम ; एको मम, एका तस्य— योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'–इति प्रथमे। द्वितीये– 'इदं तनूनपाते [नराशंसाय वा] न मम ; द्वौ मम, द्वे तस्य— योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'–इति। तृतीये— 'इदं मिड्भ्यो न मम ; त्रयो मम, तिस्रस्तस्य– योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'–इति। चतुर्थे— इदं बर्हिषे न मम ; चत्वारो मम, चतस्रस्तस्य— योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'–इति। पञ्चमे— 'इद मग्नये सोमाय, अग्नयेऽग्नीषोमाभ्याम्, अग्नीषोमाभ्यां देवेभ्य आज्यपेभ्यो न मम ; पञ्च मम, न तस्य किञ्चन— योऽस्मान् द्वेष्टि यं च वयं द्विष्मः'–इति। अमावास्यायां तु 'इद मग्नयेऽग्नीषोमाभ्या मिन्द्राय देवेभ्य इति सन्नयतः, 'इद मग्नये विष्णवे इन्द्राग्निभ्यां देवेभ्य इति असन्नयत इति विशेषः ॥ इत उत्तर मिहैव दर्श-

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ ५ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चधेनूस्त्रिदशशतरसलाधेनुसौवर्णभूमीः ।
रत्नोस्रां रुक्मवाजिद्विपमहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः ।
आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पाचमात्सिङ्गणार्यः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीहरिहरमहा-
राजसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये प्रथम-
काण्डे पञ्चमाध्यायः समाप्तः ॥ ५ ॥

पूर्णमासीयकाम्यप्रयाजानुमन्त्रणविधिरप्युक्तः कात्यायनेन— "त्विषि-मानपचितिमान्"–इत्यादिः (श्रौ०सू०२. ३.)। 'पूर्वस्मादनुमन्त्रणादिदं भिद्यते, पृथग्विधानात्'–इत्यादि च तद्वृत्तौ या० दे०। इह शतपथे त्रैकादशे श्रुत मेतत् सर्वं स्फुटम् ।— "त्विषिरेव प्रथमः प्रयाजोऽप-चितिर्द्वितीयो यशस्तृतीयो ब्रह्मवर्चसं चतुर्थोऽन्नाद्यं पञ्चमः। स प्रथमं प्रयाज मनुमन्त्रयेत त्विषिमान् भूयास मिति"–इत्यादि (२प्र० ३ब्रा० १०, ११ क०)। एतच्चानुमन्त्रणं 'प्रोषितोऽपि यजमानः करोति'–इति मद्दादेव इति शम् ॥

[अथ षष्ठाध्याये प्रथमं ब्राह्मणम्]

ऋतवो ह वै देवेषु यज्ञे भागु मीषिरे। आ नो यज्ञे भजत मा नो यज्ञादन्तर्गता*स्त्वेव नोऽपि यज्ञु-भाग ऽइति ॥ १ ॥

तद्वै देवा नु जज्ञुः। तु ऽऋतवो देवेषूजानत्वसुरा-नुपावर्त्तन्ताप्रियान् देवानां द्विषतो भ्रातृव्यान् ॥ २ ॥

ते वैता मेधतु मेधां चक्रिरे। या मेषा मेता मनुश्रु-ण्वन्ति। क्षुन्तो ह स्मैव पूर्व्वे व्युपन्तो युन्ति लुनन्तोऽपरे मृणुन्तः शुश्वद्वैभ्योऽक्षष्टपच्या ऽएवौषधयः पेचिरे ॥ ३ ॥

तद्वै देवाना मुाग ऽआस। कुनीय ऽइन्वुतो† द्विषं द्विषतेऽरातीयुति किम्वेतावन्माच मुपजानीत युथेदु मितोऽन्यथासदिति ॥ ४ ॥

ते होचुः। ऋतूनेवानुमन्त्रयामहा ऽइति केनेति प्रथमानेवैनान्यज्ञे यजामेति ॥ ५ ॥

सु हाग्निरुवाच। अथ यन्मां पुरा प्रथमं युजथु क्वाहं भवानीति न त्वा मायुतनाच्यावयाम ऽइति ते युद्दतू-नभिह्वयमाना अथाग्नि मायुतनान्नाच्यावयंस्तुस्मादग्नि-

* 'दन्तुर्गाता'–इति क, ख, ग; 'दन्तुर्याता'–इति च डा०–वेवर्-दृष्टः।

† 'इन्वुतो'–इति क, ख, ग; डा०–वेवरेण च दृष्टः।

रच्युतो नु ह वा ऽआयतनाच्च्यवते युस्मिन्नायतते भवति य ऽएवु मेतु मग्निं मच्युतं व्वेद ॥ ६ ॥

ते देवा ऽअग्निं मब्रुवन्। पुरेह्येनांस्त्वु मेवानुमन्त्रयस्वेति स हेत्याग्निरुवाचुर्त्तवोऽविदं वै वो देवेषु यज्ञे भाग मिति कथं नोऽविद ऽइति प्रथमानेवु वो यज्ञे यक्ष्यन्तीति ॥ ७ ॥

तु ऽऋतवोऽग्निं मब्रुवन्। आ वयन्त्वा मस्मासु भजामो यो नो देवेषु यज्ञे भाग मविद ऽइति सु ऽएषोऽग्निर्ऋतुष्टाभक्तः समिधो ऽअग्ने तनूनपादग्न ऽइडो ऽअग्ने बर्हिरग्ने स्वाहाग्नि मित्याभक्तो ह वै तुस्यां पुण्यकृत्यायां भवति यामस्य समानो ब्रुवाणः करोत्यग्निमुते ह वा ऽअस्मा ऽअग्निमुन्त ऽऋतव ओषधीः पचन्तीदꣳ सुर्व्वं यु ऽएवु मेतु मग्निं मृतुष्टाभक्तं वेद ॥ ८ ॥

तुदाहुः। युदुत्तमान् प्रयाजानावाहुयन्त्युथ कुस्मादेनान् प्रथमान् यजन्तीत्युत्तमान् ह्येनान् युज्ञे वाकल्पयन् प्रथमान्वो यजामेत्यब्रुवंस्तस्मादुत्तमानावाहुयन्ति प्रथमान् यजन्ति ॥ ९ ॥

चतुर्थेन वै प्रयाजेन देवाः। यज्ञ मापुवंस्तं पञ्चमेन समस्थापयन्नुथ यदुत ऊर्ध्व मुसꣳस्थितं यज्ञस्य स्वर्ग मेव तेन लोकꣳ समाश्नुवत ॥ १० ॥

ते स्वर्गं लोकं यन्तः। असुररक्षसेभ्य ऽआसङ्गादिभ्याश्चकुस्तेऽग्निं पुरस्तादकुर्व्वत रक्षोऽहणꣳ रक्षसा मपहन्तार मग्निं मध्यतोऽकुर्व्वत रक्षोऽहणꣳ रक्षसा मपहन्तार मग्निं पश्चादकुर्व्वत रक्षोऽहणꣳ रक्षसा मपहन्तारꣳ ॥ ११ ॥

स युद्येनान् पुरस्तात्। असुररक्षसान्यासिसङ्क्रन्नग्निरेव तान्युपाहन्त्रक्षोहा रक्षसा मपहन्ता युदि मध्यत आसिसङ्क्रन्नग्निरेव तान्युपाहन्त्रक्षोहा रक्षसा मपहन्ता युदि पश्चादासिसङ्क्रन्नग्निरेव तान्युपाहन्त्रक्षोहा रक्षसा मपहन्तातु ऽएवꣳ सर्व्वतोऽग्निभिर्गुप्यमानाः स्वर्गं लोकꣳ समाश्नुवत ॥ १२ ॥

तथो ऽएवैष ऽएतत्। चतुर्थेनैव प्रयाजेन यज्ञ माप्नोति तं पञ्चमेन सꣳस्थापयत्युथ यदत ऽऊर्द्ध मुसꣳस्थितं यज्ञस्य स्वर्ग मेव तेन लोकꣳ समश्नुते ॥ १३ ॥

स युदाग्नेय माज्यभागं युजति। अग्निं मेवैतत्पुरस्तात् कुरुते रक्षोहणꣳ रक्षसा मपहन्तार मथ युदाग्नेयः पुरोडाशो भवत्यग्नि मेवैतन्मध्यतः कुरुते रक्षोहणꣳ रक्षसा मपहन्तार मथ युदग्निꣳ स्विष्टकृतं युजत्यग्नि मेवैतत्पश्चात् कुरुते रक्षोहणꣳ रक्षसा मपहन्तारꣳ ॥ १४ ॥

स युद्येनं पुरस्तात्। असुररक्षसान्यासिसङ्क्ष-न्त्यग्निरेव तान्युपहन्ति रक्षोहा रक्षसा मपहन्ता युदि मध्यतु ऽआसिसङ्क्ष्न्त्यग्निरेव* तान्युपहन्ति रक्षोहा रक्षसा मपहन्ता युदि पश्चादासिसङ्क्ष्न्त्यग्निरेव† तान्युप-हन्ति रक्षोहा रक्षसा मपहन्ता सु ऽएवꣳ सर्व्वतोऽग्नि-भिर्गुप्युमानः स्वर्गं लोकꣳ सुमश्नुते ॥ १५ ॥

स युद्येनं पुरस्ताद्। यन्नुस्यानुव्याहुरेत्तं प्रति ब्रूया-न्मुखा मार्त्ति मारिष्यस्यन्धो वा बधिरो वा भविष्य-सीत्येता वै मुखा ऽआर्त्तयस्तथा हैवु स्यात् ॥ १६ ॥

युदि मध्यतो यन्नुस्यानुव्याहुरेत्। तं प्रति ब्रूयाद्-प्रजा ऽअपशुर्भविष्यसीति प्रजा वै पशवो मुध्यं तथा हैवु स्यात् ॥ १७ ॥

युद्यन्ततो यन्नुस्यानुव्याहुरेत्। तं प्रति ब्रूयादुप्रति-ष्ठितो दुरिद्रः क्षिप्रेऽमुं लोकु मेष्यसीति तुथा हैवु स्यात्तस्मादु हु नानुव्याहारीव स्यादुत ह्येवंव्वित्पुरो भुवति ॥ १८ ॥

संव्वत्सरꣳ ह वै प्रयाजैर्जयञ्जयति‡। सु हु न्वेवैनं

---

* 'मध्यतु असुररक्षसान्यासिसङ्क्ष्न्त्यग्निरेव'–इति च।

† 'पश्चादसुररक्षसान्यासिसङ्क्ष्न्त्यग्निरेव'–इति च।

‡ 'जुर्यं जयति'–इति क, ख, ग; 'जुर्यन् जयति'–इति च।

जयति योऽस्य द्वाराणि वेद किꣳ हि स तैर्गृहैः कुर्याद्यानन्तरतो नु व्यवव्विद्याद् यथा* यथास्य ते भवन्ति तस्य वसन्त एव द्वारꣳ हेमन्तो द्वारं तं वा एतꣳ संव्वत्सरꣳ स्वर्गं लोकं प्रपद्यते सुव्वं वै संव्वत्सरः सुव्वं वा ऽअक्षय्य मेतेनो हास्याक्षय्यꣳ सुकृतं भवत्यक्षय्यो लोकः ॥ १९ ॥

तदाहुः । किन्देवत्यान्याज्यानीति प्राजापत्यानीति ह ब्रूयादनिरुक्तो वै प्रजापतिरनिरुक्तान्याज्यानि तानि हैतानि यजमानदेवत्यान्येव यजमानो ह्येव स्वे यज्ञे प्रजापतिरेतेन ह्युक्ता ऽऋत्विजस्तन्वते तं जनयन्ति ॥२०॥

स ऽआज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टाद्दाज्यस्याभिघारयति सैषाज्येन मिश्राहुतिर्हूयते युजमानेन हैवैषैतन्मिश्रा हूयते यदि ह वा ऽअपि दूरे सन् युजते युद्यन्तिके युथा हैवान्ते सतु† ऽइष्टꣳ स्यादेवꣳ हैवैवंव्विदुष ऽइष्टम्भवति युद्यु हापि बह्विव पापं करोति नो हैव बहिर्द्धा यज्ञाद् भवति यु ऽएव मेतद् वेद ॥ २१ ॥ ९ ॥

॥ इति चतुर्थप्रपाठके षष्ठं ब्राह्मणम् [९. १.] ॥

---

* सायणभाष्ये, च-पुस्तके च नास्त्येतत् पदम् ।

† 'सदु'–इति सा०-भा०-सम्मतः पाठः, डा०-वेवरेण दृष्टश्च ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, त मह वन्दे विद्यातीर्थमहेश्वरम् ॥ ६ ॥

अथ वसन्तादिप्रयाजदेवेषु कथ मग्नेः सम्बन्ध इति तदुपपादनायाख्यायिका माह— "ऋतवो ह वा इति । 'ऋतवः' पुरा दर्शपूर्णमासादि-'यज्ञे' 'भागम्' 'ईषिरे' ऐच्छन्। ते देवान् प्रति अस्मानपि 'यज्ञे' भागिनः कुरुत ! 'यज्ञात्' अस्मात् 'अन्तर्'-इतान् 'मा' कुरुत! अतोऽस्माकम् 'अपि' 'यज्ञे भागोऽस्त्विति' अब्रुवन् ॥ १ ॥

"तद्वै देवा नेति । 'तत्' कार्यं 'देवाः' 'न' प्राजानन्। तेषु 'अजानत्सु' कथ मेतैः सह वासेनेति तद्वैरिभूतान् द्वेषकारिणः 'असुरान्' 'उपा'गत्य, (॥ २ ॥

"ते हैता मिति ।) तेषु 'याम्' ऋद्धिं देवेषु अन्वायन्ते[1], तादृशीम् 'एधतुम्' ऋद्धि मसुरेषु प्रवर्द्धयाञ्चक्रुः । तेषु प्रवर्द्धितेषु सत्सु असुराः केचन वापनात्पूर्वभागिनः सन्तः वृष्टिबाहुल्यात्[2] 'क्षपन्तो यन्ति'; किल केचन क्षेत्रे क्षेत्रे बीजानि 'वपन्तो यन्ति'; उप्तबीजाश्च केचन सस्यानि सम्यक् फलितानीति परस्पर मुच्चारयन्तः परिणतानि सस्यानि 'लुनन्तो यन्ति'; केचन लूनानि व्रीहिफलानि 'मृणन्तः' प्रहरन्तः, खले बलीवर्द्दाक्रमणादिना सम्बाद्धान्यं पृथक्

१— 'ऋद्धिं देवाः अत्वा व्यथन्ते'—इति ङ ।

२— 'केचन वपनात् पूर्वं वृष्टिबाहुल्यात्'—इति ङ ।

कुर्वन्तः ; तथा असुरदेशे खलु कर्षानपेक्षिता नीवाराद्यो मुञ्जमुञ्जः सर्वदा परिपक्वा आसन् ॥ ३ ॥

तद्वै देवाना मिति । एवं वैरिष्वसुरेषु सन्द्वेषु सत्सु 'देवानां' मनसि 'आगः' आसीत् । कथ मिति तदुच्यते— 'अतः' अस्मात् 'दभ्नु'-दिति अतिक्रमाद्धेतोः[1] 'द्विषन्' द्वेषकार्यवासुरसङ्गो 'द्विषते' देवसङ्गाय 'अरातीयति' शत्रुव माचरितु मिच्छति[2]। एतत् 'कनीयः दभ्नु' निकृष्टं खलु । 'अतः' प्रद्वेट्टैः सह कलहो न कार्यः किन्तु 'दृढम्' ऋत्वतिक्रमलक्षणं विच्छिन्नं कार्यम् 'इतः' अस्मात्, इदानीं प्रवृत्तप्रकाराद् 'अन्यथा' प्रकारान्तरेण समाहितात्मना 'असत्' भवेत् । 'एतावन्माचम्' अवबुद्ध्यध्व मिति परस्पर मब्रुवन् ॥ ४ ॥

"ते होचुरिति । उक्ता च, 'ऋत्वनेव अनुमन्त्रयामहै'- 'इति' निश्चित्य, तेषा मुक्तो वः 'केन' इतरदेवेभ्यः 'प्रथमानेव' 'यज्ञे' यजन मङ्गीचक्रुः ॥ ५ ॥

अथ प्राथम्ये तेभ्योऽवक्लृप्ते सत्याह— "स होवाग्निरिति । 'अग्निः' पूर्वं 'माम्' एव 'प्रथमम्' दृष्टवन्तः, इदानीं ते प्रथमं यष्टव्यास्यन्ति, 'अहं' कुत्र स्थाने यज्ञे 'भवानीति' अब्रवीत् । अथ तेनोक्तास्ते त मग्निं स्वस्थानात् 'न च्यावयाम इति' प्रतिश्रुत्य, ऋत्वाक्रान-समये 'अग्निं' स्वस्थानात् प्रच्युतं न चक्रुः । 'तस्मात्' 'अग्निः' स्वस्थानाद् 'अच्युतः' अभूत् । 'एवं' 'यः' कोऽपि अग्नेरच्युतत्वप्रकारं जानाति, सोऽपि स्वस्थानान्न च्यवत इति उक्तार्थज्ञानफलम् ॥ ६ ॥

१— 'ऋत्वतिक्रमाद्धेतोः'-इति ठ । २— पा० सू० ३. १. १० ।

"ते देवा इति। अथ 'ते देवाः' अग्नेः स्थानस्य पालन-दाक्षिण्यात् ऋत्वनुमन्त्रणे 'अग्निम्' एव प्रेरयामासुः। 'सः' तथेत्यङ्गी-कृत्य ऋतूनागत्य 'उवाच' आह— "ऋतव इति। 'वः' युष्माकं 'यज्ञे' 'देवेषु' मध्ये 'भागं' बुद्धवानस्मि 'इति'। केन प्रकारेणेति पृष्टः, 'प्रथमानेव' सतो युष्मान् 'यक्ष्यन्ति'-'इति' अब्रवीत् ॥ ७ ॥

"त ऋतव इति। अथ सन्तुष्टाः 'ऋतवः' हे अग्ने! त्वं 'यज्ञे' अस्माकं प्रथमम् 'अविदः'; अतः 'त्वाम्' 'अस्मासु' मध्ये 'आ भजामः'-इति 'अब्रुवन्'। यत एव मतः 'अग्निः' 'ऋतुषु' भागं लब्ध-वान्। "समिधो अग्ने"-"तनूनपाद्"-"अग्न इडः"—इत्याद्याभजन-प्रकारप्रदर्शनम्[1]। उक्तार्थज्ञानं प्रशंसति— "आभक्तो ह वा इति। 'अस्य' ज्ञातुरहं 'समानः' इति स्वात्मानं 'ब्रुवाणः' कश्चित्पुरुषो 'यां पुण्यकृत्यां' यत्पुण्यं कर्म, दर्शपूर्णमासादिकं 'करोति', तत्रासावपि भागवान् भवति; तथा 'एवम्' उक्तप्रकारेण 'अग्नि मृतुष्वाभक्तं' 'यो वेद', 'अस्मै' अग्निमते, उक्तार्थज्ञानसामर्थ्येन यागस्यावश्यं लाभादग्निमान् भवत्येव; अतोऽस्मै खलु उक्तप्रकारेणाग्निना सहिता 'ऋतवः', 'ओषधीः' व्रीहियवादिकाः स्व-स्व-कालोचिताः पाकं कुर्वन्ति। कथं पक्त्वा ओषधयः? कियन्तः? इति, तत्राह— "इदं सर्वं मिति। यदस्मिंलोके परिदृश्यमानं, तदिदं सर्वं मोषधि-जात मित्यर्थः ॥ ८ ॥

१— समिध इत्यादीनि प्रयाज-मन्त्र-प्रतीकानि। ते च मन्त्राः तै० ब्रा० ३. ५. ५ आम्नाताः, तै० सं० २. ६. १ विहिताश्च।

प्रयाजदेवतानां प्राथम्यं ब्रह्मवादिनां चोद्यमुखेन प्रशंसति—"तदाऊरिति। आवाहनक्रमेणैव सर्वत्र यागो दृष्टः, अत्र कथं वैलक्षण्य मिति तेषा माशयः। तैर्दृष्टं तत्कारणं दर्शयति—"उत्तमान् ह्यौति। 'हि' यस्मात् प्रथमभागकल्पनासमये 'एनान्' 'उत्तमान्' चरमभाविन एव देवताः कल्पितवन्तः, पश्चात् अपगतानां तेषां पुनरागमनाय यतो 'वः' युष्मान् 'प्रथमान् यजाम इत्यब्रुवन्'; 'तस्मात्' उक्तविधं वैलक्षण्यं सञ्जात मिति। अत्रैषा मावाहनान्निमत्वं "देवाꣳ आज्यपाꣳ आ वह"—इत्यभिधानाद्[१] द्रष्टव्यम्; आज्यपाः खलु प्रयाजानुयाजदेवाः[२] ॥ ९ ॥

आदिमध्यावसानेष्वनुष्ठेयाना माज्यभागप्रधानखिष्टकृद्यागाना मग्निदेवताकत्व मिधातु माह—"चतुर्थेनेति। चतुर्थप्रयाजेनैव पुरा 'देवाः' दर्शपूर्णमासाख्यं 'यज्ञम्' आप्ना, 'तं पञ्चमेन समस्थापयन्'; तत्र यष्टव्यान् देवान् क्रमेणोद्दिश्य स्वाहाकृतवात्[३]। 'यदत ऊर्द्धं' 'यज्ञस्य' अवशिष्ट माज्यभागाद्यस्ति, 'तेन स्वर्गं लोकं समाश्नुवत' ॥ १० ॥

"ते स्वर्ग मिति। असुरेभ्यो राक्षसेभ्यश्च तेषाम् 'आसङ्गात्'

१— २८८ पृ० १५ पं० द्रष्टव्यम्।

२— २९२ पृ० द्वतीया टीप्पनी द्रष्टव्या।

३— तद्यथा— "स्वाहाग्निम्। स्वाहा सोमम्। स्वाहाग्निम्। स्वाहा प्रजापतिम्। स्वाहाग्नीषोमौ। स्वाहेन्द्राग्नी। स्वाहेन्द्रम्। स्वाहा महेन्द्रम्। स्वाहा देवाꣳ आज्यपान्। स्वाहाग्निꣳ होत्रा जुषाणः। स्वग्न आज्यस्य वियन्तु (व्यन्तु)"—इति पञ्चमप्रयाजमन्त्रः। तै० ब्रा० ३. ५. ५. ५।

निरोधात् भीताः आसन्; तत्परिहाराय रक्षोहन्तारम् 'अग्निं' 'पुरस्तात्' पूर्वभागे रक्षसां वधाय स्थापितवन्तः। तथा मध्ये, पश्चाच्च, अग्निं मेव रक्षोहन्तारं चक्रुः ॥ ११ ॥

"स यद्येनानिति। अतः कारणात् 'सः' रक्षोहाः 'अग्निः', स्वर्गं प्रति गच्छतः 'एनान्' देवानसुररक्षसांस्य 'पुरस्तात्' पूर्वदेशे 'आसिसङ्क्षन्' आसङ्गं प्रतिबन्धम् मैच्छन् 'तानि' असुररक्षांसि चापहतवान्। एवं मध्ये, पश्चाद्देशे च ॥ १२ ॥

"तथो एवैष इति। अत्र सर्वत्राग्निभिरादिमध्यान्तस्थितैः रक्षिताः स्वर्गलोकं प्राप्ताः यथा देवास्तथैवेदानीन्तनोऽपि यजमानः चतुर्थेन प्रयाजेन यज्ञं स्वाधीनं कृत्वा पञ्चमेन समाप्य तदूर्ध्वभाविना असंस्थितेनाग्निष्टेन यज्ञेन पुरस्तान्मध्ये पश्चाच्चाग्निनैव यज्ञविघातकान् घातयित्वा निर्वाधं स्वर्गं गच्छति ॥ १३ ॥

अग्नेः पुरस्तान्मध्ये पश्चाच्च स्थापनप्रकारं दर्शयति— "स यदाग्नेय मित्यादिना। सौम्यस्याप्याज्यभागस्य सम्भवात् 'आग्नेयम्'-इति विशेषितम्। प्रथमम् 'आज्यभाग माग्नेयं' कृतवान् यजमानः, स्वर्गप्राप्तिसमये 'अग्नि मेव' रक्षोहननाय 'पुरस्तात्' कृतवान् भवति। अनेन प्रथम माग्नेयाज्यभागं कुर्यादिति ह लभ्यते। एव माग्नेयेनाष्टाकपालयोगेन अग्निं मध्यतः कुरुते। आग्नेयेन स्विष्टकृता च पश्चात् ॥ १४ ॥

चिष्वपि यागेष्वाग्नेयत्वकरणस्य प्रयोजन माह— "स यद्येनं पुरस्तादित्यादिना। एतत्पूर्ववाक्यवद्व्याख्येयम्[1] ॥ १५ ॥

१— इहैव द्वादशकण्डीत्याख्या द्रष्टव्या (४ पं०)।

"स एवं सर्वतोऽग्निभिर्गुप्यमानः"— इति[1] यदग्निरक्षण मुक्तम्, तत्प्रशंसनाय कञ्चिद् दृष्टं प्रयोजन माह— "स यद्येन मिति। 'सः' 'अनुव्याहारी' निन्दकः, 'एनम्' अग्निना रक्षितं यजमानं 'यज्ञस्य' 'पुरस्तात्' पूर्वभागे 'अनुव्याहरेत्' वैकल्यविषयं वाक्यं ब्रूयात्, 'तं' निन्दकं 'प्रति' स यजमानोऽपि 'ब्रूयात्'— "मुख्या मार्त्ति मारिष्यसि,— अन्धो वा बधिरो वा भविष्यसीति"। एषैव मुख्या आर्त्तिरित्याह— 'एताः' अन्धबधिरादयः। ज्वरशिरोव्यथादि-तात्कालिकी मार्त्ति मपेक्ष्य एतासां मुख्यत्वम्[2] ॥ १६ ॥

"यदि मध्यत इत्यादि। स्पष्टम् ॥ १७ ॥

"यद्यन्तत इति। 'क्षिप्रे' अविलम्बितस्वकाले भूमौ प्रतिष्ठा-रहितो 'दरिद्रः' सन् 'अमुं लोकं' स्वर्गम् 'एष्यसि'-'इति'। अत्र स्वर्गस्य नाशात्मकत्वात् 'अमुंलोकम्'-इत्येतदस्मालोकात्मच्युतिमात्रे पर्यवस्यति। किं मेव मभिधानमात्रेण तथाविधा असुखप्राप्तिः सिद्धा स्यादित्याशङ्क्योक्तम्— "तथा हैव स्यादिति। उक्तप्रकारः स्यादेवेत्यर्थः। यस्मादेव मवश्यं फलम्, 'तस्मात्' 'अनुव्याहारीव न स्यात्' यज्ञस्य निन्दको न भवेदिति विधिः।

उक्तार्थञ्च प्रशंसति— न केवलं यष्टैव; अपि तु 'एवंविद्' अपि स्वदूषकात् स्वयं 'परः' उत्कृष्टो 'भवति'। अथवा एवं वेदनायां तात्पर्यवान् भवेदिति आख्येयम्। तस्मादाज्यभागादीना माग्नेयत्वकरणं प्रशस्त मिति तात्पर्यार्थः ॥ १८ ॥

प्रयाज एव किञ्चिद्वेदितव्य मित्याह— "संवत्सरं हेति। 'प्रयाजैः'

१— ३९४ पृ० ५ पं०। २— अस्मन्मते तु 'मुख्या' मुखमण्डलीया।

साधनैः साध्यं 'जयन्' संवत्सरं खलु 'जयति'। जितप्रकारः पूर्वाध्याये "देवाश्च वा असुराश्चेत्यत्र "ऋतूनसंवत्सरं प्राजयन्नित्यादिनोक्तः[1]। 'यः' 'अस्य' संवत्सरस्य 'द्वाराणि' जानाति, 'सः' खल्वेव 'एनं' संवत्सरं 'जयति', नानभिज्ञः। 'यान्' प्रयाजान् 'अन्तरतः' मध्यतो 'हि' 'न' व्यवजानाति। 'ते' च 'यथा' येन प्रकारेण 'अस्य' उपकारकाः 'भवन्ति', 'सः' अनुष्ठाता 'तैः' गृह्यमाणैरनुष्ठेयैः प्रयाजैः 'किं कुर्यात्' किं साधयेत्। 'संवत्सरः' यदेकैकं तत् क्षयिष्णु, यत् 'सर्वं' तदपरिच्छेदात् तावत् 'अक्षयि'। एतत्परिज्ञानेन च 'सुकृतं', तत्फलभूतं पुण्यलोकस्य, उभावपि 'अक्षयौ' भवतः ॥ १९ ॥

अथ आज्यद्रव्यं प्राजापत्यत्वेन प्रशंसितु माह— "तदाहुरिति। प्रजापतेः सकलदेवतासमष्ट्यात्मकत्वेन अथ मसाविति निर्वक्तु मशक्यत्वादनिरुक्तत्वम्; अतो 'आज्यानि प्राजापत्यानीति ब्रूयात्'। आकृतिभेदेन बहुवचनम् ॥

प्रजापतिशब्दस्याच विवक्षित मर्थं माह— "तानि हेति। 'तानि एतानि' प्रयाजादियागसाधनद्रव्याण्याज्यानि 'यजमानदेवत्यानि'। 'एव'-कारेण प्रसिद्धः प्रजापतिरपोद्यते। एतदुपपादयति— "यजमानो हीति। इतरेषा मपरोऽस्त्येवेत्याशङ्क्याह— "एतेनेति। ऋत्विजां दक्षिणादिदानेन पालनात् प्रजापतित्वम्; 'ऋत्विजः' तु 'एतेन' नियुक्ता एव यज्ञं 'तन्वते' स्व-स्व-भागं विस्तारयन्ति। तदेवाह— "तं जनयन्तीति। 'तं' यज्ञम् ॥ २० ॥

१— ३६१ पृ० ३ पं०, ३६२ पृ० २ पं०; २६८ पृ० १४ पं०।

इद माज्यं यजमानदेवताकत्वेन प्रशस्तम्, अतस्तेनोपस्तरणाभिघारणादि कर्त्तव्य मित्याह— "स आज्यस्येति। 'सः' अध्वर्युः 'आज्यस्य अपस्तीर्य' पुरोडाशस्यापनदेश माज्येनास्तृतं कृत्वा, 'हविषः' हविः, पुरोडाशादि 'द्विरवदाय', अवत्तस्य 'आज्यस्य' 'उपरि' आज्यम् 'अभिघारयति'। 'सैषा' उपस्तृताभिघारिता 'आज्येन मिश्रा' सती अध्वर्युणा 'हूयते'। आज्यस्य यजमानदेवताकत्वस्य प्रतिपादितत्वात् 'यजमानेन एव मिश्रा हूयते'। यत एव मत आज्येनोपस्तरणाभिघारणं कृत्वा जुहुयादित्यर्थः॥

उक्तार्थज्ञं प्रशंसति— "यदि हेति। 'यथा हैव' यथैव खलु 'अन्ते मदः' मदनो देवयजनस्य सन्निधौ 'दृष्टं' साङ्गं 'स्यात्', 'एवम्' आज्यस्य यजमानदेवत्यत्वप्रकारं जानतो यजमानस्य देशान्तरस्थस्यापि 'दृष्टं भवति', व्यवधानदोषो नास्तीत्यर्थः॥

न केवलं विप्रकर्षदोषाभावः, किन्तु वैकल्यदोषोऽपि नास्तीत्याह— "यद्यु हेति। 'य एतदेवं वेद', सः 'पापम्' अङ्गभंगादिलक्षणं 'यदि' 'बहु अपि' कुर्यात्, स 'यज्ञात्' साङ्गात् 'नैव' 'बहिर्द्धा' वाह्यो 'भवति'। अथवा उक्तार्थज्ञानेन बहुपापोऽपि[1], यज्ञाधिकारी भवेदित्यर्थः॥ २१॥ ६॥ [६. १.]॥

१— "पापः, पातापेयानां, पापत्यमानोऽवाङेव पततीति वा, पापत्यतेर्वा स्यात्"—इति निरु० ५. १. २। पुनः "न पापासो मनामहे (ऋ० सं० ६. ४. ३७. ६.)"—इति-मन्त्रस्य व्याख्यायाम् "न पापा मन्यामहे × × × अस्मत्सकाशात् ब्रह्मचर्यमध्ययनं तपो दानकर्मेत्यृषिरवोचत्"—इति च तत्रैव ६. ५. २।.

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे षष्ठाध्याये प्रथमं ब्राह्मणम्[१] ॥

॥ इति प्रथमकाण्डे चतुर्थप्रपाठकः समाप्तः[२] ॥

१— "प्रयाजानुमन्त्रणम् (३. ३. २.)"– इत्यादि-कातीय-वचनानीह पर्यालोच्यानि ।

२— इत उत्तरं क-पुस्तके "काण्डी ११७"–इति, ख-पुस्तकेऽपि तथैव, ग-पुस्तके "कण्डिका १२१"–इति, घ-ङ-पुस्तके त्वसम्पूर्णे, च-पुस्तकेऽस्त्येव "कण्डिकासङ्ख्या १२१"–इति । तत्र ब्रा०१ क०१३, ब्रा०२ क०२६, ब्रा०३ क०२०, ब्रा०४ क०२५, ब्रा०५ क०१६, ब्रा०६ क०२१, सङ्कलनया १२१ इति सिद्धम् ॥

अथ

पञ्चमप्रपाठके प्रथमं ब्राह्मणम्,

अपि वा

षष्ठाध्याये द्वितीयं ब्राह्मणम् ।

॥ हरिः ॐ ॥

यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषा मियं जितिस्ते होचुः कथं न इदं मनुष्यैरनाभ्यारोह्युꣳ स्यादिति ते यज्ञस्य रुसं धौत्वा युथा मधु मधुकृतो निर्ह्रुयेयुर्व्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ युदेनेनायोपयंस्तस्माद्यूपो नाम तद्वा ऋषीणा मनुश्रुत मास ॥ १ ॥

यज्ञेन ह वै देवाः । इमां जितिं जिग्युर्यैषा मियं जितिस्ते होचुः कथं न ऽइदं मनुष्यैरनभ्यारोह्युꣳ स्यादिति ते यज्ञस्य रुसं धौत्वा युथा मधु मधुकृतो निर्ह्रुयेयुर्व्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्निति त मन्वेष्टुं दध्रिरे ॥ २ ॥

तेऽर्च्चन्तः श्राम्यन्तश्चेरुः । श्रमेण ह स्म वै तद्देवा

जयन्ति युदेषां जुय्य* मासुऽर्षयश्च† तेभ्यो देवा वैवु प्ररोचयाञ्चक्रुः स्वयं वैवु दध्रिरे‡ प्रेत तुदेष्यामो युतो देवाः स्वर्गं लोकुꣳ समाश्नुवतेति ते किं प्ररोचते किं प्ररोचत ऽइति चेरुरेत्पुरोडाश मेवु कूर्म्मं भूत्वा सुर्प्पन्तं ते ह सुर्व्व ऽएवु मेनिरेऽयं व्वै यज्ञ ऽइति ॥ ३ ॥

ते होचुः। अश्विभ्यां§ तिष्ठ सुरस्वत्यै तिष्ठेन्द्राय तिष्ठेति सु ससुर्प्पैवाग्नये‖ तिष्ठेति ततस्तस्थावग्नये वा ऽअस्थादिति तु मग्नावेवु परिगृह्य सर्व्वहुत मजुहवु-राहुतिर्हि देवानां तत ऽएभ्यो यज्ञः प्रारोचत तु मस्ृ-जन्त¶ तु मतन्वतु सोऽयुं परोऽवरुं यज्ञो ऽनूच्यते पितैवु पुत्राय ब्रह्मचारिणे ॥ ४ ॥

स वा ऽएभ्यस्तत्पुरोऽदाशयत्। यु एभ्यो यज्ञं प्रारो-चयत्तस्मात्पुरोदाशः पुरोदाशो ह वै नामैतद्यत्पुरो-डाश ऽइति सु ऽएषु ऽउभयुचाच्युत ऽआग्नेयोऽष्टाकपालः पुरोडाशो भवति ॥ ५ ॥

स नु पौर्णमासुꣳ हविः। नामावास्यु मग्नीषोमीय

---

* 'युज्य'–इति च डा०-वेवरेण दृष्टः पाठोऽशुद्ध एव।

† 'मासु ऋषयश्च'–इति ग। ‡ 'दधिरे'–इति क।

§ 'ते होचुरश्विभ्यां'–इति ग। एव मिहोत्तरत्रापि सर्वत्र।

‖ 'ससुर्प्पैवाग्नये'–इति च। ¶ 'मसृजन्त'–इति च।

ऽएवु पौर्णमासꣳ हविः सान्नाय्य मामावास्यं यन्न ऽएवैषु ऽउभयत्रावक्लृप्तो नेद्यन्नादुयानीति न्वेव पुरस्ता-त्पौर्णमासस्य क्रियत ऽएवम्वा*मावास्यस्यैतन्न तद्यस्मा-दुच क्रियते ॥ ६ ॥

यद्यु ऽएन मुपधावेत्। इष्ट्या मा याजयेत्येतयैव याजयेद्यत्कामा वा ऽएत मृषयोऽजुहवुः सु ऽएभ्यः कामः समर्द्धत यत्कामो ह वा ऽएतेन यज्ञेन युजते सोऽस्मै कामः समृद्धातें यस्यै वै कस्यै च देवतायै हविर्गृह्यतेऽग्नौ वै तस्यै जुह्वत्यग्ना ऽउ चेद्वोष्यन्त्स्यात्कि मन्यस्यै देवताया ऽआदिशेत्तस्मादग्नय ऽएव† ॥ ७ ॥

अग्निर्व्वै सुर्व्वा देवताः। अग्नौ हि सुर्व्वाभ्यो देव-ताभ्यो जुह्वति तद्यथा सुर्व्वा देवता ऽउपधावेदेवं तत्त-स्मादग्नय ऽएव ॥ ८‡ ॥

अग्निर्व्वै देवाना मज्ञातमाम्। यं व्वा ऽअज्ञातमां मन्येत त मुपधावेत्तस्मादग्नय ऽएव ॥ ९ ॥

अग्निर्व्वै देवानां मृदुर्हृदयतमः। यं वै मृदुर्हृदयतमं मन्येत त मुपधावेत्तस्मादग्नय ऽएव ॥ १० ॥

---

* 'ऽएवु म्वा'–इति क, ग।

† 'ऽएवु'–इति च; एव मिहोत्तरत्रापि सर्वत्र।

‡ 'शतम् ५००'–इतीह च-पुस्तके।

अग्निर्वै देवानां नेदिष्ठम्। यं वै नेदिष्ठ मुपसर्त्तव्यानां मन्येत त मुपधावेत्तस्मादग्नय एव ॥ ११ ॥

स यदौष्टिं कुर्व्वीत। सप्तदश सामिधेनीरनुब्रूयादुपांशु देवतां यजति तद्वौष्टिरूपं मूर्द्धन्वत्यौ याज्यानुवाक्ये स्यातां वार्चघ्नावाज्यभागौ विराजौ संयाज्ये ॥ १२ ॥ १०

॥ इति पञ्चमप्रपाठके प्रथमं ब्राह्मणम् [९. २.] ॥

आग्नेयं पुरोडाशं[1] विधातु माख्यायिका माह— "यज्ञेन वा इत्यादिना। पुरा किल 'देवाः' 'इमां जितिम्' इदानीं परिदृश्यमानप्रकारं स्वर्गजयं 'यज्ञेन' एव साधनेन ('जिग्युः') जितवन्तः। 'ते' देवाः स्वैर्जितं स्वर्गस्थानं तुच्छैः मनुष्यैः 'कथम्' आरोहणार्हं न भवेदिति परस्पर मुक्त्वा, 'यज्ञस्य' 'रसं' 'धीत्वा' पीत्वा, 'यथा' मरघाः 'मधु' निःशेषेणास्वाद्य गतसार मेव परित्यजन्ति, एवं 'यज्ञं' ('विदुह्य') विदोह्यं कृत्वा, तं 'यूपेन' आच्छाद्य तिरोहिता 'अभवन्'। अतो यूपन-साधनत्वात् यूपस्य 'यूप'-नाम सम्पन्नम्[2]। 'तत्' देवैः कृतं यज्ञविमोहनम् 'ऋषीणाम् अनुश्रुत मास' ऋषयोऽन्वगृह्णन्नित्यर्थः ॥ १ ॥

१— 'यथोक्तदेवतां प्रति हविष्टेन प्रदेयद्रव्यरूपः पक्वः पिष्टपिण्डः पुरोडाश इत्युच्यते'—इति सा० भा० (ऐ० ब्रा० १. १. १.)।

२— "यज्ञेन वै देवा ऊर्द्धाः स्वर्गं लोक मायंस्ते ऽबिभयुरिमन्नो दृष्ट्वा मनुष्याश्च ऋषयश्चानुप्रज्ञास्यन्तीति तं वै यूपेनैवायोपयंस्तं यद् यूपेनैवायोपयंस्तद्यूपस्य यूपत्वम्"—इति ऐ० ब्रा० २. १. १।

अनुश्रुतप्रकारं पुनरनुवदति[१]— "यज्ञेन ह वै देवा इति। 'तं' यूपेण योपितं यज्ञम्, ऋषयः 'अन्वेष्टुम्' अन्वेषणे मतिं कृत्वा, (॥ २ ॥

"तेऽर्चन्त इति।) तदन्वेषणेन 'अर्चन्तः' अन्वेष्टव्यं पूजयन्तः, अन्वेषणप्रयासेनात्मानं खेदयन्तः, इतस्ततः सं-'चेरुः'। कथ मित्याङ्काह— "अमेणेति। देवा ऋषयश्च पूर्वं जेतुं शक्य मर्थं[२] अमेणैव 'जयन्ति'; अतः आत्मन्यैरुरित्येतद्युक्त मित्यर्थः। अथ तदन्वेषणे एतेषां देवा अपि रुच्युत्पादन[३] मकुर्वन्,। तेऽपि स्वय मपि तदर्थं मतिं कृत्वा परस्परं यूपं प्रगच्छन्तः। यस्मात् 'स्वर्गं लोकं' 'देवाः' प्राप्ताः, 'तत्' साधनम् 'एष्यामः' 'इति' उक्त्वा (इद मन्वेषणं कार्यं 'किं प्ररोचते'[४]) किं तव मतम्— किं तव मतम् 'इति' ब्रुवाणाः 'चेरुः'। परिभ्रम्य[५] च 'पुरोडाश मेव'। कूर्मरूपं[६] धृत्वा, 'सर्प्पन्तं' पुरोडाशम् "आ दत्"। 'आ'-दित्युपसर्गश्रुतेर्योग्य-क्रियाध्याहारः; त माजगमुरेवेत्यर्थः। 'ते सर्वे' अपि 'अयं' कूर्म एव अस्माभिरन्वेष्टव्यो 'यज्ञ इति' निश्चिताः ॥ २ ॥

१— "यज्ञेन वै देवा इमां जितिं०—०तस्माद् यूपो नाम। तद्वा ऋषीणा मनुश्रुत मास"—इत्यादि चाचैवोपरिष्टात् (३. २. २. ११, १२.)।

२— "क्त्वा-ल्यौ प्रकृत्यर्थे"—इति पा० सू० ६. १. ८१।

३— 'श्रुत्युत्पादन'—इति ठ।

४— बन्धनीचिह्नान्तःकृतोऽयं पाठो ठ-पुस्तके नास्ति।

५— 'परिभ्राम्य'—इति ज, झ।

६— "अतुङ्ग मनपूपाकृतिं कूर्मस्येव प्रतिकृति मश्वसफमात्रं करोति, यावन्तं वा मन्यते"—इति आप० श्रौ० सू० १. २५ ४, ५।

"ते होचुरिति। 'ते' हे यज्ञावयव-पुरोडाश! त्वम् 'अस्मिभ्याम्' अर्थाय ('तिष्ठ') स्थितिं कुरु,— मा पलायिष्ठ इति 'ऊचुः'। तथापि 'सरस्वत्यै तिष्ठ' इति, 'इन्द्राय तिष्ठ'-'इति' चाब्रुवन्। तस्मिन् सर्पति सति 'अग्नये तिष्ठेति' ऊचुः। 'ततः' स स्थितवान्। अथ ते अयं पुरोडाशोऽग्नये स्थित इति 'तम्' अन्यर्थं मेव परिगृह्य, यथा देवतान्तरसम्बन्धराहित्येन सः 'अग्नये' एव 'अस्थात्', तथा 'सर्व ऊत मजुह्वुः'॥

किं मेकस्मै सर्वस्यापि प्रदान मिति, तत्राह— "आकृतिर्हि देवाना मिति। प्रियेति शेषः। यतः प्रियस्य वस्तुनोऽभाक्त्वेन प्रदान मनुचितम्, अतः सर्वहोमो युक्त इत्यर्थः। 'ततः' अग्नेः प्रदानात्कारणात् 'एभ्यः' ऋषिभ्यो मनुष्येभ्यः 'प्रारोचत' रुचि मुदपादयत्। 'तम्' 'असृजन्त' उदपादयन्। 'तम्' एव ('अतन्वत') अङ्गकलापैर्विस्तारितवन्तः। 'सोऽयं' यज्ञः 'परोऽवरम् अनूच्यते'। यथा परभावी[1] सन् कस्यचिदुपादिष्टः, सन्मुखादन्यस्योपदेशनात् अथ मेव 'अवरः' पश्चाद्भावी भवति, तथानुक्रमेणोच्यत इत्यर्थः। तदेवाह— "पितेव पुत्रायेति। 'ब्रह्मचारिणे' उपनीतस्यैव वेदविद्याधिकारात् ब्रह्मचारिण इत्युक्तम्॥ ४॥

अथ पुरोडाशं नामनिर्वचनद्वारेण स्तौति— "स वा इति। यतः 'सः' कूर्मरूपेणाच्छन्नो मनुष्यैर्दृष्टः, 'तत्' ततः[2] यागसमये 'पुरः' पूर्वस्मिन् काले यज्ञमुखे 'अदाशयत्' फल मदापयत्। तथा 'यः' पुरोडाशः 'एभ्यः' मनुष्येभ्योऽर्थं 'यज्ञं प्रारोचयत्'। यस्मात्

१— 'परभावी'-इति ङ। २— 'तत्र'-इति ञ।

पुरोऽदाग्नयत्, 'तस्मात्' सः 'पुरोदाग्नः'। वस्तुतः 'एतस्माम', 'यत्' सर्वैरिदानीन्तनैः 'पुरोडाग्न इति' व्यवह्रियते[1] ॥

इत्थं मन्त्रवादेन प्रशस्येदानीं तं विधत्ते— "स एषेति। 'सः' देवैराच्छादितः, 'एषः' मनुष्यैर्लब्धः, 'पुरोडाग्नः' 'आग्नेयः' अग्नि-देवताकः[2]। 'सः' 'उभयत्र' दर्शे पौर्णमास्यां च ('अच्युतः') नित्यं कर्त्तव्यः 'भवति' ॥ ५ ॥

उभयसाधारण्य मेव ख्यापयति— "स नेति। पौर्णमास्यां भवं 'पौर्णमासम्', एवम् 'आमावास्यम्'। उभयात्मकस्यान्यतरत्वाभावात्ते हि प्रतिनियतैकहविषौ इति ते आह— "अग्नीषोमीय एवेत्यादिना। उभयत्रापि नियमेनानुतिष्ठता मभिप्राय माह— "यज्ञ एवैष इति। यज्ञसाधनत्वात् 'एषः' पुरोडाग्नः 'यज्ञ एव'। स उभयकालोऽपि नियमेन देवैः 'अयानि'-'इति'; उभयत्रावक्लृप्त मतिक्रम्य नैव गच्छानि। यदा अन्यदनुतिष्ठानि, तदा 'नेत्' परिभयं भवति। "नेत्येष इदित्येतेन सम्प्रयुज्यते परिभये"—इति[3] हि निर्वचनेन खल्वभिप्रायेण 'पौर्णमासस्य', 'आमावास्यस्य' च यागस्य 'पुरस्तात्' पूर्वकाले 'क्रियते[4] यस्माद्' दर्शे पौर्णमास्यां च यस्मात्कारणादनुष्ठीयते, 'तत्' तत्कारणम्, 'एतत्तु' उभयं निमित्तं खलु ॥ ६ ॥

१— पा० सू० ३. २. ३१, ८. २. ९७। का० वा० २०३६, २०३८। य० वा० प्रा० २. ४३।

२— "तस्य देवता। अग्नेर्ढक्"—इति पा० सू० ४. २. २४, ३३।

३— निरु० १. ३. ६। 'सर्वतो भयं परिभयम्'—इति तद्वृत्तिः।

४— " 'यज्ञ एव'। स उभयकालोऽपि तयोः पूर्वकाले क्रियते"—इति ढ।

अस्य एवाग्नेयस्य[1] ऋद्धिफलार्थं पृथक्-प्रयोक्तव्यता माह— "यद्यु दृति। 'एनम्' अध्वर्युम्। 'एतयैव' आग्नेयेष्ट्यैव। "यत्कामा वा दृति। पुरा 'एतम्' आग्नेयाष्टाकपालपुरोडाशम् 'ऋषयः' यं काम मपेक्ष्य 'अजुहवुः' अन्वतिष्ठन्, 'एभ्यः' 'स कामः' समृद्धोऽभूत्; अत दृदानी मपि यः 'एतेन यजते', 'अस्मै' अपि 'स कामः' भवत्येव। यत्सम्बन्धादृष्टाकपालेष्टिरेवंविधसामर्थ्याऽभूत्, त मग्निं बऋधा प्रशंसति— "यस्यै वै कस्यै चेत्यादिना। यां काञ्चिद्देवता मुद्दिश्य आज्यसोमादि 'हविः' 'गृह्यते', तत् 'अग्नौ' एव 'जुह्वति', नान्यत्र; अतः सर्वं वा सर्वस्य ('अग्नाऽउ') अग्नावेव 'होष्यन्' यदि भवेत्, तर्हि किमर्थम् 'अन्यस्यै' इन्द्रादि-'देवतायै' अमुष्या दृद मिति 'आदिशेत्'; 'तस्मात्' अग्नौ होमस्यावश्यकत्वात् 'अग्नये' एव होमः, प्रशस्त दृति शेषः ॥ ७ ॥

दृतोऽप्यग्नय एव प्रदानं युक्त मित्याह— "अग्निर्वा दृति। उक्तप्रकारेण अग्नावेव सर्वदेवतार्थहवनात्तदुपधावितत्वात् 'सर्वाः' 'अग्निः' एव। 'तत्' तस्मात् सर्वदेवतोपधावनात् यद्बवति, तदग्नेः उपधावनेनैव स्यात्। 'तस्मादग्नय एव' हविरादेशः प्रशस्तः ॥ ८ ॥

"अग्निर्वै देवाना मिति। किं यथा लोके यम् 'अद्धातमाम्'[2] अतिशयेन प्रत्यक्षफलदं मन्येत, 'तम्' एव 'उपधावेत्', एव मग्नेः प्रत्यक्षदेवत्वात् 'अग्नय एव' ॥ ९ ॥

१— "अस्या आग्नेयेष्टेः"—इति ङ।

२— 'अद्धा'—इत्यव्ययम्, सत्यनामसु पठितम्। निघ० ३. १०. ४। इहोत्तरत्रापि बऋच २. २. १. २५; ३. १. ४. ११।

तथा इतरदेवताभ्योऽग्नेरेव शीघ्रं प्रसादाय मृदुहृदयत्वात्, प्रत्यक्षदेवत्वेन समीप एव सेव्यत्वाच्च 'अग्नय एव' होमो युक्त इत्याह— "अग्निर्वै देवानां मृदुहृदयतम इति, "अग्निर्वै देवानां नेदिष्ठ मिति च ॥ १० ॥ ११ ॥

अथ पृथक्-प्रयोक्तव्याया आग्नेयेष्टेर्वैश्वेषिक मङ्गजात माह— "स यदौत्यादिना । 'यदि' 'दृष्टिं' दर्शपूर्णमासात्पृथगेव 'कुर्वीत' 'स सामिधेनीः सप्तदशानुब्रूयात्', तथा प्रधानदेवता उपांशु यजेत । 'तत्' उपांशुत्वं काम्येष्टिरूपं खलु ; उपांशु काम्या दृष्टयः क्रियन्ते इति[१] । एवं 'मूर्धन्वत्यः'[२] "अग्निर्मूर्धा, भुवो यज्ञस्य"—इत्येते[३] मूर्धशब्दवत्यौ, प्रधानस्य 'याज्ये' खिष्टकृद्याज्यापुरोनुवाक्ये ; 'विराजौ' विराट्छन्दस्के "प्रेद्धो अग्न, इमो अग्ने"-इत्येते[४] भवतः[५] ॥ १२ ॥ १ ॥ [६. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे षष्ठाध्याये द्वितीयं ब्राह्मणम् ॥

१— पुरस्ताद् (३. ५. १०. पृ० २४६) द्रष्टव्यम् ।

२— "वयस्यासु मूर्ध्नो मतुप्"—इति पा० सू० ४. ४. १२७ ।

३— वा० सं० १३. १४ (३. १२.), १५ ।

४— वा० सं० १७, ७६ (तै० सं० ४. ६. ५. ११.) तै० सं० ४. ३. १३. २१ ।

५— संयाज्यशब्दार्थस्त्वेव माह सायणः— "खिष्टकृत्सम्बन्धिन्यौ याज्यानुवाक्ये इत्यर्थः"—इति ऐ० ब्रा० १. १. ५. भा० ।

त्वष्टुर्ह वै पुचः। त्रिशीर्षा षडक्षु ऽआस तस्य त्रीण्येव मुखान्यासुस्तद्यदेवꣳ रूप ऽआस तस्मादिश्वरूपो नाम ॥ १ ॥

तस्य सोमपान मेवैकं मुख मास। सुरापाण मेक मन्यस्मा ऽअशनायैकं त मिन्द्रो दिदेष तस्य तानि शीर्षाणि प्रचिच्छेद ॥ २ ॥

स यत्सोमपान मास। ततः कपिञ्जलः समभवत्तस्मात्स बभ्रुक ऽइव बभुरिव हि सोमो राजा ॥ ३ ॥

अथ यत्सुरापाण मास। ततः कलविङ्कः समभवत्तस्मात्सोऽभिमाद्यत् क ऽइव व्वदत्यभिमाद्यन्निव हि सुरां पीत्वा व्वदति ॥ ४ ॥

अथ यदन्यस्मा ऽअशनायास। ततस्तित्तिरिः समभवत्तस्मात्स व्विश्वरूपतम ऽइव सन्त्येव घृतस्तोका ऽइव त्वन्मधुस्तोका ऽइव त्वत्पर्णेष्वाश्रुतिता ऽएवꣳ रूप मिव हि* स तेनाशन मावयत् ॥ ५ ॥

स त्वष्टा चुक्रोध। कुविन्मे पुच मवधीदिति सोऽपेन्द्र मेव सोम माजह्रे स यथायꣳ सोमः प्रसुत ऽएव मुपेन्द्र ऽएवास ॥ ६ ॥

---

* "ऽएवꣳ रूपꣳ हि"—इति च।

इन्द्रो ह वा ऽईक्षाञ्चक्रे। इदं वै मा सोमादन्तर्यन्तीति स यथा बलीयानबलीयस ऽएव मनुपद्भूत ऽएव यो द्रोणकलशे शुक्र ऽआस तं भक्षयाञ्चकार सु हैनं जिह्मꣳसु सोऽस्य व्विष्वङ्वेव* प्राणेभ्यो दुद्राव मुखाद्वैवास्य नु दुद्रावाथ सर्व्वेभ्योऽन्येभ्यः प्राणेभ्यो ऽद्रवत्तदद्दः सौचामणीतीष्टिस्तस्यां तद्याख्यायते युथैनं देवा ऽअभिपद्यन् ॥ ७ ॥

स त्वष्टा चुक्रोध। कुविन्मेऽनुपद्भूतः सोम मबभक्षदिति सु स्वयु मेव यज्ञवेशसं चक्रे स यो द्रोणकलशे शुक्रः पुरिशिष्ट ऽआस तं प्रवर्त्तयाञ्चकारेन्द्रशत्रुर्व्वर्द्धस्वेति सोऽग्नि मेव प्राप्य सुम्बभूवान्तरैव सुम्बभूवेत्यु हैक ऽआहुः सोऽग्नीषोमावेवाभिसुम्बभूव सुर्व्वा व्विद्याः सुर्व्वं युशः सुर्व्व मन्नाद्यꣳ सुर्व्वाꣳ श्रीꣳ† ॥ ८ ॥

स यद्वर्त्तमानः समभवत्। तस्माद्वृत्रोऽथ युदपात्समभवत्तस्मादुहिस्तं दुनुश्च दनायुश्च‡ मातेव च पितेव च पुरिजग्रहतुस्तस्माद्दानव ऽइत्याहुः ॥ ९ ॥

अथ यदब्रवीदिन्द्रशत्रुर्व्वर्द्धस्वेति। तस्मादु हैन मिन्द्र

---

* 'व्विष्वङ्वेव'–इति क, ख। † 'श्रीं'–इति क, 'श्रीम्'–इति ख।

‡ 'दनायुश्च'–इति'–इति पाठः सा०-सम्मतः; हा०-वेवरेण दृष्टश्च।

ऽएव जघानाथ युद्ध शुश्वदुवस्थ्यदिन्द्रस्य शचुर्व्वर्ड्डस्तेति शुश्वदु ह सु ऽएवेन्द्र महनिष्यत् ॥ १० ॥

अथ यदब्रवीद्वर्ड्डस्तेति। तस्मादु ह स्मेषुमात्रु मेव तिर्यङ् वुर्ड्डत ऽइषुमात्रं प्राङ्क्सो ऽवैवावरꣳ समुद्रं दधावुव पूर्वꣳ स यावत्स ऽआस सुहैव तावदन्नादु ऽआस ॥ ११ ॥

तस्मै ह स्म पूर्व्वाह्णे देवाः। अशन मभिहुरन्ति मध्यन्दिने मनुष्या ऽअपराह्णे पितरः ॥ १२ ॥

स वा ऽइन्द्रस्तथैव नुत्तश्चुरन्। अग्नीषोमा ऽउपमन्त्रयाञ्चक्रेऽग्नीषोमौ युवं वै मम स्थो युवयोरहु मस्मि नु युवयोरेष किञ्चन कं म ऽइमं दस्युं व्वर्ड्डयथ ऽउप मावर्त्तेथा मिति ॥ १३ ॥

तौ होचतुः। कि मावयोस्तुतः स्यादिति ताभ्या मेतु मग्नीषोमीय मेकादशकपालं पुरोडाशं निरवपत्तस्मादग्नीषोमीय ऽएकादशकपालः पुरोडाशो भवति ॥ १४ ॥

तावेन मुपावर्त्ततुः। तावेनु सुर्व्वे देवाः प्रेयुः सुर्व्वा व्विद्याः सुर्व्वं युशः सुर्व्व मन्नाद्यꣳ सुर्व्वा श्रीस्तेनेष्ट्वेन्द्र ऽएतदभवद्युदिद मिन्द्र एषु उ पौर्णमासस्य बन्धुः स यो हैवं व्विद्वान् पौर्णमासेन युजत ऽएताꣳ हैव श्रियं गच्छत्येवं युशो भवत्येवु मन्नादो भवति ॥ १५ ॥

तुद्देव खलु हतो व्वृत्रः। स यथा हुतिर्न्निष्पीत ऽएवꣳ संल्लीनः* शिश्ये यथा निर्ह्लूतमक्तुर्भुस्त्वैवꣳ संल्लीनः† शिश्ये त मिन्द्रोऽभ्यादुद्राव हनिष्यन् ॥ १६ ॥

सु होवाच। मा नु मे प्रहार्षीस्त्वं वै तुद्देतुर्ह्यसि युदहं व्येव मा कुरु‡ मामुया भूव मिति स वै मेऽन्न मेधीति तथेति तं द्वेधान्वभिनत्तस्य युत्सौम्यं न्यक्त मास तं चन्द्रमसं चकारा थ युदस्यासुर्य मास तेनेमाः प्रजा ऽउदरेणाविध्यत्§ तस्मादाहुर्व्वृत्र ऽएव तुर्ह्यन्नाद ऽआसीद् वृत्र ऽएतर्हीतीदꣳ हि युदसावापूर्यतेऽस्मादेवैतस्लोकादाप्यायतेऽथ युदिमाः प्रजा ऽअशन मिच्छन्ते ऽस्मा ऽएवैतद्वृत्रायोदराय बलिꣳ हरन्ति स यो हैवꣳ मेतं व्वृत्र मन्नादं व्वेदान्नादो हैव भवति ॥ १७ ॥

ता ऽउ हैता देवता ऽऊचुः। या ऽइमा ऽअग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नो भूयिष्ठभाजौ स्थो युयोर्वा मिदं युवयोरस्मानन्वाभजत मिति‖ ॥ १८ ॥

---

*, † 'संल्लीनः'—इति च पाठो डा०-वेबरेण दृष्टः। संल्लीनः, 'संलीनः'—इति वा च-पाठः सा०-सम्मतश्च।

‡ 'मा आकुरु'—इति सा०-सम्मतो डा०-वेबर्-दृष्टश्च।

§ 'ऽउदरेणायुध्यत्'—इति सा०-सम्मत इत्याह डा०-वेबरः।

‖ 'भजत ऽइति'—इति च डा०-वेबरेण दृष्टः।

तौ होचतुः। किं मावयोस्ततः स्यादिति युस्मै कुस्मै च देवतायै हविर्निर्व्वपांस्तुद्वां पुरस्तादाज्यस्य यजानिति तस्माद्युस्मै कुस्मै च देवतायै हविर्निर्वपन्ति तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति तन्नु सौम्येऽध्वरे नु पशौ युस्मै कुस्मै च देवतायै हविर्निर्वपानिति* ह्यब्रुवन् ॥ १९ ॥

स हाग्निरुवाच। मय्येव वः सर्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाहुरग्निः सर्वा देवता इति ॥ २० ॥

अथ ह सोम उवाच। मा मेव वः सर्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मात्सोमꣳ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाहुः सोमः सर्वा देवता इति ॥ २१ ॥

अथ यदिन्द्रे सर्वे देवास्तस्थानाः। तस्मादाहुरिन्द्रः सर्वा देवता इन्द्रश्रेष्ठा† देवा इत्येतद्व वै देवास्त्वेधैकदेवत्या अभवन्स यो हैव मेतद्वेदैकधा हैव स्वानाꣳ श्रेष्ठो भवति ॥ २२ ॥

द्वयं वा इदं नु तृतीय मस्ति। आर्द्रञ्चैव शुष्कञ्च यच्छुष्कं तदाग्नेयं यदार्द्रं तत्सौम्य मथ यदिदं द्वयु

---

* इह 'हविः'-पदं न दृश्यते च-पुस्तके।

† 'इन्द्रज्येष्ठा'-इति पाठः सा०-सम्मत इत्याह डा०-वेवरः।

मेवाथ* कि मेतावत्क्रियत ऽइत्यग्नीषोमयोरेवाज्यभागावग्नीषोमयोरुपाꣳशुयाजोऽग्नीषोमयोः पुरोडाशो यदुत एकतमेनैवेदꣳ सर्व माप्नोत्युथ कि मेतावत्क्रियत ऽइत्यग्नीषोमयोर्ह्वैतावती व्विभूतिः प्रजातिः ॥ २३ ॥

सूर्य ऽएवाग्नेयः । चद्रमाः सौम्यो ऽहरेवाग्नेयꣳ रात्रिः सौम्या यु ऽएवापूर्यतेऽर्द्धमासः सु ऽआग्नेयो योऽपक्षीयते सु सौम्यः ॥ २४ ॥

आज्यभागाभ्या मेव । सूर्याचन्द्रमसावाप्नोत्युपाꣳशुयाजेनैवाहोरात्रे ऽआप्नोति पुरोडाशेनैवार्द्धमासावाप्नोतीत्यु हैक ऽआहुः ॥ २५ ॥

तदु होवाचासुरिः । आज्यभागाभ्या मेवातो यतमे वा यतमे वा द्वे ऽआप्नोत्युपाꣳशुयाजेनैवातो यतमे वा यतमे वा द्वे† ऽआप्नोति पुरोडाशेनैवातो यतमे वा यतमे वा द्वे ऽआप्नोति‡ सुर्वं म ऽआप्नु मसत्सुर्वं जितꣳ सुर्वेण व्वृत्रꣳ हनानि सुर्वेण द्विषन्तं भ्रातृव्यꣳ हनानीति तस्माद्वा ऽएतावत्क्रियत ऽइति ॥ २६ ॥

तदाहुः । कि मिदं जामि क्रियतेऽग्नीषोमयोरेवाज्य-

---

* 'मेवाप्य'–इति च । सोऽय मशुद्धः पाठः स्यान्मुद्राकरप्रमादजः ।

† च-पुस्तके तु 'यतमे वा यतमे वा द्वे'–इत्यस्य स्थाने 'ऽहोरात्रे'–इति पाठः ।

‡ च-पुस्तके तु 'यतमे वा यतमे वा द्वे ऽआप्नोति'–इत्यस्य स्थाने 'ऽर्द्धमासावाप्नोति'–इति पाठः ।

स्याग्नीषोमयोः पुरोडाशस्य यदनन्तर्हितं तेन जामी-त्यनेन हु त्वेवाजाम्याज्यस्येतरं पुरोडाशस्येतरं तदन्यदिवेतर मन्यदिवेतरं भवत्यृच मनूच्य जुषाणेन यजत्यृच मनूच्यर्ङ्गा यजति तदन्यदिवेतर मन्यदिवेतरं भवत्यनेन हु त्वेवाजाम्युपाꣳश्वाज्यस्य युजत्युचैः पुरोडाशस्य स युदुपाꣳशु तत्प्राजापत्यꣳ रूपं तस्मात्तस्यानुष्टुभ मनु-वाक्या मन्वाह व्वाग्घ्यनुष्टुब् वाग्घि प्रजापतिः ॥ २७ ॥

एतेन वै देवाः । ऽउपाꣳशुयाजेन यं य मसुराणा मुकामयन्त तु मुपत्सुर्य व्वज्रेण व्वषट्कारेणाघ्नंस्तथो ऽएवैषु ऽएतेनोपाꣳशुयाजेन पाप्मानं द्विषन्तं भ्रातृव्य मुपत्सुर्य व्वज्रेण व्वषट्कारेण हन्ति तस्मादुपाꣳशुयाजं यजति ॥ २८ ॥

स वा ऽऋचु मनूच्य जुषाणेन यजति । तदन्विमा ऽअन्यतरतोदन्ताः प्रजाः प्रजायन्तेऽस्थि ह्यृगुस्थि हि दन्तोऽन्यतरतो ह्येतदुस्थि करोति ॥ २९ ॥

अथर्ङ्ग मनूच्यऽर्ङ्गा यजति । तदन्विमा ऽउभयतो-दन्ताः प्रजाः प्रजायन्तेऽस्थि ह्यृगुस्थि हि दन्त ऽउभयतो ह्येतदुस्थि करोत्येता वा ऽइमा द्व्यः प्रजा ऽअन्यतरतो-दन्ताश्चैवोभयतोदन्ताश्च स यो हैवं व्विद्वानग्नीषोमयोः प्रजातिं यजति बहुर्हैव प्रजया पशुभिर्भवति ॥ ३० ॥

स वै पौर्णमासेनोपवत्स्यन्। नु सचा सुहित इव स्यात्तेनेदु मुदर मसुर्यं बिनात्याहुतिभिः प्रातर्हैव मेषु उ पौर्णमासस्योपचारः ॥ ३१ ॥

स वै सम्प्रत्येवोपवसेत्। सम्प्रति वृत्रꣳ हनानि सम्प्रति द्विषन्तं भ्रातृव्यꣳ हनानीति ॥ ३२ ॥

स वा उत्तरा मेवोपवसेत्। स मिव वा एषु क्रमते युः सम्प्रत्युपवसत्यनड्वा वै सङ्क्रान्तयोर्यदीतरो वेतर मभिभुवतीतरो वेतर मुथ य उत्तरा मुपवसति युथा पुराञ्च मादृत्तꣳ सम्पिꣳष्यादुप्रत्यालभमानꣳ सोऽन्यतो-घात्येव स्यादेवं तद्य उत्तरा मुपवसति ॥ ३३ ॥

स वै सम्प्रत्येवोपवसेद्। युथा वा अन्यस्य हतꣳ सम्पिꣳष्यादेवं तद्य उत्तरा मुपवसति सोऽन्यस्यैव कृता-नुकरोऽन्यस्योपावसायी भवति तस्मादु सम्प्रत्येवोप-वसेत् ॥ ३४ ॥

प्रजापतेर्ह वै प्रजाः ससृजानस्य। पुर्वाणि व्विसस्रꣳसुः स वै संव्वत्सरु एव प्रजापतिस्तस्यैतानि पुर्व्वा-ण्यहोरात्रयोः सन्धी पौर्णमासी चामावास्या चर्त्तु-मुखानि ॥ ३५ ॥

स व्विसस्रैः पुर्व्वभिः। नु शशाक सꣳहातुं तु मेतै-र्हविर्यज्ञैर्देवा अभिषज्यन्नग्निहोत्रेणैवाहोरात्रयोः सन्धी

तत्पुर्व्वाभिषज्यंस्तत्सुमदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासीं चामावास्यां च तत्पुर्व्वाभिषज्यंस्तत्सुमदधुश्चातुर्म्मास्यैरेवऽर्त्तुमुखानि तत्पुर्व्वाभिषज्यंस्तत्सुमदधुः ॥ ३६ ॥

स सुꣳहितैः पुर्व्वभिः। इदु मन्नाद्य मभ्युत्तस्थौ युदिदुं प्रजापतेरन्नाद्यꣳ स यो हैवं व्विद्वान्त्सम्प्रत्युपवसति सम्प्रति हैव प्रजापतेः पुर्व्व मिषज्यत्युवति हैनं प्रजापतिः सु ऽएवु मेवान्नादो भवति यु ऽएवं व्विद्वान्त्सम्प्रत्युपवसति तुस्मादु सम्प्रत्येवोपवसेत् ॥ ३७ ॥

चक्षुषी ह वा ऽएते यज्ञस्य यदाज्यभागौ। तुस्मात्पुरस्ताज्जुहोति पुरस्ताद्धीमे चक्षुषी तत्पुरस्तादेवैतच्चक्षुषी दधाति तुस्मादिमे पुरस्ताच्चक्षुषी ॥ ३८ ॥

उत्तरार्द्धपूर्वार्द्धे हैके। आग्नेय माज्यभागं जुह्वति दक्षिणार्द्धपूर्वार्द्धे सौम्य माज्यभाग मेतत्पुरस्ताच्चक्षुषी दधा ऽइति व्वदन्तस्तदु तदाविज्ञान्य* मिव हवीꣳषि ह वा ऽआत्मा यज्ञस्य स युदेवु पुरस्ताद्धविषां जुहोति तत्पुरस्ताच्चक्षुषी दधाति युचो ऽएव सुमिद्धतमं मन्येत तदाहुतीर्जुहुयात्समिद्धहोमेनु ह्येव सुमृद्धा ऽआहुतयः ॥ ३९ ॥

स वा ऽक्चुच मनूच्य जुषाणेन यजति। तुस्मादिमे

---

* 'तदातिविज्ञान्य'—इति ग।

ऽअस्थन्त्सत्यनस्थिके चक्षुषी ऽआश्लिष्टे ऽअथ यद्दच मनुच्यऽर्चा युजेदस्थि हैव कुर्यान्न चक्षुः ॥ ४० ॥

ते वा ऽएते। अग्नीषोमयोरेव रूप मन्वायत्ते यच्छुक्लं तदाग्नेयं युत्कृष्णं तत्सौम्यं युदि वेतरथा युदेव कृष्णं तदाग्नेयं युच्छुक्लं तत्सौम्यं युदेव व्वीक्षते तदाग्नेयꣳ रूपꣳ शुष्के* ऽइव हि व्वीक्षमाणस्याक्षिणी भवतः शुष्क मिव ह्याग्नेयं युदेव स्वपिति तत्सौम्यꣳ रूप मार्द्रे इव हि सुषुपुषोऽक्षिणी भवत ऽआर्द्र ऽइव हि सोम आजरसꣳ ह वा ऽअस्मिल्लोके† चक्षुष्मान्भवति सचक्षुरमुष्मिल्लोके‡ सुभवति यु ऽएव मेतौ चक्षुषी ऽआज्यभागौ व्वेद ॥ ४१ ॥ २ ॥

॥ इति पञ्चमप्रपाठके द्वितीयं ब्राह्मणम् [६. ३.] ॥

अग्नीषोमीय मेकादशकपालं विधातु माख्यायिका माह— "त्वष्टुर्ह वै पुत्र दृति[1]। पुरा किल 'त्वष्टुः'[2] शिरस्त्रयेण युक्तः

---

* 'शुष्केव'–इति क। † 'ऽअस्मिन् लोके'–इति ख, 'ऽअस्मिंल्लोके'–इति ग, 'ऽअस्मिंलोके'–इति च।

‡ 'रमुष्मिन् लोके'–इति ख, 'रमुष्मिंल्लोके'–इति ग, 'रमुष्मिंलोके'–इति च।

१— एतदारभ्याष्टमकाण्डीस्थ-'नदुद्राव'–इत्यन्तं ग्रन्थजातम् पुनः पञ्चमे काण्डे ऽपि श्रुतम् (५. ५. ४. २–८.)।

२— "त्वष्टा, तूर्णं मश्नुत इति नैरुक्ताख्विषेर्वा स्याद् दीप्तिकर्मणस्त्वच्छतेर्वा स्यात् करोति कर्मणः"–इति निरु० ८. २. १०। पुनस्तत्रैव तंत

कश्चित् 'पुचः' बभूव[1]। यतोऽय मुक्करीत्या बङ्करूपः, अतः सः 'विश्वरूपः'-इत्यन्वर्थनामा अभूत् ॥ १ ॥

"तस्येति। 'तस्य' शिरस्त्रयगतेषु मुखत्रयेषु मध्ये 'एकं मुखं' 'सोमपानं' सोमः पीयते अनेनेति करणे ल्युट्[2]। सोमपानायाभूत्। अन्यन्मुखं 'सुरापाणं' सुरापानसाधनम्। "वा भावकरणयोः"-इति[3] णत्वम्। 'अन्यस्मै' पानव्यतिरिक्ताय 'अन्नाय' भोजनाय 'एकं' मुख मासीत्। 'तं' विश्वरूपं दृष्ट्वा, 'इन्द्रः' 'द्विषे' द्वेष मकरोत्। द्वेषणं तैत्तिरीयके समाम्नातम्— "स प्रत्यञ्चं देवेभ्यो भाग मवदत्, परोक्ष मसुरेभ्यः"-इति[4]। स क्रुद्ध इन्द्रः 'तानि' त्रीण्यपि शिरांसि 'प्रचिच्छेद' ॥ २ ॥

"स यत्सोमपान इति। तेषु त्रिषु मुखेषु मध्ये 'यत्' सोमपानाय मुखम्, 'ततः' 'कपिञ्जलः' पक्षी 'समभवत्'। "कपिञ्जलः

उत्तरम्— "माध्यमिकस्त्वेत्याहुः। मध्यमे च स्थाने समाम्नातः (निघ० ५. ४. २१.)। अग्निरिति प्राकपूर्णाः"-इति (११)। 'सर्वशिल्पिमता माचार्या देववर्द्धकिर्दाक्षायणी-पुत्रो द्वादशाना मादित्याना मन्यतम इत्येतिहासिकाः'-इति च तद्भाष्ये पर्यालोच्यम्। द्युस्थाने आदित्यनामसु चाम्नातो निघण्टौ (५. ६. ६.)। "तत्रेतिहास माचक्षते"-इत्यादि नैरुक्तं चात्रालोच्यम् (निरु० १२. १. १०.)।

१— त्रिशिरो वर्णनं कृतं सायणाचार्येण ऋ०सं० १म० २अ० १सूक्तारम्भे; विशेषतस्तु "त्रिशीर्षाणं ०—० त्वष्टो गाः"-इत्यादौ द्रष्टव्यम् (ऋ० सं० १०. ८. ८; ९९. ६)।

२— पा० सू० ३. ३. ११७। ३— पा० सू० ८. ४. १०।

४— तै० सं० २. ५. १. १।

कपिरिव जीर्णः कपिरिव जवत दैषत्पिङ्गलो वा"-इति यास्कः[१]। उक्तार्थविश्वासाय पक्षिणः सोमस्य च साम्य माह— "तस्मात् स बभ्रुक इवेति ॥ ३ ॥

"अथ यत् सुरापान मिति। तथा कलविङ्कोऽपि शब्दयति, अतः ततस्तदुत्पत्तिर्युक्ता ॥ ४ ॥

"अथ यदन्यस्मा इति। 'अथ' पानात् 'अन्यस्मात्' अन्नाय यत् मुखम्, 'ततः तित्तिरिः'[२]। यतो बभ्रुरूपादन्नभक्षकान्मुखात् सम्बभूव, अतः सोऽत्यन्तं बभ्रुरूपवान्[३] दृश्यते।

कथं तस्य तथात्व मिति तद्दर्शयति— "सन्येवेति। त्वच्छब्द-स्त्वशब्दसमानार्थः, सर्वनामसु विकल्पेन पठितः[४]। 'त्वत्' एकस्मि-न्नङ्गे 'घृतस्तोका इव' घृतविन्दवः परिदृश्यन्ते। तथा 'त्वत्' एकत्र अङ्गे मधोर्विन्दव इव। एतदपि कुत इत्यत आह— 'पर्णेषु' चटकपक्षेषु 'आस्तृतिताः' आचरं प्राप्ताः बभ्रुरूपाणि दृश्यन्ते। कार्यगतं वैरूप्यं तत्कारणेऽपि सम्भावयति— 'एवं रूप मिव'

१— तथाहि-"अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते"-इत्यधिकारे (निरु० ३. ४. १.) द्रष्टव्यम्। तत्र "कमनीयं शब्दं पिञ्जयतीति वा"-इति च तच्छेषः।

२— "तित्तिरिस्तरणात्, तिलमात्रचित्र इति वा"-इति निरु० ३. ४. १।

३— एवंविधेषु पदेषु प्रथमं मत्वर्थीयप्रत्ययेन भाव्यम्, ततो समासः; अत एव "न कर्मधारयान्मत्वर्थीयो बभ्रुत्रीहिश्चेत् तदर्थप्रतिपत्ति-करः"-इति नात्र विरुध्यते।

४— ग० पा० १. १. १. (१. १. २७ सू०)।

घृतश्लोकादिरूप मिव खलु 'सः' 'तेन' मुखेन 'अग्नं' जठरम् 'आवयत्' अवति[1]रत्र गत्यर्थः[2], अगमयत् ॥ ५ ॥

"स त्वष्टेति। एवं पुत्रग्रिरस्सु क्षिप्तेषु 'स त्वष्टा' असाविन्द्रो 'मे' 'पुत्रं' 'कुवित्' बहुप्रकारम् 'अवधीत्'–'इति' क्रुद्धो भूत्वा 'अपेन्द्र मेव' इन्द्रेण विरहित मेव 'सोम माजहे'। 'सः' च 'सोमः' 'यथा' अपेन्द्रः 'प्रसुतः', 'एवं' प्रदानेऽपि 'अपेन्द्र एव' अभूत् ॥ ६ ॥

"इन्द्रो ह वा इति। स च 'इन्द्रः' 'इदम्' एव सर्वेऽपि 'मा' 'सोमात्' व्यवच्छिनं कुर्वत 'इति' विचार्य, 'यथा' प्रबलो दुर्बलस्य धन मननुज्ञात एवापहरति, 'एवम्' 'अनुपहूत एव' 'द्रोणकलशे'[3] ग्रोधितं सोम मभक्षयत्। 'सः' च भक्षितः सोमः सात्म्य मप्राप्नुवन् त मेव 'जिहिंस' हिंसितवान्, पीडा मकरोत्। ततः सर्वतः नासाद्यमुख-'प्राणेभ्यः', मुखव्यतिरिक्तेभ्यः च्युतोऽभूत्। अथ कर्क-न्ध्वादिपदार्थरूपेण स्रुतेभ्यस्तेभ्यः सकाशात् 'सौत्रामणी' सुत्रामणः सम्बन्धिनी 'इष्टिः' निष्पन्ना[4]। सोमे स्रुते, येन प्रकारेण त मिन्द्रं

१— 'अयति'–इति ज, झ, ङा०-वेवरेण च त्रिषु पुस्तकेषु दृष्टः।

२ — धा० पा० भ्वा० पं० ६००।

३— द्रोणकलशो द्रुममयः कलशाकारो वैकङ्कतः सोमरसपात्रविशेषः। अस्योपर्येव धारा ग्रहा गृह्यन्ते। का० श्रौ० ८. ७. ५ सू० द्रष्टव्यम्।

४— "सुत्रामा गोत्रभिद् वज्री"–इत्यमरः १. १. ४५। "तदेतत् सर्व माप्नोति यज्ञे सौत्रमणीसुते"–इत्यादि वा० सं० १९, ३१। तत्र च "सुरावन्तम् (वा० सं० १९. ३२.)"–इत्यादिमन्त्रैर्होमो विहितः (का० श्रौ० १९. ३. ८.)। "न वा एतदयो न हिरण्यं, यत्सौत्रमणी; न स्त्री न पुमान्, यत् क्लीवः; न सोमो न सुरा, यत् सौत्रामणी-

सुतसोमं 'देवाः' विचिकित्सितवन्तः, 'तत्' सर्वं सौत्रामणीप्रकरणे विस्पष्टं माम्नायते[1] ॥ ७ ॥

"स त्वष्टेति। अथ 'स त्वष्टा' मम 'सोमम्' अतिप्रसूत मनाकारित मेवापिबदिति क्रुद्धः सन्, 'खय मेव' नष्टस्य यज्ञस्य 'यज्ञवेशसं' यज्ञहिंसापरिहारं कृतवान्। कथम् ? 'यो द्रोणकलशे' 'शुक्रः' सोमः 'परिशिष्टः' आसीत्, 'तम्' आदाय प्रवर्त्तयामास, "इन्द्राग्नचुर्वर्द्धस्व"-इत्युच्चार्य हुतवान्। 'सः' च हुतः सोमः, अग्निप्राप्ति-समकाल एव पुरुषरूपेण 'समभूव'। केचित् प्रवर्त्तनसामर्थ्यात् अग्नि मस्यृग्भ्यन्नेव मध्ये 'समभूवेत्याहुः'। 'सः' च समभवन् 'अग्नीषोमावेव' 'अभि' व्याप्नुवन् भक्षयन् 'समभूव'। न केवलं जगत्कारणभूतौ तावेव, किन्तु लोके याः 'विद्याः', यद् 'यशः', यत् अदनीय मन्नम्, या च 'श्रीः', तानि सर्वाणि 'अभि'लक्ष्य भक्षयन् 'समभूव' ॥ ८ ॥

"स यदवर्त्तमान इति। तथा 'सः' समभवन् 'वर्त्तमानः' सर्वं व्याप्नुवन्नेव। यतः 'समभवत्', 'तस्मात्' तस्य नाम, सर्वं व्याप्य वर्त्तत इति व्युत्पत्त्या 'वृत्तः'-इति सम्पन्नम्[2]। तथा यस्मात् ('अपात्')

समृद्धौ"-इति तै० ब्रा० १. ८. ५. ४। "ते देवा अब्रुवन् सुत्रातं वतैनं मत्रासता मिति तस्मात् सौत्रामणी नाम"-इति (५. ५. ४. १२.) नामनिर्वचनम्। "सूत्रातं वतैनं पाप्मनोऽत्रासयतीति"-इत्यादि चोपरिष्टादिहैव (५. ५. ४. १२ ; १२. ७. १. १४.)।

१— इहैवोत्तरभागे द्रष्टव्यम्। उत्तरभागे हि अष्टाध्यायिसौत्रामण्यश्व-मेधाख्यास्त्रयः काण्डास्तुर्यस्य ब्रह्मप्रतिपादको बृहदारण्यकाख्यः।

२— "वृत्तो वृणातेर्वा, वर्त्ततेर्वा, वर्द्धतेर्वा ; 'यदवृणोत् तद् वृत्तस्य वृत्तत्व मिति विज्ञायते, 'यदवर्त्तत तद् वृत्तस्य वृत्तत्व मिति विज्ञायते, यदवर्द्धत तद् वृत्तस्य वृत्तत्व मिति विज्ञायते"-इति निरु० २. ५. ३।

अपादः सन् सम्भूतः, 'तस्मात्' अतः सर्पणसामर्थ्यात् 'अहिः' इत्यपि[1] तस्मामासीत्। 'तं' 'दनुश्च दनायुश्च' माद्र-पित्र-स्थानीयौ भूत्वा रक्षणाय 'परिजग्रहतुः'। यस्मात्ताभ्यां परिजग्रहतुः, 'तस्माद्दानव इत्याहुः' सर्वे जनाः ॥ ९ ॥

"अथ यदब्रवीदिति। तथा स त्वष्टा ग्रहप्रचारसमये[2] इन्द्र-शत्रुरिति[3] पूर्वपदोदात्ततया,— इन्द्रः शत्रुर्यस्येति बहुव्रीहिसमासं कृत्वा[4] मन्त्रं प्रयुक्तवान्, अतः तम् 'इन्द्रो जघान'। यद्यसौ अन्तोदात्ततया तत्पुरुषसमासेन[5] वा, 'इन्द्रस्य शत्रुः'-इति व्यत्ययनिर्देशेन वा ब्रूयात्, तदा निश्चित मेव 'स इन्द्रं' हन्यात्[6] ॥ १० ॥

१— "अहिरयनात् ; एत्यन्तरिक्षे। अय मपीतरोऽहिरेतस्मादेव, निर्ऋ-तिसोपसर्ग आहन्तीति"—इति निरु० २. ५. ३।

२— 'ग्रहप्रचारसमये'—इति ठ।

३— "इन्द्रशत्रुः। इन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्र-शत्रुः"—इति निरु० २. ५. २।

४— "बहुव्रीहौ प्रकृत्या पूर्वपदम्"—इति पा० सू० ६. २. १।

५— "अन्तोऽवत्याः"—"समासस्य"—इति पा० सू० ६. १. २२०, २२३।

६— "इन्द्रस्य शातयिता इन्द्रशत्रुरिति-विवक्षायां तत्पुरुषसमासस्यान्तो-दात्तत्वेन भवितव्यम् : आद्युदात्तत्वयं शब्दः प्रयुक्तः, स च बहुव्रीहितां द्योतयति, बहुव्रीहौ प्रकृत्या पूर्वपद मिति पूर्वपदाद्युदात्तत्वविधा-नात्। सति बहुव्रीहौ इन्द्रः शातयिता यस्येत्यर्थो भवति। सोऽयं मन्त्रगतः स्वरापराधः"—इति तै० सं० २. ४. १२ सा० भा०। अत एवाह पस्पशायाम्— "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या-प्रयुक्तो न तमर्थं माह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्"—इति पा० म० भा० १. १. १आ०।

"अथ यदिति। तथा 'वर्द्धखेति'-प्रयोगसामर्थ्यात् 'सः' वृत्रः 'इषुमात्रम्— इषुमात्रम्' धनुषः सकाशाद्बलात्प्रमुक्तेषुर्यावत् दूरं गच्छति तावन्मात्रम्, प्रतिक्षणं 'तिर्यङ्' उभयपार्श्वतः 'वर्द्धते', 'प्राङ्' हि 'इषुमात्रम्' अवर्द्धत। एतत् पश्चाद्वृद्धेरप्युपलक्षणम्। 'अवरं', 'पूर्वं' च 'समुद्रं' तथा प्राक्-पश्चात्समुद्रावपि 'अवदधौ' शरीरवृद्ध्या अवाक् चकार इत्यर्थः। यावद्यावत् प्रवृद्ध आस, तावत्तावत् प्रवृद्धोऽसमञ्चक एवाभूत्[1] ॥ ११ ॥

"तस्मै ह स्मेति। एवं बद्धाग्निने 'तस्मै' 'देवाः मनुष्याः पितरश्च' पूर्वमध्यन्दिनापराह्णेषु क्रमेण सर्वतः 'अन्नम्' प्रयच्छन्ति ॥ १२ ॥

"स वा इन्द्र इति। इन्द्रस्तु वृत्रशरीरवृद्धिक्रमानुसारेणैवेषदीषत्प्रणुन्नो दूर एव[2] 'चरन्', ओदन ममहमानो वृत्र मनुगतौ 'अग्नीषोमौ' दृष्ट्वा उपमन्त्रयामास। कथम्? हे 'अग्नीषोमौ!' युवां 'मम' स्वम् भवथः, 'युवयोरहं' स्वम् भवामि। यथाहं युवयोस्तथा 'एषः' वृत्रो 'न किञ्चन' किमपि न भवति, अतः 'कम्' कीदृक्प्रहत्योपेतं 'दस्युं' 'वर्द्धयथ'? अतोऽमुं परित्यज्य मां प्रति 'उपावर्त्तेथाम्'। 'इति'-शब्दः उपमन्त्रणप्रकारसमाप्त्यर्थः[3] ॥ १३ ॥

'तौ होचतुरिति। अथ 'तौ' इन्द्रम् 'ऊचतुः'। 'ततः'

१— तैत्तिरीयसंहितायाञ्चैव मेव (२. ४. १२, २. ५. २.)।

२— 'दूराद् दूर एव'—इति ज, झ।

३— तैत्तिरीयसंहितायाञ्चात्र मेवमेवोपमन्त्रणम् (तै० सं० २. ५. २.); अधिकन्तु तत्र श्रुत मिहैव प्रजापतितो वज्रलाभादिकञ्चेति।

वृचवदननिर्गमनात् 'आवयोः' 'किं' फलं लभ्यं 'स्यात्'? 'इति'। स एव मुक्तः 'ताभ्याम्', 'एतम्' इदानीं विधीयमानम् 'एकादशकपालं पुरोडाशम्' अग्नीषोमदेवताकं कृत्वा निरुप्तवान्, तथोरिद मिति कल्पितवानित्यर्थः ॥

इदानीं तं यागं विधत्ते— "तस्मादिति। अग्नीषोमौ देवते यस्य, सः 'अग्नीषोमीयः[१]', एकादशसु कपालेषु संस्कृतः पुरोडाशः 'एकादशकपालः[२]' स भवेत्, पौर्णमास्यां कर्त्तव्यः ॥ १४ ॥

"तावेन मिति। अथ 'तौ' 'एनम्' इन्द्रं प्रत्युपावृत्तावभूताम्। 'तावत्' 'सर्वे' अपि वृचमुखान्तर्गताः 'देवाः' ('प्रेयुः') निरीयुः। तथा वृत्रेण भक्षिता विद्यायग्रोऽन्नमश्नियः 'सर्वाः' अपीन्द्रं प्रति निर्गताः। 'यत्' 'इदम्' इदानीम्परिदृश्यमानप्रकार मिन्द्रस्य सर्वाधिपत्य मस्ति, तत् 'तेन' अग्नीषोमीयैकादशकपालयागेन 'इष्ट्वा' 'अभवत्'। उक्त मर्थं निगमयति— "एष उ इति। एष एव "त्वष्टुर्ह वै"-इत्याद्युपक्रम्य, "तेनेष्ट्वेन्द्र एतदभवत्"-इत्यन्तेनोक्त एव 'पौर्णमासस्य' पौर्णमास्या मसाधारण्येनानुष्ठेयस्य[३] हविषो 'बन्धुः' बन्धकोऽर्थनियामकः, एतदेव ब्राह्मण मित्यर्थः ॥

१— "तस्य देवता (४. २. २४.)"—इत्यधिकारे "द्यावाएथिवी-सुनासीरमरुत्वदग्नीषोम-वास्तोष्पति-गृहमेधाच्छ च"—इति पा० सू० ४. २. ३२। "देवताद्वन्द्वे च (पा० सू० ६. ३. २६.)"—इति, "अग्नेः स्तुत्स्तोमसोमाः (८. २. ८२.)"—इति पाणिनिसूत्रे चात्र स्मर्त्तव्ये।

२— "संस्कृतं भक्षाः"—इति पा० सू० ४. २. १६।

३— 'पौर्णमास्यां साधारण्येनानुष्ठेयस्य'—इति ज।

विहित मर्थं मनूद्य प्रशंसति— "यो हैवं विद्वानिति। अत्र यद्यपि पौर्णमासीशब्देन कालवाचिना तत्कालक्रियमाणं सर्वं कर्माश्रयणीयम्, तथाप्याग्नेयाष्टाकपालस्य साधारण्याद्, वाक्यशेषे श्रीप्रभृतेरेव फलत्वेन श्रवणाच्च, अग्नीषोमीय एकादशकपाल एव परिगृह्यते। 'यः' यजमानः 'एवम्' उक्त मर्थं 'विद्वान्' जानन्, 'पौर्णमासेन' पौर्णमास्यां क्रियमाणेनाग्नीषोमीयेन 'यजते' अनुतिष्ठति, सः 'एताम्' दृष्टेनानुभूतां 'श्रियम्', तथाविधं यशोऽन्नञ्च प्राप्नोति ॥ १५ ॥

"तदेव खल्विति। अथ तदानीम्, अग्नीषोमादिनिर्गमनानन्तर मेव 'वृत्रो हतः' 'निष्पौतो दृतिरिव' चर्मनिर्मितपात्र मिव, स यथा 'संक्लीनः'[१] सङ्कुचितकुच्चिरिति[२] एवं संक्लीनो भूमावशयिष्ट; तथा 'निर्धूतसक्तुका भस्त्रा' चर्ममयी संक्लीना, तद्वत् 'संक्लीनः' शेते; कुचिगतानां सक्तुस्थानीयानां देवानाम्, उदकस्थानीयानां मरुद्गणादीनाञ्च स्रावात् दृष्टान्तद्वयाभिधानम्। अथ प्रयानं वृत्रं हननेच्छया इन्द्रः शीघ्र माजगाम ॥ १६ ॥

"स होवाचेति। तं दृष्ट्वा वृत्रोऽब्रवीत्,— इदानीं मेतत् सर्वं त्वमेव भवसि, पूर्वं यदहं सर्व मभवम्; अतो 'व्याकुर्वेव' शरीरं विविधम्, आ सर्वतो भग्नपर्यन्तं[३] कुरु, विदारयेत्यर्थः। 'अमुया' इदानीं मनूद्भूयमानप्रकारया स्त्रिया 'मा भूवम्' सर्वदा न भवामि 'इति'। 'सः' एव मुक्तः इन्द्रः, तर्हि ममाक्षं भवेत्युवाच।

१— 'संक्लीनः'—इति ठ। एव मिदोत्तरत्रापि सर्वत्र।

२— 'सङ्कुचितकुच्चितनुः पतति'—इति ठ। ३— 'भग्नं'—इति ठ।

'तथा' अस्तु 'इति' उक्तम्। 'तम्' इन्द्रो 'द्वेधा' 'अन्वभिनत्' तदनुक्रमेण व्यदारयत्। तेन 'यत्' 'सौम्यं' श्रेष्ठं श्रुत मासीत् 'तं चन्द्रमसं चकार'। प्रतिनिर्देशापेक्षया पुंल्लिङ्गता। 'यत्' 'असुर्यम्' असुरेभ्यो हितम्[१] उच्छिष्ट मासीत्, 'तेन' 'इमाः' सर्वा अपि प्रजाः उदरप्रदेशेन अयुज्यत्[२], तद्रूपेणोपस्थापयामासेत्यर्थः। यस्मादेवं 'तस्माद्' यः कश्चित् यदि बह्वन्नं भक्षयेत्, 'तर्हि' तदा सर्वेऽपि जनाः इदानीं 'वृक एतर्हि अस्माद् आसीत्' इत्याहुः'। प्रसिद्धेः सार्वत्रिकत्वप्रदर्शनाय दृष्टान्तः। उक्त मर्थं समर्थयते— "एतर्हीति। 'असौ' चन्द्रः पूर्वपक्षे 'आपूर्यते'-इति यत्, तत् 'इदं हि' किं मिदम्? तदाह— 'अस्मात्' 'लोकादेव' चन्द्रः 'आप्यायते'। अस्माल्लोकात् चन्द्रस्याप्यायनप्रकार मुपरिष्टाद् वक्ष्यते— "तदेन मङ्ग्रु ओषधिभ्यः सम्भृत्याहुतिभ्यो ऽधि जनयति, स एष आहुतिभ्यो जातः पश्चाद्दृश्ये"-इति[३]।

यदा ('इमाः') बुभुक्षिताः 'प्रजाः' 'अन्नं मिच्छन्ति', तदा 'अस्मा एव वृकाय' षष्ठ्यर्थे चतुर्थी[४], वृकरूपाय 'उदरायैव' 'बलिं हरन्ति'। अतो वृकभागविशेषस्यास्मरूपेण स्थापनं युक्त मित्यर्थः। "स यो हैव मिति ज्ञानफलम् ॥ १७ ॥

१— असुरशब्दस्य गवादिषु पाठात् "तस्मै हितम् (पा० सू० ५. १. ५.)"—इत्यर्थे "उ-गवादिभ्यो यत् (पा० सू० ५. १. २.)"—इति यत्। वस्तुतोऽत्र "असुरस्य स्वम् (पा० सू० ४. ४. १२३.)"—इति यदित्येव स्यात् सुवचम्। २— 'अयुध्यत्'—इति ज, ट।

३— एतदिहैव काण्डे इत उपरिष्टाद् द्रष्टव्यम् (६. ४. १५.)।

४— पा० सू० २. ३. ६२ वा० १. (१५०६)।

प्रयाजानन्तर माज्यभागौ वक्तव्यावन्तरितौ, अतस्तौ अग्नीषोमीयपुरोडाशप्रसङ्गेन विधातु माह[1]— "ता उ हेति। वृत्रदेहात् 'अग्नीषोमावनु' निर्गताः सर्वाः 'देवताः' 'तौ' अग्नीषोमौ प्रतीद मब्रुवन्। यतो वृत्रदेहान्निर्गतयोर्युवयोरिदं पुरोडाशद्वयं प्रातिस्विकम्[2] अभूत्, अतो युवा मेव प्रभूतभागभाजौ भवथः, 'युवयोः' मध्ये 'अस्मान्' अपि 'अन्वाभजतम्' 'इति' ॥ १८ ॥

"तौ होचतुरिति। अथ 'तावुचतुः'— 'ततः' युष्मदनुप्रवेशाद् 'आवयोः किं स्यात्?' 'इति' उक्ता देवतास्तयोः हे अग्नीषोमौ! लोके यष्टारो 'यस्मै कस्मै च देवतायै' इन्द्रादिदेवतानां मध्ये यां काञ्चिद्देवतां प्रति 'हविः' 'निर्वपान्' निर्वपेयुः; तत्र च निरूप्तप्रधानदेवताभ्यः पूर्वम् 'आज्यस्य' आज्यं[3] 'यजान्' यजेयुः। इदानीं विधत्ते— "तस्मादिति। 'तस्माद्' देवैर्दत्तत्वात् यत्र निर्वपति, तत्र 'आज्यभागावग्नीषोमाभ्याम्' अनुष्ठेयौ।

आज्यभागौ प्रशंसति— "तन्न सौम्ये इति पशुसोमयोराज्यभागौ 'न' कुर्यात्। निर्वापाभावादेव पशुसोमयोरप्राप्तस्य आज्यभागस्य पुनर्निषेधेनैष्टिक माज्यभागविधानं स्तूयते। यथा दशमाध्यायस्याष्टमे पादे द्वितीयाधिकरणे— "न सौम्येऽध्वर[4] इत्यत्र

१— 'प्रयाजानन्तरं वक्तव्यौ तावाज्यभागौ, अग्नीषोमीयपुरोडाशप्रसङ्गेन विधातु माह"—इति ट-पाठः।

२— प्रातिस्विक मसाधारणधर्मे चिकाणडः।

३— 'आज्यभागं'—इति ट।

४— ४१८ पृ० ४ पं० द्रष्टव्यम्। एतदेव तदधिकरणस्य विषयवाक्यम्।

किं निषिध्यते, उत पर्युदस्यते, अथार्थवादः ? इति त्रिधा विकल्प्यार्थवाद इति राद्धान्तितम्[१]। सोमपश्वोस्तदप्राप्तौ कारणं माह— "यस्ये कस्ये चेति। 'निर्वपानिति ह्यब्रुवन्' इति निर्वापस्य विशेषितत्वात् तयोस्तदभावादिति भावः ॥ १९ ॥

इदानीं ताभ्यां देवताभ्यः कृत मुपकारं दर्शयति— "सह्याग्नि-रित्यादिना, "अथ ह सोम इत्यादिना च। अग्निः सर्वदेवार्थं माऽऽत्याधारतालक्षणम्,— सोमस्तु सर्वदेवताना माऽऽतिलक्षणम्, उपकारं कृतवन्तौ। यस्मादेवं 'तस्मात्' वेदवादिनः अग्नेः सोमस्य च सर्वदेवतात्मकताम् 'आहुः' ॥ २० ॥ २१ ॥

"अथ यदिन्द्र इति। 'यद्' यस्माच्च 'इन्द्रे' 'सर्वे देवाः' 'तस्थानाः' स्थितवन्तः, अतः 'इन्द्रः सर्वा देवताः'। अत्र कारणं माह— "इन्द्रज्येष्ठा देवा इतीति। ज्येष्ठत्वं तु "तावेन मुपावहृतत्-स्तावनु सर्वे देवाः"-इत्यादिनोक्तत्वात्[२] अवगन्तव्यम्। 'एतद्ध' एतेनैव खलु कारणेन सर्वेऽपि 'देवाः' 'त्रेधा' त्रिप्रकारेण अग्निसोमेन्द्रात्मकाः 'एकदेवत्याः' एकैकदेवतार्थाः 'अभवन्'। तादर्थ्ये यत् ॥

१— तथाहि जैमिनिसूत्रम्— "अपूर्वे चार्थवादः स्यात्"-इति मी० द० जै० सू० १० अ० ८ पा० ५ सूत्रम् (८ अधि०)। "यथा 'आदित्यो यूपः'-इति अङ्गने क्रते तेजस्त्वसामान्यादुच्यते, एव मिहापि पशौ आज्यभागौ कथं न क्रियेता मिति तदर्था प्रशंसा"-इति च तत्र तद्भाष्योपसंहारः (शा० भा०)।

२— अस्मिन्नेव ब्राह्मणे पुरस्ताद् (४१६ पृ० १५ क०) द्रष्टव्यम्।

उक्तार्थञ्च प्रशंसति— "स य इति। अग्न्यादीना मेकदेवत्व-लक्षणश्रेष्ठत्वपरिज्ञानेन स्वय मपि स्वकीयानां मध्ये एक एव 'श्रेष्ठो भवति' ॥ २२ ॥

आज्यभागोपांशुयाजपुरोडाशानां यदग्नीषोमदेवताकत्व मस्ति, तत् प्रशंसितु माह— "द्वयं वा इत्यादि। लोके पदार्थाः सर्वेऽपि शुष्कार्द्रभावेन द्विविधाः; अतः हतीयविधस्याभावाद् 'यच्छुष्कं तदाग्नेयम्' भविष्यति, 'यच्चार्द्रं तत्सौम्यम्'। अतो लोके विद्यमानं वस्तुद्वय मेव अस्मादेव कारणात् अग्नीषोमयोर्योगेन स मापं भविष्यति। 'किम्' 'एतावद्' बङ्ग 'क्रियते' 'इति' ब्रह्मवादिना-ह्योद्यम्। एतावदिति मङ्गहेणोक्तस्य विवरणम्— "अग्नीषोमयो-रिति। अग्नीषोमयोरेवाज्यभागावित्यादिचयाणा मपि प्रदानस्योप-पत्ति माह— "अग्नीषोमयोर्हेत्यादिना। 'एतावतौ' सूर्यचन्द्रादि-भेदेन त्रिधा[1] 'विभूतिः'। विभवो[2] बङ्गभावः। विभूतिरित्यस्य व्याख्यानम्— "प्रजातिरिति। 'प्रजातिः' प्रकर्षेणोत्पत्तिः ॥ २३ ॥

सूर्यादियुगलत्रयस्याग्नीषोमात्मकतां विभज्य योजयति— "सूर्य एवेति। सूर्याङ्गोश्चन्द्ररात्र्योश्चाग्निसोमात्मकताया मुष्णत्वशीतत्वे हेतू। आपूर्यमाणपक्षस्याग्नेयत्व मग्नेर्भिन्नस्य सवितुः किरणाना मनुक्रमेण चन्द्रमस्यनुप्रवेशात्; अपक्षीयमाणपक्षस्य सौम्यत्वञ्च क्रमेण सूर्यांशापनये सति स्वकीयकारणोपवापादिति[3] द्रष्टव्यम् ॥ २४ ॥

अस्त्वेवं किं तत इत्यत आह— "आज्यभागाभ्या मेवेति। अत-

१— 'त्रेधा'—इति ढ। २— 'विभावो'—इति ढ।

३— 'स्वकीयकिरणोपवापादिति'—इति च पाठो डा०-वेवरेण दृष्टः।

स्त्रिविधविभूत्याप्तये त्रयाणा मपि यागाना मग्नीषोमीयत्वं युक्त मिति केचिदाहुः ॥ २५ ॥

"तद् होवाचेति। 'आसुरिः' खेवम् 'उवाच'[1]। उभयेषु त्रिषु यागेष्वाज्यभागाभ्या मेव सूर्याहोऽर्द्धमासयुगलत्रयात्मकासु[2] त्रिविधासु विभूतिषु 'यतमे वा यतमे वा' 'द्वे' वस्तुनी, 'यतमे वा' अहोरात्ररूपे वा, शुक्लकृष्णपक्षरूपे वा, द्वे 'आप्नोति'। वौष्णया त्रिविधान्यपि युगलानि परिगृह्यन्ते। आज्यभागपुरोडाशाभ्यां अग्नीषोमाग्नीषोमदेवताकाना मप्येवं त्रिष्वपि यागेष्वेकैकेनैव त्रिविधा मप्यग्नीषोमयोर्विभूति माप्नवान्[3] भवतीति[4] 'आसुरिः' आचार्यो मन्यते।

आसुरिपक्षं निगमयति— "तस्मादिति। 'तस्माद्वै' यस्मादेकैकेन सर्वविभूतिराप्ना भवति, तस्मात् कारणात् 'एतावत्' यागत्रय मप्यग्नीषोमीय मेव 'क्रियते' ॥ २६ ॥

अथाज्यभागादियागत्रयद्रव्ययोराज्यपुरोडाशयोरेकदेवतात्वप्रयुक्तं जामितादोष माशिष्य द्रव्यमन्त्रधर्माणां भेदेन तत्परिहरति— "तदाहुरित्यादिना। आज्यपुरोडाशस्य प्रदान मिति शेषः। अथवा 'आज्यस्य' 'पुरोडाशस्य' वा पशावपि 'अग्नीषोमयोः' एव दीयत इत्यर्थः। कथ मेतावता जामितेति, तत्राह— "यदिति। एकरूपं 'यद्' वस्तुद्वयम्, तद्विलक्षणेन वस्त्वन्तरेणाव्यवहितम्; 'तेन' अव्यव-

---

१— 'आसुरिराचार्यस्त्वेवं मन्यते'—इति ट।

२— 'सूर्याहोऽर्द्धमासयुगलत्रयात् सकलासु'—इति ज, झ।

३— 'त्रिविधा अप्यग्नीषोमयोर्विभूतीराप्नवान्'—इति ज।

४— 'भवति'—इत्यन्त एवाचार्यग्रन्थो ट-पुस्तके।

धानेन तद्वस्तु 'जामि' भवति। अत्र तु व्यवधान माग्नेयेन 'अनेन' वक्ष्यमाणेन च खल्वजामि। केनेति, उच्यते— 'आज्यस्य' द्रव्यस्य 'इतरम्' इतरत् कर्म उपांशुयाजाख्यम्; तथा 'पुरोडाशस्येतरं' आज्याख्यम्[१]; अन्योऽन्यापेक्षयोरुभयोरितरत्वम्। "अन्यदिवेति। द्रव्यभेदादेकदेवत्य मपि कर्मद्वयम् 'अन्यदिवान्यदिव' भवतीत्यर्थः; अतोऽन्ययोर्न जामितास्ति। द्वितीयः परिहारः— आज्यभागः प्रधानद्वयं वेति कोटिद्वयं विषयीकृत्य प्रवृत्त इति द्रष्टव्यम्[२]। मन्त्रभेदेन चाज्यभागप्रधानद्वययोरजामित्वम्[३]; प्रधानद्वययोः 'जुषाणः'—इत्यस्यासम्भवात्। यद्यप्याज्यभागप्रधानयोर्देवतैक्यम्, तथाप्याज्यभागस्य 'ऋचम्' "अग्निर्ऋचाणि"—"त्वं सोमासि"-इत्यादिका मनुवाक्यां कृत्वा, "जुषाणो अग्निराज्यस्य वेतु"-"जुषाणः सोमः"-इति 'जुषाणेन यजति'[४]; प्रधानाभ्यां तु क्रमेण "अग्नीषोमा यो अद्य वाम्[५]"—"अग्नीषोमा सवेदसा[६]"-इत्यनूच्य, "आन्यं दिवो मातरिश्वा जभार[७]"-"युव मेतानि[८]"-इत्यृग्भ्यां यजति। "अन्यदिवेत्यादि। पूर्ववत्[९] न दोषः। तथाज्यपुरोडाशयोरुपांशुत्वौच्चैस्त्व-

---

१— 'धानाख्यम्'—इति भ, ङ।
२— द्वितीय इत्यादिग्रन्थो ङ-पुस्तके नास्ति।
३— मन्त्रेत्यादिग्रन्थो ज-पुस्तके नास्ति।
४— तै० ब्रा० ३. ५. ६. १, २ सग्निरस्त्रौ मन्त्रौ द्रष्टव्यौ।
५— ऋ० सं० १. ९३. २।
६— ऋ० सं० १. ९३. ९। तै० ब्रा० ३. ५. ७. ४ (क)।
७— ऋ० सं० १. ९३. ६।
८— ऋ० सं० १. ९३. ५। तै० ब्रा० ३. ५. ७. ४ (ख)।
९— ५ पंक्तिर्द्रष्टव्या।

भेदादप्यजामित्वम् । "तावब्रूतादग्नीषोमाव्याज्यस्यैव तावुपांशु पौर्णमास्यां यजन्निति-श्रुत्यन्तरात् उपांशुत्वविधानं युक्तम् । विहित माज्यस्योपांशुत्वं प्रशंसति—"स यदुपांशुरिति। उपांशुत्वस्यानिरुक्तत्वात्, प्रजापतेरपि सर्वात्मकत्वेन तथात्वात्, प्रजापतिरूपत्वम् ; 'तस्मात्' उपांशोः प्रजापतिरूपत्वात् 'तस्य' प्रजापतेः उचिता मनुष्टुप्छन्द-स्काम् "अग्नीषोमा यो अद्य वाम्"-मित्येताम् 'अनुवाक्याम्' अनुब्रूते। एतावता कथं साम्यप्रतीतिरित्यत आह— "वाग्घीति । "अनुष्टुप् च वै सप्तदशश्च समभवताम् मानुष्टुप् चतुरुत्तराणि छन्दांस्यसृजत"-इति सामब्राह्मणे[1] श्रवणादनुष्टुभो वाग्रूपत्वम् । ततोऽपि किं मित्यत आह— "वाग्घि प्रजापतिरिति । "आश्रावयास्तुश्रौषडित्यादि— "एष वै सप्तदशः प्रजापतिरितिश्रुतेः[2] प्रजापतिरूपत्वम् ॥ २७ ॥

सिद्धवद्भवदुक्त मुपांशुयाज मिदानीं सार्थवादं विदधाति— "एतेन वै देवा इति । 'एतेन' 'उपांशुयाजेन' 'असुराणां' मध्ये 'यं-यम्' असुरं हन्तु मैच्छन्, 'तं-तम्' 'उपसृत्य' उपपार्श्वं च गत्वा, उच्चैरुच्चार्यमाणेन वषट्काराख्येन च 'वज्रेण' 'अघ्नन्' । वषट्कारस्य वृत्रशिरश्छेदनसाधनत्वात् वज्रत्वम् । "तथो एवेत्यादि स्पष्टम् । तस्मात् उपांशुयाजं यजेदिति विधिः । उपांशुर्ज्यते देवता अत्र यागे इति 'उपांशुयाजः' ॥ २८ ॥

आज्यभागोपांशुयाजयोर्जामितापरिहाराय याज्यापुरोऽनुवाक्ययोः वैलक्षण्य मुक्तम्, तदेव विधाय प्रशंसति[3]— "स वा एतच्च मनूच्च

१— सा० ब्रा० १प्र० २ख० द्रष्टव्यम् ।
२— पुरस्तात् टौप्यन्यां द्रष्टव्यम् (२५२ पृ०) ।
३— वैलक्षण्य मुक्त्वा प्रशंसति'-इति ढ ।

जुषाणेनेत्यादिना। उदाहृतौ जुषाणशब्दयुक्तौ मन्त्रौ[1], 'तत्' तादृक् अनुष्ठानम् 'अनु', तत्सामर्थ्यादित्यर्थः। 'अन्यतरतः' तयोरन्यच्च चक्करणात् एतत्कर्म 'अन्यतरतः' 'अस्थि' अस्थिवद् दृढं करोति। तस्मात् अन्यतरत चक्करणं युक्त मित्यर्थः ॥ २९ ॥

"अथर्च्च मनूच्यर्च्चेति। एवम् 'ऋच मनूच्य ऋचा'-इत्येतद्व्याख्येऽयम्। 'उभयतोदन्ताः' पुरुषाश्वादयः प्रसिद्धाः। द्विविधप्रजाव्यतिरेकेण प्रजान्तराभावात् सर्वप्रजालाभाय याज्यानुवाक्यायुगलयोरुक्तं वेलक्षण्यम् ॥

उक्तार्थज्ञानपूर्वकानुष्ठानं प्रशंसति— "स य इति। अग्नीषोमयोः प्रजापतिसूर्यसोमादिरूपं त्रिविधत्वेभवम्, तदाप्निकारण माज्यभागोपांशुयाजाग्नीषोमीयपुरोडाशाख्यं यागत्रय मनुतिष्ठतीत्यर्थः ॥ ३० ॥

॥ ३१ ॥ ३२ ॥

पक्षान्तर माह— "स वा उत्तरा मिति। न पूर्वां पौर्णमासी मुपवसेत्, उत्तरा मेव। उत्तरोपवासपक्षे गुण माह— "अथ य उत्तरा मिति। यथा कश्चित्परराष्ट्रं प्राप्य प्रतिमुखं पलायमानं हननोद्योगरहितं सम्यक् चूर्णितं करोति, तदुत्तरं पेषण मप्येवं भवति; प्रतिनिवृत्तस्योत्तरपक्षस्याक्रान्तप्रायत्वात्। "य उत्तरा मिति पुनरुपसंहारः ॥ ३३ ॥

इत्थं पक्षान्तरं सोपपत्तिक मभिधाय प्रथमं पक्षं सिद्धान्तयितुं पुनरुपादत्ते— "स वै सम्प्रत्येवोपवसेदिति।

१— इहैव पुरस्तात् प्रदर्शितौ (४३७ पृ० ११ पं०)।

ननु द्वितीयपक्षानादरे किं कारण मिति, तदाह— "यथा वा अन्यस्येति। 'यथा' कश्चिन्मन्दोऽन्येन पूर्व मेव पातितम्, पुनः स्वयम् 'पिंष्यात्', 'एवं' 'तत्' उत्तरपेषणं भवति; स्वत एव प्रतिनिवृत्तस्य पक्षस्य स्वेनाक्रान्तत्वात्।

उत्तरानादरे कारणान्तर माह— "सोऽन्यस्यैवेति। किञ्च उत्तरोपवासी 'अन्यस्य' अन्येन यत्कृतं कार्यं तस्य 'अनुकरः' अनुकारी, कृतस्यैव कार्यस्य पुनः करणशीलो भवति। तथा 'अन्यस्य उपावसायी' अन्येनाध्यवसितस्य पुनरध्यवसायी 'भवति'। सम्प्रति उपवसन्तं दृष्ट्वा, तदनुकर्त्तुं स्वय मपि परेद्युः असावुपवसतीत्येवं प्रतिभानात्। 'तस्मादु सम्प्रति'-इति स्वपक्षनिगमनम् ॥ ३ ४ ॥

सम्प्रतिपक्ष मेव सिद्धान्तयितु माख्यायिका माह— "प्रजापतेर्हेति। पुरा 'प्रजाः' सृष्टवतः 'प्रजापतेः' सन्धयो विस्रस्ता आसन् किल। ननु कः प्रजापतिः? कानि पर्वाणि? इति उच्यते— संवत्सरे सकलप्रजोत्पत्तेः 'सः संवत्सर एव प्रजापतिः'; 'तस्य' कालात्मकस्य 'पर्वाणि' 'अहोरात्रयोः सन्धौ' प्रातस्सायङ्कालौ। तथा एतौ 'सन्धौ' 'पौर्णमासी च अमावास्या च' कालौ। 'ऋतुमुखानि' वसन्तादीनि, तानि विस्रस्तानि ॥ ३ ५ ॥

"स विस्रस्तैरिति। 'सः' विस्रस्तपर्वा 'संहातुं' सङ्गतो भवितुं शक्तो माभूत्। 'तम्' अशक्तम् 'एतैर्हविर्यज्ञैः' 'देवाः' 'अभिषज्यन्' भेषज मकुर्वन्। सोमव्यतिरिक्ताज्यपुरोडाशादिसाध्या[1] 'हविर्यज्ञाः'। विभज्य योजयति— सायं प्रातश्च क्रियमाणेन 'अग्निहोत्रेण'

१— 'सोमव्यतिरिक्तपुरोडाशादिसाध्या'-इति ठ।

'अहोरात्रयोः सन्धौ' एतदात्मकं प्रजापतेः 'तत् पर्व' चिकित्सन्, 'समदधुः' समाहित मकुर्वन्। तथा 'पौर्णमासीज्ञामावास्याञ्च' पौर्णमास्यमावास्यारूपे पर्वणी वैश्वदेवादि-'चातुर्मास्यैरेव' वसन्तादि-'ऋतुमुखानि' 'समदधुः' ॥ २ ६ ॥

"स सम्ऽहितैरिति। 'सः' एव कालात्मकः प्रजापतिः दृढपर्वा[1], संवत्सरमध्ये यदन्नं व्रीह्यादिरूपं पक्वं भवति, तत् सर्वम् 'अभि'-लक्ष्य भोक्तु मुत्थितवान्; कालावयवानां विच्छेदाभावात् तत्तत्कालोचितमन्नं भोगयोग्य मासीदित्यर्थः ॥

इदानी मुपवासयोग्यं पर्व विधत्ते— "सम्प्रतीति। 'सम्प्रति ह्येव' पर्वविस्रंसनसमकाल एव 'प्रजापतेः पर्व' सम्प्रति उपवसन् चिकित्सितवान् भवति; तथैव सम्प्रत्युपवासिनं रचति; प्रजापतिवत् स्वय मपि सर्वान्नादो भवति ॥

"य एवं विद्वान्"-इति उपसंहारः। "तस्मादिति स्वाभिमत-पक्षनिगमनम्। कात्यायनस्तु ब्राह्मणे सोपपत्तिकाभिधान मभिप्रेत्य पक्षद्वय मपि विकल्पेनोवाच— "पूर्वां पौर्णमासी मुपवसेत्, उत्तरां वा"-इति[2] ॥ २ ७ ॥

आज्यभागस्थाननियम माह— "चक्षुषी ह वा इति। 'यत्' यतः 'आज्यभागौ' चक्षुःस्थानीयौ, अतः 'पुरस्तात्' कर्त्तव्यौ; तयोः पुरस्तात्करणेन 'यज्ञस्य चक्षुषी' 'पुरस्तात्' कृतवान् भवति। यतो

१— 'पश्चात् 'सः' दृढपर्वा'-इत्येतावदेव ज-झ-पुस्तकयोः।

२— का० श्रौ० सू० २. १. १। इहैवोपरिष्टाद् (६. २. २. १८)।

यज्ञे ते पुरस्तात् क्रियेते, अत इदानी मपि प्राणिनां 'चक्षुषी पुरस्ताद्' वर्त्तेते ॥ २८ ॥

अत्र केषाञ्चित् पक्षं माह— "उत्तरार्द्धपूर्वार्द्धे इति। तेषा मभिप्राय माह— "एतदिति। 'एतत्' एतेन, पूर्वभागेऽपि उत्तर-दक्षिणभागयोर्हेतिमेन 'पुरस्तात्' साक्षात् 'चक्षुषी' स्थान एव स्थाप-यामः इति ॥

अस्य पक्षस्य दुरवगमत्व मात्मङ्कृत्य पूर्वोक्त मेव पक्षं सिद्धान्तयति— "तदु तदेत्यादिना। 'अविज्ञान्य मिव' विज्ञानेन हीन मिव, वैषम्याभावेन साक्षात् स्थानविज्ञानस्याशक्यत्वात् तस्य। कस्य पुर-स्तादित्यत आह— "हवींषीति। यागशरीररूपस्य द्रव्यत्यागात्मक-त्वात् यत्र प्रधानानि हवींषि हूयन्ते, तेषां पुरोभागमात्रपवनात् स्वस्थाने चक्षुःस्थानं भवतीत्यर्थः। उक्तपुरोभागविशेष[1] माह— "यत्रो एवेति। उत्तरपूर्वार्द्धादिस्थान मनपेक्ष्य प्रधानहविःपुरोभागे 'यत्र' कुत्राग्नौ समिद्धे होतव्यम्; तथा सति 'आज्यतयः' अपि 'सम्यञ्चः' स्युः। अत्र कात्यायनः— "आग्नेय मुत्तरपूर्वार्द्धे, दक्षिणपूर्वार्द्धे सौम्यं, समिद्धतमे वा"-इति[2] ॥ २९ ॥

आज्यभागयाज्यानुवाक्ययोर्यादृग् जुषाणवैलक्षण्यं पूर्वं मुक्तम्[3], तदपि तयोश्चक्षुष्टप्रयुक्त मित्याह— "स वा ऋच मनूद्येति। 'अक्ष्नन्' अक्ष्णि, मुखे अक्ष्मिमये सति ऋग्जुषयोः[4] काठिन्यमृदुत्वात्

१— 'उक्तहविःपुरोभागे विशेष'—इति ङ।
२— का० श्रौ० सू० ३. ३. १७. २०, २१, २२।
३— इहैव पुरस्तात् २७ कण्डी द्रष्टव्या (४२० पृ०)।
४— 'ऋग्जुषाणयोः'—इति भ, 'ऋग्यजुषोः'—इति ङ।

साम्यादस्थ्नस्थ्नात्मता । यद्वै यज्ञस्य समाम्नातेन यजुषा[1] क्रियते, तत् शिथिलितम्; यदृचा तद् दृढ मिति । 'ऋचा' "अग्निर्ऋचाणि"-इत्यादिकया, 'यजुषा' "जुषाणो अग्निर्जुषाणः सोमः"—इति, ऋग्यजुषोश्च मृदुशिथिलत्वे समाम्नाते । उक्तप्रकारता मथान्यभावे दोषदर्शनेन समर्थयते— "यदृच मनूच्येति । अण्डावेव कुर्वन्, प्राणिनां यज्ञस्य वा 'अस्थि' अस्थिस्थानं मुखम् केवलम् 'कुर्यात्', 'न चक्षुः, चक्षुस्तु वर्जयत्येव ॥ ४० ॥

आग्नेयसौम्ययोराज्यभागयोर्यज्ञचक्षुत्वं लौकिकचक्षुस्साम्येन समर्थयते— "ते वा एते इति । 'ते' चक्षुषी प्रत्येकम् 'अग्नीषोमयोः रूपम्' 'अन्वायत्ते' अनुप्राप्ते । कथम्? चक्षुषि 'यच्छुक्लं तदाग्नेयम्' सितभास्वरत्वसाम्यात्; चन्द्रमसि कार्ष्ण्यस्य वृद्धानुसारेण स्फुटं प्रतिभासात् 'यत् कृष्णं तत् सौम्यम्' ।

अथ "आग्नेयः कृष्णग्रीवः"-इत्यादिषु[2] कार्ष्ण्यस्याग्नेयत्वश्रवणात्, अक्षिमध्यस्य प्रकाशकाग्निधर्मत्वाच्च; सोमे भूयसः शौक्ल्यस्य दर्शनाच्च उक्तवैपरीत्य माशङ्क्याह— "यदि वेतरथेति ।

इदानीं दर्शनादर्शनांशभेदेनाग्नीषोमात्मकता माह— "यदेव वीक्षत इति । 'यदेव' चक्षुरुन्मीलनकाले सर्वं पश्यति । एतदुपपादयति— "शुष्के इवेति । सर्वं मपि वस्त्वग्निसम्बन्धे शुष्कं भवतीति प्रसिद्धम् । स्वपितिरप्यदर्शन मुपलक्षयति— "यदेवेति । दर्शनं न

१— 'चक्षुषी'-इति ज, झ ।

२— य० वा० सं० २८. २८ । विधानञ्चास्येदैव १३. ५. १. ३ ।

करोतीत्यर्थः । 'सुषुपुषः' सुप्तवतः । क्षपेः क्षसुः[१] । सोमोऽपि आर्द्र-प्रसवः ; आप्यमण्डलत्वात् ॥

वेदितुः प्रशंसा— "आजरस मिति । वयोहानिपर्यन्तं 'चक्षुष्मान् भवति' इत्यर्थः[२] । 'अमुष्मिन्' स्वर्गलोकेऽपि 'सचक्षुः' एव 'सभवति', आज्यभागयोः चक्षुष्ट्व-वेदिता ॥ ४ १ ॥ २ ॥ [६. ३.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे षष्ठाध्याये तृतीयं ब्राह्मणम् ॥

इन्द्रो ह युच व्वृत्राय व्वज्रं प्रजहार । सोऽबुलीयान् मन्यमानो नास्तृषीतीव बिभ्यन्निलयाञ्चक्रे स पुराः परावतो जगाम देवा ह वै व्विदाञ्चक्रुर्हतो वै व्वृचो-ऽथेन्द्रो न्यलेष्टेति ॥ १ ॥

त मुन्वेष्टुं दध्रिरे । अग्निर्हैवुतानाः हिरण्यस्तूप ऽऋषीणां बृहतीच्छन्दसां तु मग्निरनुविवेद तेनैताः रुचिः सहाजगाम स वै देवानां व्वसुर्व्वीरो ह्येषाम् ॥ २ ॥

ते देवा ऽअब्रुवन् । अमा* वै नोऽद्य व्वसुर्व्वसति

१— पा० सू० ३. २. १०७ ; ६. १. १५ ।

२— 'वयोहानिपर्यन्तं चक्षुर्मोघं न भवति'—इति ट ।

* 'नमा'—इति क, ख, ग ।

यो नः प्रावात्सीदिति तुभ्या मेतद्यथा ज्ञातिभ्यां वा सखिभ्यां वा सहागताभ्याꣳ समानु मोदनं पुचेदजुं वा तदुह मानुषꣳ हविर्हैवाना मेवु माभ्या मेतत्समानुꣳ हविर्निरवपन्नैन्द्राग्नं द्वादशकपालं पुरोडाशं तस्मादै-न्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥ ३ ॥

स इन्द्रोऽब्रवीद्। युच वै व्वृत्राय व्वज्रं प्राहरं तद्यस्मये सु कꣳ ऽइवास्मि* न वै मेदुं धिनोति युन्मा धिनुवत्तुन्मे कुरुतेति तथेति देवा ऽअब्रुवन् ॥ ४ ॥

ते देवा ऽअब्रुवन्। न वा ऽइमु मन्यत्सोमाद्धिनु-यात्सोम मेवास्मै सुम्भरामेति तस्मै सोमꣳ सुमभरन्नेष वै सोमो राजा देवाना मुन्नं युच्चन्द्रमाः स युचैषु ऽएताꣳ रात्रिं नु पुरस्तान्नु पश्चाद्दहशे तुदिमुं लोक मागच्छति सु ऽइहैवापश्चौषधीश्च प्रविशति स वै देवानां व्वस्वन्नुꣳ ह्येषां तद्युदेषु ऽएताꣳ रात्रि मिहामा व्वसति तस्मादमावास्या नाम ॥ ५ ॥

तं गोभिरनुविष्टाप्य सुमभरन्। यदोषधीराꣳस्त-दोषधिभ्यो युदपोऽपिबंस्तदद्धास्तु मेवुꣳ सम्भत्यातुच्च तीव्रीकृत्य तु मस्मै प्रायच्छुन् ॥ ६ ॥

सोऽब्रवीद्। हिनोत्येवु† मेदुं नेव तु मयि श्रयते

---

* 'ऽइवास्मिन्'–इति क। † 'धिनोत्येवु'– इति ग, च।

युथेदं* मयि श्रयातै तथोपजानीतेति तꣳ स्रुतेनैवा-
श्रयन् ॥ ७ ॥

तद्वा ऽएतत्। समानु मेव सत् पुय ऽएव सदिन्द्र-
स्यैव सत्तत्पुनर्न्नानेवाचक्षते। यदब्रवीद्विनोति मेति
तस्माद्ब्रुथ युदेनꣳ स्रुतेनैवाश्रयंस्तस्माच्छृतꣳ ॥ ८† ॥

स युथाꣳशुराप्यायेत। एव मापायतापं पाप्मानꣳ
हरिमाणं महतैषु ऽउ ऽआमावास्युस्य बन्धुः स यो
हैवं विद्वान्त्सन्नयत्येवꣳ हैव प्रजया पशुभिराप्यायते
ऽप पाप्मानꣳ हते तस्माद्वै सुन्नयेत् ॥ ९ ॥

तदाहुः। नासोमयाजी सुन्नयेत्सोमाहुतिर्व्वा ऽएषा
सानवरुद्धासोमयाजिनस्तस्मान्नासोमयाजी सुन्नयेदिति॥
१० ॥

तदु सुमेवु नयेत्। नन्वचान्तरेण शुश्रुम सोमेन नु
मा याजयतेाथ म ऽएतदाप्यायनꣳ सुभरिष्यथेत्यब्रवी-
दिति न वै मेदुं धिनोति युन्मा धिनुवत्तुन्मे कुरुतेति
तस्मा ऽएतदाप्यायनꣳ सुभरंस्तस्मादप्यसोमयाजी
सुमेवु नयेत् ॥ ११ ॥

व्वार्चघ्नं वै पौर्ण्णमासम्। इन्द्रो ह्येतेन व्वृत्र मुहन्नथै-

---

† 'युथेद'–इति च-पाठो नूनं मुद्राकरप्रमादजः।

* इह "अर्द्धप्रपाठकः"–इति ख-ग-पुस्तकयोः।

तुदेवु व्वृचहुत्यं युदामावास्युं व्वृचुꣳ ह्यस्मा ऽएतुज्जघ्नुष ऽआप्यायन मुकुर्व्वन् ॥ १२ ॥

तद्दा ऽएतुदेव व्वार्चघ्नम् । युत्पौर्णमास मुथैषु ऽएवु व्वृचो युचन्द्रमाः स युचैषु ऽएताꣳ रात्रिं न पुरस्तान्नु पश्चाद्दद्दशे तुदेन मेतेन सुर्व्वꣳ हन्ति नास्य किञ्चन पुरिशिनष्टि सुर्व्वꣳ ह वै पाप्मानꣳ हन्ति नु पाप्मनः किञ्चन पुरिशिनष्टि यु ऽएवु मेतद्वेद ॥ १३ ॥

तद्वेके दृष्ट्वोपवसन्ति । श्वो नोदेतेत्यदो वैवु देवाना मुविक्षीण मुन्नं भवत्युथैभ्यो व्वयु मितु ऽउप प्रुदास्याम ऽइति तद्वि सुम्भृतं यदुक्षीण ऽएव पूर्वस्मिन्नन्नेऽथापर मुन्न मागुच्छति सु ह बह्वन्नु ऽएवु भवत्युसोमयाजी तु क्षीरयाज्यदो वैव सोमो राजा भवति ॥ १४ ॥

अथ युथैवु पुरा । केवलीरोषधीरश्नन्ति केवलीरपः पिबन्ति ताः केवल मेव पुयो दुह ऽएवं तुदेष वै सोमो राजा देवाना मुन्नं युचन्द्रमाः स युचैषु ऽएताꣳ रात्रिन्नु पुरस्तान्नु पश्चाद्दद्दशे तुदिमुं लोक मागच्छति सु ऽइहा-पश्चौषधीश्च प्रविशति तुदेन मङ्ग ऽओषधिभ्यः । सम्भृत्याहुतिभ्योऽधि जनयति सु ऽएष ऽआहुतिभ्यो जातुः पश्चाद्दद्दशे ॥ १५ ॥

तद्वा एतद्। अविक्षीण मेवु देवाना मन्नाद्यं पुरिसवतेऽविक्षीणꣳ ह वा अस्यास्मिंल्लोकेऽन्नं भुवत्यक्षय्य ममुष्मिंल्लोकु सुकृतं य एवु मेतद्वेद ॥ १६ ॥

तद्वा एताꣳ रात्रिम्। देवेभ्योऽन्नाद्यं प्रच्यवते तुदिमं लोक मागच्छति ते देवा अकामयन्त कथन्नु न इदं पुनरागच्छेत्कथन्न इदं पुरागेव न म्रियेदिति तद्व एवु सन्नयन्ति तेषुाशꣳसन्त एतु एवु नः सम्भृत्य म्रदास्यन्तीत्याह वा अस्मिन्त्स्वाश्च निध्याश्च शꣳसन्ते यु एवु मेतद्वेद यो वै परमुतां गच्छति* तस्मिन्नाशꣳसन्ते† ॥ १७ ॥

तद्वा एषु एवेन्द्रः। यु एष तुपत्युथैषु एवु व्वृचो युच्चन्द्रमाः सोऽस्यैष भ्रातृव्यजन्मेव तस्माद्यद्युपि पुरा व्विदूर मिवोदितोऽथैन मेताꣳ रात्रि मुपैव न्याम्नवते सोऽस्य व्यात्त मापद्यते ॥ १८ ॥

तं ग्रसित्वोदेति। स नु पुरस्तान्नु पश्चाद्दहꣳ ग्रसते ह वै द्विषन्तं भ्रातृव्य मयु मेवास्ति नास्य सपत्नाः सन्तीत्याहुर्य एवु मेतद्वेद ॥ १९ ॥

तं निर्द्धीय निरस्यति। सु एषु धीतुः पश्चाद्दहꣳ स पुनराप्यायते सु एतस्यैवान्नाद्याय पुनराप्यायते

---

* 'गच्छति'—इति च। † 'शꣳसन्ति'—इति क।

यदि ह वा अस्य द्विषन् भ्रातृव्यो व्वणिज्युया वा केनचिद्वा सम्भवत्येतस्य ह्वैवान्नाद्याय पुनः सम्भवति यु अेवु मेतद्वेद ॥ २० ॥

तद्वैके महेन्द्रायेति कुर्व्वन्ति । इन्द्रो* वा अेषु पुरा व्वृत्रस्य व्वधा†दुथ व्वृत्रꣳ हत्वा युथा महाराजो व्विजिग्यानु अेवं महेन्द्रोऽभवत्तस्मान्महेन्द्रायेति तद्विन्द्रायेत्येवु कुर्यादिन्द्रो वा अेषु पुरा व्वृत्रस्य व्वधा‡दिन्द्रो व्वृत्रं जघ्निवांस्तुस्माद्विन्द्रायेत्येवु कुर्यात् ॥ २१ ॥ ३ ॥

॥ इति पञ्चमप्रपाठके तृतीयं ब्राह्मणम् [६. ४.] ॥

अथामावास्यानि हवींषि विधातु माख्यायिका माह— "इन्द्रो ह यचेति । 'यच' यस्मिन् देशे 'इन्द्रः' 'वृत्राय' वृत्रवधार्थं 'वज्रं' 'प्रजहार', तदा स्वयं बलवान् सन्नपि 'अबलीयान्' अहं मिति मत्वा 'नास्तृषि' । "स्तृङ् हिंसायाम्[1]", स्तृङ्[2] । अहं न हिंसितवानस्मीति भीतः सन् पुनर्बाधशङ्कया निलीनोऽभूत् । एतदेवाह— 'परा: परावतो जगाम' अत्यन्तं विप्रकृष्टदेशं गतवान् । परावदिति

---

* 'तद्वैके । महेन्द्रायेति कुर्व्वन्तीन्द्रो'—इति ग, च ।

†, ‡ 'बधा'—इति च ।

१— 'स्तृणाति'—इत्यस्य बधकर्म्मसु पाठात् । निघ० २. १९. १२ ।

२— पा० सू० ३. २. ११० ; ३. ४. ६ ।

दूरनाम[1]। तस्य "उपसर्गाच्छन्दसि धात्वर्थे"-इति[2] मतुप्। ततो 'देवाः' वृत्ते सते 'इन्द्रः' तज्जीवनग्रहणया कुत्र विलीनः? 'इति' विदित्वा, (॥ १ ॥

"त मन्वेष्टु मिति।) अन्वेषणे मतिं कृत्वा देवर्षिच्छन्दसां मध्ये अग्निहिरण्यरूपहृत्याख्यास्त्रयोऽप्यन्वयिषुः। तत्र 'अग्निः' 'अनुविवेद' अनुसृत्यालब्धवान्। लब्धेनेन्द्रेण सह 'एतां' रात्रिं। रात्रिशब्दो दिनस्योपलक्षणः। अत्यन्तसंयोगे द्वितीया[3]। क्षण मप्यमावास्यादिवसं सहोषितवान्। किं कारणं तत्र तस्य वास इति, तदाह— "स वा इति। 'सः' इन्द्रो 'देवानां' 'वसुः' धनरूपः[4], वासयिता वा[5]। एवं 'हि' यतः 'एषां' देवानां मध्ये 'वीरः', अतः तदागमनायाग्नेर्विलम्बो युक्तः। "इन्द्रो हि देवानां वसुः"-इति तैत्तिरीयके समानप्रकरणेऽभिधानात् "स वै"-इति तच्छब्देनेन्द्र एव परामृष्टव्यः ॥ २ ॥

ऐन्द्राग्नं द्वादशकपालं विधातु माह— "ते देवा इति। 'ते देवाः' 'नः' अस्माकं सम्बन्धी 'यः' इन्द्रः प्रवास मकरोत्, सः 'नः'

१— निघ० ३. २९. ५। निरु० ७. ७. ४; ११. ४. १४।

२— पा० सू० ५. १. ११८।

३— "कालाध्वनोरत्यन्तसंयोगे"-इति पा० सू० २. ३. ५।

४— निरु० ६. २. ४।

५— "वसवो यद् विवसते सर्वम्। अग्निर्वसुभिर्वासव इति समाख्या; तस्मात् पृथिवीस्थाना। इन्द्रो वसुभिर्वासव इति समाख्या; तस्मान्मध्यमस्थाना। वसव आदित्यरश्मयः, विवासनात्; तस्माद् द्युस्थानाः"-इति निरु० १२. ४. ७।

'वसुः', 'अद्य' 'अमा' अग्निना सह 'वसति'-'इति' उक्ता, 'ताभ्यां' सखिभावेन सह वसन्ता मिन्द्राग्निभ्यां दादशकपालं हविरिति शेषः ; प्रयच्छाम इत्यर्थः ॥

ननु देवताभेदेन हविर्भेदः किं न स्यात् ? इत्यत आह— "यथा ज्ञातिभ्या मिति। परस्पर मुच्छिष्टता नास्तीत्यवगमयितुं ज्ञातिसख्योरुपन्यासः। 'समानम्' एक मेव पचति ; पक्त्रा समानं प्रयच्छतीत्यर्थः। 'मानुषं' मनुष्येभ्यः कर्त्तव्यं सत्, उपकरण मिति शेषः। अस्त्वेवं देवानां कि मायात मित्याह— "हविर्देवाना मिति। 'देवानां' तु सहागतानां 'हविः समान मेव' उपकरण मित्यर्थः। एवं पूर्वाचारानुसारेणैव इदानीं विधत्ते— "तस्मादैन्द्राग्न इति ॥ ३ ॥

अथ साम्नाय्यं विधातु माह— "स इन्द्र इत्यादिना। 'यत्र' यस्मिन् काले 'वज्रं' 'प्राहरम्' प्राक्षिपम्, तदा 'व्यस्मये' विस्मितोऽभवम् ; विगतप्रबले स्वयदर्शनात्। यतः 'ज्यायोऽस्मि', तस्मात् 'इदं' कठिनं पुरोडाशं 'मा' मां 'न धिनोति' न प्रीणयति, अतो मम प्रीतिकरं हविः सम्पादयत 'इति' (॥ ४ ॥

"ते देवा इति।) उक्ता 'देवाः' 'इमम्' इन्द्रं प्रीणयितुं 'सोमादन्यत्' 'न' शक्नोतीति विचार्य, तस्मै 'सोम मेव' सम्भृतवन्तः। कथं सम्भरयुरिति, तत्प्रकार उच्यते— "चन्द्रमा इति। 'यत्' योऽस्ति 'एषः' एवाभिषूयमाणः 'सोमो राजा', 'सः' एवोभयतस्इन्द्रदर्शनरहितायां सम्पूर्णमावास्यायां भूलोक मागत्य अप्सु ओषधीषु च प्रविशति। 'सः' प्रविष्ट एव चन्द्रमाः 'देवानां वसु'

देवधनम्। कुतः?[1] यतः 'एषां' व्रीह्यियवसोमादिरूपेण 'अन्नं' भवति, अतो वसुरित्यर्थः ॥

चन्द्रमसोऽओषधिसहवासप्रसङ्गात् 'अमावास्या'-शब्दं निर्वक्ति—"तद्यदेष इति। 'इह' भूलोके 'एतां रात्रिम्' अपरिदृष्टचन्द्रायां रात्रौ साकल्येन 'अमा वसति' अमा सह वसति; ओषधिचन्द्रमसा मस्यां तिथौ सहवासात् सा तिथिः 'अमावास्या नाम' अभवत् ॥ ५ ॥

"तं गोभिरिति। 'तम्' अनुप्रविष्टं सोमं 'गोभिः' अनुक्रमेण विविधं स्रापयित्वा धारयित्वैव 'समभरन्'। तत्प्रकार माह—"यदोषधीरिति। 'ओषधीः' 'आस्रन्' अभक्षयन् गावः, 'तत्' तेन 'ओषधिभ्यः' सोम मभरन्। तथा अनुप्रविष्टसोमा अपः पिबन्ति गावः, तेन 'अद्भ्यः'; अनुपलक्षितानां तृणपयसां क्षीरतया परिणामादिति भावः। एवम्प्रकारेण सम्भरण मेव सोमस्य तीव्रीकरणम्। अथवा 'तीव्रीकृत्य' अन्यत् आतञ्चनं कृत्वेत्यर्थः। अथ 'तं' सम्भृतम् 'असौ' इन्द्राय 'प्रायच्छन्' ॥ ६ ॥

"सोऽब्रवीदिति। 'सः' इन्द्रः स्त्रीकृत्येदम् 'अब्रवीत्'। 'इदं' हविः 'मा' मां 'धिनोत्येव'[2], ('तु') परन्तु 'मयि' 'नैव अयते' न तिष्ठति, न मात्यं भजत इत्यर्थः। अतो 'मयीदं' 'यथा' 'अयातै' अयेत, 'तथा' उपायं बुध्यध्व मिति। तेऽपि 'तम्' इन्द्रं 'घृतेनैव' पक्वक्षीरेणैव 'अश्रयन्'। यद्यपि तैत्तिरीयके प्रथमं घृतं पश्चाद्

१— ठ-पुस्तके नास्त्येतत् पदम्।

२— 'हिनोत्येव'—इत्येव बऊमूलपुस्तकपाठः।

दधीति[1] क्रमः, तथाप्यत्र सायम्प्रातर्दोहाभ्यां दधिपयसोः सम्भवात्[2] अनेन क्रमेणाभिधान मिति द्रष्टव्यम् ॥ ७ ॥

तत् प्रशंसति— "तदा एतदिति। 'तत्' प्रथमतस्सुब्रह्मात्मकम् 'एतत्' घृतरूपेण परिणतम्, वस्तुतः 'समान मेव' एकरूप मेव ॥ ८ ॥

साम्नाय्यस्य सोमात्मकता मभिधाय, आप्यायनसाम्यादपि तदात्मकता माह— "स यथांशुरिति। 'अंशुः' सोमः, 'स यथा' आप्याययेत्, 'एवं' साम्नाय्य मपि। तथा पीतवतां 'पाप्मानम्' 'अप'हन्ति[3],— 'हरिमाण' शरीरहरितत्व मपहन्तीति ॥

प्राकरणिक मर्थ मुपसंहरति— "एष उ इति। 'एषः' "इन्द्रो ह यच्च वृत्रायेत्यादिकः[4] 'आमावास्यस्य' कर्मणः 'बन्धुः' ब्राह्मणम्[5] ॥

उक्तार्थज्ञानप्रशंसापूर्वकं साम्नाय्यं विधत्ते— "स यो हैवं विद्वानिति ॥ ९ ॥

विहितस्य साम्नाय्यस्याधिकारितां निश्चेतुं केषाञ्चिन्मत माह— "तदाऊरिति। 'तत्' तत्र साम्नाय्यविषये 'आऊः' ब्रुवते। तेषा मभिप्राय माह— "सोमाऊतिरिति। साम्नाय्याऊतिः परम्परया 'सोमाऊतिः' खलु; 'सा एषा' पूर्वं सोमेनानिष्टत्वात् 'अनवरुद्धा' न सम्पन्ना; अतः 'असोमयाजी न यजेतेदिति' ॥ १० ॥

१— "घृतेन प्रातस्सवने श्रीणीयात्, दध्ना मध्यन्दिने, नीतमिश्रेण तृतीयसवने"—इति तै० ब्रा० १. ४. ८. ६।

२— पूर्वं सायं दोहेन दधि सम्पाद्यते, ततो यागदिने प्रातर्दोहेन घृतम्।

३— इदैतत्पदं ट-पुस्तके नास्ति। ४— ४४४ पृ० ७ पं०।

५— व्याख्यान मेतस्य ४३० पृ० १५-पङ्क्तेरेषतो द्रष्टव्यम्।

स्वाभिमतं पक्षं प्रतिजानीते[1]— "तदिति । असमयने कारणं स्मारयन् पुनराक्षिपति— "नन्वचान्तरेणेति । 'ननु' 'अत्र' विषये 'अन्तरेण' मध्ये एव श्रुतवन्तः स्म । कथम् ? 'नु' निश्चयेन 'मा' मा मिन्द्रं 'सोमेन' 'याजयत', 'अथ' पश्चात् 'मे' मम 'एतत्' सान्नाय्यलक्षणम् 'आप्यायनम्' 'भरिष्यथ ?'-'इति' इन्द्रेणोक्तं वचन मिति । स्वाभिमतसमयनपक्षे पूर्वोदाहृतं वाक्यं प्रमाणत्वेन पुनः आवयन्निगमयति[2]— " न वै मेद मित्यादिना । पूर्ववद्व्याख्येयम्[3] । अतः समयेदिति स्वपक्षनिगमनम् ॥ ११ ॥

अमावास्योपवासस्य कालं विधित्सुः पुराकल्प माह— "वार्चघ्नं वा इति । पौर्णमास्यां क्रियमाणं यद्धविरस्ति, तद् 'वार्चघ्नं' वृचहननसम्बन्धि ; वृचहननाय तदन्तर्गतनिगममावसरे एकादश-कपालोपांशुयाजहविषोः प्रदानात् । हननसाधनत्व मेव दर्शयति— "इन्द्रो ह्येति । आमावास्यन्तु हविः 'वृचहत्यं' वृचहनन मेव ; वृचं हतवत इन्द्रस्याप्यायनार्थं कृतत्वात् ॥ १२ ॥

वक्ष्यमाणोपायेन वृचशब्दार्थं माह— "तदा एतदिति । उक्त-प्रकारेण 'पौर्णमासं' हविः 'वार्चघ्नम्' । "चन्द्रमा इति । स यथा-स्थित एव 'वृचः' ; "तस्य यत् सौम्यं न्यक्तं मास, तं चन्द्रमसं चकार"-इतिप्राग्युक्तत्वात्[4] । 'सः' उक्तरूपो वृचः 'यत्र' यस्मिन्

१— "स्वाभिमतं पक्षं माह—"-इति ट ।

२— 'इन्द्रेणोक्तं वचनं तत्प्रमाणत्वेन पुनः आवयन् निगमयति'-इति ट ।

३— इहैव श्रुता सप्तमी कण्डी (४५२ पृ०) द्रष्टव्या ।

४— ४१७ पृ० ६-पङ्क्तिमध्यतो द्रष्टव्यम् ।

दिवसे 'पुरस्तात् पश्चात्' च 'न' दृश्यते, 'तत्' तेन 'एनं' दृचम् 'एतेन' हविषा 'सर्वं' साकल्येन 'हन्ति', 'न किञ्चन' अवशेषयति। अतः सर्वपापक्षयाय चन्द्रदर्शनरहितायां शुद्धामावास्यायां मेवोपवसेदित्यर्थः ॥

उक्तार्थज्ञानं प्रशंसति— "सर्वं ह वा इति ॥ १२ ॥

उपवासतिथिविषये केषाञ्चित्पक्षं माह— "तद्वैक इति। केचन चन्द्रदर्शनयुक्तायां चतुर्दशीयुक्तामावास्यायां मेवोपवसन्ति। एषा मभिप्राय माह— 'यः' परस्मिन्नहनि 'नोदेतेति' अव्यवहिते एव भविष्यति काले उदयं न प्राप्नोतीति; अतोऽदर्शनोपवासपक्षो न युक्त इत्यभिप्रायः। स्वपक्षे को लाभ इत्यत आह— "अदो हैवेति। 'अदः' अविप्रकृष्टं प्रत्यक्षं चन्द्राख्यं[1] खलु 'देवानां मविचीर्ण मज्ञं भवति'; अतो यथा न विच्छीर्णं भवेत्, तथा (कर्त्तव्यम्)। 'अथ' चन्द्रक्षयसमनन्तर मेव 'एभ्यः' देवेभ्यो 'वयम्' 'इतः' लोकात् 'प्रदास्याम इति'। अविच्छीर्णत्व मेव दर्शयति— "तद्धीति। पूर्वार्जिताच्छेऽवशिष्टे पुनरन्नसञ्चये सत्यन्नघातत्वात् 'तत् मस्तृद्धम्' तथाविधान्न एव प्रतृद्धान्नो भवति। तस्मात् चन्द्रदर्शनयुक्तितिथावेवोपवासो युक्त इति ॥

दृष्टोपवासपक्षे दोषाभिधानपुरःसर मदर्शनोपवास मेव समर्थयते— "असोमयाजी वित्यादिना। 'तु'-शब्दः पक्षं व्यावर्त्तयति। 'असोमयाजी क्षीरयाजो भवति'; स मेव नयेदिति निगमितत्वात्। 'अदो वैव' आहृतं क्षीर मेव लोकान्तरवर्त्ति सत्, 'सोमो

१— 'चन्द्रारघं (? घ A. ?)'–इति ठ।

राजा भवति'; "स एष आकृतिभ्यो जातः पश्चाद् ददृशे"-इति वक्ष्यमाणत्वात्[१] ॥ १ ४ ॥

अस्तु, ततः किं मित्यत आह— "अथ यथैवेति। 'यथा' 'पुरा' चन्द्रस्यौषध्युदकेषु प्रवेशरहितकाले, अमावास्यातः पूर्वदिवसे इत्यर्थः। तत्र यथा गावः 'केवलीः' चन्द्रानुप्रवेशरहिताः 'ओषधीः' 'अपः' च आहारं कृत्वा, 'केवलं' चन्द्ररहितम् 'एव' 'पयो दुहे' दुहते[२]। "लोपस्त आत्मनेपदेषु"-इति[३] त-लोपः, "बहुलं छन्दसि"-इति[४] रुट्। 'एवं' 'तत्' चीरयजनं भवति; चन्द्रानुप्रवेशरहितं केवलं भवतीत्यर्थः। अतो दृष्टोपवासे चन्द्रस्यौषधीष्वननुप्रवेशेन केवलत्वात् तदानीं चीरस्य चन्द्रात्मकान्नत्वाभावात् स पचो न युक्त इत्यर्थः। अस्तु, को दोष इत्याशङ्क्याह अवश्यं चन्द्रानुप्रवेशता चीरेण भवितव्य मित्याह— "एष वा इति। एतत् मान्नाय्यब्राह्मणवद् व्याख्येयम्[५]। 'एनम्' अमावास्याया मप्योषधीष्वनुप्रविष्टम् ताभ्यः 'आकृतिभ्यः' सकाशात् चीररूपेण 'सम्भृत्य' 'अधिजनयति' पुनरुत्पादयति चीरयाजी। 'स एषः' अमुं लोक मागतः, पुनराकृतिद्वारा[६] अन्तरिक्षे उत्पन्नः, 'पश्चात्' प्रतीच्यां दिशि 'ददृशे' दृश्यते ॥ १ ५ ॥

"तदा एतदिति। 'तत्' एतच्चन्द्राख्य मप्सं 'परिप्लवते' परि-

१— परस्या मेव कण्डिकायाम् (१५पं०)। मूलन्तु ४४७ए० १६पं० द्रष्टव्यम्।
२— धा० पा० अदा० उ० ४। ३— पा० सू० ७. १. ४१।
४— पा० सू० ७. १. ८। ५— मूलम् ४४५ ए० ८ पं०; तद्व्याख्यानम् ४५१ ए० द्रष्टव्यम्। ६— '०द्वारेण'-इति ङ।

भ्रमति। उक्तार्थज्ञानं प्रशंसति— "अविच्छीर्णं ह वा अस्यास्मिन्निति ॥ १ ६ ॥

अन्नस्याविच्छीर्णत्वाच्च मान्नाय्यस्यावश्यं दातव्यता माह— "तद्वा एतां रात्रिमिति। चन्द्रोपचय एवान्नप्रत्यवः; च्युतस्य च भूलोकप्रवेश उक्तः; प्रच्युतञ्च तदन्नं तथैव प्रणाश मपाप्य यथा पुनरागच्छेदिति कामयित्वा मान्नाय्ययाजिभ्येतेऽस्माकं क्षीररूपेण पुनः सम्पाद्य दास्यन्तीत्याशंसां कुर्वन्ति। अतोऽवश्यं चन्द्रदर्शनरहिततिथौ मान्नाय्यं कर्त्तव्य मित्यर्थः ॥

उक्तार्थज्ञं प्रशंसति— "आह वा इति। 'निष्याः' नीचाः; "समानी यश्च निष्याः"-इत्यादिमन्त्रवर्णात्[1]। उक्तार्थज्ञानिकृष्टतराः। तं ज्ञानिन मयं मग्नाच्छादनादिकं प्रयच्छतीत्याशंसनीयत्वं युक्त मेवेत्याह— "यो वा इति ॥ १ ७ ॥

चन्द्रस्य क्षयोदयकारणाभिधानव्याजेन चन्द्रदर्शनरहिता ममावास्यां प्रशंसति— "तद्वा एष एवेन्द्र इत्यादिना। तपन्नादित्य एवेन्द्रः, परमैश्वर्ययोगात्। चन्द्रस्य वृत्रत्वं प्रतिपादितम्। 'स चन्द्रमाः' 'अस्य' सूर्यस्य प्रचुजन्मैव भवति। अनेन सूर्याचन्द्रममोरिन्द्रवृत्रत्वे समर्थिते भवतः[2]। भ्रातृव्यत्वं समर्थयते— "तस्मा-

---

१— तै० ब्रा० २. ४. १. २।

२— वृत्रपदार्थनिर्णये त्वेव मुक्तं यास्केन— "तत् को वृत्रः? मेघ इति नैरुक्ताः; त्वाष्ट्रोऽसुर इत्यैतिहासिकाः; अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्धकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्त्यहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च; विदृद्धा शरीरस्य स्रोतांसि निवारयाञ्चकार, तस्मिन् हते प्रसस्यन्दिरे आपः"-इत्यादि निरु० २. ५. २।

दिति। यस्मादयं तस्य भ्रातव्यः, 'तस्मात्' 'पुरा' अमावास्यातः पूर्वदिवसेषु अत्यन्तं दूरं यथा भवति तथा 'उदितः' अपि 'अथैनं' सूर्याख्यं मित्रं प्रति 'एतां रात्रिम्' अमुं अमावास्यादिवसं प्रति 'उपैव' समीपे एव 'न्यायवते' आगच्छति। अथ 'सः' एव 'अस्य' दुष्टस्य 'व्यात्तं' विवृतं मुखं प्राप्नोति ॥ १८ ॥

"तं यमित्येति। 'तं' मुखान्तर्गतं ग्रसितुं गिरन्नेव सूर्यं उदेति। 'सः' तस्मिन् दिवसे 'न पुरस्तात्' दृश्यते। उक्तार्थमेव प्रशंसति— "यमते ह वा इति। चन्द्राख्यभ्रातव्यस्यात्यन्त मदर्शनात् तद्राज्ञौ 'सपत्नाः न सन्ति' एव 'इत्याहुः' ॥ १९ ॥

एवं सपत्नं चन्द्रं निःशेषेण पीत्वा पुनर्निर्गमयति— "तं निर्द्धीयेति। पूर्वस्यां दिशि भक्षितः, 'पश्चात्' भागे निर्गतो रेखामात्रो दृश्यते; 'सः' च 'पुनः' कलाक्रमेण तस्यैव सूर्यस्याश्नत्वाय प्रवर्द्धते ॥

ज्ञातुः फलं माह— "यदि हेति। 'अस्य' ग्रहुरपि अनेन हतधनोऽपि ऋषिवाणिज्यादिकया कयाचिद्वृत्त्या समृद्धो भवन् 'एतस्य' ज्ञातुरन्नार्थ मेव वर्द्धते ॥ २० ॥

सान्नाय्यस्येन्द्रत्व माख्यायिकया प्रतिपादितम्, तत्र केषाञ्चित्पक्ष मुपन्यस्य पुनरिन्द्रत्व मेव सिद्धान्तयति— "तद्वैक इति। 'तत्' सान्नाय्यम्। महेन्द्रत्वे कारणं माह— "एष पुरेति। पूर्वं केवल मिन्द्रः सन्नपि; यथा कश्चिद्राजमात्रः सन् पश्चाच्छत्रून् जित्वा महाराजतां प्राप्नोति। यत एवं वृत्रं हत्वा महेन्द्रोऽभवत्, अत एवं युक्त मित्यर्थः। स्वपक्षे युक्तिं माह— "वृत्रस्य वधादिति।

वृत्रवधात् प्राक् यतोऽयं केवलः 'इन्द्रः', तथाविध एव स 'वृत्रं' हतवान्; अतः पश्चादागतं महत्व मप्रयोजक मिति 'इन्द्रायेत्येव कुर्यात्' इति ॥ २१ ॥ ३ ॥ [६. ४.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे षष्ठाध्याये चतुर्थं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो घोरं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ ६ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसीरीःखिदशतरुलताधेनुसौवर्णभूमीः।
रत्नोक्षां रुक्मवाजिद्विपमहितरथौ सायणिः सिङ्गणार्यो,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटस्थ ॥
धान्याद्रिं धन्यजन्मा तिलभव मतुलः स्वर्णजं वर्णमुख्यः,
कार्पासीयं कृपावान् गुडकृत मजडो राजतं राजपूज्यः।
आज्योत्थं प्राज्यजन्मा लवणज मनृणः शार्करं चार्कतेजाः,
रत्नाढ्यो रत्नरूपं गिरि मकृत मुदा पाचसात्सिङ्गणार्यः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीहरिहरमहा-
राजसाम्राज्यधुरन्धरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे माध्यन्दिनशतपथब्राह्मणभाष्ये प्रथम-
काण्डे षष्ठाध्यायः समाप्तः ॥ ६ ॥

---

*

[अथ सप्तमाध्याये प्रथमं ब्राह्मणम्]



स वै पर्णशाखया व्वत्सानपाकरोति। तद्यत्पर्ण-शाखया व्वत्सानपाकरोति युच्च वै गायत्री सोम मुच्छा-पतत्तदस्या ऽआहरन्त्या ऽअपादुस्ताभ्यायुत्य* पर्ण प्रच्चि-च्छेद गायत्र्यै वा सोमस्य वा राज्ञस्तुत्यतित्वा पर्णो† ऽभवत्तस्मात्पर्णो नाम तद्यदेवाच सोमस्य न्यक्तं तदि-हाप्यसदिति तस्मात्पर्णशाखया व्वत्सानपाकरोति ॥ १ ॥

ता‡ माच्छिनत्ति। इषे त्वोर्ज्जे त्वेति व्वृष्ट्यै तदाह यदाहेषे त्वेत्यूर्ज्जे त्वेति यो व्वृष्टादूर्ग्रसो जायते तस्मै तदाह ॥ २ ॥

अथ मातृभिर्व्वत्सान्त्समुवार्ज्जन्ति। स व्वत्सꣳ शाख-योपस्पृशति व्वायुव स्थेत्ययं वै व्वायुर्योऽयं पुवत ऽएष वा ऽइदꣳ सर्व्वं प्रप्याययति युदिदं किञ्च व्वर्षत्येष वा ऽएतासां प्रप्यायायिता तस्मादाह व्वायुव स्थेत्युपायुव

---

* 'व्यपाधुस्ताभ्यायुत्य'–इति सा०-सम्मत इति डा०-वेवरः।

† 'स पर्णो'–इति ख। ‡ 'त'–इति च।

स्थेत्यु हैक आहुरुप हि द्वितीयोऽवतीति* तदु तथा नु ब्रूयात् ॥ ३ ॥

अथ मातृणा मेकाꣳ शाखयोपस्पृशति। व्वत्सेन व्याकृत्य देवो वः सविता प्रार्प्पयत्विति सविता वै देवानां प्रसविता सवितृप्रसूता यज्ञꣳ सम्भरानिति तस्मादाह देवो वः सविता प्रार्प्पयत्विति ॥ ४ ॥

श्रेष्ठतमाय कर्म्मण ऽइति। यज्ञो वै श्रेष्ठतमं कर्म्म यज्ञाय हि तस्मादाह श्रेष्ठतमाय कर्म्मण ऽइति ॥ ५ ॥

आप्यायध्व मघ्न्या ऽइन्द्राय भाग मिति। तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येव मेवैतद्देवताया ऽआदिशति यदाहाप्यायध्व मघ्न्या ऽइन्द्राय भाग मिति ॥ ६ ॥

प्रजावतीरनमीवा ऽअयक्ष्मा ऽइति। नाच तिरोहित मिवास्ति मा व स्तेन ऽईशत माघशꣳस ऽइति मा वो नाष्ट्रा रक्षाꣳसीशतेत्येवैतदाह ध्रुवा ऽअस्मिन् गोपतौ स्यात बह्वीरित्यनपक्रमिण्योऽस्मिन् युजमाने बह्व्यः स्यातेत्येवैतदाह ॥ ७ ॥

अथाहवनीयागारस्य वा पुरस्ताद्। गार्हपत्यागारस्य वा शाखा मुपगूहति युजमानस्य पशून् पाहीति तद् ब्रह्मणैवैतद्युजमानस्य पशून् परिददाति गुप्त्यै ॥ ८ ॥

---

* 'द्वितीयोऽयतीति'–इति च।

तस्यां पवित्रं करोति । व्वसोः पवित्र मसीति यज्ञो वै व्वसुस्तस्मादाह व्वसोः पवित्र मसीति ॥ ९ ॥

अथ यवाग्वैताꣳ रात्रि मग्निहोत्रं जुहोति । आदित्यं वा ऽएतद्देवतायै हविर्भवति यत्पयः स यत्पयसा जुहुयाद्यथान्यस्यै देवतायै हविर्गृहीतं तदन्यस्यै जुहुयादेव तत्तस्माद्यवाग्वैताꣳ रात्रि मग्निहोत्रं जुहोति जुह्वत्यग्निहोत्र मुपक्लृप्तोखा भुव*त्यथाहोपस्तृष्टां प्रब्रूतादिति यदा प्राहोपस्तृष्टेति ॥ १० ॥

अथोखा मादत्ते । द्यौरसि पृथिव्यसीत्युपस्तौत्येवैना मेतन्मह्यत्येव यदाह द्यौरसि पृथिव्यसीति मातरिश्वनो घर्म्मोऽसीति यज्ञ मेवैतत्करोति युथा घर्म्मं प्रवृञ्ज्यादेवं प्रवृणक्ति विश्वधा ऽसि परमेण धाम्ना दृꣳहस्व मा ह्वारिति दृꣳहत्येवैना मेतद्दृश्थिलां करोति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतद्दृढला माशास्ते ॥ ११ ॥

अथ पवित्रं निदधाति । तद्वै प्राङ् निदध्यात्प्राची हि देवानां दिगथो ऽउदगुदीची हि मनुष्याणां दिगयं वै पवित्रं योऽयं पवते सोऽयु मिमांल्लोकांस्तिर्यङ्नुपवते तस्मादुदङ् निदधात् ॥ १२ ॥

---

* '०खा भुव'—इति डा०-वेबरेण च दृष्टः । च-पाठस्तु '०खा भव'—इति ।

तद्यथैवादः । सोमꣳ राजानं पवित्रेण सम्पावयन्त्येवꣳ मेवैतत्सम्पावयत्युदीचीनदꣳ वै तत्पवित्रं भवति येन तत्सोमꣳ राजानꣳ सम्पावयन्ति तस्मादुदङ् निद-ध्यात् ॥ १३ ॥

तन्निदधाति । व्वसोः पवित्र मसीति यज्ञो वै व्वसुस्तस्मादाह व्वसोः पवित्र मसीति शतधारꣳ सहस्रधार मित्युपस्तौत्येवैनदेतन्महयत्येव यदाह शतधारꣳ सहस्रधार मिति* ॥ १४ ॥

अथ व्वाचंयमो भवति । आ तिस्रणां दोग्धोर्व्वाग्वै यज्ञो व्विक्षुब्धो यज्ञं तनवा ऽइति ॥ १५ ॥

तदानीयमान मभिमन्त्रयते । देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वेति तद्यथैवादः सोमꣳ राजानं पवित्रेण सम्पावयन्त्येवꣳ मेवैतत्सम्पावयति ॥१६॥

अथाह का मधुक्ष ऽइति । अमू मिति सा व्विश्वायु-रित्युथ द्वितीयां पृच्छति का मधुक्ष ऽइत्यमू मिति सा व्विश्वकर्म्मेत्युथ तृतीयां पृच्छति का मधुक्ष ऽइत्यमू मिति सा विश्वधाया ऽइति तद्यत्पृच्छति व्वीर्याण्येवा-स्वेतद् दधाति तिस्रो दोग्धि त्रयो वा ऽइमे लोका ऽएभ्य ऽएवैनदेतल्लोकेभ्यः सम्भरत्युथ कामं व्वदति ॥ १७ ॥

---

* 'मिति'–इति क, ख ; 'मितु'–इति ग ।

अथोत्तमां दोहयित्वा। येन दोहयति पात्रेण तस्मिन्नुदस्तोकं मानीय पल्यङ्क* प्रत्यानयति यदेव पयसोऽहार्यि तदिहाप्यसदिति रसस्यो चैव सर्व्वत्वायेदꣳ हि यदा व्वर्षत्यथौषधयो जायन्त ऽओषधीर्जुग्ध्वापः पीत्वा तत ऽएष रसः सम्भवति तस्माद् रसस्यो चैव सर्व्वत्वाय तदुद्वास्यातनक्ति तीव्रीकरोत्येवैनदेतत्तस्मादुद्वास्यातनक्ति ॥ १८ ॥

स ऽआतनक्ति। इन्द्रस्य त्वा भागꣳ सोमेनातनक्मीति तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येव मेवैतद्देवतायाऽआदिशति यदाहेन्द्रस्य त्वा भाग मिति सोमेनातनक्मीति स्वदयत्येवैनदेतद्देवेभ्यः ॥ १९ ॥

अथोदकवतोत्तानेन पात्रेणापिदधाति। नेदेनदुपरिष्टान्नाष्ट्रा रक्षाꣳस्यवमृशानिति व्वज्रो वा ऽआपस्तद्व्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति तस्मादुदकवतोत्तानेन पात्रेणापिदधाति ॥ २० ॥

सोऽपिदधाति। व्विष्णो हव्यꣳ रक्षेति यज्ञो वै व्विष्णुस्तद्यज्ञायैवैतद्धविः पुरिददाति गुप्त्यै तस्मादाह व्विष्णो हव्यꣳ रक्षेति ॥ २१ ॥ ४ ॥

॥ इति पञ्चमप्रपाठके चतुर्थं ब्राह्मणम् [७. १.] ॥

---

* 'पल्यङ्क'-इति च।

॥ श्रीगणेशाय नमः ॥

प्रधानयागः सकलः साख्यानः सम्प्रकीर्त्तितः ।
प्राधान्येनाथ तद्धर्मा निरूप्यन्तेऽथ[1] सप्तमे ॥ ७ ॥

तत्रादौ सन्निहितत्वात् सान्नाय्यधर्माः[2] प्रथम मुच्यन्ते । तत्र वत्सापाकरणाय शाखाच्छेदं[3] विधास्यन् तदुचितं शाखायाः पर्णत्वं सार्थवाद माह— "स वै पर्णशाखयेति । 'सः' वत्सानामपाकर्त्ता । शाखायाः पर्णत्वं प्रशंसितु मनुवदति— "तद्यत्पर्णशाखयेति । 'यत्र' यस्मिन् देशे 'गायत्री' पक्षिरूपेण 'सोमम्' अभिलक्ष्य आनयनाय अगच्छत्, 'तत्' 'अस्याः आहरन्त्याः[4]' 'अपाधस्ता[5]' अधस्तात् प्रदेशे

१— 'निरूप्यन्तेऽत्र'–इति ज ।

२— "अग्नीषोमीय एव पौर्णमासं हविः सान्नाय्य मामावास्यम्"–इति ४०६ पृ० । "स प्रजापतिः पशूनब्रवीदेतदस्मै सन्नयतेति, तत् पशव ओषधीभ्यो ऽध्यात्मन्त्समनयन् ; तत् प्रत्यदुहन् ; यत् समनयन्, तत् सान्नाय्यस्य सान्नाय्यत्वम्"–इति तै० सं० २. ५. ३. ३ । तदेतस्मात् पशुपयसां सान्नाय्यत्व मवगम्यते । गोरस इति, एतद्ब्राह्मणवचन-व्याख्यायां सायणः । 'सान्नाय्यं दधिपयोलक्षणम्'–इति चाचैव (११. २. ६. ६.) भाष्ये सायणः । 'सम्यङ् नीयते होमार्थं मग्निं प्रति इति सान्नाय्यं हविर्विशेषः'–इति पा० ३. १. १२६–सूत्रवृत्तौ दीक्षितः । 'सान्नाय्यं दुग्धदधिरूपं हविः'–इति कात्या० श्रौ० ४. २. १७–सूत्र-वृत्तौ याज्ञिकदेवश्च । "सोमः खलु वै सान्नाय्यम्"–इति तै० ब्रा० ३. २. ३. ११ । सान्नाय्यविधानादिकं सर्वञ्चैतः पूर्वस्मिन् ब्राह्मणे ४–११ कण्डीषु द्रष्टव्यम् । ३— 'वत्सापाकरणार्थशाखाच्छेदं'–इति ठ ।

४— 'आनयनायागच्छन्नाहरन्त्याः'–इति ज, ठ ।

५— 'अपादस्ता'–इति बङ्गमूलपाठः ; 'अपावस्ता'–इति च भाष्यपाठो डा०-वेवरेण दृष्टः । वस्तुतो 'अपादस्ता' अप-अदस्तम्, अनुपत्तौण मित्यर्थः स्यात् साधुः । तै० आ० ४. १. २, तै० ब्रा० ३. २. ३. १२ द्रष्टव्यम् ।

'अभ्यायत्य' यत्[1] 'पर्णं', तत्[2] 'प्रच्छिच्छेद'। कस्येत्याह— "गायत्र्यै वा, सोमस्य वा राज्ञ इति। 'वा'-शब्दस्यार्थे, 'गायत्र्याः' 'सोमस्य' चेत्यर्थः; अननुष्ठानत्वेन विकल्पस्यानुचितत्वात्। पतितात् पर्णात् उत्पन्नः पलाशः, तस्य 'पर्णत्वम्'[3]। अस्त्वेवं तथाप्यस्यैव शाखाकरणे कोऽभिप्राय इत्यत आह— "तद्यदेवेति। 'तस्मात्' सोमांशस्यैव सम्पादितप्रायत्वात् 'पर्णशाखया' एव माहात्म्यः सकाशात् 'वत्सान्' 'अपाकुर्यात्' पृथक् कुर्यात्[4]। कात्यायनस्तु ग्रामीशाखा मपि विकल्पेनाचावोचत्— "पर्णशाखां छिनत्ति शामीशाखां वा"-इति[5]। "शम्याः पलञ्"-इति[6] विकारेष्वपि ॥ १ ॥

इदानीं छेदने मन्त्रं[7] विधत्ते— "ता मिति। "तदिति। इत्यत इतौट्। यदिट्, तदाक्य मित्यर्थः। पृथग्-योगस्य विवक्षितत्वात् वाक्ययोरपि पौर्वापर्यं विवक्षित मिति गम्यते। स्पष्ट मन्यत्॥

सूत्रकारस्तु मन्त्रभेदपक्ष मपगृह्य शाखाच्छेदे एव विकल्पितम्, छेदनमन्त्रमनयोर्वेति योगभिन्नतां चाह— "पर्णशाखां

१, २— ज-ङ-पुस्तकयोरिह यत्तत्पदे न दृश्येते।

३— 'तस्य पर्णत्वम्'-इति ङ-पुस्तके नास्ति।

४— 'सम्पादितप्रायत्वात् अस्यैव शाखाच्छेदनम्'-इत्येव ङ।

५— का० श्रौ० सू० ४. २. १। "इमे त्वेत्यूर्जे त्वेति वा"-इति तत्र तच्छेषः (वा० सं० १. १. १, २.)। "उभयोर्मन्त्रयोश्छेदने विधानात् करणमन्त्रत्वेन समुच्चयासम्भवाद् विकल्पः"-इति तत्र या० दे०।

६— पा०सू० ४. ३. १४२। ७— वा०सं० १. १. १ (१, २ वा.)।

क्षिनक्ति ग्रामीणौ वेषेत्वेति, ऊर्जे त्वेति वा, क्षिनद्मीति वोभयोः साकाङ्क्षत्वात्, सन्नमयामीति वोत्तरे"-इति[१] ॥ २ ॥

अथ वत्सानां मातृसंयोजनम्। तत्रैकस्य शाखया समन्त्रक मुपस्पर्शनमाह— "अथ मातृभिरिति। 'समवाजेन्ति' संयोजयन्ति। हे वत्स! गावस्थ! यूयं 'वायवः स्थ' प्रवर्द्धकत्वेन वायुसम्बन्धाद् यूय मपि वायवो भवथेति मन्त्रार्थः[२]। कथ मेतेषां वायुत्वव्यवहार इति तत्समर्थनायाह— "अयं वा इत्यादि। वायोर्गवां वर्द्धकत्व-समर्थनाय सर्वजगद्वर्द्धकता माह— "एष वा इदं सर्वं मिति। एतन्मन्त्रशेषत्वेन[३] शाखान्तरे पठितं[४] मन्त्र मनूद्य निराचष्टे— "उपायव स्थेत्यु हैक इति[५]। यदेनं भागं ब्रूयात्, यजमानस्य 'द्वितीयः' प्रचुरपागच्छति, अतो 'न ब्रूयात्' ॥३॥

प्रस्तुतानां गवां मध्ये एकस्याः वत्सात् पृथक् स्पर्शनम्, तन्मन्त्रं चाह— "अथ मातृणा मिति। 'वत्सेन' 'व्याकृत्य' पृथक्कृत्य। प्रेषणकर्मणि सवितुः प्रयोजकत्वे कारण माह— "सविता वा इति। 'यज्ञं' यज्ञसाधनं क्षीरम्, तत् 'सम्भरान्' सम्भरेयुः ॥ ४ ॥

किं तत् श्रेष्ठतमं कर्म? इति, तदाह— "यज्ञो वा इति। साक्षात्स्वर्गसाधनत्वादितरकर्मभ्यः 'श्रेष्ठतमत्वम्' ॥ ५ ॥

१— का० श्रौ० सू० ४. २. १, २, ३।
२— वा० सं० १. १. २ (३ वा.)। का० श्रौ० सू० ४. २. ७।
३— नास्त्येतद्विशेषणं ङ-पुस्तके।
४— तै० सं० १. १. १; तै० ब्रा० ३. २. १ द्रष्टव्यम्।
५— तै० सं० १. १. ३। का० श्रौ० सू० ४. २. ८।
६— वा० सं० १. १. २. (४ वा.)। का० श्रौ० सू० ४. २. ९।

मन्त्रभागे यद्देवताविशेषनामनिर्देशपूर्वक मादेशनम्, तत्प्रशंसति— "आप्यायध्व मघ्निया[1] इति। यथा अग्नये हविर्ग्रहणादौ अग्नये जुष्ट मिनीमीति[2] नामविशेषतो देवतादेशनं क्रियते, तद्वदिह मपि पाठेनैव कृतं भवतीत्यर्थः[3] ॥ ६ ॥

"प्रजावतीरित्यादि। स्पष्टार्थता माह— "नाघेति। 'मा वः'-इत्यस्य मन्त्रभागस्य तात्पर्यं माह— "नाष्ट्रेति। 'नाष्ट्रा' नाष्ट्राणि नाशकारीणि, 'रक्षांसि'। रक्षितव्याभ्य इति रक्षणापादानभूतानि स्तेनव्याघ्रादीनि 'नाष्ट्रा'। ध्रुवशब्दगोपतिशब्दयोरर्थं माह— "ध्रुवा अस्मिन्निति ॥ ७ ॥

शाखागुच्छप्रदेशविशेषम्, तत्र समन्त्रकं गूहनञ्चाह— "अथाहवनीयागारस्थेति। अग्निपुरोदेशे स्थापयन्नध्वर्युः असुं मन्त्रं ब्रूयात्— "यजमानस्थेति[4]। हे शाखे! त्वं 'यजमानस्य पशून्' रक्ष। एतन्मन्त्रपाठतात्पर्यं माह— "तद्रक्षणेवेति। एतन्मन्त्रपाठेन शाखायै पशूनां परिदानम्, तदधीनत्वेन रक्षणार्थम् ॥ ८ ॥

इदानीं दोहनार्थं शाखायां समन्त्रकं[5] पवित्रबन्धनं विधत्ते— "तस्यां पवित्र मिति। (दोहनार्थं[6]) 'तस्यां' शाखायां 'पवित्रं'

१— 'अघ्नियाः'—इति तैत्तिरीयपाठः; अत्रत्यपाठस्तु 'अघ्याः'—इत्येव।

२— पुरस्तात् (३८ पृ० ७ पं०) १. २. १७ द्रष्टव्यम्।

३— "ऐन्द्रं भवति माहेन्द्रं वा"—इति का० श्रौ० सू० ४. २. १०।

४— वा० सं० १. १. ४. (५ वा.)। का० श्रौ० सू० ४. २. ११।

५— वा० सं० १. २. १। का० श्रौ० सू० ४. २. १५।

६— नास्त्येतत् पदं ढ-पुस्तकादन्यत्र।

कुशद्वयात्मकं चित्वतं वा 'करोति' बध्नीयात्। तथाच सूत्रम्— "वसोः पवित्र मिति पवित्र मस्यां बध्नाति कुशौ, चित्वदा"-इति[१]। 'वसु'-शब्दार्थं माह— "यज्ञो वा इति। पुनात्यनेनेति[२] 'पवित्रम्'[३], तस्मिन्नित्यर्थः ॥ ९ ॥

अमावास्यायां रात्रौ सन्नयतः क्षीरस्यान्नार्थत्वेन नियोगात् अग्निहोत्रस्य द्रव्यान्तरं विधत्ते— "अथ यवाग्वेति। एतच्छब्दार्थं माह— "यत्पय इति। विपक्षबाधपुरःसरं स्वपक्ष मुपसंहरति— "स यत्पयसेति। इन्द्रार्थस्य दुग्धस्य अग्न्यर्थत्वस्याप्युक्तत्वात्। यद् यवाग्वैव होतव्यम्। "यवाग्वाग्निहोत्रहोमः सन्नयतः"-इति[४] कात्यायनः। "जुह्वत्यग्निहोत्र मिति। दोहकालोपलक्षणार्थम्, जुह्वतिसमकालम्; तद्धोमे परिसमाप्त एव 'उखा' सान्नाय्यस्थाली सा अध्वर्युणा अपणप्रदेशे 'उपक्लृप्ता' भवति। तस्याः समानयनानन्तरम् 'उपसृष्टां' वत्सेन सङ्गताम् 'प्रब्रूतात्'-'इति' दोग्धारं प्रत्यध्वर्युः। 'यदा' उपसृष्टा, तदा 'उपसृष्टेति' दोग्धा 'प्राह' ब्रूयादित्यर्थः। दोग्धा च शूद्रव्यतिरिक्तो भवेत्; "वाग्यतो दोहयत्यशूद्रेण"-इतिसूत्रात्[५] ॥ १० ॥

१— का० श्रौ० सू० ४. २. १५, १६। २— पा० सू० ३. २. १८५।

३— "चित्वद्दर्भमयं पवित्रम्"-इत्यापस्तम्बः। "हस्तप्रादेशमात्रं तु चित्वत् कृत्वा पवित्रकम्"-इति। पवित्रं वेणाकार मिति केचित्। नवकुशवेणी मिति श्रीअनन्तः। वस्तुतो द्वे साग्रे दर्भदले पवित्रं कर्त्तुं शाखायां बध्नाति, कुशत्रयस्य रज्वाकारं कृत्वा वा बध्नातीति सम्प्रदायः।

४— का० श्रौ० सू० ४. २. १७। तण्डुलैः ग्रन्थिलपक्वा यवागूरित्युच्यते।

५— का० श्रौ० सू० ४. २. २२। 'अशूद्रेण=त्रैवर्णिकेन'-इति माधवः।

अध्वर्योः समन्त्रकं[1] स्रुक्स्रुवादानं विधत्ते— "अथोखा मिति। उखायाः द्यु-पृथिव्यात्मकत्वस्य कदाचिदप्यसम्भवात् उपस्तुतिमाह मिद मित्याह— "उपस्तौत्येवेति। सापि किमर्थमित्यत आह— "मह्यत्येवेति। स्तुत्या पूजनं लोके प्रसिद्धम्। अधिश्रयणे मन्त्रं[2] माह— "मातरिश्वन इति। 'मातरि' अन्तरिक्षे श्वसतीति 'मातरिश्वा' वायुरादित्यो वा[3]। तस्य घर्मस्य मषि; तेन दीप्यमानत्वात्। एतत्पाठेन 'यज्ञ मेव' कृतवान् भवति। तत्कथ मिति, तदुपपादयति— "यथेति। यज्ञे 'यथा' 'घर्मो' प्रवर्ग्यं 'प्रवृञ्जात्', 'एवं' स्रुक्स्रुवाधिश्रयणेन 'प्रवृणक्ति' प्रवर्ग्यं कृतवान् भवति; अतो यज्ञसम्पादनम्। "विश्वधायाः"-इतिमन्त्रभागस्य तात्पर्याभिधानं स्पष्टम्। "मा ते"-इतिमन्त्रभागे 'यज्ञपति'-शब्दार्थं माह— "यजमानो वा इति। 'क्रूरा' नाम्नः, तद्भावम् 'आग्नास्ते'— 'मा क्रार्षीत्'-इत्यनेन। "कॄ कौटिल्ये"-इति[4] धातुः॥ ११ ॥

अथ पवित्रस्थापनं तदयनियमञ्चाह— "अथ पवित्र मिति। वत्सापाकरणानन्तरं यत् प्राक्षापवित्रं कृतम्, तत् प्रागग्रं स्रुक्स्रुवां 'निदध्यात्'। दैव्यस्य पवित्रस्य देवदिगाभिमुख्यं युक्तम्; प्राच्या इन्द्राधिष्ठितत्वात्, इन्द्रस्य च सर्वदेवतात्मकत्वात्, तद्दैवत्यं पवित्रम्। दिगन्तर माह— "अथोदीची हीति। उत्तरस्यां प्रायेण मनुष्यप्राचुर्यात्। किञ्च यस्माच्चगत्पवित्रभूतो वायुरपि 'तिर्यङ्नुपवते'

१— वा० सं० १. २. २। का० श्रौ० सू० ४. २. १९।

२— वा० सं० १. २. ३। का० श्रौ० सू० ४. २. २०।

३— निरु० ७. ७. ४ द्रष्टव्यम्। ४— धा० पा० स्वा० प० ९३१।

तिर्यग् गच्छति; अतोऽस्यापि पवित्रत्वात् तत्सौम्याय 'उदङ् निदध्यात्' ॥ ११ ॥

सान्नाय्यस्य सोमात्मकत्वात् तत्पवनसाधन-दशापवित्रवदस्या-प्युद्गयत्वं युक्त मिति स-दृष्टान्त माह— "तद्यथैवाद इति ॥ १२ ॥

पवित्रनिधानस्य मन्त्र माह— "तत्त्विदधाति वसोरिति[1] ॥ १३ ॥

मौनकालनियमावधि माह— "अथेति। 'तिसृणां दोग्धोः' तिसृणां गवां दोहावधि। 'वाचा' मन्त्रेण साध्यत्वात् 'वाग्= यज्ञः'। अथ वाक्शब्देन नियता वाक् विवक्षिता। वाचि यज्ञो-पयोगिन्यां सत्यां मनसि विक्षेपो भवति, तत्परिहाराय वाङ्-नियमविधानम्[2] ॥ १५ ॥

पयस आसेचनसमये अध्वर्योर्जपं विधत्ते[3]— "तदानीयमान मिति। 'अभिमन्त्रणम्' आभिमुख्येन जपः; "आसिच्यमाने जप-तीतिसूचात्[4]। 'सुप्रा' सुष्ठु-पवित्रेण पावयित्वा। स्पष्ट मन्यत् ॥ १६ ॥

"अथाहेति। अध्वर्युः प्रथमायां गवि दुग्धायां 'कां' गाम् 'अधुक्षः' दुग्धवानसीति[5] ब्रूयात्। सोऽपि दोग्धा गङ्गां गौरी मिति दुग्धाया गोर्नाम मिति निर्दिशेत्। अथ सोऽध्वर्युस्तां 'सा विश्वायुः'-'इति' ब्रूयात्[6]। एव मुत्तरयोरपि व्याख्या। 'विश्वायुः' वक्तव्या,

---

१— वा० सं० १. ३. १। का० श्रौ० सू० ४. २. २१।

२— 'वाग्यमविधानं'—इति ज। ३— 'अध्वर्युर्जपति'—इति ऊ।

४— का० श्रौ० सू० ४. २. २३। तत्र मन्त्रः — वा० सं० १. ३. २।

५— का० श्रौ० सू० ४. २. २४। तत्र मन्त्रः — वा० सं० १. ३. ३।

६— वा० सं० १. ४. १। का० श्रौ० सू० ४. २. २५।

बङ्कचीरेत्यर्थः। 'विश्वकर्मा' बङ्कत्वनिसाधनदोहकर्मोपेता[1]। 'विश्वधायाः' धीयत इति 'धायाः' अन्नम्, बङ्कान्ना[2]। एवं प्रश्नपूर्वकं तासां गुणकथनेन तासु वीर्यं भवत्यापयति। दोग्धव्यगवां सङ्ख्यां विधत्ते—"तिस्रो दोग्धीति। तिसृभ्यः चीरसम्भर्त्ता त्रिभ्यो लोकेभ्य एव सम्भृतवान् भवति, अतः तिस्रो दुह्यात्। अत्र "यावत् स्व मधिकारात्, तिस्रो वा नित्यत्वात्"-इत्यादि[3] सूत्रं द्रष्टव्यम्॥

अतःपरं वाङ्नियमं विसृजेदित्याह—"अथ कामं वदतीति॥१७॥

दोहनपात्रक्षालनोदकस्य पुनः चीरे समर्पण माह— "अथोत्तमा मिति। 'उदस्तोकम्' उदकविन्दुधारा मित्यर्थः। 'पल्यञ्च[4]" परितो गमयित्वा, दोहपात्र उदक मासिच्य प्रक्षाल्येत्यर्थः। 'पयसः' अवशिष्टं 'यत्' 'अहार्षि' हृत मभूत्। "तदिहापीति। 'अपि'-शब्दो भिन्नक्रमः,— तदपीह 'अमृत' भवेदिति। एतत् सङ्क्षालनोदकानयनप्रयोजनम्। तदपि किमर्थ मित्यत आह— "रसस्यो चैवेति। 'उ, च, एव'-इति निपातत्रयम्। 'रसस्य' चीरस्यैव 'सर्वलाय' कात्स्न्यार्थ। अस्तु नाम चीरांशेन सर्वलम्, तत्संयुक्तेन क्षालितोदकेन कथं सर्वत्व मित्युदकस्यापि चीरोपादानता माह— "इदं हि यदेति। परिक्षालनानयनमन्त्रः[5] सूत्रे दर्शितः—

१, २— वा० सं० १. ४. २, ३। का० औ० सू० ४. २. २६।

३— का०औ०सू० ४. २. २८, २९। अत्रादिपदेन "आदिसामर्थ्यात्"-"दर्शनाच्च"-इतिसूत्रद्वयस्य ग्रहणम् (का० औ० सू० ४.२.३०, ३१.)।

४— परिपूर्वाङ्कृतेः रूपमिदम्। एव मुपरिष्टादपि ३.९.२.१६ द्रष्टव्यम्।

५— आम्नातश्च सः— तै० सं० १. १. ३. १।

"परिच्चालन मानयति सम्पृच्यध्व मृतावरीरित्यादिना[१]। "तदु-द्वास्येत्यादि। आतञ्चनेनैतत् चीरं तीव्रीकृतवान् भवति। तीव्री-करणं सारत्वकरणम्। चीरादपि दध्नोर्वत्वकरत्वं लोके दृष्टम्,— "यन्मा धिनवत्तन्मे कुरुत"-इति ह्युक्तम्[२]। आतञ्चनद्रव्यं सूत्रकार आह— "प्राग्घुतग्रेषेण"-इति[३]। यवाग्वेत्यर्थः[४] ॥ १८ ॥

तत्र मन्त्र माह— "स आतनक्ति इन्द्रस्य त्वेति[५]। मन्त्रे देवता-नामनिर्देशं प्रशंसति— "तद्यथेति। पूर्ववद्व्याख्येयम्[६]। सोमस्य देवताना मतिप्रियत्वात् कीर्त्तितेन एतद्धव्यं तेभ्यः स्वादु कृतवान् भवति ॥ १९ ॥

"अथोदकवतेति। पिधानपात्रस्योदकपूर्णत्वे प्रयोजन माह— "नेदिति। 'नेत्'-इति परिभये[७]। यद्युदकपूर्णं न कुर्यात्, न तु चीर मुपरिभागे, 'रक्षांसि' 'अवस्पृशान्' अवस्पृशेयुः; एतद्भयावह मित्यर्थः। कथं तत्परिहार इति तदाह— "वज्रो वा आप इति ॥ २० ॥

"सोऽपिदधातीति। पिधानमन्त्रे[८] विष्णुशब्दार्थ माह— "यज्ञो

१— का० श्रौ० सू० ४. २. ३२ (तै० सं० १. १. ३. १ द्रष्टव्यम्)।

२— पुरस्तादूतम्—४४६ ए० १५ प० (तै० सं० २. ५. ३. ४.)।

३, ४— का० श्रौ० सू० ४. २. ३२। दध्नेति नव्याः। "अत्र विप्रति-पत्तिः"—इत्यादिर्याज्ञिकदेवीयो ग्रन्थोऽत्रालोच्यः।

५— वा० सं० १. ४. ४।

६— इहैव षष्ठकाण्डे-भाष्यं द्रष्टव्यम् (४६१ ए०)।

७— "नेत्येष इदित्येतेन सम्भयुज्यते परिभये"—इति निरु० १. ३. ६।

८— वा० सं० १. ४. ५। का० श्रौ० सू० ४. २. ३४।

वा इति। स च चय्यात्मना व्यापित्वात् 'यज्ञो विष्णुः' ॥ २१ ॥ ४ ॥ [७. १.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे सप्तमाध्याये प्रथमं ब्राह्मणम्[१] ॥

१— "प्रतिपदि दर्शयागं चिकीर्षुरमावास्यायां प्रातरग्निहोत्रं हुत्वा दर्शयागार्थं 'ममाग्नेर्वर्चः'–इति मन्त्रेण अग्निषु समिदाधानरूप मन्वाधानं कृत्वा वत्सापाकरणं कुर्यात्। दर्शयागे चीणि हवींषि सन्ति। आग्नेयोऽष्टाकपालः, ऐन्द्रं दधि, ऐन्द्रं पय इति। तत्र प्रतिपदि दधि होतुं दधो निष्पत्त्यै रात्रावमावास्यायां गावो दोग्धव्याः। तद्दोहनार्थं प्रातर्लौकिकदोहादूर्ध्वं स्वमातृभिः सह चरन्तो वत्साः स्वमातृभ्यः पलाशशाखयापाकरणीयाः। तदर्थं पलाशशाखाच्छेदनम्"–इति वा० सं० महीध० भा०। अथात्र "देवो वः"–इतीम मेव, त्रीन्मन्त्रानभिप्रेत्य विनियोगत्रयं च प्रोक्त मापस्तम्बेन। तथाहि—"देवो वः सविता प्रार्पयत्विति शाखया गोचराय गाः प्रस्थापयति, प्रस्थिताना मेकां शाखयोपस्पृशति दर्भैर्दर्भपिञ्जूलैर्वा आप्यायध्व मिति, यज्ञस्य हेतिः परि वो वृणक्त्विति प्रस्थिता अनुमन्त्रयते"–इति। अतएव तैत्तिरीयभाष्ये सायणेनात्र विनियोगसङ्ग्रह एव मुक्तः— "इषे शाखां छिनत्त्यूर्जे मार्ष्टि वा इति वत्सकान्। अपाकृत्याथ देवो गाः प्रस्थाप्येति गां स्पृशेत्। यज्ञस्येत्यभिमन्त्र्यैतान् ध्रुवेति गृह्य मात्रजेत्। यजेति शाखोपगूह्य इत्यष्टावनुवाकगाः"–इति। एवञ्चैतदनुवाकाम्नातैरृग्भिर्मन्त्रैस्तैत्तिरीयाणां शाखाच्छेदनादीन्यष्टौ कर्माणि सम्पद्यन्ते। तत्र "सन्नयन मृजूकरणम्, अनुमार्जन मानुलोम्येन संलग्नधूल्याद्यप-

ऋणꣳ ह वै जायते योऽस्ति। स जायमान एव देवेभ्य ऽऋषिभ्यः पितृभ्यो मनुष्येभ्यः ॥ १ ॥

स यदेव यजेत। तेन देवेभ्य ऽऋणं जायते तद्भ्य ऽएतत् करोति यदेनान् यजते यदेभ्यो जुहोति ॥ २ ॥

अथ यदेवानुब्रुवीत। तेनऽर्षिभ्य ऽऋणं जायते तद्भ्य ऽएतत्करोत्यृषीणां निधिगोप ऽइति ह्यनूचानु माहुः ॥ ३ ॥

अथ यदेव प्रजा मिच्छेत। तेन पितृभ्य ऽऋणं जायते तद्भ्य ऽएतत्करोति यदेषाꣳ सन्ततꣳ व्यवच्छिन्ना प्रजा भवति ॥ ४ ॥

अथ यदेव व्वासयेत। तेन मनुष्येभ्य ऽऋणं जायते तद्भ्य ऽएतत्करोति यदेनान् व्वासयते यदेभ्योऽशनं ददाति स यु ऽएतानि सर्व्वाणि करोति सु कृतकर्म्मा तस्य सर्व्व माप्तꣳ सर्व्वं जितम्† ॥ ५ ॥

नयनम्"–इति तै०ब्रा०सा०भा०। मूलादारभ्याग्रात् स्पर्शेन मनुमार्जन मिति धूर्त्तस्वामी। "अनुमार्जनं तत्पर्णादिपातनेन गुणीकरणम्"–इति का० श्रौ० सू० ४. २. ३ भाष्ये या० दे०। वाजसनेयिनान्तु "यद्वस्येति मन्त्रो मन्त्रभागो वा नैवाम्नातः; एवं "वायव स्थ"–इत्यस्यानन्तरम् "उपायव स्थ"–इति मन्त्रो मन्त्रांशो वा नास्त्येव; अपि "आप्यायध्व मिति मन्त्रे "ऊर्जस्वतीः पयस्वतीः"–इति विशेषणपदद्वयाभावोऽपि बोध्यः।

* 'सन्ततु'–इति च। † 'जितं'–इति क, ख; 'जितꣳ'–इति च।

स येन देवेभ्य ऽऋणं जायते। तदेनांस्तदुवदयते* यद्यजतेऽथ यदग्नौ जुहोति तदेनांस्तदुवदयते† तस्माद्यत्किञ्चाग्नौ जुह्वति तदवदानं नाम ॥ ६ ॥

तद्वै चतुरवत्तं भवति। इदं वा ऽअनुवाक्याथ याज्याथ व्यषट्कारोऽथ सा देवता चतुर्थी यस्यै देवतायै हविर्भवत्येवꣳ हि देवता ऽअवदानान्यन्वायत्ता‡ ऽअवदानानि वा देवता ऽअन्वायत्तान्यतिरिक्तꣳ§ ह तदवदानं यत्पञ्चमं कुस्मा ऽउ हि तदवद्येत्तस्माच्चतुरवत्तं भवति ॥ ७ ॥

उतो पञ्चावत्त मेव भवति। पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चऽर्त्तवः संव्वत्सरस्यैषो पञ्चावत्तस्य सम्पदहुर्हैव प्रजया पशुभिर्भवति यस्यैवं व्विदुषः पञ्चावत्तं क्रियत ऽएतद्ध न्वेव प्रज्ञातं कौरुपाञ्चालं यच्चतुरवत्तं तस्माच्चतुरवत्तं भवति ॥ ८ ॥

स वै यावन्माचु मिवैवावद्येत्। मानुषꣳ ह कुर्याद्यन्महदवद्येद् व्यृद्धं वै तद्यज्ञस्य युन्मानुषं नेद् व्यृद्धं यज्ञे करवाणीति तस्माद्यावन्माचु मिवैवावद्येत् ॥ ९ ॥

स ऽआज्यस्योपस्तीर्य। द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति द्वे वा ऽआहुती सोमाहुति-

---

*,† 'ऽदुवजायते'—इति ख।

‡ 'ऽन्वन्वायत्ता'—इति ख। § 'ऽनुरतिरिक्तꣳ'—इति ख।

रेवान्याज्याहुतिरन्या तुत ऽएषा केवली युत्सोमाहुति-
रुथैषाज्याहुतिर्यद्वविर्यज्ञो युत्यमुस्तदाज्य मेवैतुत् करोति
तुस्मादुभयुत आज्यं भवत्येतद्वै जुष्टं देवानां यदाज्यं
तज्जुष्ट मेवैतुद्देवेभ्यः करोति तुस्मादुभयुत ऽआज्यं
भवति ॥ १० ॥

असौ वा ऽअनुवाक्येयं याज्या। ते ऽउभे योषे
तुयोर्म्मिथुन मस्ति वषट्कारु एव तद्वा ऽएषु एवु व्वषट्कारो
यु ऽएषु तुपति सु ऽउद्युन्नेवामू मधिद्रुवत्यस्तं युन्निमा
मुधिद्रवति तुद्देतुन व्वृष्णेमां प्रजातिं प्रुजायते यैन-
योरियं प्रुजातिः ॥ ११ ॥

सोऽनुवाक्या मनूच्य। याज्या मनुद्रुत्य पश्चाद्वषट्क-
रोति पश्चाद्वै परीत्य व्वृषा योषा मुधिद्रवति तुद्देने
ऽउभे पुरुस्तात् क्रत्वा व्वृष्णा वषट्कारेणाधिद्रावयति
तुस्मादु सहु वैवु वषट्कारेण जुहुयाद् वषट्कृते वा ॥ १२ ॥

देवपाचं वा ऽएष युद्वषट्कारः। तद्युथा पाच ऽउद्वृत्य
प्रयुच्छेदेवं तदथ युत्पुरा व्वषट्काराज्जुहुयाद्युथाधो
भूमौ निदिग्धं* तुदमुया स्यादेवं तत्तुस्मादु सहु वैवु†
व्वषट्कारेण जुहुयाद्वषट्कृते वा ॥ १३‡ ॥

---

* 'निदग्धं'–इति सा०-सम्मत इति डा०-वेवरः।

† 'वै'–इत्येव ख-पुस्तके।

‡ इत्रैव "६०० घृतम्"–इति ख; "घृतम् ६००"–इति च-पुस्तके।

तद्यथा योनौ रेतः सिञ्चेत्। एवं तदथ युत्पुरा व्वषट्कारा᳖ज्जुहुयाद्यथा योनौ रेतः सिक्तं तदमुया स्यादेवं तत्तस्माद् सहु वैवु* व्वषट्कारेण जुहुयाद्व्यषट्कृते वा॥ १४॥

असौ वा ऽअनुवाक्येयं याज्या। सा वै गायत्रीयं चिष्टुबसौ स वै गायत्री मन्वाह तदमू मनुब्रुवन्नसौ ह्यनुवाक्येमा मन्वाह्येयꣳ हि गायत्री॥ १५॥

अथ चिष्टुभा यजति। तदनया युजन्नियꣳ हि याज्यामुष्या ऽअधि व्वषट्करोत्यसा ऽउ हि चिष्टुप्तदेने सयुजौ करोति तस्मादिमे सुभुञ्जाते ऽअनयोरनु-सम्भोग मिमाः सुर्व्वाः प्रजा ऽअनु सुभुञ्जते॥ १६॥

स वा अङ्क्तयन्निवैवानुवाक्या मनुब्रूयात्। असौ ह्यनुवाक्या बृहद्यासौ बार्हतꣳ हि तद्रूपं क्षिप्र ऽएव याज्यया त्वरेतेयꣳ हि याज्या रथन्तरꣳ ह्रीयꣳ रथन्तरꣳ हि तद्रूपꣳ हुयति वा ऽअनुवाक्यया प्रयच्छति याज्यया तस्मादनुवाक्यायै रूपꣳ हुवे हुवामह ऽआगच्छेदुम्बर्हिः सीदेति यद्धुयति हि तया प्रयच्छति याज्यया तस्मा-द्याज्यायै रूपं व्वीहि हविर्जुषस्व हविराव्वृषायस्वाद्रि पिब प्रेति यत्तु हि तया युच्छति† ॥ १७॥

सा या पुरस्ताल्लक्षणा। सानुवाक्या स्यादसौ ह्यनु-

* 'वै'–इत्येव ख-पुस्तके। † 'यच्छति'–इति च।

वाक्या तुस्या ऽअमुष्या ऽअवस्तात्नुक्ष्म* चन्द्रमा नुक्षचाणि सूर्यः ॥ १८ ॥

अथु योपुरिष्टात्नुक्षणा । सु याज्या स्यादियꣳ हि याज्या तुस्या ऽअस्या† ऽउपुरिष्टात्नुक्षौषधयो व्वनस्पुतय ऽआपोऽग्निरिमाः प्रजाः ॥ १९ ॥

सा हु न्वेव सुमृद्धानुवाक्या । युस्यै प्रथमात्पदाद्देवुता मभिव्याहरति सो ऽएव सुमृद्धा याज्या युस्या ऽउत्तमात् पदाद्देवुताया अधि वषट्करोति व्वीर्यं वै देवतऽर्ध्वस्तुदु-भयुत ऽएवैतद्वीर्येण परिगृह्य युस्यै देवुतायै हविर्भ्वति तुस्यै प्रयच्छति ॥ २० ॥

स वै व्वौगिति करोति । व्वाग्वै व्वषट्कारो वाग्रेतो रेत ऽएवैतत्सिञ्चति षडित्यृतवो वै षट् तुद्दतुषेवैतद्रेतः सिच्यते तुद्दतवो रेतः सिक्तु मिमाः प्रजाः प्रजनयन्ति तुस्मादेवं व्वषट्करोति ॥ २१ ॥

देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः प्रजापतेः पितुर्दाय मुपेयुरेतावेवार्द्धमासौ यु ऽएवापूर्यते तं देवा ऽउपायुन् योपक्षीयते त मसुराः ॥ २२ ॥

---

* 'अधस्तात्नुक्ष'—इति सा०-सम्मत इति डा०-वेवरः ।

† नास्त्येतत् पदम् ख-पुस्तके ।

ते देवा ऽअकामयन्त। कथं न्विम मपि सृंवृज्जी-महि योऽय मसुराणा मिति तेऽर्चन्तः श्राम्यन्तश्चेरुस्तु ऽएतꣳ हविर्यज्ञं ददृशुर्यद्दर्शपूर्णमासौ ताभ्या मयजन्त ताभ्या मिष्ट्वैत मपि समवृञ्जत ॥२३॥

यु ऽएषो ऽसुराणा मासीद्। यदा वा ऽएता ऽउभौ परिस्रवेते ऽअथ मासो भवति मासशुः संव्वत्सरः सुर्व्वं वै संव्वत्सरः सुर्व्व मेव तद्देवा ऽअसुराणाꣳ समवृञ्जत सुर्व्व-स्मात्सपत्नानसुरान्निरभजन्त्सुर्व्वꣳ ह्येवैष ऽएतत्सपत्नानाꣳ संवृङ्क्ते सुर्व्वस्मात्सपत्नान्निर्भजति य ऽएव मेतद्वेद ॥२४॥

स यो देवाना मासीत्। स यवायुवत हि तेन देवा योऽसुराणाꣳ सोऽयवा न हि तेनासुरा ऽअयुवत ॥२५॥

ऽअथो ऽइतरथाहुः। यु ऽएव देवाना मासीत्सोऽयवा न हि त मसुरा ऽअयुवत योऽसुराणाꣳ स यवायुवत हि तं देवाः सुब्द मुहः सुगरा राचिर्यव्या मासाः सुमेकः संव्वत्सरः स्वेको ह वै नामैतद्यत्सुमेक ऽइति युवा च हि वा ऽअयवा यवेतीवाथ येनैतेषाꣳ होता भवति तद्याविहोच मित्याचक्षते ॥२६॥ ५ ॥

॥ इति पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् [७. २.] ॥

Pariçiṣṭa Parvan, (Text) Fasc. 1–5 @ /6/ each	Rs.	1	14
Prākṛita-Paingalam, Fasc. 1–6 @ /6/ each		2	4
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
Parāçara, Institutes of (English)		0	12
Prabandhacintāmaṇi (English) Fasc. 1–2 @ /12/ each		1	8
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
*Taittereya Saṁhitá, (Text) Fasc. 14–45 @ /6/ each		12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-3 @ /6/ each ...		1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
Varsa Krya Kaumudi, Fasc. 1–3 @ /6/		1	2
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
Viṣnu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradiya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13	0
Rtogs brjod dpag bkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/		1	8
Āin-i-Akbari, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–6 @ 1/ each		6	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbālnāmah-i-Jahāngīri, (Text) Fasc. 1–3 @ /6/ each		1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each		13	2
Maghāzi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each		1	14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs.	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each ...	...	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...	...	7	2
Ma'āṣir-i-'Ālamgīri, (Text), Fasc. 1–6 @ /6/ each ...	...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	...	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ditto (English) Fasc. 1–14 @ /12/ each ...	...	10	8
Ditto Index	...	1	0
Tārikh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārikh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...	...	3	0
Wis o Rāmīn, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1	...	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members			
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anis-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmlu-l-'ilm ir-riyāẓi, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar " "	8	0
16.	Kaçmiraçabdāmṛta, Parts I & II @ 1/8/	3	0
17.	A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18.	Memoir on maps illustrating the Ancient Geography of Kaśmir by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899	4	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each		29	
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...		5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

20-6-1901.

Books are supplied by V.-P.P.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No. 1016.



॥ शतपथब्राह्मणम् ॥

॥ सायणाचार्यकृतवेदार्थप्रकाशाख्यभाष्यसहितम् ॥

THE ÇATAPATHA BRĀHMAṆA

OF THE WHITE YAJURVEDA,

WITH THE

COMMENTARY OF SĀYAṆA ĀCĀRYA.

EDITED BY

ĀCĀRYA SATYAVRATA SĀMAS'RAMĪ

VOL. I, FASCICULUS VI.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1902.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57. PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Śāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalata, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3		1	2
Brhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Brhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çatapatha Brāhmaṇa, Fasc. 1–6		2	4
Çatasahasrika Projnaparamita, (Text) Fasc. 1–3 @ /6/ each ...		1	2
*Caturvarga Chintāmani (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Catasahasrika-prajna-parimita Part I Fasc. 1–3 @ /6/		1	2
Çlokavartika, (English) Fasc. 1–3		2	4
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ...		4	14
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradipōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–4 @ /6/ each		4	14
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mimāmsa Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smrti, (Text) Fasc. 1–3 @ /6/		1	
Nyāyavārtika, (Text) Fasc. 1–5 @ /6/		1	14
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4
Nityacarapaddhati Fasc. 1–5 (Text) @ /6/		1	14
Nyayabindutīkā, (Text)		0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati, Fasc. 1–3 @ 2/		6	0

अवदानस्वरूपं[1] विवक्षुराख्यायिका माह— "ऋणं हेति। 'यः' द्विजातिः 'स जायमान एव' देवादिभ्यश्चतुर्भ्योऽपि 'ऋणवान्' अधमर्णिको 'जायते'[2]। ऋणित्वे[3] जनन मेव निमित्त मित्यर्थः॥ १॥

सङ्क्षेपोक्तं[4] विवृणोति— "स यदेवेति। 'यजेत'-इति 'यत्', 'तेन' कारणेन यागेन निमित्तेन 'देवेभ्यः' 'तद् ऋणं जायते'। 'हि' यस्माद् यागकर्मभ्यः 'एभ्यः' देवेभ्यः 'एतत्' इदानीं 'करोति'; अतस्तेभ्यः तद् ऋण मित्यर्थः। तच्छब्दार्थं माह— "यदेनानिति। यागहोमावुभावपि नियमेन देवार्थ मेव यतः क्रियेते; अतः तेषां तौ स्वम्, तस्मादृणप्रदानत्वादृणी जायत इत्यर्थः। एव मुत्तर-वाक्यान्यपि योज्यानि॥ २॥

"अथेति। 'अनुब्रुवीत' अनुवचनं कुर्यात्, अधीयेतेत्यर्थः। "निधिगोप इतीति। उपभुज्यमानोऽपि यो न विनश्यति, स 'निधिः'। तादृशः ऋषीणां सम्बन्धी यो वेदाख्यो निधिः, तस्य गोपायिता 'इति' वेदम् 'अनूच्यमानम्' 'आहुः' बुधाः। अतस्तेषां प्रवचनं धन मिति गम्यते॥ ३॥ ॥ ४॥

"अथ यदेवेति। 'वासयेत' गृहे; अन्नादिप्रदानेनेदानी मव-

१— "यत् किञ्चाग्नौ जुह्वति तदवदानं नाम"—इतीहैवोपरिष्टात् (६ क०)।

२— "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारि-वासी"—इति तै० सं० ६. ३. ११. १३। म० सं० ६. ३५—३७; ४. २५७। रामा० २. ४. १३। महाभा० १. ४६५६—५८।

३— "ऋणत्वे"—इति ठ। ४— "सङ्क्षेपोक्तं"—इति ठ।

काशं प्रयच्छेत् । 'यः' जायमानो ब्राह्मणः 'एतानि' यागानुवचनादीनि 'सर्वाणि' अपि 'करोति', 'सः' 'कृतकर्मा' कृतकृत्यः । तस्मात् आप्तव्यं 'सर्वं आप्तं' भवति, देवादिसर्वस्वानं 'सर्वं' जेतव्यं 'जितं' भवति ॥ ५ ॥

"स येनेति । दत्यं तेषा ऋणत्वं प्रति तेन 'अवदयते' दयतिर्दानार्थः[१]; अवप्रत्यर्पणम्, देवानां स्वभूत ऋणम्, विभज्य दत्तवान् भवति । तच्छब्दार्थं माह— "यद्यजत इति । यदस्ति तत्तेन यागेनेत्यर्थः ; एवं होमेनापि । 'यस्मादेवं' तस्मात् 'यत् किञ्च' चरुपुरोडाशादिकम् 'अग्नौ जुह्वति', 'तत्' अवत्तं हविः "अवदानम्"-इति प्रसिद्धं भवति ॥ ६ ॥

तस्यावदेयस्य चतुष्टं विधत्ते— "तदा इति । तत्र कारणमाह— "इदं वा इति । 'इदं वा' अनुवाक्यात्मक मिदं खलु प्रथमम् ; 'अथ' पश्चाद् 'याज्या' ; 'अथ' प्रधानसाधनो 'वषट्कारः' ; पश्चाद्धविस्स्वामिनो 'देवता' 'चतुर्थी' भवति । 'एवं' क्रमेण पुरोऽनुवाक्याद्याश्चतस्रो 'देवताः', क्रमेण चत्वारि 'अवदानानि अन्वायत्ताः' । 'हि'-शब्दस्यार्थः[२]; अवदानानि च चत्वारि, चतस्रः पुरोऽनुवाक्यायाज्यादिदेवताः 'अन्वायत्तानि' अनुप्राप्तानि । अत उभयेषां समसङ्ख्याकत्वात् तन्न्यूनाधिकभावो न युक्त इत्यर्थः । चतसृभ्योऽवदानचतुष्टयस्यावश्यकत्वात् न्यूनसङ्ख्याकत्वं न शक्यम् । अधिकत्व-

---

१— "दय दानगतिरक्षणहिंसादानेषु"—इति धा० पा० भ्वा० आ० ४८१ ।

२— "हीत्येषोऽनेककर्मा"—इति निरु० १. २. ४ ; १. ४. ३ । अम० को० ३. ३. २५६, ४. ५ ।

दोषात् पञ्चम माग्रङ्क्ष्व परिहरति— "अतिरिक्तं हेति। अतिरेक मेव दर्शयति—"कस्मा इति। 'कस्मै' प्रयोजनाय 'पञ्चमम् अवद्येत्?' तदभिमानिन्याः पञ्चम्या देवताया अभावादिति भावः॥ ७॥

अथाभ्युपगम्याधिक्यदोषं यज्ञादिसम्पत्तिलाभाय पञ्चावदान-पक्ष मप्याह— "उतो इति। यज्ञस्य पाङ्क्तत्वं धानाकरम्भादिहविः-पञ्चकादिनावगन्तव्यम्[१]। ऐतरेयकेऽपि— "यो वै यज्ञम्"—इत्यादिना[२] हविरचरसङ्ख्यादिभिर्बहुधा[३] यज्ञस्य पाङ्क्तत्व मुपपादितम्। पशोः पाङ्क्तत्वं लोमत्वगादिभिरिति प्रागुक्तम्[४]। हेमन्तशिशिरयो-रैक्याभिप्रायेण संवत्सरः पाङ्क्तः[५]। एवन्तु पञ्चावत्ते सति तद्गतपञ्च-सङ्ख्याद्वारा 'सम्पत्' यज्ञात्मकं धनं सम्पद्यत इत्यर्थः॥

एतज्ज्ञानपूर्वकानुष्ठानफल माह— "बहुर्हैवेति॥

अथ पुनः चतुरवत्त मेव स्तापयति— "एतदिति। एतदेव 'चतु-रवत्तं' 'कौरुपाञ्चालम्' कुरुपञ्चालदेशे प्रसिद्धम्; अतस्तच्च प्रज्ञा-तत्वादनुष्ठानसम्प्रदायानुरोधेन 'चतुरवत्तम्' एव कर्त्तव्यम्॥ ८॥

अवदानस्येयत्तां विधत्ते— "स वा इति। ('यावन्मात्र मिव') 'इव'-शब्दोऽनर्थको वाक्यालङ्कारे[६]। 'यावन्मात्र मेव' अङ्गुष्ठपर्वमात्र मेवेत्यर्थः॥

१— "धानाः, करम्भः, परिवापः, पुरोडाशः, पयस्या"—इति ऐ० ब्रा० २. ३. ६; तै० सं० ६. ५. ११. ८। २— ऐ० ब्रा० २. ३. ६।

३— हविष्पङ्क्तिः, अक्षरपङ्क्तिः, नराशंसपङ्क्तिः, सवनपङ्क्तिः।

४— "पाङ्क्तः पशुः"—इत्यादिकं पुरस्तात् द्रष्टव्यम् (१२६९० ७ पं०)।

५— "हेमन्तशिशिरयोः समासेन"—इति ऐ० ब्रा० १. १. १।

६— " इवोऽपि वृक्षते"—इत्यादि निरु० १. ३. ५ द्रष्टव्यम्।

आधिक्ये दोष माह— "मानुषं वै"-इति। मनुष्याणां शरावादिपरिमितत्वादाधिक्यं मानुषत्वकरणम् ॥ ९ ॥

इदानीं चतुरवदानप्रकारं दर्शयति— "स आज्यस्येति। पुरोडाशाभ्यौ द्वौ; तदध उपरि चोपस्तृताभिघारिताज्याभ्यां[1] चतुरवत्तत्वम् ॥

पुरोडाशस्योभयत आज्यकरणं प्रशंसितु माह— "द्वे वा इति। सर्वापि आकृतिः सोमाज्यभेदेन द्विविधा; तत्र सोमस्य[2] स्वरूपेणाकृतित्वादाज्यापेक्षैव नास्ति; अवशिष्टौ हविर्यज्ञपशुयज्ञावाज्याकृतिकौ[3] भवितव्यौ; अतस्तत्र तयोः 'एतत्' एतेनोपस्तरणाभिघारणेन 'आज्य मेव' कृतवान् 'भवति' ॥

"एतद्वै जुष्टम्"—इत्यादि स्पष्टम् ॥ १० ॥

अवदानाय धर्म मुक्त्वा प्रधानधर्मं विधातु माह— "असौ वा इति। अनुवाक्या-याज्ययोः क्रमेण देवताक्राम-हविःप्रदानसाध-

---

१— पुरस्तात् द्रष्टव्यम् ३९५, ४०३ पृ०; परस्तादपि ६. १. २१। अपि का० श्रौ० सू० १. ९. ८–११, २०, २१।

२— "अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशिमांस्ततः। वाजपेयोऽतिरात्रश्चाप्तोर्यामात्र सप्तमः। इत्येते सुत्याः"–इति गो० ब्रा० १. ५. २३। सुत्याः सोमसंस्थाः सोमयज्ञाः इत्येतेऽभिन्नार्थाः।

३— "अग्न्याधेय मग्निहोत्रं पौर्णमास्यमावास्ये। नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तमः। इत्येते हविर्यज्ञाः"–इति गो० ब्रा० १. ५. २३। "अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्याश्वयुजीति सप्त पाकयज्ञसंस्थाः"–इति गौ० ध० सू० ८. ५। पाकयज्ञा एव पशुयज्ञाः।

मत्वं वक्ष्यते[१]। आक्रातव्यानां देवानां द्युलोकसम्बन्धात्, प्रदानस्यै-वैतल्लोकसम्बन्धात्, तयोः क्रमेण द्युभ्वात्मकता। तयोः स्त्रीलिङ्गत्वात् द्वन्द्वे, वषट्कारस्य[२] पुंल्लिङ्गत्वात् सह मिथुनतास्ति। उभयोरन्तराले तपन्नादित्य एव वषट्कारः। स चोदयात्समयसमये दिवं पृथिवी-म्याधिक्षत्य गच्छति[३]। 'तत्' तस्मात् 'एतेन वृष्णा' अनेन वर्षकेण, आदित्येन सह सङ्गते सत्यौ, ते एव मिदानीं प्रसिद्धाम् 'इमां प्रजातिं' 'प्रजायेते'; सर्वेषा मप्युत्पद्यमानानां भावानां तत्रैवोत्पत्तेः, उत्पद्यमानपदार्थात्मना ते एव प्रकृष्टे जायेते इत्यर्थः॥ ११॥

पुरोऽनुवाक्यायाज्यानां[४] द्युभ्वात्मकताभिधानस्य[५] प्रयोजन माह— "सोऽनुवाक्या मिति। तयोः समनन्तरं वषट् कुर्यादिति विधिः। उक्तेऽर्थे लोकाचरणं प्रमाणयति— "पश्चादा इति। 'पश्चात् परीत्य' स्त्रियाः पश्चाद्देशादागत्य 'अधिद्रवति' अभिगच्छति। 'तत्' तेन याज्यापुरोऽनुवाक्यानन्तरं वषट्कारकरणेन 'एने उभे' द्यावापृथिव्यात्मिके याज्यापुरोऽनुवाक्ये 'पुरस्तात् कृत्वा' 'वृष्णा' सेक्त्रा 'वषट्कारेण' तत्सूर्यात्मकेन द्रवण माकारितवान् भवति।

१— इत्रैव ब्राह्मणे सप्तदशकण्डिकायाम् (४८८ पृ० ११ पं०)।

२— 'वषट्कार एव'—इति ज।

३— "स वा एष न कदाचनास्त मेति, नोदेति। तं यदस्त मेतीति मन्यन्तेऽह्न एव तदन्त मित्त्वाथात्मानं विपर्यस्यते; रात्रौ मेवावस्तात् कुरुतेऽह्नः परस्तात्"—इत्यादि ऐ० ब्रा० ३. ४. ६।

४— 'पुरोऽनुवाक्यायाज्यादीनां'—इति ज, 'पुरोऽनुवाक्यादीनां'—इति ढ।

५— 'द्युत्वात्मकताभिधानस्य'—इति ज, ढ।

"तस्मात्"-इति स्पष्टम्। वौषडित्युच्चारणकाले वा, समनन्तरं वा प्रदान मस्तु; सर्वथा वषट्कारात् प्राक् न जुह्वयादित्यर्थः। अनेनैव पुरोऽनुवाक्याया याज्ययोर्वषट्कारात् पूर्वभावित्वं सिद्धम् ॥ १२ ॥

प्रदानस्य वषट्कारानन्तरत्वं प्रकारान्तरेणोपपादयति— "देवपाचं वा इति। पिबन्त्यनेन देवा इति 'देवपाचं' 'वषट्कारः'। 'तत्' वषट्कारावसानं प्रदानम् 'एवं' भवति, पाचोद्धारपूर्वकप्रदान मिव भवति। उक्तवैपरीत्ये दोष माह— "अथ यत्पुरेति। 'अधो भूमौ निदिग्धम्'[1] भूमौ प्राप्तम्[2], दुष्टत्वेनोपयोगाभावात् दग्ध मित्युपचर्यते[3]। 'अमुया' अनेन वषट्कारात्पूर्वकालहोमेन ('स्यात्') दग्धं स्यादित्यर्थः। "तस्मात्"-इत्युपसंहारः ॥ १३ ॥

"तद्यथा योनौ"—इत्यादि स्पष्टम् ॥ १४ ॥

पुरोऽनुवाक्याया याज्ये गायत्रीत्रिष्टुभौ कर्त्तव्ये इति विधातु माह— "असौ वा इति। 'अनुवाक्या' 'असौ' द्युलोकः, तत्स्थाना; 'याज्या' तु ('इयम्') भूः। 'सेयं' पृथिवी गायत्र्यात्मिका, 'असौ' द्युलोकः त्रिष्टुबात्मकः। तथा सति "गायत्री मन्वाह"—इति यत्, 'तत्' तेन अनुवाक्यात्मकम् 'अनुब्रुवन्' गायत्रीच्छन्दोद्वारा 'इमां' पृथिवीं मेवोक्तवान् भवति। द्युलोकस्य कथ मनुवक्तव्यतेत्याशङ्क्य अनुवाक्यात्मकत्वं वाक्यमध्य एव स्मारयति। पृथिव्या अप्यनुवक्तव्यत्वं गायत्र्यात्मकत्वादित्याह— "इयꣳ हीति। इत्थ मनुवाक्याया गायत्रीत्वे द्यावापृथिव्यावुभे अपि योजितवान् भवतीत्युक्तम् ॥ १५ ॥

१— 'निदग्धम्'-इति ज, 'निदिग्धम्'-इत्यपि तत्रैव ग्रोधितः।

२— 'प्राप्तं'-इति ज। ३—दिग्ध मित्यस्यैव भाष्यं स्यात् दग्ध मिति।

याज्यायास्त्रिष्टुप्त्वमभ्यादनेऽपि तथैव योजितवान् भवतीत्याह— "अथेति। 'त्रिष्टुभा यजति' त्रैष्टुभं याज्यां कुर्यात्। तत्र याज्यया स्तुत्वा यजतीति यत्, 'तत्' तेन 'अनया' पृथिव्यैव यजति। तत्कथ मित्यत आह— "तदिति। 'तत्' तेन त्रिष्टुप्त्वकरणेनानया यजति। एतां भुव मेव याज्यां कृतवान् भवतीत्यर्थः। उक्तार्थ-समर्थनाय पूर्वोक्तं स्मारयति— "द्यं हि याज्येति। अतः 'अमुष्या अधि' द्युलोकस्योपरि एव 'वषट्' कृतवान् भवति। एतत्समर्थना-याह— "त्रिष्टुबिति। 'तत्' तेन, पुरोऽनुवाक्यायाज्ययोर्गायत्र्यो-स्त्रिष्टुप्त्वकरणेनानेन 'एने' द्यावापृथिव्यौ, प्रतिपादितप्रकारेण 'सयुजौ' परस्परं संयुक्तौ कृतवान् भवति। 'तस्मात्' सायुज्यात् 'इमे' सहाभ्यवहरतः; "द्यावापृथिवीभ्यां स्वाहा"-इति[1] सहप्रदानात्। अथवा वृष्ट्यन्नयोः परस्परसापेक्षत्वात्[2] सहभागः[3]। अतस्तयोः सहभागम् 'अनु' 'सर्वाः' अपि 'प्रजाः' तत्सम्बन्धिन्यः 'अनु सम्भुञ्जाते' अनुस्मृत्य भुञ्जते। अत उभयोः सभागलोकात्मकत्वात्, तयोश्च परस्परसाहित्याद् याज्यानुवाक्ययोः साहित्येनापि भवितव्य मित्यर्थो लभ्यते ॥ १ ६ ॥

अथानुवाक्याया उच्चारणधर्म माह— "स वा अङ्ग्यन्निवैवेति। 'अङ्ग्यन्निव' वर्णानालोड्यन्निव अग्नेरनुवाक्यां ब्रूयात्। अङ्गतिः

१— ऐ० ब्रा० १. ३. ५। तै० ब्रा० २. १. ७. १; ८. २।

२— इहैवोपरिष्टात् ५. ३. ५. १७; ७. ३. १. ३०। म० सं० ३. ७६।

३— 'सहभाव'-इति ज-ध्रोधितः, 'सहभोगः'-इति ट।

गत्यर्थः[१]। उक्तविधानुवचनं "बृहत्"-सामा[२] स्तौति— "असौ द्यौरिति। 'अनुवाक्या' ('असौ') द्यौः, एवं 'बृहत्' सामापि द्यौः[३]। 'हि' यतो द्युभागोऽनुवाक्या बृहत्साम, 'तत्' तस्मात् तद्गतं मन्त्रलं 'बार्हतं' बृहतीसम्बन्धि 'रूपम्' ॥

याज्याया उच्चारणे धर्मं माह— "क्षिप्र एव याज्ययेति। 'याज्यया' निमित्तया उच्चारणे वर्णविषयां त्वरां कुर्यात्। "इयं द्यौरित्यादि[४]। पूर्वापेक्षया त्वरतीति 'तत्' क्षिप्रोच्चारणं 'राथन्तरम्' रथन्तरसम्बधि 'रूपम्'[५] ॥

अथ पुरोऽनुवाक्यायाज्ययोः लक्षणान्यन्यानि वक्तुं कार्यभेदं माह[६]— "क्रूयति वा इति। 'अनुवाक्यया' यष्टव्यदेवान् आक्रूयति, तानेव 'याज्यया' यजति। 'तस्मात्' आक्रानार्थत्वात्, आक्रानार्थं यल्लिङ्गम्, तत् 'अनुवाक्याया रूपम्'। तानि लिङ्गानि दर्शयति— "क्रुव इत्यादिना। 'हि' यस्मात् 'तया' अनुवाक्यया यष्टव्यदेवान् आक्रूयति, तस्मादाक्रानप्रकाशकं "क्रुवे"-इत्यादि यल्लिङ्गजातम्, तदत्यैव सर्वचानुवाक्या कार्येत्यर्थः ॥

"प्रयच्छति याज्ययेत्यादि। यस्माद् याज्या हविःप्रदानसाधनम्, 'तस्मात्' तस्याः तत्प्रदानप्रकाशकं लिङ्गं 'रूपम्'। अभिहित-

---

१— "पर्यक्रुयाते"-इति ऋ० सं० १०. १६. ७।

२— सा० सं० आ० गा० १. १. २७।

३— ता० ब्रा० १६. ११। तै० ब्रा० ३. ५. १३।

४— सा० सं० आ० गा० २. १. २१। तै० ब्रा० ३. ५. १३।

५— ता० ब्रा० १६. ११। ६— 'कार्यभेदमाह'-इति ङ।

लिङ्गानि दर्शयति— "वीहीति। 'हि' यस्मात् 'तया' याज्यया प्रयच्छति हविः, 'तस्मात्' प्रदानप्रकाशकं यद् "वीहि"-इत्यादि लिङ्गम्, तदत्यैव सर्वत्र याज्या कार्येत्यर्थः ॥ १७ ॥

लक्षणान्तर माह— "सा या पुरस्ताल्लक्षणेति। 'पुरस्तात्' मन्त्रस्य पुरोभागे 'लक्षणं' यष्टव्यदेवनाम यस्यां[1] 'सा' ('अनुवाक्या') पुरोऽनुवाक्या। तस्या अधस्ताल्लक्षणत्वे कारण माह— "तस्या इति। 'तस्याः' पुरोऽनुवाक्यायाः 'अमुष्याः' "अमौ हि अनुवाक्या"-इत्युक्तत्वात्[2] सामानाधिकरण्यम्। तस्याः चन्द्रनक्षत्रसूर्याः ('अवस्ताल्लक्ष्म') अधस्तात् लक्ष्माणीव; अधोभागे तेषां परिभ्रमणात्। अतोऽस्या अपि तथात्वं युक्तम् ॥ १८ ॥

"अथ योपरिष्टाल्लक्षणेति वाक्यं पूर्ववाक्यवद्व्याख्येयम्। 'तस्याः' याज्यारूपायाः 'अस्याः' भूम्याः ॥ १९ ॥

उक्तं पुरस्तादुपरिष्टाल्लक्षत्वं विभिनष्टि— सा ह स्मेवेति। 'यस्यै' यस्या अनुवाक्यायाः 'प्रथमात् पदात्' "अग्निः प्रत्नेन मन्मना गीर्भिरित्यादिलक्षणाद्[3] यष्टव्यदेवतां ब्रूयात्, 'सा एव समृद्धा अनुवाक्या'। 'याज्या' तु सा समृद्धा, 'यस्या उत्तमात् पदात्' "जिह्वा अग्ने चकृषे इत्यादिकात्[4] अभिहितायाः 'देवतायाः' उपरि 'वषट्करोति'। ननु कथं देवतासद्भावमात्रेण समृद्धत्व मिति, तदाह—

१— "यष्टव्यदेवता यस्यां"-इति ज, झ, ङा०—वेबरेण च दृष्टः।

२— पूर्वस्यां काण्डिकायां द्रष्टव्यम् (४७८पृ० ११पं०)।

३— ऋ० सं० ८. ४४. १२। तै० ब्रा० ३. ५. ६. ३। तै० सं० २. ६, २. २।

४— ऋ० सं० १० ८. ६। तै० ब्रा० ३. ५. ७. २। तै० सं० २. ६. २. ८।

"वीर्यं वा इति। 'देवता वै वीर्यम्' ऋगाख्यानस्य तत्प्रकाशनार्थत्वात्[1] ॥ २० ॥

अथ याज्यानन्तरभाविनं वषट्कारं विभज्य विधाय प्रशंसति— "स वै वौगितीति। 'वौगिति' उच्चारणं कुर्यात्। तत्प्रशंसति— "वाग्वा इति। 'वौग्'-इत्येतदौकारस्थाने आकारे कृते 'वाग्'-इति भवति; अतो 'वषट्कारो वाक्'। सा च 'वाक्' 'रेतः'; सेचनसाधनत्वात्। उच्चारण मेव तत्सेकः। तथा 'षडिति' करोतीत्यनुषज्यते, ब्रूयादित्यर्थः। सङ्ख्याया ऋत्वप्यसम्भवात् 'ऋतवः' एव 'षट्'-इत्यनेन विवक्षिताः; प्राक् षडित्यतः वौगित्येतस्य स्थापनात्। तेन 'सिक्तं' 'रेतः' 'इमाः' सर्वाः 'प्रजाः' उत्पादयन्ति। 'तस्मात्' 'एवं' वौषडिति 'वषट्' कुर्यात् ॥ २१ ॥

इत्थं दर्शपूर्णमासोभयसाधारण मवदानादिकं वषट्कारान्तं धर्म मभिधाय तत्प्रसङ्गाद्यवादिग्रहाभिधानद्वारेण दर्शपूर्णमासयागं प्रशंसति— "देवास्च वा असुरास्चेत्यादिना। 'प्राजापत्याः' प्रजापतेः पुत्राः 'दायं' पैतृकं वित्तम्[2] 'उपेयुः'। किं तत्? 'एतावेव' प्रसिद्धावेव 'अर्द्धमासौ' मासस्यार्द्धौ शुक्लकृष्णपक्षौ। "अर्द्धं नपुंसकम्[3]"— इत्येकदेशिसमासः। विभज्याह— "य एवापूर्यत इति। प्रजापतेः कालात्मकत्वादनयोस्तदत्त्वम् ॥ २२ ॥

१— "प्र वीर्येण देवताति चेकिते"—इत्यादिषु (ऋ० सं० १. ५५. ३.)।

२— "दायं पित्र्यम्"—इति म० सं० ६. १६४। ऋ० सं० १०. ११४. १०। ऐ० ब्रा० ७. ३. ५। ता० ब्रा० १६. ४। तै० सं० ३. १. ६ ४।

३— "पा० सू० २. २. २।

एवं विभागे सति 'देवाः' 'कथम्' असुरेभ्यः, तदीय मपि भागं 'संवृञ्जीमहि' अपहरेमहि ? एवं कामयित्वा तत्साधनं प्रयासेनान्विष्य 'दर्शपूर्णमासौ' यागावेवापश्यन्। 'ताभ्याम्' ('एत मपि') कृष्णपक्ष मपि स्वय मलभन्त। (॥ २३ ॥)

तद्द्वारा तदुभयावर्त्तमानात्मकं मासम्, तदावर्त्तनात्मकं संवत्सरं च, असुरेभ्यः 'समवृञ्जत' स्वाधीनं कृतवन्तः। अतो न्यूनाधिक-कालावयवानां संवत्सरेऽन्तर्भावात् 'संवत्सरः सर्वम्' संवत्सरात्मकात् 'सर्वस्मात्' कालात् 'सपत्नान् असुरान्' भागरहितान् अकुर्वन्। 'निरभजन्'-इति तात्पर्याभिधानम्। 'सर्वम् एव एषः'-इति वेदितुः फलम्। अतो दर्शपूर्णमासानुष्ठानं सपत्नसर्वस्वहरण मिति प्रशंसा ॥ २४ ॥

"स यो देवाना मिति। 'सः यः' इति वाक्यालङ्कारे। 'सः' आपूर्यमाण-पक्षः पुरा 'देवाना मासीत्'। 'सः' 'यवायुवत'। यौतीति[1] यवः, तस्य यवेति नाम। कथम् ? 'हि' यस्मात् 'तेन' आपूर्यमाणपक्षेण सह 'देवाः' 'अयुवत' समसृज्यन्त। 'असुराणां' कृष्णपक्षस्तु 'अयवा'। कथम् ? 'हि' यस्मात् 'तेन' कृष्णपक्षेण सह 'नायुवत' तस्य देवैरपहृतत्वात् ॥ २५ ॥

शुक्लकृष्णपक्षयोर्नामधेयव्युत्पाद मारभ्य— "अथो इति। 'देवानां' स्वभूतो 'यः' असौ 'अयवा'; देवानां प्रतिनियतस्वभूतत्वेनासुर-सम्बन्धाभावात्। अतोऽयवनादमिश्रणाद्यवा शुक्लपक्षः। 'असुराणां' स्वभूतः कृष्णपक्षो 'यवा'; उपायेनापहृत्य देवैर्मिश्रितत्वात् ॥

१— "यु मिश्रणेऽमिश्रणे च"-इति अदा० प० २२ धा०।

अनयोरेवावयवावयवप्रशंसार्थं महोरात्रमाससंवत्सराणा मपि नाम दर्शयति— "सव्द मित्यादिना। यव-शब्दाभिधेयान् शुक्ल-कृष्णपक्षान् अर्हतीति[1] 'मासः यव्यः'। 'खेकः'-इत्यस्य मकारोप-जनेन 'सुमेकः'-इति संवत्सरस्य नाम सम्पन्नम्। 'सु' सुष्ठु 'एकः' 'खेकः'। "सर्वं वै संवत्सरः"-इत्युक्तत्वेन[2] सर्वस्यापि कालस्य तत्रैवान्तर्भावात् संवत्सर एक एव कालः; अतस्तस्यैतन्नाम युक्तम्; तस्यैव परोक्षेण[3] 'सुमेकः'-इति व्यवहारः[4]॥

प्रसङ्गादहरादिनामाभिधाय प्रकृत मुपसंहरति— "यवा चेति। 'यवा अयवा च हि' 'यवेतीव' यवेत्येव भवति; यवन-स्योभयानुगतत्वात्। अथवा देवेरेवायवात्मकस्य कृष्णपक्षस्यापि यवनात् पक्षद्वय मपि 'यवा'। अतः 'एतेषां' यवादीनां मध्ये 'येन' निमित्तेन 'होता' भवेत्, 'तत्' कार्यं 'याविहोत्रम्'।

१— 'हौतीति'– इति ज, 'युङ्क्तीति'–इति तत्रैव शोधितः पाठः, 'अ-[य]तीति'–इति डा०-वेबर-शोधितः। अर्हतीति पाठे यवशब्दात् "दण्डादिभ्यो यत्"–इति (पा० सू० ५. १. ६६.) अर्हत्यर्थे यत् स्यात्, स्याच्च दण्डादेराकृतिगणत्वं मन्तव्यम्। 'अर्हीत्तानि'–इति झ–पाठः।

२— ४८० ए० ६ पं०।

३— "परोक्षप्रिया इव हि देवाः"–इति तै० ब्रा० १. ५. ९. २। तथैव शे० ब्रा० ३. ३. ९।

४— 'मासो यव्यः'–इत्यस्यानन्तरं खेक इत्यादि-व्यवहार इत्यन्त-ग्रन्थस्यस्थाने "सुष्ठु एकः 'खेकः'; सर्वस्यापि कालस्य तत्रैवान्तर्भावात् संवत्सर एक एव कालः मकारोप[यु]ङ्क्तेन 'सुमेकः'–इति परोक्षनाम सम्प-न्नम्"–इति ठ–पाठः।

तैत्तिरीयकेऽपि "शतद्या उपदधाति"-इत्यत्र[1] चयनप्रकरणे यवाद्यो व्याख्याताः[2] ॥ २६ ॥ ५ [७. २.] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे सप्तमाध्याये द्वितीयं ब्राह्मणम् ॥

॥ इति प्रथमकाण्डे पञ्चमप्रपाठकः समाप्तः[3] ॥

१— "तै० सं० ५. ३. १.२ ; ११. ६ ; ४. २. १ ।

२— "कल्पः—'यावा अयावा इति सप्तर्त्तव्याः'—इति । पाठस्तु— 'यावा अयावा एवा ऊमाः सप्तः सगरः सुमेकः'—इति । यावाद्याः षट् शब्दा वसन्ताद्यृतुवाचिनः ; सुमेकशब्दः संवत्सरवाची । हे इष्टके! त्वं त्वद्रूपासीति योज्यम्"—इति तै० सं० ४. ४. ८. २३—२६ सा० भा० ।

३— इत उत्तरम् — क—पुस्तके "काण्डो १२१"—इति, ख—पुस्तकेऽपि तथैव, ग—पुस्तके "काण्डो १२१"—इति, घ—ङौ न स्तः, च—पुस्तके तु "कण्डिकासङ्ख्या १२१"—इति । तत्र १ब्रा० १२क०, २ब्रा० ४१क०, ३ब्रा० २१क०, ४ब्रा० २१क०, ५ब्रा० २६क० ; सङ्कलनयात्र पञ्चमप्रपाठकीयपञ्चसु ब्राह्मणेषु १२१ कण्डिकाः श्रुता इति सिद्धम् ॥

अथ

षष्ठप्रपाठके प्रथमं ब्राह्मणम् ।

अपि वा

सप्तमाध्याये तृतीयं ब्राह्मणम् ।

॥ हरिः ॐ ॥

यज्ञेन वै देवाः* । दिव मुपोदक्रामन्नथ योऽयं देवः पश्ना मीष्टे सु ऽइहाहीयत तस्माद्वास्तव्य ऽइत्याहुर्व्वास्तौ हि तदहीयत ॥ १ ॥

स येनैव देवा दिव मुपोदक्रामन् । तेनो† ऽएवार्च्छन्तः श्राम्यन्तश्चेरुरथ योऽयं देवः पश्ना मीष्टे यु ऽइहाहीयत ॥ २ ॥

सु ऽऐक्षत । अहास्य हान्तर्यन्त्य मा यन्नादिति सोऽनूच्चक्राम स ऽश्रायतयोत्तरत ऽउपोत्थेदे यु‡ ऽएषु स्विष्टकृतः कालः§ ॥ ३ ॥

---

* 'देवाः'–इति ख ।

† 'oक्रामंस्तेनो'–इति क, ग ।

‡ 'सु'–इति च ।

§ 'कालुः'–इति च ।

ते देवा ऽअब्रुवन्। मा विस्रक्षीरिति ते वै मा यज्ञान् मान्तुर्ग्गतोहुतिं मे कल्पयतेति तथेति स सुमृहृत् सु नास्यत् स न कुञ्चनाहिनत् ॥ ४ ॥

ते देवा ऽअब्रुवन्। यावन्ति नो हवीꣳषि गृहीतान्यभूवन्त्सर्वेषां तेषाꣳ हुत मुपजानीत यथास्मा ऽआहुतिं कल्पयामेति ॥ ५ ॥

ते ऽध्वर्यु मब्रुवन्। यथापूर्वꣳ हवीꣳष्यभिघारयैकस्मा ऽअवदानाय पुनरुप्यायय्यायातयामानि कुरु तत ऽएकैक मवदान मवद्येति ॥ ६ ॥

सोऽध्वर्युः। यथापूर्व्वꣳ हवीꣳष्यभ्यघारयद्देकस्मा ऽअवदानाय पुनरुप्याययदयातयामान्यकरोत्तत ऽएकैक मवदान मवाद्यत्तस्माद्वास्तव्य ऽइत्याहुर्व्वास्तु हि तद्यज्ञस्य युक्तेषु हविष्षु तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते सर्व्वचैव स्विष्टकृदन्वाभक्तः सर्वत्र ह्येवैनं देवा ऽअन्वाभजन् ॥ ७ ॥

तद्वा ऽअमुय ऽइति क्रियते। अग्निर्वै सु देवस्तस्यैतानि नामानि शर्व्व ऽइति युथा प्राच्या ऽआचक्षते भव ऽइति युथा बाहीकाः पशूनाम्पती रुद्रोऽग्निरिति तान्यस्याशान्तान्येवेतराणि नामान्यग्निरित्येव शान्ततमं तस्माद्मुय ऽइति क्रियते स्विष्टकृत ऽइति ॥ ८ ॥

ते होचुः। यच्चय्यमुच सत्ययक्ष्महि तन्नः स्विष्टं कुर्व्विति तुदेभ्युः स्विष्ट मुकरोत्तुस्मात् स्विष्टकृत ऽइति ॥ ९ ॥

सोऽनुवाक्या मनूच्य सुम्पश्यति। ये तुथाग्निꣳ स्विष्टकृत मुयाडग्निरग्नेः* प्रिया धामानीति तुदाग्नेय माज्यभाग माहायाट् सोमस्य प्रिया धामानीति तत्सौम्य माज्यभाग माहायाडग्नेः प्रिया धामानीति तद्व ऽएष ऽउभयुचाच्युत ऽआग्नेयुः पुरोडाशो भुवति तु माहु ॥ १० ॥

अथ यथादेवतम्। अयाड् देवाना माज्यपानां प्रिया धामानीति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा आज्यपा युक्षदग्नेर्होतुः प्रिया धामानीति तुदग्निꣳ होतार माह तुदस्मा ऽएतां देवा ऽआहुतिं कल्पयित्वाथैनेनैतद्वयः सुमशाम्यन् प्रिय ऽएनं धामन्नुपाह्वयन्त तुस्मादेवꣳ सुम्पश्यति ॥ ११ ॥

तद्वैके। देवतां पूर्व्वां कुर्व्वन्त्ययाड्कारादग्नेरयाट् सोमस्यायाडिति तदु तथा नु कुर्यादिलोम ह ते यज्ञे कुर्व्वन्ति ये देवतां पूर्व्वां कुर्व्वन्त्ययाड्कारादिदꣳ हि प्रथमु मभिव्याहरन्नयाड्कारु मेवाभिव्याहरति तुस्मादयाड्कारु मेव पूर्व्वं कुर्यात् ॥ १२ ॥

युक्षत् स्वं महिमान मिति। युच्च वा ऽअदो देवता

---

* 'मुयालग्निरग्नेः'–इति सायणसम्मतः पाठ इति डा०-वेबरः।

ऽआवाहयति तदुपि स्वं महिमान मावाहयति तदुतः प्राङ् नैव किञ्चन स्वाय महिम्न ऽइति क्रियते तदुच तं प्रीणाति तथो हास्यैषोऽमोघायावाहितो भवति तस्मादाह युक्षत् स्वं महिमान मिति ॥ १३ ॥

आ यजता मेज्या ऽइष ऽइति। प्रजा वा ऽइषस्ता ऽएवैतद्यायजूकाः करोति ता ऽइमाः प्रजा युजमाना ऽअर्चन्त्यः श्राम्यन्त्यश्वरन्ति ॥ १४ ॥

सो ऽअध्वरा जातवेदा जुषताꣳ हविरिति। तद्यज्ञस्यैवैतत्समृद्धि माशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जुयति तस्मादाह जुषताꣳ हविरिति ॥ १५ ॥

तद्यदेते ऽअच। याज्यानुवाक्ये ऽअवक्लृप्ततमे भवतस्तृतीयसवनं वै स्विष्टकृद्वैश्वदेवं वै तृतीयसवनं पिप्रीहि देवाꣳ३* ऽउशतो यविष्ठेति तदनुवाक्यायै व्वैश्वदेव मग्ने यदद्य व्विशो ऽअध्वरस्य† होतरिति तद्याज्यायै वैश्वदेवं तद्यदेते ऽएवꣳरूपे भवतस्तेनो ऽएते तृतीयसवनस्य रूपं तस्मादा ऽएते ऽअच याज्यानुवाक्ये ऽअवक्लृप्ततमे भवतः ॥ १६ ॥

तै वै चिष्टुभौ भवतः। व्वाक्तु वा ऽएतद्यज्ञस्य युत् स्विष्टकृदवीर्यं वै व्वाक्त्विन्द्रियं व्वीर्यं चिष्टुबिन्द्रियु

---

* 'देवाꣳ३'–इति च। † 'ऽअध्वरस्य'–इति क, ग।

मेवैतद्वीर्यं व्वास्तौ स्विष्टकृति दधाति तस्मात्त्रिष्टुभौ भवतः ॥ १७ ॥

उतो ऽअनुष्टुभावेव भवतः । व्वास्त्वनुष्टुब्व्वास्तु स्विष्टकद्वास्तावेवैतद्वास्तु दधाति पेसुकं वै व्वास्तु पिस्यति ह प्रजया पशुभिर्यस्यैवं व्विदुषोऽनुष्टुभौ भवतः ॥ १८ ॥

तदु ह भाल्लवेयः । अनुष्टुभ मनुवाक्यां चक्रे त्रिष्टुभं याज्या मेतदुभयं परिगृह्णामीति स स्खलित्वा पपात सु पतित्वा बाहु मपि शश्रे* स परिमम्लुग्रे यत् किं मुकरं तस्मादिद मापद्वीति† सु हैतदेव मेने यद्विलोम यज्ञेऽकर मिति तस्मान्न व्विलोम कुर्यात् सुच्छन्दसावेव स्याता मुभे वैवानुष्टुभा ऽउभे वा त्रिष्टुभौ ॥ १९ ॥

स वा ऽउत्तरार्द्धादवद्यति । उत्तरार्द्धे जुहोत्येषा ह्येतस्य देवस्य दिक् तस्मादुत्तरार्द्धादवद्यत्युत्तरार्द्धे जुहोत्येतस्यै वै दिश ऽउदपद्यत तं तुत ऽएवाशमयंस्तस्मादुत्तरार्द्धादवद्युत्तरार्द्धे जुहोति ॥ २० ॥

स वा ऽअभ्यङ्क ऽइवेतराभ्य ऽआहुतिभ्यो जुहोति । इतरा ऽआहुतीः पशवोऽनुप्रजायन्ते रुद्रियः स्विष्टकृद्-

---

* 'सस्खे'–इति सायणसम्मतः पाठ इति डा०-वेबरः ।

† 'मापदिति'–इति च । 'मापद्वीति'–इत्यपि डा०-वेबरेण दृष्टः । 'मुपदिति'–इत्येव पाठः सायणसम्मत इति च डा०-वेबरः ।

द्रियेण* पशून् प्रसजेद्यदितराभिराहुतिभिः संसृजेत् तेऽस्य गृहाः पशव ऽउपमूर्यमाणा ऽईयुस्तस्मादभ्यर्ध ऽइवेतराभ्य आहुतिभ्यो जुहोति ॥ २१ ॥

एष वै सु यज्ञः। येन तुदेवा दिव मुपोदक्रामन्नेषु ऽआहवनीयोऽथ यु ऽइहाहीयत स गार्हपत्यस्तस्मादेतं गार्हपत्यात् प्राञ्च मुद्धरन्ति ॥ २२ ॥

तं वा ऽअष्टासु विक्रमेष्वादधीत। अष्टाक्षरा वै गायत्री गायत्यैवैतद्दिव मुपोत्क्रामति ॥ २३ ॥

एकादशस्वादधीत। एकादशाक्षरा वै त्रिष्टुप् त्रिष्टुभै-वैतद्दिव मुपोत्क्रामति ॥ २४ ॥

द्वादशस्वादधीत। द्वादशाक्षरा वै जगती जगत्यैवै-तद्दिव मुपोत्क्रामति नाच मुाचास्ति युचैव स्वयं मनसा मन्येत तदादधीत स यदा ऽआप्यल्पकु मिव प्राञ्च मुद्धु-रति तेनैव दिव मुपोत्क्रामति ॥ २५ ॥

तदाहुः। आहवनीये हवीꣳषि अपयेयुरुतो वै देवा दिव मुपोदक्रामंस्तेनो ऽएवार्वन्तः श्राम्यन्तश्चेरुस्तस्मिन् हवीꣳषि अपयाम तस्मिन् यज्ञं तनवामहा ऽइत्यपस्खलु ऽइव ह सु हविषां यज्ञार्हपुत्ये अपुयेयुर्यज्ञु ऽआहवनीयो यज्ञे यज्ञं तनवामहा ऽइति ॥ २६ ॥

---

* 'ोद्रुद्रेण'–इति सायणसम्मत इति डा०-वेबरः।

उतो* गार्हपत्य एवु अपयन्ति। आहवनीयो वा एष न वा एष तुस्मै युदस्मिन्नुभृतꣳ अपुपेयुस्तुस्मै वा एष युदस्मिञ्छृतं जुहुयुरित्युतो यतरुथा कामुयेत तुथा कुर्यात् ॥ २७ ॥

सु हैषु यज्ञ एवाच। नमुताया वै बिभेमीति का ते एनमतेत्यभितु† एवु मा पुरिस्तृणीयुरिति तुस्मादेतदभि मभितः पुरिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृप्तिरिति ब्राह्मणस्यैव तृप्ति मनु तृप्येय मिति तुस्मात्सुꣳस्थिते यज्ञे ब्राह्मणं तर्प्पयितवै ब्रूयाद्यज्ञ मेवैतत् तुर्प्पयति ॥ २८ ॥ १ ॥

॥ इति षष्ठप्रपाठके प्रथमं ब्राह्मणम् [७. ३.] ॥

अथाग्नये क्षिप्तज्ञद्यागम्, तस्य प्रधानयागसमानन्तर्यञ्च विधातु माख्यायिका माह— "यज्ञेन वा इति। पुरा खलु 'देवाः' 'यज्ञेन' साधनेन 'दिवं' प्राप्ताः; तथा पश्वभिमानी 'देवः' रुद्रः 'इह' यज्ञवास्तावुषित्वा[१] द्युलोकाद्धीनोऽभूत्। अत एव 'वास्तौ' एव स्थितत्वात् रुद्रो 'वास्तव्य इति' वेदविदः कथयन्ति ॥ १ ॥

रुद्रस्येहैव हीनभावे कारणाभिधानायाह— "स येनैवेति।

---

* 'उतो'–इति च। † 'oतेत्यभित'–इति च।

१— 'यज्ञवास्तवरोषित्वा'–इति ज, झ, दृष्टौ डा०-ओयेबरेणापि।

'अथ' रुद्राः 'देवाः' 'येन' यज्ञेन साधनेन 'दिवं' गताः, 'तेनैव' साधनेन, तत्साधयितुं साधन मतिदुस्सम्पाद मिति ब्रुवन् आत्मान मन्तरेण क्लेशापनयनां स्वर्गसाधन मन्वतिष्ठत् ॥ २ ॥

"स ऐक्षतेति । भवतः स चाहं देवैरेव्यक्तो भुव मा यज्ञादेते व्यवहितं कुर्वन्तीत्येवेति विचार्य स्वयं यज्ञप्रदेशं प्रत्युत्तमासन्नद्धो[१] भूत्वोत्तरस्यां दिशि स्थित्वोत्काले यज्ञं प्रतिरोद्धु मुत्तस्थौ ॥ ३ ॥

तथा च सति— "ते देवा अब्रुवन्निति । 'ते देवाः' (अमुं[२]) यज्ञं विसृष्टं मा कार्षीरित्यब्रुवन् । अथ स रुद्रोऽपि हे देवाः ! 'ते' यूयं 'मा' मां 'यज्ञात्' अन्तर्हितं 'मा' कार्ष्ट, अत एव 'आऋतिं 'मे' मदर्थं 'कल्पयतेति' उक्तवान् । तैः 'तथा' अस्तु 'इति' उक्ते 'सः' रुद्रो यज्ञं 'समस्थत्' ऊर्द्धं प्रापयत् ; न च हविरादिकं बहिः क्षिप्तवान् । तथा 'कञ्चन' किमपि यज्ञावयवं न हिंसितवान् ॥ ४ ॥

"ते देवा इति । अथ 'ते देवाः' परस्पर मित्थम् 'अब्रुवन्',— अस्माकं प्रदानाय 'यावन्ति हवींषि गृहीतानि', 'तेषां' पूर्व्वं माऋतं 'ऋतं[३] ग्रिष्टम् 'उपजानीत' । 'यथा' येन प्रकारेण द्रव्येण 'अस्मै' रुद्राय 'आऋतिं कल्पयाम' 'इति' ॥ ५ ॥

एव मुक्त्वा, "तेऽध्वर्यु मब्रुवन्निति । हे अध्वर्यो ! त्व मस्माक मवत्तानि 'हवींषि' आग्नेयादिक्रमेण अभिधारणं कुरु । तथा चैकस्मै, ततोऽप्यवशिष्टायावदानाय, 'पुनः' तदवत्तशेषम्, 'पुनः' अभिधारणेन 'आप्याययं', ततः अयातयामं कृत्वा सर्वाण्यवत्तशे-

---

१— 'प्रत्युच्चक्राम स क्रुद्धो'—इति ङ । २— नैतत् पदं ङ-पुस्तकादन्यत्र ।
३— 'तेषां पूर्वं माऋतिऋतां'—इति झ,'तेषां सर्वेषां माऋतिऋता'—इति ढ ।

षाणि अगतसाराणि कुरु, 'ततः' 'एकैकं' यावन्तः प्रधानग्नेषा-स्तेष्वेकैक मवदानं कुरु ॥ ६ ॥

देवैरभिहित मर्थं मध्वर्युणा तथैवानुष्ठित मर्थं श्रुतिभूतार्थेन श्लोटानुवदति— "सोऽध्वर्युरित्यादिना ॥

इदानीं मवशिष्टभात्केन रुद्रस्य वास्तव्यत्वप्रसिद्धिं माह— "तस्मादिति । आख्यायिकासिद्धं मर्थं मिदानीं विधत्ते— "तस्माद् यस्यै कस्यै चेति । हविर्ग्रहणवत्सर्वप्रदेशेष्वपि खिष्टकृतो नियतत्वे कारणाभिधानं "सर्वत्र होति । रुद्रः 'अन्नाभक्तः' ॥ ७ ॥

कथ मग्नेः खिष्टकृति क्रियत इत्याशङ्क्याह— "तदा अग्नय इतीति । प्राच्यादिदेशभेदेन शर्वादिनामभेदेऽपि देवतैकैवेत्यर्थः । यद्येवं तर्हि अन्यत् नाम किन्न स्यादित्यत आह— "तान्यस्येति । 'अस्य' रुद्रस्य अग्निनामाभिधेयस्य अस्तु पावकादि नाम ; सर्वलोको-ऽपकारित्वात् । 'तस्मात्' तत्र सर्वत्र 'अग्नये-इति क्रियते' ॥ ८ ॥

अथ किमर्थं खिष्टकृत इति विशेषणं हविर्दात्रभिः क्रियते ? तत्र कारण माह[1]— "ते होचुरिति । 'यद्' यस्मात् 'त्वयि' 'अमुत्र' आहवनीयदेशे आहुत्याधारभूते 'सति' 'अयज्ञहि' दृष्टवन्तः, तस्मात् । अथ वा 'यत्' हविर्जातम् 'अयज्ञहि', 'तत्' सर्वं 'खिष्टम्' अवैकल्येन प्र'कुरु' ; यथा साङ्गं फलवद्भवति, तथा कुर्वित्यर्थः । यस्मादूचुः, 'तस्मात्' स तथैव 'खिष्ट मकरोत्' सर्वत्रापि विशे-षणत्वेन 'खिष्टकृत इति' क्रियते । तस्मात् "अग्नये खिष्टकृते"-इति खिष्टकृद्यागसमये ब्रूयादित्यर्थः ॥ ९ ॥

१— 'खिष्टकृत इति विशेषणस्य कारण माह'-इति ढ ।

अथ खिष्टकृन्निगद[1] मभिधातु माह[2]— "सोऽनुवाक्या मिति। 'सः' होता, खिष्टकृदनुवाक्यानन्तरं 'ये' आनन्तर्येण प्रयाजाज्य-भागादिदेवाः खिष्टाः, तान्, तं 'खिष्टकृत मग्निं' च 'सम्पश्यति' संस्मरेत्, सम्भूयानुवदेदित्यर्थः॥

सन्दर्शनप्रकार मनूद्य क्रमेण व्याचष्टे—"अथाऽग्निः[3]"-इत्यादिना। 'अथ' खिष्टकृत् 'अग्निः' ('अग्नेः') प्रथमाज्यभागदेवस्य ('प्रिया') प्रियाणि 'धामानि' 'इति' निःशेषाणि 'अयाट्' इष्टवान्। 'तत्' तेनैतन्मन्त्रभागपाठेन प्रथमम् 'आज्यभागं' खिष्टं कृतवानित्युक्तवान् भवति। एव मितरवाक्यान्यपि योज्यानि। एष खिष्टकृन्निगद आवाहननिगदेनैव व्याख्यातप्रायः[4] सम्पश्यताम्[5]॥ १०॥

अत्र खिष्टकृदग्निरवान्तरदेववत्खिष्टीकर्त्तव्यत्वेनोक्तः, सोऽभि-धीयते— "यत्तदग्नेर्होतुः प्रिया धामानीत्यनेन। अत्राज्यभागादि-देवेभ्योऽन्य मिच्छितत्वाद्याडिति भूतार्थे प्रयोगात् खिष्टकृदग्नेः स्वस्तेः परं यष्टव्यत्वम्। यत्तदिति विधर्थेः पञ्चमलकारः[6]। "अग्निं

१— सु एष निगदः वा० सं० २१ अ० ४७ कण्डिकायां द्रष्टव्यः।

२— 'अथ खिष्टकृन्निगद मभिदधाति'-इति ङ।

३— 'अयालग्निः'-इत्येव पाठोऽस्मद्दृष्टेषु सर्वपुस्तकेषु, पठ्यते तु अया-ळग्निः'-इति; वस्तुतः 'अयाडग्निः'-इत्येव साधुः।

४— पुरस्तात् ४. २. १६ द्रष्टव्यम् (२८८, २९१ पृ०)।

५— नैतत् पदं ङ-पुस्तके।

६— "लिङर्थे लेट्"-इति पा० सू० ३. ४. ७।

होतार माहेति। होमाधार मग्नि माह। स एव खिष्टकृदग्निः; "त्वय्यसुच सत्ययज्ञहौत्युक्तत्वात्[1]। किं मेतत्सन्दर्शनमाचेणाग्निः कथं खिष्टं कुर्यादित्याशङ्क्य तस्य प्रीत्युत्पादनप्रकारं दर्शयति— "तदस्मा इति। 'तत्' तस्मात् 'अस्मै' खिष्टकृतेऽग्नये पूर्वम् 'एतां माहुतिं कल्पयित्वा' ('अथ') इदानीम् ('एतेन') अनेन यजदग्नेरिति भागेन 'भूयः समग्राभ्यन्' (भूयसीं प्रीतिं मुदपादयन्[2])। "तस्मादिति। सर्वथाग्नेः सन्तुष्टत्वाय खिष्टकृत्त्वकरणस्य प्रकाशनादेवं सम्पद्येदित्यर्थः॥ ११॥

अयाड्कारात् प्राग् देवतानामनिर्देश मेकीयपक्षत्वेनोपन्यस्य निराचष्टे— "तद्धैक इति। तत् स्वय मेव प्रदर्शयति— "अग्नेरयाट् सोमस्यायाडिति। अग्नेः सोमस्य च यानि धामानि, तानि खिष्टकृदग्निः सम्यगिष्टवानित्यर्थः। 'विलोम' विरुद्धम्; खिष्टीकरणस्यैवाभ्यर्हितत्वेन प्रथमनिर्देष्टव्यत्वात्[3]। अतः 'प्रथम मभिव्याहरन्' पुरुषोऽयाड्कार मेव प्रथम मभिव्याहरेत्॥ १२॥

स्वं महिमान मित्यस्य तात्पर्य माह— "यजत् स्वं महिमान मिति। अयं खिष्टकृदग्निः 'स्वं महिमानं' स्वकीयं देवतारूप मपि 'यजत्' यजेत। खिष्टकृत इदानी मपि अकृतत्वादयाडिति नोच्यत इत्यभिप्रायः। 'यज' यष्टव्यदेवता 'आवाहयति', तत्रापि 'स्वं

१— पुरस्ताद् द्रष्टव्यम् (३६६ ए० १पं०)।

२— व्याख्यैषा ठ-पुस्तकमात्रे दृश्यते।

३— 'देवतां देवतानाम पूर्वम् अयाट्कारात् प्राक्। तद्विरुद्धम्; खिष्टीकरणस्यैवानभ्यर्हितत्वेन प्रथमनिर्देष्टव्यत्वात्'—इति ठ।

महिमानं' महत्वस्य विग्रह मप्यावाहयति। अतो यथा आवाहिता देवताः सर्वा अपीष्टाः, एवं स्वं महिमार्थ मपि यष्टव्यम्। यतः 'अतः प्राक्' 'किञ्चन' 'स्वाय महिम्ने' इदं हविः 'इति' 'न क्रियते', तस्मात् 'अत्र' स्विष्टकृन्निगदाभिधानसमये 'तत्' तेन स्वं महिमान मित्यनेन 'तम्' (अग्नेर्महिमानं[1]) प्रीणितवान् भवति। अत एव यच्चदग्नेरित्येतत् अग्नेरपि यागानुज्ञाप्रदानादेव पूर्वं प्रागावाहनसमये आवाहितः स्वो महिमा। 'तथो ह' तथैव सति 'अस्य' यजमानस्य 'अमोघाय' साफल्याय 'आवाहितः' भवेत्। तस्मादित्युपसंहारः ॥ १३ ॥

"आ यजतेति। 'आ यजता मेज्या दृषः'-इतिभागस्य तात्पर्य माह— दृट्शब्देनात्र मुच्यते; तदुपजीवित्वात् 'प्रजाः' अपि 'दृषः'; 'एज्याः' पुनः पुनरिज्याः[2]; अत एतत्पाठेन यजमानरूपाः प्रजाः 'यायजुकाः' दृष्टिप्रीलाः[3] 'करोति'। अतः कारणात् 'ता इमाः' सर्वा यजमानरूपाः प्रजा इदानीम् 'अर्चन्त्यः' बहुकर्म कुर्वन्त्यः 'आत्मन्तः' आत्मानं व्यापारैः क्लेशयन्त्यः ('चरन्ति') यागाननुतिष्ठन्ति ॥ १४ ॥

"सो अध्वरेति। सो अध्वरेत्यस्य तात्पर्य माह— "तद्यज्ञस्यैवैतदिति। 'हविः' सौविष्टकृतम्, 'जातवेदाः' आहवनीयाधारः स्विष्टकृदग्निः। 'यत्' 'हविः' (सौविष्टकृतं[4]) 'देवाः' सेवन्ते[5], 'तेन'

१— ठ-पुस्तके नैते पदे दृश्येते।

२— 'पुनर्यष्टा'-इति ज, झ; 'पुनरिज्या'-इत्यपि दृष्टो डा०-वेबरेण।

३— 'इज्याप्रीलाः'-इति च। ४— नैतत् पदं ठ-पुस्तकादन्यत्र।

५— 'सेवतां'-इति ठ।

सेवितेन हविषा 'महत्' उत्तमं[1] स्थानं 'जयति' यजमानः ; अतः सप्तदुर्हविर्षाऽधीनत्वादेतत्याठो युक्तः ॥ १५ ॥

इत्थं खिष्टकृन्निगदं व्याख्याय तस्य याज्यां पुरोऽनुवाक्याञ्चाह— "तद्यदिति। 'अत्र' खिष्टकृदिति। 'तद्यत्' तस्मात् 'एते' वक्ष्यमाणे एव 'याज्यानुवाक्ये' 'अवक्लृप्ततमे' अत्यन्तं योग्ये भवतः। तयोरवक्लृप्तत्व माह— "तृतीयसवनं वा इति। अयं 'खिष्टकृद्' यागः 'तृतीयसवनं' तत्स्थानीयः; अन्तिमत्वसाम्यात्। तच्च 'तृतीयसवनं' 'वैश्वदेवं' विश्वे देवास्तत्राभिमानिनः; अतः सर्वथा वैश्वदेवेन भवितव्यम्। तत्रापि "पिप्रीहि"-इति[2] या ऋगस्ति, 'तत्' 'अनुवाक्यायै' अनुवाक्यायाः 'वैश्वदेवं' रूपम् ; तच्च "देवान्"-इति देवानां बहुत्वश्रवणात्। "अग्ने यदद्य"-इत्येत्[3] 'याज्यायै' याज्यायाः वैश्वदेवत्वम् ; अत्र च "विशः"-इति बहुवचनलिङ्गात्। 'एते' ऋचौ 'एवंरूपे' वैश्वदेवलिङ्गके "पिप्रीहि देवान्"—"अग्ने यदद्य विशः"-इत्येवंरूपे ; ('तेन उ') तेनैव कारणेन 'एते' द्वे ऋचौ 'तृतीयसवनस्य रूपम्' ॥ १६ ॥

तयोर्यत् त्रिष्टुप्त्वम्, तत्प्रशंसति— "ते वै त्रिष्टुभाविति। खिष्ट-

---

१— 'जेतव्यं'-इति ज।

२— ऋ० सं० १०. २. १। तै० सं० ४. ३. १३. १३। पाठस्त्वेवम्—"पिप्रीहि देवाꣳ उशतो यविष्ठ विद्वाꣳ ऋतुꣳ ऋतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वꣳ होतृणा मस्यायजिष्ठः"-इति।

३— ऋ० सं० ६. १५. १४। तै० सं० ४. ३. १३. १४। तत्पाठस्त्वेवम्— "अग्ने यदद्य विशो अध्वरस्य होतः पावक प्रशंसे वस्वꣳ हि यज्वा। ऋता यजासि महिना वि यद् भूर्ईळ्या वह यविष्ठ या ते अद्य"-इति।

कृतो ऽनावग्निष्टरूपत्वात् 'एतद्' 'यज्ञस्य' 'वास्तु' वास्तुस्थानीयम्। तच्च वास्तु 'अवीर्यं' निस्सारम्; उपयुक्तशेषत्वात्। त्रिष्टुप् प्रजापतेः बलवद्भ्यः उरोबाहुभ्यः सकाशादिन्द्रेण सहोत्पन्नत्वात् 'त्रिष्टुबिन्द्रियम्'; अत एव 'वीर्यम्'; अतः पुरोऽनुवाक्यायास्त्रिष्टुप्त्वकरणेन अबले 'स्त्रिष्टकृति' 'इन्द्रियं वीर्यं मेव' स्थापितवान् भवति॥ १७॥

पश्चान्तर माह— "उतो अनुष्टुभावेवेति। स्त्रिष्टकृतः प्रधानेभ्योऽतिरिक्तत्वेनाधिकत्वाद् 'वास्तु', 'अनुष्टुप्' अपि गायत्र्यादिसवनच्छन्दसोऽतिरिक्तत्वाद् 'वास्तु'; अत एव 'वास्तावेव' 'वास्तु' स्थापितवान् भवति। तच्च वास्तु 'पेसुकम्' अभिवर्द्धनशीलम्; अत एव तज्ज्ञानवान् यः 'अनुष्टुभौ' याज्यानुवाक्ये कुर्यात्, सोऽपि 'प्रजया पशुभिः' च 'पिस्पति[1]' अभिवृद्धो[2] भवति॥ १८॥

याज्यानुवाक्ययोर्विलक्षणच्छन्दस्त्वपक्षं निराकर्तुं माख्यायिका माह— "तदु हेति। 'भास्त्रवेयः' त्रुक्तोभयपक्षोक्तफलावरोधाय 'अनुष्टुभ मनुवाक्यां', 'त्रिष्टुभं याज्याम्' अकरोत्। 'सः' विलक्षणानुष्ठानदोषेण कदाचित् सञ्चारसमये 'रथात् पपात'। पतञ्चैकं 'बाहुं' भूमौ प्रसारितवान्[3]; सबाहुर्विस्रस्तोऽभूदित्यभिप्रायः। 'सः' च विचार्य किञ्चिदविहितं कृतवानस्मि, 'तस्मात्' 'इदं' रथात्पतनम् 'अपत्[4]' प्राप्त मभूदिति निश्चित्य, "यदनन्तरं यद्भवति, तत्तस्य कारणम्"—इतिन्यायादिदं विपरीतानुष्ठान मेव कारणं

१— निघ० २.१४. २१। "पिस्फ पेस्फ गतौ" भ्वा० प०, व्यत्ययेन श्यन्।
२— 'अतिवृद्धो'-इति ज, झ। ३— 'ग्रस्रे'-इत्यस्यैवाय मर्थः स्यात्।
४— मूलविरुद्धपाठोऽयम्; तस्यैव व्याख्यानं वा कृत मेवं स्यात्।

बुद्धवान्। यस्मादेवं 'तस्मात् सर्वत्र' विपरीतं 'न' अनुतिष्ठेत्। अतः 'उभे' याज्यानुवाक्ये 'अनुष्टुभावेव वा त्रिष्टुभावेव वा'; खिष्टकृद्याज्यानुवाक्ये 'सच्छन्दसौ' समानच्छन्दस्के भवेताम् ॥ १९ ॥

खिष्टकृदवदानहोमप्रदेशयोर्विशेष माह— "स वा उत्तरार्द्धादिति। उत्तरपूर्वदिशो[1] लोकपालत्वेन रुद्रसम्बन्धः सर्वशास्त्रप्रसिद्धः[2]; तेन कारणेनापि उत्तरार्द्धादेवावदानं, तत्रैव होमस्य कर्त्तव्य इत्याह— "एतस्मै वै दिश इति। खिष्टकृद्यागविधानसमये "उत्तरत उपोत्पदे"-इत्युक्तत्वात्[3]; "यत उत्पद्यते, 'तं तत एव' शमयितव्यम्"— इतिनियमात् उत्तरतोऽवदानहोमौ कर्त्तव्यौ। तथा च कात्यायनः— "यावद्धविरुत्तरार्द्धात् खिष्टकृतस्तत एव होमः"-इति[4] ॥ २० ॥

उत्तरदेशे प्रदानेऽपि प्रधानहविषा महासंस्थां विधत्ते— "स वा अभ्यर्द्ध इवेति। 'इतराभ्यः' प्रधान-'आकृतिभ्यः' सकाशात् 'अभ्यर्द्धे' सन्निहितप्रदेशे एव; न तासां स्थाने। विपक्षे बाध माह— "इतरा इति। 'इतरा आकृतीः अनु' यजमानस्य 'पशवः' 'प्रजायन्ते'; ताः पशुफलजनका इत्यर्थः। खिष्टकृद्यागस्य 'रुद्रियः' रुद्रदेवत्यः।

१— 'उत्तरदिशो'-इति क; 'उत्तरपूर्वदिशो'-इत्यपि दृश्यो डा०-वेबरेण।

२— "इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्"-इति अम० को० १. ३. ३।

३— पुरस्ताद् द्रष्टव्यम् (४९४ पृ० १४ पं०)।

४— का० श्रौ० सू० ३. ३. २६, २७। यावन्ति हवींषि भवन्ति, तेषां सर्वेषा मुत्तरार्द्धात् उत्तरस्मात् प्रदेशात् खिष्टकृतः खिष्टकृद्यागार्थं नयति। ततोऽग्नेरुत्तरार्द्ध एव खिष्टकृदवदानानां होमो भवति।

एवं सति यदि ताभिः सह खिष्टकृदाऋतिं मासंयोजयेत्, तदा रुद्रेण[१] सह 'पशून्' 'प्रसजेद्' योजयेत् । अत एतेनापराधेन यजमानस्य गृहावस्थिताः 'पशवः' 'उपमूर्यमाणाः' समीप एव म्रियमाणाः प्राप्नुयुः । तस्मादितराभ्यो नातिदूरे जुहुयात् । तथा च सूत्रम्— "असंसृष्टा माऋतिभिः"-इति[२] ॥ २१ ॥

आहवनीयगार्हपत्ययोरन्यतरस्मिन् हविः-अपणं विधास्यति, तदर्थं तयोराधानप्रदेशपरिमाणं विधातु माह— "एष वा इति । 'येन' साधनेन 'तद्देवाः' 'दिवं' गताः, 'स एष यज्ञः' खलु । एष यज्ञ इत्येतद्विग्निनष्टि— "एष आहवनीय इति । यज्ञसाधनत्वादाहवनीयस्य यज्ञत्वम् । यस्त्विह भूमावेवाग्निष्टः, 'स गार्हपत्यः' । 'तस्मात्' इदानी मपि दिवङ्गन्तुकामाः 'एतम्' आहवनीयं यज्ञसाधनं 'गार्हपत्यात्' 'प्राञ्चं' प्राग्देशं प्रति 'उद्धरन्ति' यजमानायोद्धरेयुरित्यर्थः ॥ २२ ॥

उद्धृत्य प्राच्यां कियत् पुर आदध्यात्? इत्यत्र वक्तुन् पचानाऋतः— "तम् अष्टाक्षित्यादिना । विक्रमशब्देनात्र विक्रम्यते अनेनैवेति व्युत्पत्त्यैकपादप्रक्षेपपरिमितोऽग्र उच्यते[३]; अन्यत्र यजमानसम्मानस्य करणात् । गार्हपत्य मवधीकृत्य तथाविधेषु अष्टसु प्रक्रमेषु गतेष्वाह-

---

१— 'रुद्रियेण'-इति मूलपाठः; तस्यैव व्याख्यानं स्याद्रुद्रेणेति ।

२— का० औ० सू० ३. ३. २९ । इतराभिराज्याऋतिभिरसंसृष्टां खिष्टकृदाहुतिं जुहुयादिति तदर्थः । ३— 'क्रमु पादविक्षेपे'-इति भ्वा० प० ४७३ धातुः । प्रकर्षेण क्रमणं प्रक्रमः । क्रमणेगारत्निमात्रः प्रक्रमो भवति; "तस्मात् प्राङ् प्रक्रामति त्रीन् विक्रमान्"-इत्यादिश्रुतेः (३. ५ १. १.) । अरत्निस्तु पुरुषपद्धमांग्रः; तस्माद् द्विपदः प्रक्रमः ।

वनीय मादधीत। तथा सति तद्वारा अष्टसङ्ख्यायुक्त-'गायत्र्यैव' 'दिवं' प्राप्नवान् भवति। तस्माद्गायत्र्यैसाम्यलाभादष्टप्रक्रमपरिमाणाधानं प्रशस्त मित्यर्थः ॥ २३ ॥

एव मुत्तरवाक्यान्यपि योज्यानि ॥ २४ ॥

क्रियासौकर्यानपक्षवेनान्यान् पक्षानभिधाय कर्मणो यावन्मात्रं पर्याप्त मिति मन्यते, तावन्मात्र मेव कुर्यादित्याह— "नाचेति। 'अत्र' आधानविषये अष्टत्वादि[1]-'माचा' 'नास्ति' शास्त्रतः। अतः स्वेच्छया 'यत्रैव' देशे आहवनीय आहिते कर्म सुकरं भवतीति 'स्वयं मनसैव मन्येत' निश्चिनुयात्, तत्र 'आदधीत'; तस्मात् 'अल्पक मिव' अल्पक मपि, अष्टप्रक्रमादत्यल्प मपि 'प्राञ्चं' दिशं प्रत्युद्धरेत्। 'तेनैव' आत्मनैव[2] 'दिवं' प्राप्नोत्येव। अत्र कात्यायनः— "पुरस्तादाहवनीयस्याष्टासु प्रक्रमेष्वेकादशसु द्वादशसु मत्या वा"- इति[3] ॥ २५ ॥

इदानीं हविः-अपणविषये केषाञ्चित्पक्ष माह— "तदाहुरिति। आहवनीय एव अपयता मभिप्राय माह— "अतो वा इति। 'अतः' अस्मादाहवनीयात् 'देवाः' 'दिवं' प्राप्ताः, अतोऽस्माभिरपि तत्रैव अपणं कर्त्तव्य मिति तेषा माशयः। उपोत्क्रमणसाधनत्व मेव कुत इत्यत आह— "तेनो एवेति। तेनैवाहवनी-

---

१— 'अष्टात्वादि'-इति भ। २— 'आत्मनैव'-इति ज।

३— का० औ० सू० ४. ८. १९। गार्हपत्यस्य खरस्य मध्यात् प्राचां दिशि अष्टासु पदिकेषु प्रक्रमेषु आहवनीयखरस्य मध्यं कुर्यात्। 'मत्या वा' उक्तसङ्ख्यातो न्यूनेष्वपि सप्तसु षडादिषु वेत्यर्थः।

येन साधनेन प्रयासात्मकं हविःप्रदानादि सकलं कर्मानुतिष्ठन्; अतस्तस्योपोत्क्रमणसाधनत्वम्। अतो वय मपि अन्यत्र अपण मन्यत्र जुहवाम इति वैय्यधिकरण्यं मा भूदिति तस्मिन्नेव आहवनीये अपणं यागञ्च करवामेति। वैय्यधिकरण्ये दोष माह— "अपस्खल इवेति। 'गार्हपत्ये अपयेयुः' इति यत्, 'सोऽपस्खलः इव' अपस्खल नाम 'हविषां' भवति। फल्गितानां व्रीह्यादीनां तुषविमोकादिसम्पादनप्रदेशः 'स्खलः'। यथा व्रीह्यादिरग्निः खलाद्[1] बहिरपि प्राप्तो व्यर्थो भवति, एव मन्यत्र अपण मपि। अतः प्रागुक्तप्रकारेण आहवनीये एव 'यज्ञे', 'यज्ञं' यज्ञसाधनत्वात् अप्यमाणं हविरपि यज्ञः ॥ २६ ॥

अन्येषां पच माह— "उतो इति। प्रथमपक्षोक्त माहवनीये अपण मचापि सम्भावयति— "आहवनीयो वा इति। आहवनीयस्य इतः प्रणीतत्वात्। कि मुपचरितेनाहवनीयेन, साक्षात्तस्मिनेव अपण मस्त्वित्याशङ्क्य तस्य अपणायोग्यत्व माह— "न वा एष इति। 'एषः' आवनीयः घृत-अपणाय 'न वै' नोचितः, खल्वित्यर्थः। तर्हि कस्मा उचित इति, तत्राह— "तस्मै वा इति। अग्नौ घृतस्य होमायोचित इत्यर्थः ॥

१— 'स्खलाद्'-इति ठ। वस्तुतो लोके निस्सकारः प्रयोग एव स्यात् साधुः। तथा हि मनुः—"खलात् क्षेत्रादगारादा"-इत्यादि (११. १७.)। "खल उत्तरवेदिः"-इति आश्व० श्रौ० ७. १३. १४; का० श्रौ० २२. ३. ४३। "ये वेदि मभितस्तानुत्तरवेदिदेशे मृदून्ति"-इति च तत्रैव तत उत्तरम् ४५ सू०।

अथवा एवं व्याख्येयम्। "आहवनीयो वा एष इति, मुख्य आहवनीय एवोच्यते। यस्मात्[1] 'एष आहवनीयः' आहवनार्हः; अत एष पक्वस्य हविषो होमाय योग्यः; न त्वामस्य पाकायेति। अग्निदयपचेऽप्युपपत्तिसम्भवाच्छ्रपणस्यैच्छिकत्व माह— "अतो यत-रयेति। यथा कामयते, तथैव कुर्यात् ॥ २७ ॥

अथाग्नेः परिस्तरणं विधातु माह— "स वै एष इति। 'यज्ञः' अग्निः; एष आहवनीय इत्युक्तत्वात्। 'नग्नता' प्रावरणराहित्यम्। अग्ने-र्नग्नत्वपरिहार मजानानाः पृच्छन्ति— "का त इति। 'अनग्नता'-इति छेदः। "तस्मादिति, परिस्तरणविधिः ॥

दक्षिणभूतब्राह्मणसन्तर्पणं विधातु माह— "दक्षिणाया इति। भीत्युपन्यासस्तस्यावश्यम्परिहर्त्तव्यत्वद्योतनार्थः। कः परिहारस्तृष्णाया इति पृष्ट आह— "ब्राह्मणस्यैवेति। 'एव'-कारेण स्वतर्पणादपि ब्राह्मणतर्पण मेव श्रेय इत्यय मर्थो द्योत्यते। 'ब्राह्मणस्य'-इति जातावेकवचनम्[2]; ब्राह्मण मित्यभिधानात्। "तस्मादिति। 'ब्राह्मणं तर्पयितवै ब्रूयात्' यजमान इति शेषः। 'एतत्' एतेन ब्राह्मणतर्पणेन 'यज्ञ मेव' अग्नि मेव ॥ २८ ॥ १ ॥ [७. ३.] ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
प्रथमकाण्डे सप्तमाध्याये तृतीयं ब्राह्मणम् ॥

१— 'तस्मात्'-इति ज, झ। २— पा० सू० १. ३. ५८ द्रष्टव्यम्।

प्रजापतिर्ह वै स्वां दुहितर मभिदध्यौ । दिवं वोषसं वा मिथुन्येनया* स्या मिति ताꣳ सम्बभूव ॥ १ ॥

तद्दे देवाना मागꣳआस । यु ऽइत्थꣳ स्वां दुहितर मस्माकꣳ स्वसारं करोतीति ॥ २ ॥

ते ह देवा ऊचुः । योऽयं देवः पशूना मीष्टे ऽति-सन्धं वा ऽअयं चरति यु ऽइत्थꣳ स्वां दुहितर मस्माकꣳ स्वसारं करोति विध्येम मिति तꣳ रुद्रोऽभ्यायत्य विव्याध तस्य सामि रेतः प्रचस्कन्द तथेन्नूनं तदास ॥३॥

तस्मादेतदृषिणाभ्यनूक्तम् । पिता यत् स्वां दुहितर मधिष्कन् क्षया रेतः सञ्जग्मानो निषिञ्चदिति तदाग्निमारुत मित्युक्थं तस्मिंस्तद्याख्यायते युथा तद्देवा रेतः प्राजनयंस्तेषां यदा देवानां क्रोधो व्यैदृग्घ प्रजापति मभिषज्यंस्तस्य तꣳ शल्यं निरकृन्तन्स वै यन्नु ऽएव प्रजापतिः ॥ ४ ॥

ते होचुः । उपजानीत युथेदं नामुयासत् कनीयो ह्याहुतेर्युथेदꣳ स्यादिति ॥ ५ ॥

ते होचुः । भगायैनद्दक्षिणत ऽआसीनाय परिहरत तद्भगः प्राशिष्यति तद्युथाहुतꣳ मेवं भविष्यतीति तद्भगाय

---

* 'मिथुंन्येनया'–इति क, ग ।.

दक्षिणत आसीनाय पर्युजह्रु*स्तङ्गोऽवेक्षाञ्चक्रे तस्या-क्षिणी निरैदाह तथेन्नूनं तदास तस्मादाहुरन्धो भुग इति ॥ ६ ॥

ते होचुः। नो न्वेवाचाशमत् पूष्ण एनत् पुरि-हरतेति तत् पूष्णे पर्युजह्रुस्तत् पूषा प्राश तस्य दतो निर्जघान तथेन्नूनं तदास तस्मादाहुरदन्तकः पूषेति तस्माद्यं पूष्णे चरुं कुर्वन्ति मुपिष्टाना मेव कुर्वन्ति यथादन्तकायैवम् ॥ ७ ॥

ते होचुः। नो न्वेवाचाशमद् बृहस्पतय एनत् पुरिहरतेति तद् बृहस्पतये पर्युजह्रुः‡ स बृहस्पतिः सवितार मेव प्रसवायोपाधावत् सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासु-वत् तदेनꣳ सवितुप्रसूतं नाहिनत् ततोऽर्वाचीनꣳ शान्तं तदेतन्निदानेन युत् प्राश्निचम्§ ॥ ८ ॥

स युत् प्राश्निच मवद्यति। युदेवाचाविद्वं यज्ञस्य युद्रुद्रियं तदेवैतन्निर्मिमीतेऽथाप उपस्पृशति शुग्नि-रापस्तुदङ्गिः शमयत्यथेडां पशून्त्समुवद्यति ॥ ९ ॥

स वै यावन्माच मिवैवावद्येत्। तथा शल्पः प्रच्यवते

---

*,†,‡ 'पर्युजर्ह्रुः'–इति क, ग।

§ 'प्राश्निचं'–इति क, ग; 'प्राश्निचꣳ'–इति ख, च।

तस्माद्यावन्मात्रं मिवैवावद्येदन्यतरत ऽआज्यं कुर्याद्-धस्ताद्वोपरिष्टाद्वा तथा खदून्निस्मरणवद्भवति तथा निस्रवति तस्मादन्यतरत ऽआज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा॥ १० ॥

स ऽआज्यस्योपस्तीर्य। द्विर्हविषोवदायाथोऽपरिष्टाद्घाज्यस्याभिघारयति तद्यथैव यन्नस्यावदान मेव मेव तत्* ॥ ११ ॥

तन्न पूर्वेण परिहरेत्। पूर्वेण हैके परिहरन्ति पुरस्ताद्वै प्रत्यञ्चौ युजमानं पशव ऽउपतिष्ठन्ते रुद्रियेण ह पशून् प्रसजेद्यत् पूर्वेण परिहरेत्तेऽस्य गृहाः पशव ऽउपमूर्युमाणा ऽईयुस्तस्मादित्येव तिर्यक् प्रजिहीत† तथा ह रुद्रियेण पशून्न प्रसजति तिर्यगेवैनं निर्मिमीते ॥ १२ ॥

तत् प्रतिगृह्णाति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामीति ॥ १३ ॥

तद्यथैवादो बृहस्पतिः। सवितारं प्रसवायोपाधावत् सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाहिनदेव मेवैषु

---

* 'मेव तत्'–इति ख, 'मेव मेतत्'–इति च।

† 'प्रजहीत'–इति हरिस्वामिसम्मत इति डा०–वेबरः।

ऽएतत्सवितार मेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रसौति तदेनꣳ सवितृप्रसूतं नु हिनस्ति* ॥ १४ ॥

तत् प्राश्नाति। अग्नेष्ट्वास्येन प्राश्नामीति न वा ऽअग्निं किञ्चन हिनस्ति तथो हैनु मेतन्नु हिनस्ति† ॥ १५ ॥

तन्नु दङ्क्षिः खादेत्। नेन्म ऽइदꣳ रुद्रियं दतो हिनुसदिति तस्मान्नु दङ्क्षिः खादेत् ॥ १६ ॥

अथाप ऽआचामति। शान्तिरापस्तुदङ्क्षिः शान्त्या शमयतेऽथ परिक्षाल्य पाचम् ॥ १७ ॥

अथास्मै ब्रह्मभागं पर्याहरन्ति। ब्रह्मा वै यज्ञस्य दक्षिणतु ऽआस्तेऽभिगोप्ता सु ऽएतं भागं प्रतिविदानु ऽआस्ते युत् प्राशिचं तदस्मै पर्याहार्षुस्तत् प्राशीदथ यु मस्मै ब्रह्मभागं पर्याहरन्ति तेन भागी स यदुत ऽऊर्ध्व मुसꣳस्थितं यज्ञस्य तदभिगोपायति तस्माद्वा ऽअस्मै ब्रह्मभागं पर्याहरन्ति ॥ १८ ॥

स वै व्वाचंयमु ऽएव स्याद्। ब्रह्मन् प्रस्थास्यामी-त्येतस्माद्वचसो व्विवृहन्ति वा ऽएते यज्ञं क्षणन्ति ये मुध्ये यज्ञस्य पाकयज्ञियेडया चरन्ति ब्रह्मा वा ऽऋत्विजां भिषुक्तमस्तद् ब्रह्मा सुन्दधाति नु ह

*,† 'न हिनुस्ति'-इति ग।

सुन्दध्याद्युद्वावद्युमान ऽआसीत तुस्माद्वाचंयमु ऽएवु स्यात् ॥ १९ ॥

स युदि पुरा मानुषीं व्वाचं व्याहुरेत्। तुजो व्वैष्णवी मृचं वा युजुर्वा जपेद्यज्ञो वै विष्णुस्तुद्यज्ञं पुनरारभते तुस्यो वैषा प्रायश्चित्तिः ॥ २० ॥

स यद्वाह। ब्रह्मन् प्रस्थास्यामीति तुद् ब्रह्मा जपत्येतं ते देव सवितर्यज्ञं प्राहुरिति तुत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृहस्पतये ब्रह्मण ऽइति बृहस्पतिव्वै देवानां ब्रह्मा तद्यु ऽएवु देवानां ब्रह्मा तुस्मा ऽएवैतत् प्राह तुस्मादाह बृहस्पतये ब्रह्मण ऽइति तेन यज्ञु मव तेन यज्ञुपतिं तेन मा मवेति नाच तिरोहित मिवास्ति ॥ २१ ॥

मुनो जूतिर्जुषता माज्यस्येति। मुनसा वा ऽइदꣳ सुर्व्वं माप्तं तन्मुनसैवैतत् सुर्व्वं माप्नोति बृहस्पतिर्यज्ञु मिमं तनोत्वरिष्टं यज्ञꣳ सु मिमं दधात्विति यद्विदृढः तत्सुन्दधाति व्विश्वे देवास ऽइह मादयन्ता मिति सुर्व्वं वै व्विश्वे देवाः सुर्व्वेणैवैतत् सुन्दधाति स युदि कामुयेत ब्रूयात् प्रतिष्ठेति युद्यु कामुयेतापि नाद्रियेत ॥ २२ ॥ २ ॥

॥ इति षष्ठप्रपाठके द्वितीयं ब्राह्मणम् [७. ४.] ॥

[प्राग्निचावदानविधर्थ[1] माख्यायिका माह— "प्रजापतिर्ह वै इति । दिव मिति केचिदाऊरुषस मित्यपरे । तथा चैतरेयब्राह्मणम्[2]— "दिव मित्यन्य आऊरुषस मित्यन्ये"- इति[3]।]

"प्रजापतिर्ह वै"। प्राग्निचब्राह्मण मेतत्। तच्च रौद्रश्येषो-रनीकं प्रजापतेर्यज्ञस्य ग्रस्यात्मकं निरवदेयम्। ब्रह्मणा च सवित्-प्रसूतेन बृहस्पतिरूपेण प्राग्नीय मित्येतदाख्यानेन दर्श्यते। 'प्रजापतिः' प्राणपिण्डलोककालयज्ञात्मा, अभिध्यातवान्, 'दिवम् वा उषसं वा' लोकात्मना दिवम्; कालात्मना उषसम्; प्राण-पिण्डात्मना ऋचेभ्यो मृगो रोहितम्, रोहिणी नाम नक्षत्रम्[4]; यज्ञात्मना वाचम्। कथ मभिदध्यौ? 'मिथुनी' मिथुनवान् 'एनया' 'स्या मिति', 'तां' 'सम्बभूव' सङ्गतः ॥ १ ॥

१— प्राग्निचं ब्रह्मणो भागावदानम्। तत् क्रियते येन पात्रेण, तत् पात्रं प्राग्निचहरणम्। तच्च आदर्शसदृशं वर्तुलं, चमससदृशं चतुरस्रं वा, खातवच्च भवति। का० श्रौ० १. ३. ४०, ४१ सूत्रे द्रष्टव्ये।

२— "प्रजापतिर्वै स्वां दुहितर मभ्यध्यायद्, दिव मित्यन्य आऊरुषस-मित्यन्ये"—इत्यादि ऐ० ब्रा० ३. ३. ६।

३— मत्सङ्कृहीतेषु डा०-वेबरसङ्कृहीतेषु च सर्वेष्वेवादर्शपुस्तकेषु शतपथ-ब्राह्मणीयप्रथमकाण्डस्यैतदन्त मेव सायणभाष्य मवलोक्यते, अथ्ये-तदारभ्याकाण्डसमाप्तेर्यत्र यत्रेषस्य हरिस्वामिकृतं भाष्य मेव सर्वत्र विद्यत इत्येतत्काण्डस्यावग्रिष्टं सायणीयं भाष्यं लुप्तकल्पता मुपगत मिति स्यान्मन्तव्यम्।

४— तथा ह्यैतरेयकम्— "ता मश्यो भूत्वा रोहितं भूत्वा०—० या रोहित् सा रोहिणी"—इत्यादि ३. ३. ६।

"तद्वै देवानाम्" । 'तद्' दुहितृगमनं 'देवानां' चेतसि 'आगः' अपराधो बभूव । अपराधी सर्वं मेवं 'करोतीति' ॥ २ ॥

"ते ह देवाः" । 'योऽयं देवः पशूना मीष्टे', तम् 'ऊचुः'— 'अतिसन्धं' सन्धा सन्धानं मर्यादा व्यवस्था, "दुहिता न गन्तव्या"- इति; अतीत्य सन्धाम् (त मतिसन्धं सञ्चरणम्[१]), मर्यादा मतीत्य 'अयं चरति' । ततश्चापराधित्वान्निग्रहार्ह इति 'विध्य इमम्' । "व्यध ताड़ने[२]" । ताडयेषुणेति । यज्ञाङ्गसृष्टिभवितव्यताप्रसक्तानां चेष्टितम् 'तं' 'रुद्रः' आलक्ष्य इषुं विद्धवान् । "तथेत्नूनम्" । इच्छब्दोऽवधारणार्थः[३] । 'नूनं'-शब्दो यस्मादर्थे[४] । यस्मात् तथैव 'तदास' ॥ ३ ॥

"तस्मादेतत्" । 'तस्मात्' तत् 'ऋषिणा' मन्त्रेण 'अभ्यनूक्तम्' । 'पिता' प्रजापतिः 'स्वां दुहितरम्' 'अधिष्कन्' अधिस्कन्नः, तथा च 'सञ्जग्मानः' सङ्गतः सन्, 'द्यावा' द्यावां पृथिव्यां 'यत् रेतः' 'निषिञ्चत्' अभिषिक्तवान् । तस्माद्रेतसः "साध्योऽजनयन् ब्रह्म देवा वाक्तोष्पतिं व्रतपां निरतक्षन्"-इति[५] 'तदाग्निमारुत मिति' नाम्ना 'उक्थं' प्रस्तुतम्[६]। 'तस्मिन्' 'तद्' विभज्याख्यायते । 'यथा' 'तत्' 'रेतः' 'देवाः' प्रजनितवन्त इत्याख्यानशेषयोजना । यज्ञस्य कृत्स्नतायै 'स वै यज्ञ एव' इत्याख्यानस्य प्रकृतसम्बन्धोपक्षेपः ॥ ४ ॥

१— नास्येषोऽर्थो ऋ-पुस्तके । २— दि० प० ७५ धा० ।
३— निरु० १. ३. ५ द्रष्टव्यम् । ४— निरु० १. २. ४ द्रष्टव्यम् ।
५— ऋ० सं० १०. ६१. ७ (पिता यत् स्वां)। ऐ० ब्रा० ३. ३. ६ द्रष्टव्यम् ।
६— "यैषा रौद्री प्रस्तुते"—इत्यादि ऐ० ब्रा० ३. ३. १० पर्यालोच्यम् ।

"ते होचुः"। "यथेदं मिति। यत् 'इदम्' दुग्धोरनीकं यन्नवनीतविलिप्तम्, तद् 'यथा' 'न' वृथा स्यात्, 'यथा' च प्रधानाङ्गतेः न महत् स्यात्, तथा उपायं जानीतेति 'ते' देवाः 'ऊचुः' ॥ ॥ ५ ॥ ॥ ६ ॥

"ते होचुर्नो न्वेव"। प्रायप्रसन्नः[१] एव ब्राह्मणशेषः, किञ्चित्तु वक्ष्यामः। 'नो'—इति प्रतिषेधः[२]; 'नु'—इति वाक्यपूरणः[३]। 'अग्रमत्' न ग्रान्तम्। 'दतः' दन्तान्। 'प्रपिष्टानां' तण्डुलाना मिति शेषः ॥ ७ ॥

'न अहिनत्'। हिनोतेर्हिंसाकर्मणः[४]। न हतवान् 'ततोऽर्वाचीनम्'। वृहस्पतिप्रग्रमनादर्वाक् 'ग्रान्तम्'। "तदेतच्चिदानेनेति। इतिहास मुपसंहृत्याधिदैवज्ञानाय प्राग्निता प्राग्नोऽस्येति 'प्राग्निचम्'। "अण्-प्रकरणे अग्निपदादिभ्य उपसंख्यानम्"-इति[५] हि स्मरन्ति ॥ ८ ॥

"स यत्"। "यदेवाचेति। संसारस्वभावाद् 'यदत्र' किञ्चिदग्रान्तं 'तत्' 'निर्मिमीते' बहिष्करोति, निष्कर्षतीत्यर्थः। 'अथ' 'अप उपस्पृशति' अध्वर्युः। "अथेडां पशूनिति। पशूत्व मिडायाः प्रसिद्धम्[६]; पशवश्च रुद्राद्रुचणीयाः; अतो रुद्रिये प्राग्निचे दत्ते अप उपस्पृश्य 'इडा मवधति' ॥ ९ ॥

१— 'प्रसन्नः'—इत्येव ठ। २— निरु० १४. ३७. वा १३. ४. ६।
३— "नु इत्येषोऽनेककर्मा"—इत्यादि निरु० १. २. २।
४— निघ० ४. ३. ६४। ५— पा० ५. १. ६७ सू० १ वा०।
६—"पशवो वा इळा"—इत्यादि ऐ० ब्रा० २. ४. ६। तै० सं० २. ६. ७. ३। इत उत्तरस्मिन् ब्राह्मणे च (१२ क०) द्रष्टव्यम्।

"स वै" । इडावदानार्थता मुपस्पर्शनस्य दर्शयति— 'खदत्' । "खद् स्थैर्ये हिंसायां च[१]" । अल्पतरत्वादस्थिर मगाढबन्धम्, 'निस्सरणवद्भवति' ; इतरथा तु चतुर्गृहीतं महत्त्वाद्गाढं स्यादित्यभिप्रायः ॥ १० ॥

"स आज्यस्य" । —इति वचनाद् विकल्पः पूर्वेण सह ॥ ११ ॥

"तत्र पूर्वेण" । 'इत्येव'—इत्यभिनयेन अध्वर्युसङ्गरं दर्शयति । एव मेव अध्वर्युसङ्गरेण 'तिर्यक् प्रजहीत' । "ओ हाङ् गतौ[२]" । प्रगच्छेत् प्राग्निचम् ॥ १२ ॥

"तत्प्रतिगृह्णाति" । —इत्यत आरभ्य ब्रह्मत्वं प्राय आधायसमाप्तेः[३] ॥ १३ ॥ १४ ॥ १५[४] ॥ १६ ॥

"अथापः" । 'अथ परिचाल्य पात्रं' "नाभि मालभते"-इति शाखान्तरात् तच्छेषः ॥ १७ ॥

"अथास्मै ब्रह्मभागं" । —इत्याध्वर्यवम् । 'प्रतिविदानः' जानन्, एष मे भाग इत्याग्नयः । 'पूर्वम् आस्ते' 'पर्याहार्षुः' पर्याहृतवन्तः । 'प्राग्नीत्' प्राग्नितवान् । अनेन तु ब्रह्मभागेन 'भागी' । खीकृतेनैव यज्ञशेषं 'गोपाययेति' ॥ १८ ॥

"स वै वाचंयमः" । वाचं यच्छतीति[५] 'वाचंयमः' । अस-

१—भ्वा० प० ५० धा० । २—जु० आ० ७ धा० ।

३— "देवस्य त्वेति प्रतिगृह्णाति"-इति का० श्रौ० सू० २. २. १६ । मन्त्रस्तु— वा० सं० २. ११. २ ।

४— "अग्नेष्टेति प्राश्नाति दन्तैरनुपस्पृशन्"-इति का०श्रौ० सू० २. २. १८ । मन्त्रस्तु— वा० सं० २. ११. ३ ।

५— "वाचि यमो व्रते"-इति पा० सू० ३. २. ४०, "वाचं यमपुरन्दरौ च"-इति पा० सू० ६. ३. ६६ ।

सन्धवचनादुपरमयति, एतद्व्रतो वाचंयमः, ब्रह्मा स्यात्। कियन्तं कालम्? 'ब्रह्मन्! प्रश्नाख्यामीति आ एतस्मात्' 'वचसः' अध्वर्यु-वचनात्। अभिविधौ च आङ्, न मर्यादायाम्; कुतः? सन्धान-वचनात्[१]। 'विरहन्ति' विच्छिन्दन्ति। 'क्षणन्ति' हिंसन्ति। 'ये मध्ये यज्ञस्य' 'पाकयज्ञीयया' पाकयज्ञार्हया विलक्षणया[२] 'इडया' 'चरन्ति'। पाकयज्ञेषु हुतशेषो भक्ष्यते, इडाहुतशेषो भक्ष्यते; तेन पाकयज्ञार्हेत्युच्यते। "ब्रह्मा वा ऋत्विजां भिषक्तमः" अतिशयेन यज्ञस्य चिकित्सिता; स हि प्रायश्चित्तैर्यज्ञं भिषज्यतीत्यभिप्रायः। ततः किम्? यद् वाचंयमो भवति, 'तत्' तेन 'ब्रह्मा' यज्ञं 'सन्द-धाति'; अन्यथा तु नैव सन्दध्यात्। 'यद्' यदि 'वावद्यमानः' पुनःपुनर्वदमानः 'आसीत्' ॥ १९ ॥

"स यदि पुरा"। —इति प्रायश्चित्तविधिः ॥ २० ॥

"स यत्राह"। —इत्यनुयाजप्रसवविधिः। "नात्र तिरोहित मिति। विस्पष्ट एवार्थः। कथं सविता? उच्यते— यस्मात् 'ते' तुभ्यम् 'एते' अध्वर्यवो 'यज्ञं प्राडः', 'बृहस्पतये' च; न मह्यं मनुष्याय, 'तेन' कारणेन त्व मनुज्ञया यज्ञादीनवपालय[३] ॥ २१ ॥

"मनोजूतिः[४]"। 'मनः' च देवानां 'जूतिः' गन्त्री, 'जुषताम्'

१— 'सन्धवचनात्'—इति ञ, झ। २—नैतत् पदं ठ-पुस्तके।

३— "एतं त इति समिदामन्त्रितः प्रसौति"—इति का० श्रौ० सू० २. २. २१। मन्त्रस्तु— वा० सं० २. १२, १३।

४— वा० सं० २. १३। एष हि पूर्वमन्त्रस्यैवापरांशः।

प्रीयतां हृष्यत्वाज्येन । 'बृहस्पतिः' च 'यज्ञं' 'तनोतु, सन्दधातु' च । 'विश्वे' च 'देवाः' हृष्यन्तु, त्वयानुज्ञातेऽध्वर्यो । तस्मादनुजानीहीत्यभिप्राय माह च्य सवितुः, स्वयं ब्रह्मा आह— "सावित्या-दृह मेव सविता ; ततश्च 'प्रतिष्ठा' अध्वर्यो । अतिसर्जने लोट्[१] ॥ २२ ॥ २ ॥ [७. ४.] ॥

इत्याचार्यहरिस्वामिनः कृतौ शतपथभाष्ये
सप्तमस्य चतुर्थं ब्राह्मणम् ॥

नागस्वामिसुतोऽवन्त्यां पाराशर्यो वसन् हरिः ।
श्रुत्यर्थं दर्शयामास शक्तितः पौष्करीयकः ॥
श्रीमतोऽवन्तिनाथस्य विक्रमार्कस्य भूपतेः ।
धर्माध्यक्षो हरिस्वामी व्याख्यच्छातपथीं श्रुतिम् ॥

इति श्रीमदाचार्यहरिस्वामिनः कृतौ शतपथभाष्ये
सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

---

१ —पा० सू० १. ३. १६३ ।

[अथ अष्टमाध्याये प्रथमं ब्राह्मणम्]

मनवे ह वै प्रातः। अवनेग्य* मुदक माजह्रुर्यथेदं पाणिभ्या मवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणी ऽआपेदे ॥ १ ॥

स हास्मै व्वाच मुवाद। बिभृहि मा पारयिष्यामि त्वेति कस्मान्मा पारयिष्यसीत्यौघ ऽइमाः सर्वाः प्रजा निर्वोढा ततस्त्वा पारयितास्मीति कथं† ते भृतिरिति ॥२॥

स होवाच। यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य ऽएव मत्स्यं गिलति कुम्भ्यां माग्रे बिभरासि स यदा ता मतिव्वुर्द्धा ऽअथ कर्षूं खात्वा तस्यां मा बिभरासि स यदा ता मतिव्वुर्द्धा ऽअथ मा समुद्र मभ्यवहरासि तर्हि वा ऽअतिनाष्ट्रो भवितास्मीति ॥ ३ ॥

शुश्वद्ध झषु ऽआस। स हि ज्येष्ठं व्वर्द्धतेऽथेतिथीः‡

---

* 'अवनेज्य'–इति ज-पाठः, डा०–वेबरेणापि दृष्टः।

† 'मुजर्ह'–इति क, ग। ‡ 'कुथं'–इति च।

सुमां तुदौघु ऽआगन्ता तुन्मा नाव मुपकल्प्योपासासै सु ऽओघ ऽउत्थिते नाव मापद्यासै तुतस्त्वा पारयिता-स्मीति ॥ ४ ॥

तु मेवं भूत्वा समुद्र मभ्युवजहार। सु यतिथौं तत्सुमां परिदिदेश ततिथौः सुमां नाव मुपकुल्प्योपा-साञ्चक्रे सु ऽओघ उत्थिते नाव मापेदे तः स मुत्स्य ऽउपन्यापुप्लुवे तुस्य शृङ्गे नावः पाशं प्रतिमुमोच तेनैत मुत्तरं गिरि मतिदुद्राव ॥ ५ ॥

सु होवाच। अपीपरं वै त्वा व्वृक्षे नावं प्रतिबध्नीष्व तं तु त्वा मा गिरौ सुन्त मुदकु मन्तुश्छैत्सीद्* यावद्यावदुदकुः† समवायात्तावत्तावदन्वुवसर्पासीति सु ह तावत्तावदेवान्वुवससर्प्प तदुप्येतदुत्तरस्य गिरेर्म्मनोरव-सर्प्पण मित्यौघो ह ताः सुर्वाः प्रजा निरुवाहाथेह मनुरेवैकः पुरिशिशिषे ॥ ६ ॥

सोऽर्चञ्छ्राम्यंश्चचार‡ प्रजाकामः। तचापि पाक-यज्ञेनेजे सु घृतं दुधि मुत्वामिक्षा मित्यसु जुहवाञ्चकार तुतः संवत्सरे योषित् सुम्बभूव सा ह पिब्दमा§नेवोदे-

---

* 'मन्तुश्छैत्सीद्'–इति क। † 'यावदुदकुः'–इति च।

‡ 'चक्रार'–इत्यपि पाठो डा०–वेबरेण दृष्टः।

§ 'पिवदमा'–इत्यपि पाठो डा०–वेबरेण दृष्टः।

याय तस्यै ह स्म घृतं पदे सन्तिष्ठते तया मिचावरुणौ सञ्जग्माते ॥ ७ ॥

ताꣳ होचतुः कासीति। मनोर्दुहितेत्यावयोर्ब्रूष्वेति नेति होवाच यु ऽएव मा मजीजनत तस्यैवाहु मस्मीति तस्या मपि त्व मीषाते तदा जज्ञौ तदा नु जज्ञावुति-त्वेवेयाय सा मनु माजगाम ॥ ८ ॥

ताꣳ ह मनुरुवाच कासीति। तव दुहितेति कथं भगवति मम दुहितेति या ऽअमूरप्स्वाहुतीरहौषीर्घृतं दुधि मस्त्वामिक्षां ततो मा मजीजनथाः साशीरस्मि तां मा यज्ञे ऽवकल्पय यज्ञे चेद्वै मावकल्पयिष्यसि बहुः प्रजया पशुभिर्भविष्यसि या मु मया* काञ्चाशिष माशासिष्यसे सा तें सर्वा समर्द्धिष्यत ऽइति तां मेतन्मध्ये यज्ञस्यावाकल्पयन् मध्युꣳ ह्येतद्यज्ञस्य युद-न्तरा प्रयाजानुयाजान् ॥ ९ ॥

तयार्द्धञ्छाम्यंश्चचार प्रजाकामः। तयेमां प्रजातिं प्रजज्ञे येयं मनोः प्रजातिर्याम्बेनया काञ्चाशिष माशास्तु† सास्मै सर्वा समार्द्धत ॥ १० ॥

सैषा निदानेन यदिडा। स यो हैवं विद्वानिडया चरत्येतांꣳ हैव प्रजातिं प्रजायते यां मनुः प्राजायत

---

* 'या ममया'–इति च। † 'माशास्ते'–इति ग।

याम्वेनया काञ्चाशिष माशास्ते सास्मै सर्वा सम्पद्यते ॥ ११ ॥

सा वै पञ्चावत्ता भवति । पशवो वा ऽइडा पाङ्क्ता वै पशवस्तस्मात् पञ्चावत्ता भवति ॥ १२ ॥

सु समवदायेडाम् । पूर्वार्द्धं पुरोडाशस्य प्रशीर्य पुरस्ताद् ध्रुवायै निदधाति ताꣳ होचे प्रदाय दक्षिणात्येति ॥ १३ ॥

स होतुरिह निलिम्पति । तद्वोतौष्ठयोर्निलिम्पते मनसस्पतिना ते हुतस्याश्नामीषे प्राणायेति ॥ १४ ॥

अथ होतुरिह निलिम्पति । तद्वोतौष्ठयोर्निलिम्पते व्वाचस्पतिना ते हुतस्या*श्नाम्यूर्ज ऽउदानायेति ॥ १५ ॥

एतद्व वै मनुर्बिभयाञ्चकार । इदं वै मे तनिष्ठं यन्नुस्य युदिय मिडा पाकयज्ञिया यद्वै म ऽइह रुक्षाꣳसि यन्नं नु हिꣳस्युरिति ता मेतत् पुरा रुक्षोभ्यः पुरा रुक्षोभ्य ऽइत्येव प्रापयत तथो ऽएवैना मेषु ऽएतत् पुरा रुक्षोभ्यः पुरा रुक्षोभ्य ऽइत्येव प्रापयतेऽथ यत् प्रत्यक्षं नु प्राश्नाति नेदुनपक्रृतां प्राश्नानी†त्येतदेवैनां प्रापयते यदोष्ठयोर्निलिम्पते ॥ १६ ॥

अथ होतुः पाणौ समवद्यति । समवत्ता मेव

---

* 'जुतस्या'–इति च । † 'प्राश्नामी'–इति च ।

सतीं तुदेनां प्रत्युक्षꣳ होतरि श्रयति तुयात्मुञ्छ्रुतुया* होता युजमानायाशिष माशास्ते तुस्माद्धोतुः पाणौ समुवद्यति ॥ १७ ॥

अथोपाꣳशूपह्वयते। एतद्व वै मनुर्बिभयुञ्चकारेदं वै मे तुनिष्ठं यज्ञुस्य युदिय मिडा पाकयज्ञिया यद्वै म ऽइह रुक्षाꣳसि यज्ञं नु हन्युरिति तु मेतत् पुरा रुक्षोभ्यः पुरा रुक्षोभ्य ऽइत्येवोपाꣳशूपाह्वयत तथो ऽएवैना मेषु† ऽएतत् पुरा रुक्षोभ्यः पुरा रुक्षोभ्य ऽइत्येवोपाꣳशूपह्वयते ॥ १८ ॥

स उपह्वयते। उपहूतꣳ रथन्तरꣳ सहु पृथिव्योप माꣳ रथन्तरꣳ सहु पृथिव्या ह्वयता मुपहूतं व्वामदेव्यꣳ सुहान्तरिक्षेणोप मां व्वामदेव्यꣳ सुहान्तरिक्षेण ह्वयता मुपहूतं बृहुत् सहु दिवोप मां बृहुत् सहु दिवाह्वयता मिति तुदेता मेवैतदुपह्वयमान ऽइमांश्च लोकानुपह्वयत ऽएतानि च सामानि ॥ १९ ॥

उपहूता गावः सहुऽर्षभा ऽइति। पशवो वा ऽइडा तुदेनां परोऽक्ष मुपह्वयते सहुऽर्षभा ऽइति सुमिथुना मेवैना मेतदुपह्वयते ॥ २० ॥

---

* 'ञ्छृतुया'–इति च। † 'मेष'-इति च।

उपह्वता सन्नुद्दोषेति। तुदेनाꣳ सन्नुद्दोषा सौम्येनाध्वरेणोपह्वयते ॥ २१ ॥

उपह्वतेडा तुतुरिरिति। तुदेनां प्रत्यक्ष मुपह्वयते तुतुरिरिति सुर्वꣳ ह्येषा पाप्मानं तुरति तुस्मादाह तुतुरिरिति* ॥ २२ ॥

उपह्वतः सुखा भक्ष ऽइति। प्राणो वै सुखा भक्षस्तुत् प्राण मुपह्वयत ऽउपह्वतꣳ हेगिति तच्छरीर मुपह्वयते तत्सुर्वा मुपह्वयते ॥ २३ ॥

अथ प्रतिपद्यते। इडोपह्वतोपह्वतेडोपो ऽअस्मांꣳ† ऽइडा ह्वयता मिडोपह्वतेति तदुपह्वता मेवैना मेतत्सतीं प्रत्यक्ष मुपह्वयते या वै सासौन्नौर्व्वै सासौद्युतुष्पदी वै गौस्तुस्माद्यतुरुपह्वयते ॥ २४ ॥

स वै चतुरुपह्वयमानः। अथ नानेवोपह्वयते ऽजामितायै जामि ह कुर्याद्यदिडोपह्वतेडोपह्वतेत्येवोपह्वयेतोपह्वतेडेति‡ व्वेडोपह्वतेति तदर्व्वाची मुपह्वयत ऽउपह्वतेडेति तत्पुराची मुपो ऽअस्मांꣳ§ ऽइडा ह्वयता मिति तदात्मानञ्चैवैतन्नान्तरेत्य॥न्यथेव च भवतीडोप-

---

* 'तुतुरिरिति'–इति च। † 'ऽअस्मां२॥'–इति च।

‡ 'oतोपह्वतेडोपह्वतेडेति'–इत्यपि दृश्यो डा०–वेबरेण।

§ 'ऽअस्मां२॥'–इति च। ॥ 'oवैतेनान्तरेत्य'–इति न।

ह्वतेति तत्पुनरर्व्वाची मुपह्वयते तदर्व्वाचीच्चैवैना मेतत्पुराचीच्चोपह्वयते ॥ २५ ॥

मानवी घृतपदीति । मनुर्ह्येता मग्रे ऽजनयत तस्मा-दाह मानवीति घृतपदीति युदेवास्यै घृतं पदे समतिष्ठत तस्मादाह घृतपदीति ॥ २६ ॥

उत मैचावरुणीति । युदेव मित्रावरुणाभ्याꣳ समग-च्छत स ऽएव मैचावरुणो न्यङ्को ब्रह्मा देवह्वतोपह्वतेति ब्रह्मा ह्येषां देवह्वतोपह्वतोपह्वता दैव्या ऽअध्वर्यव ऽउपह्वता मनुष्या ऽइति तद्दैवांस्चैवैतदध्वर्यू*नुपह्वयते ये च मानुषा व्वत्सा वै दैव्या ऽअध्वर्यवोऽथ य ऽइतरे ते मानुषाः ॥ २७ ॥

यु ऽइमं यज्ञ मुवान्ये च यज्ञुपतिं व्वर्द्धानिति । एते वै यज्ञ मवन्ति ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचाना ऽएते ह्येनं तन्वत ऽएत ऽएनं जनयन्ति तदु तेभ्यो निह्नुते व्वत्सा ऽउ वै यज्ञुपतिं व्वर्द्धन्ति युस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञुपतिर्व्वर्द्धते तस्मादाह ये च यज्ञुपतिं व्वर्द्धानिति ॥ २८ ॥

उपह्वते द्यावापृथिवी पूर्वजे ऽऋतावरी देवी देव-पुत्रे ऽइति । तदिमे द्यावापृथिवी ऽउपह्वयते युयोरिदꣳ

---

* 'तद्दैवांस्चैवाध्वर्यू'–इति च ।

सुर्व मध्युपह्वतोऽयं युजमान इति तद्युजमान मुपह्वयते तद्यदुच नाम नु गृह्णाति परोऽक्षꣳ ह्याशीर्यदिडायां मानुषꣳ ह कुर्याद्यन्नाम गृह्णीयाद् व्यृद्धं वै तद्यज्ञस्य युन्मानुषं नेद् व्यृद्धं यज्ञे करवाणीति तस्मान्न नाम गृह्णाति ॥ २९ ॥

उत्तरस्यां देवयज्यायां मुपह्वत इति । तदस्मा एतज्जीवातु मेव परोऽक्ष माशास्ते जीवन् हि पूर्व मिष्ट्वाथापरं यजते ॥ ३० ॥

तदस्मा एतत् प्रजा मेव परोऽक्ष माशास्ते । यस्य हि प्रजा भवत्यमुं लोकु मात्मनैत्यथास्मिंल्लोके प्रजा यजते तस्मात् प्रजोत्तरा देवयज्या ॥ ३१ ॥

तदस्मा एतत् पशूनेव परोऽक्ष माशास्ते । यस्य हि पशवो भवन्ति स पूर्व मिष्ट्वाथापरं यजते ॥ ३२ ॥

भूयसि हविष्करणा उपह्वत इति । तदस्मा एतज्जीवातु मेव परोऽक्ष माशास्ते जीवन् हि पूर्व मिष्ट्वाथ भूयोभूय एव हविष्करोति ॥ ३३ ॥

तदस्मा एतत् प्रजा मेव परोऽक्ष माशास्ते । यस्य हि प्रजा भवत्येक आत्मना भवत्यथोत दशधा प्रजया हविष्क्रियते तस्मात् प्रजा भूयो हविष्करणम् ॥ ३४ ॥

तदस्मा एतत् पशूनेव परोऽक्ष माशास्ते । यस्य हि

पशुवो भुवन्ति स पूर्वं मिष्ट्वाथ भूयो भूय ऽएवु हविष्क-रोति ॥ ३५ ॥

एषा वा ऽआशीः । जीवेयं प्रजा मे स्याच्छ्रियं गच्छेय मिति तद्यत् पशुनाशास्ते तच्छ्रिय मेवाशास्ते श्रीर्हि पशवस्तदेताभ्या मेवैतदाशीर्भ्याꣳ सुर्वं मात्मं तस्माद्वा ऽएते ऽग्रुच दु ऽआशिषौ क्रियेते ॥ ३६ ॥

देवा म ऽइदꣳ हविर्जुषन्ता मिति । तस्मिन्नुपक्रुत ऽइति तद्यजुस्यैवैतत् सुम्रद्धि माशास्ते यद्धि देवा हविर्जुषन्ते तेन हि मइज्ञुर्यति तस्मादाह जुषन्ता मिति* ॥ ३७ ॥

तां वै प्राश्नन्त्येवु । नाग्नौ जुह्वति पशुवो वा ऽइडा नेत् पशूनग्नौ प्रहणुजामेति तस्मान्नाग्नौ जुह्वति ॥ ३८ ॥

प्राणेषेवु हूयते । होतरि त्वद्युजमाने त्वदध्वर्यौ त्वदुथ युत् पूर्वार्द्धं पुरोडाशस्य प्रणीर्य पुरस्ताद् ध्रुवायै निदधाति युजमानो वै ध्रुवा तद्युजमानस्य प्राशितं भवत्युथ युत् प्रत्युक्षं नु प्राश्नाति नेदुसꣳस्थिते यज्ञे† प्राश्नानीत्येतदेवास्य प्राशितं भवति सुर्वे प्राश्नन्ति सुर्वेषु मे हुतासदिति पुच्च प्राश्नन्ति पशुवो वा ऽइडा पाङ्क्ता वै पशुवस्तस्मात् पुच्च प्राश्नन्ति ॥ ३९ ॥

---

* एतदनन्तरं 'शतम् ७००'–इति ग, च । † 'जज्ञे'–इति क ।

अथ युच्च प्रतिपद्यते। तच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति तदुच्च पितृणां* भाजनेन चतस्रो† वा ऽअवान्तरदिशो ऽवान्तरदिशो वै पितुरस्तुस्माच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति ॥ ४० ॥

अथ यच्चाह्वोपह्वृते द्यावापृथिवी ऽइति। तदग्नीध आदधाति तदग्नीत् प्राश्नात्युपह्वृता पृथिवी मातोप मां पृथिवी माता ह्वयता मग्निराग्नीध्रात् स्वाह्वोपह्वृतो द्यौष्पितोप मां द्यौष्पिता ह्वयता मग्निराग्नीध्रात् स्वाहेति द्यावापृथिव्यो वा ऽएष यदाग्नीध्रस्तुस्मादेवं प्राश्नाति ॥ ४१ ॥

अथ युचाशिष माशास्ते। तुज्जपति मयोद मिन्द्र इन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम्। अस्माकꣳ सन्त्वाशिषः सत्या नः सन्त्वाशिष ऽइत्याशिषा मेवैषु प्रतिग्रहस्तद्या ऽएवाचऽर्त्विजो यजमानायाशिष ऽआशासते ता ऽएवैतत् प्रतिगृह्यात्मन् कुरुते ॥ ४२ ॥

अथ पवित्रयोर्मार्जयन्ते। पाकयज्ञियुयेव वा ऽएत-द्दिडयाचारिषुः पवित्रपूता यदुत ऽऊर्ध्वं मुसꣳस्थितं यज्ञस्य तुत्तनवामहा ऽइति तुस्मात् पवित्रयोर्मार्ज्जयन्ते ॥ ४३ ॥

---

* 'पितृणां'—इति च। † 'चतस्रो'—इति क।

अथ ते पवित्रे प्रस्तरेऽपिसृजति। यजमानो वै प्रस्तरः प्राणोदानौ पवित्रे यजमाने तत् प्राणोदानौ दधाति तस्मात्ते पवित्रे प्रस्तरेऽपिसृजति ॥ ४४ ॥ ३ ॥

॥ इति षष्ठप्रपाठके तृतीयं ब्राह्मणम् [८. १.] ॥

॥ श्रीगणेशाय नमः ॥

"मनवे ह वै"। दृडाब्राह्मण मेतत्[१]। तत्रेडायां[२] मानवी मिडां देवतां वक्तुं "मानवी घृतपदी मैत्रावरुणीत्येतानि च निगदपदानि[३] व्याख्यातु मितिहासः प्रवृत्तः। स चेतिहासः प्रसक्त एव, किञ्चित्तु दर्शयामः।—

'मनवे' वैवस्वताय। तादर्थ्ये चतुर्थी[४]। अवनेज्यते हस्तादि अनेनेति 'अवनेग्यम्'[५]; करणे क्त्यः[६]। 'आजह्रुः' आनीतवन्तः, परिचारकाः। 'यथा' 'इदम्' अधुना 'पाणिभ्यां' हस्तार्थं यदवनेजनं तस्मै 'आहरन्ति', तथा आजह्रुः। 'तस्य' मनोः प्रक्षालयतः 'मत्स्यः' 'पाणौ' प्राप्तः। भाविनोऽर्थस्य सिद्ध्यर्थं देवतैव मत्स्यरूपेणाजगाम ॥ १ ॥

१— तैत्तिरीयब्राह्मणे (३. ५. ८.) समाम्नातानीडानिगदवाक्यानीहोनविंशकण्डिकादिषु, तैत्तिरीयसंहितायाञ्च (२. ६. ७.) व्याख्यातानि, प्रपञ्च सूत्रितानि चाश्वलायनेन (श्रौ० सू० १. ८.)।

२— 'ततः प्रजायां'—इति ठ। ३— ५३० पृ० ३–७ पं० द्रष्टव्याः।

४— पा० २. ३. १३ सू० १वा०। ५— 'अवनेज्यम्'—इति ज, ठ।

६— पा० सू० ३. ४. ७०।

"स होवाच"। 'सः' मत्स्यः 'अस्मै' मनवे 'वाचम्' उदितवान्। कीदृशीम्? 'बिभृहि' पुष्णीहि 'मा' माम्। किमर्थम्? 'पारयिष्यामि'। 'पार रक्षणे'[1]। रक्षिष्यामि 'त्वा' 'इति'। 'कस्मात्?' इति भयहेतुः[2] प्रश्नः। वहतीति 'ओघः' उदकसङ्घातः। स इमा भरतवर्षनिवासिनीः 'प्रजाः' निःश्रेयं वोढा, देशान्तरं प्रापयिता। तस्माद् भयहेतोस्त्वा पालयितास्मि 'इति' मत्स्यवचः। 'कथम्?' इति मनोः प्रश्नः। कथं तव 'भृतिः' भरणं पुष्टिः 'इति' ॥ २ ॥

"स होवाच"। 'क्षुल्लकाः' क्षुद्रकाः, अल्पकाः। 'नाङ्क्षाः'—इति। 'गिलति'। "गॄ निगरणे"[3]। निगिरति[4]। 'बिभरासि'। अर्थेषणायाम्[5] लिङर्थे लेट्[6]। बिभ्रियाः, पुष्णियाः। एव मेव 'अभ्यवहरासि', 'उपासासै', 'आपद्यासै' —इति[7] व्याख्येयानि। 'अतिवर्द्धै' अतिरिच्य वर्द्धितास्मीति प्राप्ते। "यदाद्यद्योर्लिङ उपसङ्ख्यानम्[8]", ततश्च "लिङर्थे लेट्"-इति[9] यदायोगे लेट्। 'कर्षूः' खातिकाः[10]। अतीतो नाङ्क्षान् नाग्रयित्वृन् इति 'अतिनाङ्क्षः' ॥ ३ ॥

१— चु० प० ५५ धा०। रलयोरभेदः। "पार तीर कर्मसमाप्तौ"-इति चास्ति चु० प० ३७८ धा०। २— पा० सू० १. ४. २५।

३— तु० प० ११९ धा०। ४— 'निगरति'-इति ठ।

५— पा० सू० ३. ३. १६१। ६— पा० सू० ३. ४. ७।

७— ५२४ए० १३पं०, ५२५ए० १पं०, ५२५ए० २पं० द्रष्टव्याः।

८— पा० ३. ३. १४७ सू० १वा०। ९— पा० सू० ३. ४. ७।

१०— निघ० ३. २३. ६, अम० को० १. २. ३. २७, २. ७. २७, चिका० २. ७. ९। 'खानिकाः'-इति ठ-पाठः। तच्च चिका० २. १०. ९।

"शश्वद्भ"। शश्वच्छब्दोऽत्र सामर्थ्यात् क्षिप्रवचनः। 'झषः' महामत्स्यः, क्षिप्र मेव महामत्स्योऽवावर्त्तते इत्यर्थः। अथ कस्मात्स शीघ्र मेव महामत्स्यः संवृत्तः? 'हि' यस्मात् 'सः' 'ज्येष्ठं' वृद्धत्तमं 'वर्द्धते'; सर्व एव हि जलचरा अतिशयेन वर्द्धन्ते, स तु मत्स्यत्वादनाद्यत्वाच्च वृद्धत्तमं वर्द्धत इति श्रुतिवचनम्। 'अथेतिथीम्'—इति मत्स्यवचनम्। अथ मपि समुद्र मभ्यवहते 'इतिथीम्' इत्यभिनयः। तेन सङ्ख्येयाः समाः[1] दर्शितवान्। इयतीनां दशानां द्वादशानां वा पूरणी 'इतिथी'। इदम इशादेशः[2] छान्दसः। टित्वात् ङीप्[3]। इयत्यस्तिथयो यस्यां सा इतिथीति केषुचित् कोषेषु। तेष्वपि इयतिथीं यावतिथीं तावतिथी मिति प्राप्ते छान्दसो थ-शब्द—व-शब्दलोपः। 'समाः' संवत्सरः, ताम् 'समाम्', समाया मित्यर्थः। 'तत्' स इति लिङ्गव्यत्ययः। 'सः' पूर्वोक्तः 'औघः' 'आगन्ता'; 'तत्' तदा 'नावम्' उपकल्प्य, माम् 'उपासासै' उपासीथाः। 'औघे' 'वोह्यिते' तां 'नावम्' त्वम् 'आपद्यासै' आरोहेरित्यर्थः॥ ४॥

"त मेवं भूता"। यावतीनां पूरणीं 'यतिथीं' 'परिदिदेश' परिदिष्टवान्, आख्यातवान्, 'ततिथीं' तावतीनां पूरणीं 'समाम्', 'नाव मुपकल्प्य' मत्स्य मुपासितवान्। 'औघे' च उह्यिते 'नावम्' अधिरूढः। 'तं' च मनुं 'स मत्स्यः' 'उप' समीपे, नीः[4]; एन मुपकर्ष्य मिति[5] सम्बन्धः। 'आपुप्लुवे' आगतः[6]। 'तस्य' मत्स्यस्य 'शृङ्गे' भवितव्यतयैव निष्पादिते 'नावः पाशं' प्रतिबद्धवान्।

१— 'सङ्ख्येयां समां'—इति ज, झ।
२— पा० सू० ५. ३. ३।
३— पा० सू० ४. १. १५।
४— 'नौचैः'—इति ज, झ।
५— 'मुपकर्ष्यामीति'—इति ज, ठ।
६— 'र्ष्य आगतः'—इति ज।

'तेन' पाप्मेन स ह मत्स्यः 'एतम् उत्तरं गिरिम्' हिमवन्तम् अधिजगाम ॥ ५ ॥

"स होवाच"। मत्स्यवचनम्। पालितवानस्मि त्वाम्; अधुनाच 'वृत्ते' 'नावं प्रतिबध्नीष्व'; किञ्चापरम्— 'गिरौ' 'सन्नं' 'त्वा' त्वाम् 'उदकम्' 'अन्तर्व्यैस्रीद्' तद्देशमध्यं भित्त्वा पृथगकार्षीद्, इद मस्माद्देशादित्यर्थः। कथं पुनस्त्वां नावं छिनत्ति? 'यावद्-यावत्' अध्वनः 'उदकं समवायात्' एकीभावाय, 'अव' अधः 'अयात्' गच्छेत्, अवतरेदित्यर्थः; 'तावत्-तावत्' त्व मपि तदेवोदकम् 'अनु' 'अवसर्पासि' अवतरेः। 'सः' मनुः प्राप्ते काले 'तावत्-तावदेव' अन्ववसृप्तः। येन च वर्त्मना मनुः अवसृप्तः, 'तद्' अद्यत्वे 'अपि' 'एतत्' 'उत्तरस्य गिरेः मनोरवसर्पणम्' —'इति', आऽऽरिति शेषः। अवसृप्तोऽनेनेति 'अवसर्पणम्' ॥ ६ ॥

"सोऽर्षञ्छ्राम्यन्"। तपः तप्तवान् 'प्रजाकामः'। 'तत्रापि' 'सः' मनुः 'पाकयज्ञेन' अनेन 'ईजे' इष्टवान्, इतादिभिः। 'ततः' तस्मात् पाकयज्ञादेव 'संवत्सरे' पूर्णे 'योषित्' मिश्रीभावात्मिका सम्भूता। 'सा' योषित् 'पिब्दमाना' पाकधर्मात्मिका 'इव' आस। पिबतेर्दकारप्रत्ययत्ययोगात् अकारप्रत्ययः; तत्त्वेन साचादात्मगामिफलत्वादात्मनेपदे बलम्[1]; नामधातौ। "पिब क्षरणे[2]"। इतप्रभवत्वात् इतं स्रवन्ती 'उदेयाय' उद्गता, उदकादुत्थिता। एवञ्च सुस्निग्धा पिब्दमाना येन, 'तस्मै' तस्याः 'पदे' इतं मन्तिष्ठते स्म'। 'तया' च 'मित्रावरुणौ' कथ मपि सङ्गतौ ॥ ७ ॥

१— 'वत्वम्'–इति ठ। २— भ्वा० प० ५२८ धा०। 'पिब'–इति ठ।

"ताꣳ होचतुः"। 'आवयोर्दुहितेति ब्रूष्व'—'इति' ऊचतुः। 'अपि त्वं' भागः, तं प्रार्थितवन्तौ। 'तद्' भागित्वं 'वा जज्ञौ' वा-शब्दः च-शब्दार्थे[1], जानातिश्च प्रतिपूर्वो द्रष्टव्यः; प्रतिज्ञातवती च; 'न' च प्रतिज्ञातवतीति। यावता मैत्रावरुणीति व्यपदिश्यते, तावत् प्रतिज्ञातवती; यच्च तस्याः किञ्चित् ताभ्यां क्लृप्तेतेति, एवं न प्रतिज्ञातवती ॥ ८ ॥

"तां ह मनुः"। 'अजीजनयाः' जनितवानसि। 'आग्नीरस्मि' आग्नीर्हेतुत्वादाग्नीः। 'अत्र कल्पय' सङ्गततया समर्थय, समर्थां कुरु। 'मया' हेतुभूतया, मय्युपह्वयमानायाम् "उपह्वतोऽयं यजमानः"—इत्येतेन[2] होढवचनेन 'याम् आग्निषम् आग्नाग्निष्यसे' इति, 'ताम्' 'एतत्' एतां मैत्रावरुणीं मानवीं घृतपदीं 'मध्ये यज्ञस्य' यज्ञस्यान्तः समर्थयन् 'प्रयाजानुयाजान् अन्तरा'। इति दृढ़ायागः[3] ॥ ९ ॥

"तयार्चन्"। 'तया' सह दर्शपूर्णमासयोर्देवार्चनव्रतलक्षणं 'तपः' 'आस्यन्' कुर्वन्, 'चचार'। 'तया' हेतुभूतया। 'इमाम् प्रजातिम्'। प्रजायते इति प्रजातिः। ततो 'यास्वेनया'—इत्यादि, तत्करणफलम् ॥ १० ॥ ११ ॥

"सा वै पञ्चावत्ता"। उपस्तरणादिविशेषः; शाखान्तरात्। 'पशवो वा इडा' पशुप्रभव-घृतादिप्रभवत्वात् पशवः इडा[4] ॥ १२ ॥

"स समवदाय"। प्रसन्ना ॥ १३ ॥

१— 'चिच्छब्दार्थे'—इति ठ, ढ। २— ५३१ पृ० १ पं०।

३— इडाशब्देनेडापात्रा भवत्तं पुरोडाशादि द्रव्यं मुच्यते।

४— तै० सं० २. ६. ७. ३। ऐ० ब्रा० २. ४. ६।

"स होतुरिह"। इहेत्यभिनयेन प्रदेशिनीपर्वमध्यमं दर्शयति ; शाखान्तरात् ॥ १४ ॥

"अथ होतुरिह"। 'इह'-इति हेत्वन्तरम् ; शाखान्तरादेव। 'ओष्ठयोः'-इति। अत्राविशेषेण 'निलिम्पते' निलिम्पेदिति श्रुतिः[1] ; शाखान्तरे तु— अधर मधर उत्तर मुत्तरे। किं पुनर्निलिम्पते ? द्रवत्वात् सन्निधानाद्दनीयत्वाच्च आज्यम्। तत्रापि "एतदेवैनां प्रापयते"—इति[2] दृङा-निश्चयवचनादैड मेवाज्य मिति गम्यते ॥ १५ ॥

"एतद्ध वै मनुः"। निर्लेपार्थवादोऽयम्। 'बिभयाञ्चकार' भीतः। 'तनिष्ठम्' तनुतमम्। 'पाकयज्ञिया' पाकयज्ञार्हा। मनुष्यप्रधानत्वात् मन्दतरवीर्यत्वमभिप्रायः। 'यत्' 'इयम् इडा'। 'यत्' 'इह' तनिष्ठे देशे 'यज्ञं न हिंस्युः', महत् स्यादिति शेषः। एवं भीतः, बिभ्यत्। "ता मेतदिति। 'ताम्' इडाम् 'एतद्', यत् "ओष्ठयोर्निलिम्पते"—इति वक्ष्यते[3], तत् 'पुरा रक्षोभ्यः' यावदेवोच्चैरुपक्रान्तं श्रुत्वा रक्षांसि नागच्छन्ति, तावत् 'प्रापयत'। "प्राणेष्वेव हूयते"—इति वक्ष्यते[4], तं प्राणदेशं प्रापितवान्। "पुरा रक्षोभ्यः—पुरा रक्षोभ्यः"- इति द्विर्वचनं प्रयोगान्तरव्याप्त्यभिप्रायम्[5] ॥ १६ ॥

"अथ होतुः"। अवान्तरेडावदान मेतत्[6] ॥ १७ ॥

"अथोपाꣳशु"। अत ऊर्द्धं होच भिडोपक्रानं विधीयते। तदपि द्विविधम्,— उपांशु चोच्चैश्च। तच प्रथमं तावदुपांशूपक्रानं

१— एतन्मन्त्रस्तद्व्याख्यानञ्च तै० सं० २. ६. ८ द्रष्टव्यम्।
२— ५२७ पृ० १७ पं०। ३— ५२७ पृ० १८ पं०।
४— ५३२ पृ० १३ पं०। ५— पा० सू० ८. १. १, ४।
६— का० श्रौ० सू० ३. ४. १०। ऐ० ब्रा० २. ४. ६।

युज्यते। उपपूर्वो क्रयतिरभ्यनुज्ञायां वर्त्तते; उपांश्वनुजानीते इत्यर्थः। "एतदिति। 'बिभयाञ्चकार' भीतः, बिभ्यत्। पूर्ववद् व्याख्या[१]। 'इयं' हि 'इडा' सर्वैः ऋत्विग्यजमानैर्विभज्य भक्षणीया। तच्च चोनातिरेकाग्रङ्कानिवृत्तये परस्पर मनुज्ञातव्यम्। तच्चै-तत्साधारण मेवानुज्ञातं मध्यमस्थानीयो होता सर्वैरभ्यारभ्यः करोति ॥ १८ ॥

"स उपक्रयते"। यदीडानुज्ञातया, रथन्तरादीनां किं मापतितम्? अत आह— "तदेता मेवैतदिति। इडाया एवैतानि रथन्तरादीनि, पृथिव्यादीनि च रूपाणि। ततश्च तस्या मुपक्रुतायां तान्युपक्रुतानि भवन्ति। तेषु चोपक्रुतेषु सा उपक्रुता भवतीत्या-धिदैविकीं विभूतिं ख्यापयितुं तद्द्वारेणैवोपक्रयते। तथा च क्वचिदाह— "तदेनां परोच मुपक्रयते"-इति[२]। "उप मां रथन्तर मिति। सर्वत्र रथन्तरादिमयी इडा-देवता, तां नार्हण्यननुज्ञाता मनुष्या भक्षयितुम्; अतः सानुज्ञाप्यते— "मा मिति। एतच्च तुल्यहेतुत्वात् सर्वेषा मृत्विग्यजमानानां प्रदर्शनार्थम् ॥ १९ ॥

"उपक्रुता गावः"। प्रसन्नास्तुतश्च॥ 'प्राणः' 'शरीरम्'[३]; इडाया एतद्दृष्टव्यम् ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

"अथ प्रतिपद्यते"। "अथोपांशूपक्रयते"-इति यदुक्तम्[४],

१— ५३९ पृ० ८–११ पङ्क्तयो द्रष्टव्याः।

२— ५३८ पृ० १७ पं०। ३— २३ कण्डिका द्रष्टव्या।

४— ५३८ पृ० ४ पं०।

तस्यावच्छेदार्थम्[१] "अथ प्रतिपद्यते"—इत्याह। तेनेत ऊर्ध्वं यथा-प्राप्त मुच्चैर्वक्तव्यम् ॥ २४ ॥

प्रसक्ताद्यूतस्योऽतःपरम्। "वत्सा वै दैव्या अध्वर्यवः"-इति[२] मांसाद्यं हविः सम्भवति; अध्वर्युवदित्यभिप्रायः। दृष्टाच्च भक्ष्यां, भक्ष्यत्वेनानुज्ञाय भक्षयितॄन् अनुजानीते— "उपह्वता दैव्या अध्वर्यव इत्यादिना[३] ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

तत्राप्यविशेषेणानुज्ञाय, विशेषत आग्नीध्र मनुजानीते— "उपह्वते द्यावापृथिवी"-इति। स हि द्यावापृथिव्योरधिदैवरूपेणानुज्ञायते। "उपह्वतो यजमानः"-इति। यजमानस्य विशेषोपक्रमम्; परोक्षं[४] ह्यचाग्नीरिति। कथं परोक्षम्? उत्तरस्यां देवयज्यायाम् उपह्वत इत्यनुज्ञामात्र मिह श्रूयते, नाग्नास्त इति; "यत्राग्नास्ते, तदनुज्ञातव्यम्"—इति अनुज्ञया आग्नीर्गम्यत इत्यभिप्रायः। ततश्च यजमानोऽपि सामान्यरूपेणैव यजमान इति वाच्यः, न विशेषरूपेण देवदत्तो यज्ञदत्त इति। तद् विरुष्टं प्रत्यक्षं मानुष मित्यभिप्रायः ॥ २९ ॥

"उत्तरस्याम्"। यदिडाया मुपह्वतः, तत् 'उत्तरस्यां देवयज्यायाम् उपह्वतः'; सापीडाया एव विभूतिरित्यभिप्रायः। "तदस्या एतदिति। जीवनादीना मुत्तरेज्याहेतुत्वात्। उत्तरया देवेज्यया[५] जीवनादीनि लक्ष्यन्ते इति दर्शयति। यच्चाग्नास्ते, तत्रोपक्रमं

१— 'तस्याविच्छेदार्थम्'—इति ज, झ। २— ५३० पृ० १० पं०।
३— ५३० पृ० ८ पं०। ४— 'पारोक्ष्यं'—इति ज, झ।
५— 'देवयज्यया'—इति ठ।

युक्त मिति गम्यमाना माग्निषं "परोक्ष माग्नास्ते"-इति दर्शयति। एतेन "भूयो हविष्करणम्" आग्नास्त इति व्याख्यातम् ॥ २०—२५ ॥

"एषा वा आग्नीः"। एषैव; नातोऽधिकास्तीत्यभिप्रायः। "तद्यत्पशूनिति। पशूपलक्षणार्थ मित्यभिप्रायः। "तदेताभ्या मिति। यद्यपि जीवनादिलक्षण मेक मुभयचाभिन्नम्, तथापि स्वरूपेणोत्तरस्या दृज्यायां बहु हविष्करणं भिद्यते[1]; अल्पेनापि हविषा उत्तरस्या देवयज्यायां उपपत्तेः ॥ २६ ॥

"देवा म इदं हविः"। 'देवा मे इदं हविः' 'जुषन्ताम्' सेवन्ताम्। यो मनोरथो यजमानस्य तस्य, 'तस्मिन्' अथ मनुज्ञातः, सोऽस्य समृद्धता मित्यर्थः। "तद्यज्ञस्यैवैतदिति। हविर्जोषणद्वारेण यज्ञसमृद्धिफल माग्नास्त इति दर्शयति ॥ २७ ॥

"तां वै प्राश्नन्त्येव"। प्रसक्ता ॥ २८ ॥

"प्राणेष्वेव"। त्वच्छब्दः समुच्चयार्थः। होत्रादिग्रहणं प्रदर्शनार्थम्, ब्रह्माग्नीध्रयोरपि; "पञ्च प्राश्नन्ति"-इतिवचनात्[2]। "अथ यत्पूर्वार्द्धे मिति। पुनर्वचनं यजमानभागत्वज्ञापनार्थम्। "नेदसंस्थित इति। नो संस्थिते; प्राश्नातीति वचनाद्भक्ष्यते। 'अस्य' यजमानस्य 'प्राग्नितं भवति' इति। अग्नौ हुत्वाथ भक्षयति। "दैवो वा अस्यैष आत्मा मानुषोऽयम्"-इत्यनेन दर्शनेनावश्यं यजमानेन प्राश्नीय मित्यभिप्रायः ॥

"अथ यत्प्रत्यच्च मिति। यजमानभाग मनुपहूतं न प्राश्नाति; इडां तु विशेषत उपहूतां प्राश्नात्येव[3]। "नेदसंस्थिते"-इति।

१— 'विद्यते'-इति ज, झ। २— ५३२ पृ० २० पं०।
३— "उपहूतां प्राश्नन्ति युक्ताः, यजमानस्य"-इति का० श्र. ४. २२, २३।

अद्यापि अनुयाजपत्नीसंयाजदेवता नेज्यन्ते ; तास्वनिष्टास्वयुक्तं स्वयं यजन मित्यभिप्रायः। "एतदेवास्येति। होमानन्तर मेव प्राग्नितं भवतीत्यभिप्रायः। अन्ते तु प्रत्यक्ष मेव प्राग्नेष्यति ; अप्राश्नमाने यजमाने भागत्वव्यपदेशानुपपत्तेः। "सर्वं प्राश्नन्ति" इडा मिति सम्बध्यते ॥ २८ ॥

"अथ यत्र प्रतिपद्यते"। 'यत्र' काले होता 'प्रतिपद्यते' "इडोपह्वता"-इत्येतं निगदम्, 'तत्' तदा 'चतुर्द्धा कृत्वा पुरोडाशम्' आग्नेयम्; "आग्नेयं चतुर्द्धा करोति"-इति ब्राह्मणात्। बर्हिषि सीदतीति 'बर्हिषत्'। यथा बर्हिषद् भवति, तथा करोति; बर्हिषि सादयतीत्यर्थः। (तच्चतुर्द्धाकरण माग्नेयस्य पुरोडाशस्य ब्रह्मह्वोचध्वर्यग्नीधां भक्ष इति। एवं चतुःप्रकारं चतुर्द्धा, अयजमानाश्चत्वारः प्राश्नन्त्वित्येवं न पञ्च प्राश्नन्तीति विरोधः[1]।) 'तत्' चतुर्द्धाकृतस्य बर्हिषः सादनम्, 'अत्र' दर्शपूर्णमासयोः 'पितृणां[2] भाजनेन' हेतुना, क्रियत इति शेषः। पितृणां संविभागार्थ इत्यर्थः। किन्तत् पितृभ्यो दीयते ? नेत्याह। किन्तर्हि? चतुस्संज्ञासामान्याद् बर्हिस्सम्बन्धाच्चाच्च भक्षिमाच्च मेतत्। तदाह— "चतस्रो वा इति। "अवान्तरदिशो वै पितर इति। तासु हि पितृयज्ञेन तेभ्यो दीयते। "तस्मादिति निगमः[3] ॥ ४० ॥

"अथ यत्राहोपह्वते"। "तदग्नीध आदधाति"। आङ्पूर्वो

१— ठ-पुस्तकमात्रे एषोऽधिकः पाठः। २— 'पितॄणां'-इति ठ।
३— का० श्रौ० सू० ३. ४. १३-१८। एतन्नोऽपि तत्रैव संस्मृतः।

दधाति[1]रन्यत्र स्थापने प्रयुक्तोऽत्र तर्पणे द्रष्टव्यः[2]। न चैष इडाभागः; किं तर्हि? अन्य एवाय मग्निड्डागः; प्राग्निचक्षेडा च, यच्चाग्नीध आदधातीतीडाया भेदेन व्यपदेशात्। एतेन ब्रह्मभागयजमानभागयोरपीडाव्यतिरेकः सिद्धः। "द्यावापृथिव्यो वा एष यदाग्नीध्रः"। अग्निं मिन्धे, दीपयति सन्मार्गणेति 'अग्नीत्'। अग्निसमिन्धनादियोगादाग्नीध्रस्य तत्परत्वम्। स इन्द्रः द्यावापृथिव्यौ तर्पयति। "धूमेनामूं तृञ्जेमाम्"-इति[3]। धूमेन 'अमूं' द्याम्, तृञ्जा 'इमां' पृथिवी मिति। द्यावापृथिव्यौ आग्नीध्रः; तस्मिन् भक्षणादिना प्रीते सिद्धे, सिद्धा द्यावापृथिव्योः प्रीतिरिति ॥ ४१ ॥

"अथ यत्राग्निषम्"। 'यत्र' काले 'आग्निषम्' "उपह्वतोऽयं यजमान उत्तरस्यां देवयज्यायाम्"-इति[4] होता 'आगास्ते', 'तत्' तदा 'जपति[5]'। कः? यजमानः; आग्निषां तदर्थत्वात्[6];— "तद्या

१— जु० उ० १० धा०। २— का० श्रौ० ३. ४. १९ सू० टीका द्र०।

३— "भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः"-इति ऋ० सं० १. १६४. ५१। ४— ५३१ ए० १ पं० द्रष्टव्या।

५— "आग्नास्ते मदीय मिति यजमानो जपति"-इति का० श्रौ० सू० ३. ४. २१। मन्त्रस्तु वा० सं० २. १०. १।

६— तदिडाप्राशनपद्धतिरित्येवम्।— अध्वर्युः इडापात्रीं गार्हपत्ये प्रतप्य तस्यां स्थाल्या एवोपस्तीर्य पुरोडाशस्य दक्षिणतो मध्याच्चावद्यति। ततः प्रत्यङ्मुखो भूत्वा होत्रे इडां प्रदाय, हस्तेनापि मुञ्चन्, होतारं प्रदक्षिणीकृत्य, होतुरग्रे प्रत्यङ्मुख उपविश्य, होत्रा समर्पितां मिडां प्रतिगृह्य, इडाया एव स्रुवेणाज्य मादाय होतुः प्रादेशिन्या उत्तमे पर्वणि मध्यमे च स्रुवेणैवानक्ति। ततो होतुर्हस्ते इडाया एव पञ्चा-

एवाचर्त्विजो यजमानायाग्निष आग्रामते, ता एवैतत्प्रतिगृह्यात्मन् कुरुते"-इतिवाक्यशेषात्[१] ॥ ४ २॥

"अथ पवित्रयोः"। 'पवित्रयोः' पवित्राभ्या मिति विभक्ति-व्यत्ययः। कुतः? "पवित्रपूताः ०—० तनवामहै"—इतिवाक्यशेषात्[२]। 'मार्जयन्ते'[३]। "मृजू शौचालङ्कारयोः"। चौरादिकत्वाणिच्[४]। शोधयन्त्यात्मान मित्यर्थः ॥ ४ ३॥

"अथ ते पवित्रे"। "यजमानो वै प्रस्तरः"; इतरस्माद्धर्हिष उत्कृष्टतरत्वात्। "प्राणोदानौ पवित्रे"; द्वित्वात्। 'अपिसृजति' संसृजति[५] ॥ ४ ४ ॥ २ ॥ [८. १.] ॥

श्रीमतोऽवन्तिनाथस्य विक्रमार्कचितौ गितुः।
धर्माध्यक्षो हरिस्वामी व्याख्यच्छ्रुतपथीं श्रुतिम् ॥
इत्याचार्य-श्रीहरिस्वामिनः कृतौ शतपथभाष्ये
हविर्यज्ञेषु अष्टमस्य प्रथमं ब्राह्मणम् ॥

वक्ष्यति। होता च पञ्चमं भक्षदानं स्वयमेवादत्ते। तत इडोपहूतेति होत्रा पठ्यमाने आग्नेयं पुरोडाशं चतुर्धा कृत्वा ब्रह्म पिन्वस्वेतिमन्त्रान्तेऽध्वर्युर्बर्हिषि निदधाति। ततो यजमान आग्नेयादिविदित्तु चतुरो भागान् निधाय, प्रदक्षिणमाग्नेयस्यानादारभ्य, इदं ब्रह्मणः, इदं होतुः, इदं मध्वर्योः, इदं मार्जीध्रस्येति ऋत्विग्भ्य आदिशति। ततोऽप्रसव्यादिकर्मान्ते सर्वे प्रणीतोल्करावन्तरेण निष्क्रम्य, समर्पणक्रमेण भक्षयन्ति। यजमानोऽपि पञ्चमं भागं भक्षयतीति।

१— ५३३ ए० १४ पं०। २— ५३३ ए० १७ पं०।
३— का० श्रौ० सू० ३. ४. २४। मन्त्रस्तु— वा० सं० ६. २२. २।
४— चु० उ० ३१५ धा०। ५— पा० सू० ३. १. २५।
६— का० श्रौ० सू० ३. ४. २५। तन्मन्त्रोऽपि तत्रैव संस्मृतः।

ते वा ऽएते ऽउल्मुके ऽउदूहन्ति। अनुयाजेभ्यो यातयामेव वा ऽएतदग्निर्भवति देवेभ्यो हि यज्ञ मूहिवान् भवत्ययातयाम्न्यनुयाजांस्तनवामहा ऽइति तस्माद्वा ऽएते ऽउल्मुके ऽउदूहन्ति ॥ १ ॥

ते पुनरनुसꣳस्पर्शयन्ति। पुनरेवैतदग्नि माप्याय-यन्त्ययातयामानं कुर्वन्त्ययातयाम्नि यदुत ऽऊर्द्ध मुसꣳस्थितं यज्ञस्य तत्तनवामहा ऽइति तस्मात् पुनरनुसꣳस्पर्शयन्ति ॥ २ ॥

अथ समिध मभ्यादधाति। सुमिन्ध ऽएवैन मेतत् सुमिद्धे यदुत ऊर्द्ध मुसꣳस्थितं यज्ञस्य तुत् तनवामहा ऽइति तस्मात् समिध मभ्यादधाति ॥ ३ ॥

ताꣳ होतानुमन्त्रयते। एषा ते ऽअग्ने समित्तया व्वर्द्धस्व चा च प्यायस्व व्वर्द्धिषीमहि च व्वय मा च प्यासिषीमहीति तद्यथैवादः समिद्ध्यमानायान्वाहैव मेवैतदन्वाह तदेतद्धोतुः कर्म स यदि मन्येत न होता व्वेदेत्यपि स्वय मेव यजमानो ऽनुमन्त्रयेत ॥ ४ ॥

अथ सम्मार्ष्टि। युनक्त्येवैन मेतद्युक्तो यदुत ऽऊर्द्ध मुसꣳस्थितं यज्ञस्य तुदहादिति तस्मात् सम्मार्ष्टि सकृत्-सकृत् सम्मार्ष्टि चिस्त्रिर्वा ऽअग्रे देवेभ्यः सम्मृजन्ति नेत्तथा करवाम यथा देवेभ्य ऽइति तस्मात् सकृत्-सकृत्

सुम्माष्ट्यजामितायै जामि ह कुर्याद्यत् चिः पूर्वं चिरुपरं तस्मात् सकृत्-सकृत् सुम्मार्ष्टि ॥ ५ ॥

स सुम्मार्ष्टि। अग्ने व्वाजजिद् वाजं त्वा सरत्स्वाꣳसं वाजजितꣳ सुम्माज्मीति* सरिष्यन्त मिति वा ऽअग्र ऽआह सरिष्यन्निव हि तर्हि† भुवत्यथाच सस्रत्स्वाꣳस मिति ससृवेव ह्यच भवति तस्मादाह सस्रत्स्वाꣳस मिति ॥ ६ ॥

अथानुयाजान् यजति। या वा ऽएतेन यज्ञेन देवता ह्रियति याभ्य ऽएष यज्ञस्तायते सुर्वा वै तक्ता ऽइष्टा भवन्ति तद्यक्तासु सुर्वास्विष्टास्वथैतत्पश्चेवानुयजति तस्मादनुयाजा नाम ॥ ७ ॥

अथ यदनुयाजान् युजति। छन्दाꣳसि वा ऽअनुयाजाः पशवो वै देवानां छन्दाꣳसि तद्यथेदं पशवो युक्ता मनुष्येभ्यो वहन्त्येवं छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं व्वहन्ति तद्यच छन्दाꣳसि देवान्त्समतर्पयन्नथ छन्दाꣳसि देवाः समतर्पयंस्तदुतस्तत् प्रागभूद्यच्छन्दाꣳसि युक्तानि देवेभ्यो यज्ञ मुवाक्षुर्यदेनान्त्समतीतृपन् ॥ ८ ॥

अथ यदनुयाजान् युजति। छन्दाꣳसि वा ऽअनुयाजाꣳश्छन्दाꣳस्येवैतत्सन्तर्प्पयति तस्मादनुयाजान्यजति

---

* 'सुम्माज्मीति'—इति क, ग। † 'तर्हि'—इति च।

तस्माद्येन व्वाहनेन धावयेत्तद्विमुच्य ब्रूयात् पायय-* तैनत्सुहितं कुरुतेत्येषु ऽउ वाहनस्यापह्नवः ॥ ९ ॥

स वै खलु बर्हिः प्रथमं यजति । तद्वै कनिष्ठं छन्दः सुन्नायची प्रथमा छन्दसां युज्यते तदु तद्वीर्येणैव युच्छेनी भूत्वा दिवः सोम माहरत्तदृयथायथं मन्यन्ते यत्कनिष्ठं छन्दः सुन्नायची प्रथमा छन्दसां युज्यते ऽथाच यथायथं देवाश्छन्दाꣳस्यकल्पयन्ननुयाजेषु नेत्यापवस्यसमुसदिति ॥ १० ॥

स वै खलु बर्हिः प्रथमं यजति । अयं वै लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोक ऽओषधीर्दधाति ता ऽइमा ऽअस्मिल्लोका† ऽओषधयः प्रतिष्ठितास्तदिदꣳ सर्वं जगदस्यां तेनेयं जगती तज्जगतीं प्रथमा मकुर्वन् ॥ ११ ॥

अथ नराशꣳसꣳ द्वितीयं यजति । अन्तरिक्षं वै नराशꣳसः प्रजा वै नरस्ता इमा अन्तरिक्ष मनु वावद्यमानाः प्रजाश्चरन्ति यद्वै व्वदति शꣳसतीति वै तदाहुस्तस्मादन्तरिक्षं नराशꣳसोऽन्तरिक्ष मु वै चिष्टुप्तत् चिष्टुभं द्वितीया मकुर्व्वन् ॥ १२ ॥

अथाग्निरुत्तमः । गायची वा अग्निस्तुन्नायची मुत्तमा मकुर्व्वन्नेवं यथायथेन छन्दाꣳसि प्रत्यतिष्ठंस्तस्मादिद मुपापवस्यसम् ॥ १३ ॥

* 'पायय'–इति च । † 'ऽअस्मिंल्लोक'–इति च ।

देवान् यजेत्येवाध्वर्युराह। देवन्देव मिति सर्वेषु होता देवानां वै देवाः सन्ति छन्दाꣳस्येव पशवो ह्येषां गृहा हि पशवः प्रतिष्ठो हि गृहाश्छन्दाꣳसि वा अनुयाजास्तस्माद् देवान् यजेत्येवाध्वर्युराह देवन्देव मिति सर्वेषु होता ॥ १४ ॥

व्वसुवने व्वसुधेयस्येति। देवताया ऽएव व्वषट् क्रियते देवतायै ह्रयते न वा ऽअच देवतास्त्यनुयाजेषु देवम्बर्हिरिति तच नाग्निर्न्नेन्द्रो न सोमो देवो नराशꣳस ऽइति नात ऽएकश्चन यो वा ऽअचाग्निर्गायत्री सु निदानेन ॥ १५ ॥

अथ यद्वसुवने व्वसुधेयस्येति युजति। अग्निर्वै व्वसुवनिरिन्द्रो वसुधेयोऽस्ति वै छन्दसां देवतेन्द्राग्नी ऽएवैव सु हैतद्देवतायाꣳ एव व्वषट् क्रियते देवतायै ह्रयते ॥ १६ ॥

अथोत्तमं मनुयाजं मिष्ट्वा समानीय जुहोति प्रयाजानुयाजा वा ऽएते तद्यथैवादः प्रयाजेषु युजमानाय द्विषन्तं भ्रातृव्यं बलिꣳ हारयत्यच* ऽआद्यं बलिꣳ हारयत्येव मेवैतदनुयाजेषु बलिꣳ हारयति ॥ १७ ॥ ४ ॥

॥ इति षष्ठप्रपाठके चतुर्थं ब्राह्मणम् [८. २.] ॥

---

* 'हारयत्यच'–इति च ।

"ते वा एते उल्मुके"। अनुयाजब्राह्मण मेतत्। "अथाग्निं कल्पयति"—इत्यस्मिन्[1] क्रमे उल्मुके[2] द्वे 'उदूहन्ति' ऊर्द्धं नयन्ति, अग्नितः पृथक् कुर्वन्ति, ऋत्विग्यजमानाः। साचाद्ध्वर्युः, इतरे तदनुज्ञानेन। अथ कस्मान्न बहव एव साचादुदूहन्ति? एकेनोदूहनेनैकस्यैव कर्त्तुरपेक्षितत्वात्। यथा चानुयाजयजने तेषां स्वव्यापारापेक्षं बहुत्वम्, एव मुदूहनेऽपीति गम्यते। किमर्थं मुदूहन्ति?[3] 'अनुयाजेभ्यः' अनुयाजार्थम्। कोऽनुयाजेषु तयोरुपयोगः? इति चेत्, 'यातयामा' गतरसः, गतवीर्यः 'एतत्' एतस्मिन्ननुयाजकाले अग्निर्भवति। 'देवेभ्यः' यस्माद् 'यज्ञ मूढ़वान् भवति', ततश्च गतवीर्यत्वादनुयाजेष्वक्षमः स्यात्। आभ्यां प्रागुन्नीताभ्यां पुनः संसृष्टाभ्याम्[4] अगतवीर्यो भविष्यतीत्यभिप्रायः। अतएवाग्निकल्पनकाले उदूहन्तीति गम्यते। अनुयाजेभ्यः उल्मुके उत्सार्य देवयागायाग्निं कल्पयतीति हि तच्च युज्यते॥ १॥

"ते पुनरनु"। अनुयाजेभ्य उल्मुके उत्सार्य देवयागेऽतीते पश्चात् 'संस्पर्शयन्ति' भक्षयन्ति॥ २॥

"अथ समिध मभ्या"। उल्मुकसमासेन पुनर्नवीकृतोऽग्निः॥३॥

"ताꣳ होता"। समिधा सामिधेनीस्थानीयया च "एषा ते"—इत्यनयर्चा[5], "समिध्यते"-इत्येतदादिभ्यां द्वाभ्या माह। "तदेत-

---

१— पुरस्तात् ३. ३. १२ (२१७ पृ० १४ पं०) द्रष्टव्यम्।
२— 'उल्मुकम्' प्रज्वलत् काष्ठम्। अम० को० २. ६. ३०।
३— 'मुदूहनम् ?'—इति ठ। ४— 'संसृष्टाभ्याम्'—इति ठ।
५— वा० सं० २. १४. १। का० श्रौ० सू० ३. ५. २।

दिति । यस्मादेव मनुमन्त्रणात्मकं कर्म होतुः, नाध्वर्योः । 'स यज-मानः' 'होता न वेद इति मन्येत', तदा 'स्वय मप्यनुमन्त्रयेत' ॥ ४ ॥

"अथ सम्मार्ष्टि" । सम्मार्गो द्वाभ्या मुच्यते[1] ॥ ५ ॥

"स सम्मार्ष्टि" । 'सस्रुवान्'[2] सस्रुतवानिति प्राप्ते तकारलोपः[3] ॥ ६ ॥

"अथानुयाजान्" । (न चैष दृडाभागः, किं तर्ह्यन्य एवाय मग्नीद्धागः, प्राग्निचं च दृडा च यच्चाग्नीध आदध्यात्[4]) अचानु-याजविधिरुपक्रान्तः, तस्मात् "अनुयाजान् यजति"—इत्युपसंहरि-ष्यते । 'या वा एतेन'-इति निर्वचनम् ॥ ७ ॥

"अथ यदनुयाजान्" । —इति अर्थवादसम्बन्धार्थः पुनरुपन्यासः । "छन्दाꣳसीति । यदा छन्दोभिर्देवास्तर्पिताः, अथोत्तरकालं देवैश्छ-न्दांसि तर्पितानीतीतिहासः । त मधियज्ञं योजयति[5]— 'तत्' 'अतः' अनुयाजेभ्यः 'प्राक्' वृत्त मधियज्ञम् । किं तत् ? यच्छन्दो-भिर्देवास्तर्पितास्तदेतद्यज्ञे रूपं दर्शितम् । प्रयाजादौ स्विष्टकृदन्त इत्यर्थः ॥ ८ ॥

यस्य द्वितीयावृत्तं देवैश्छन्दसां तर्पणम्, स यज्ञे दर्शनीयः; तदर्थं मनुयाजा दृश्यन्त इति दर्शयन्नाह— "अथ यदनुयाजान् यजतीति ॥ ९ ॥

१— वा० सं० २. १४. २, ३ । का० श्रौ० सू० ३. ५. ३, ४ ।

२— पुरस्तात् ४ ४ १५ (३०७ पृ०) द्रष्टव्यम् ।

३— " 'सस्रुवांसं' सरन्तम् । स्रु गतावित्यस्माच्छिट, तस्य क्वसुः"—इति, 'सस्रुवांसः' प्राप्तवन्तः'—इति च ऋ० सं० सा० भा० ।

४— ज-पुस्तकेऽय मधिकः पाठः ।

५— 'त मभिधेयं यज्ञं योजयति'—इति ठ ।

"स वै खलु"। उत्तरस्यां कण्डिकायां बर्हिषो जगतीत्वं वक्ष्यते अस्यां तु जगत्या अनुयाजेषु प्राथम्यकारणं माह— "तद्वै"—इति। तत्र सामिधेनीषु 'कनिष्ठम्' अक्षरसङ्ख्यया अल्पतमं 'छन्दः' 'गायत्री' 'प्रथमा छन्दसां' यज्ञेषु 'युज्यते'। 'तत्' तेन 'वीर्येण' 'यज्ञ्येनो भूत्वा दिवः सोम माहरत्'। यच्च 'अयथायथं' अयथास्थं स्थानविपर्यासं 'मन्यन्ते' विद्वांसः। 'यत्' जगत्यां परिमाणतो ज्येष्ठाया मेव तिष्ठमानाया मल्पाक्षरा 'गायत्री प्रथमा युज्यते', तद् 'यथायथं' कर्त्तुं मिह 'अनुयाजेषु' 'देवाः' जगतीं प्रथमाम् 'अकल्पयन्'। सा च जगती बर्हिरित्यभिप्रायः। किमर्थम्? "नेत् पापवस्यस मसत्" 'पापं' ज्येष्ठापेक्षया कनिष्ठम्, तत् पापक मेव, 'वस्यसम्' प्रशस्यतरं, यत् 'नेत् असत्'; तदनुकाराच्च प्रजास्वपि यत्पापं वित्तबन्धुकर्मादिना, तद् 'वस्यसं' वसुतरं, प्रशस्यतर मितरस्मादपापान्माभूदिति ॥१०॥

यदि देवा यथायथ मचाकल्पयन्, एवं तर्हि जगती प्रथमं यष्टव्या, किम् बर्हिषा? एतदाशङ्क्य बर्हिषो जगतीत्वं वक्तुं बर्हिःशब्दप्रयोगे च कारणं वक्तुं पुनराह— "स वै खलु"—इति। 'अयं वै लोको बर्हिः' येयं बर्हिराख्या देवतात्वेज्यते, एषा अयं लोकः। कथम्?। परिवृढ्यो हि सः। एव मपि जगती-शब्देनैव युक्तम् 'अयं लोको बर्हिः' यष्टुम्, किं बर्हिःशब्देन? अत आह— "ओषधयो बर्हिरस्मिन्नेवैतल्लोक ओषधीर्दधातीति। बर्हिःशब्देन जगत्या मपीज्यमानाया मयं गुणो लभ्यत इत्यभिप्रायः। यद्ययं लोको बर्हिः, बर्हिश्च प्रथम मिज्यते, ततः कथं यथायथं छन्दांसि

कल्पितानि भवन्तीत्यत आह— "तदिद मिति। अथ मेव लोको जगत्सम्बन्धात् 'जगती'; ततश्चास्मिन् लोके बर्हिषीज्यमाने जगती छन्दसां प्रथम मिष्टा भवतीत्ययथायथपरिहारः। "तज्जगतीं प्रथमा मिति। "यद्वर्हिः प्रथम मयजन् देवाः, तज्जगतीं प्रथमा मकुर्वन्नेवं यथायथ मकुर्वन्"-इतीतिहासशेषस्य पूर्वेण सम्बन्धः। "तथो एवैष यद्वर्हिर्यजति, तज्जगतीं प्रथमां करोति, ततश्चापापवस्यसं यथायथं करोति"-इति चोपसंहार इतिहासस्य द्रष्टव्यः ॥ ११ ॥

"अथ नराशंसं"। नरः प्रजाः शंसन्ति वदन्त्यस्मिन्निति 'अन्तरिक्षं नराशंसः'। 'अन्तरिक्ष सु वै त्रिष्टुप्'; मध्यमत्वादेकादशभागत्वाच्च। दश दिशः, आत्मनैकादश; रुद्रसम्बद्धादा[1]। इहापि तथैवेतिहासोऽधियज्ञे उपसंहारार्थः। "यन्नराशंस मयजन्, तत् त्रिष्टुभं द्वितीया मकुर्वन्; यन्नराशंसं यजति, तत्त्रिष्टुभं द्वितीयां करोति"-इति॥ १२ ॥

"अथाग्निरुत्तमः"। अत्र यष्टव्य इति शेषः। "गायत्रौ वा अग्निः" राग्नेयौ हि ॥ १३ ॥

"देवान् यजेत्येव"। बर्हिरादिषु यष्टव्येषु बर्हिर्यजेत्यादिरूपेन्द्र-याज्यावचने चेद मुच्यते। 'देवान्'—इति बहुवचनान्तेन देवशब्देनाध्वर्युः प्रेष्यति; न बर्हिर्यजेत्यादिना। होतापि सर्वत्र 'देवं देव मिति' आह, न बर्हिराद्येव केवल मित्यर्थः[2]। ननु चोत्तरयोर्द्वयो

१— एकादश रुद्राः, ते च मध्यस्थाना इति यास्कीयनिरुक्तादौ प्रसिद्धाः।

२— "अतिक्रम्याऽऽह्याह देवान् यजेति, यज-यजेत्युत्तरौ, देवान्-देवमिति वा सर्वत्र नियमशब्दाद्, विकृतिदर्शनाच्च"—इति. का०श्रौ०सू०३.५.६-९।

देव इत्याह, न देवं देव मिति[1] ? सत्य मेवम्। यथाप्राप्ते त्वनुवदितव्ये 'देवं'-शब्दाद्वीप्सादिर्वचन मेतत्[2] प्रातिपदिकनिर्देशमात्रपरं द्रष्टव्यम्। किं पुनः कारणं बर्हिरादिषु वक्तव्येषु देवान् आह ? यस्माच्छन्दोदेवत्या अनुयाजाः, 'छन्दांसि' च 'देवानां देवाः', परोक्षत्वाच्च देवशब्दः प्रशस्ततरः; अतः छन्दो वा गायत्र्यादिर्वा 'तस्माद् देवान् यजेत्येवाध्वर्युराह'। —इत्येत मर्थं 'देवानां वै देवाः सन्ति'—इत्यादिना दर्शयति। 'पशवो हि'—इति देवत्वोपपत्तिः। पशूनाञ्च साक्षाद्देवत्व मसिद्ध मिति 'गृहा हि पशवः'—इत्याह। गृहभोगाः पशुमत[3] एवेति 'गृहाः पशवः'। गृहाणा मप्यसिद्धं देवत्व मिति 'प्रतिष्ठो हि गृहाः'—इत्याह। प्रतितिष्ठन्त्यस्या मिति 'प्रतिष्ठा' शरणम्, गतिरित्यर्थः। यस्य यस्य शरणं गतिरित्यन्तोपकारी, स तस्य देव इति प्रसिद्धम्। "तस्माद् देवान् यजेत्याह"-इत्युपसंहारः ॥ १४ ॥

"वसुवने वसुधेयस्येति"। अनुयाजेषु[4] सर्वेषु होताहेति सम्बन्धः। "देवताया एवेति। कण्डिकाद्वयेनास्य पदद्वयस्यान्तरार्थव्याख्यानम्[5]; तस्योपक्रमः— सर्वत्रैव यागे 'देवतायै एव' होत्रा

१— इह प्रथमो बर्हिर्यागः, तत्र 'देवम्'-इति समाम्नातम्; द्वितीयो नराशंसयागः, तृतीयस्तु स्विष्टकृदग्नियागः, तत्रोभयत्रैव 'देवः'-इत्याम्नातः। तै० ब्रा० ३. ५. ६. १, २, ३, मन्त्रा द्रष्टव्याः।

२— पा० सू० ८. १. ४। ३— 'पशुमन्त'-इति ङ।

४— नास्त्येतत् पदं ठ-पुस्तकादन्यत्र।

"यत्किञ्चामौ जुह्वति, तदवदानं नाम" ५. ५. ६. [५. ३. ३.

"यथा ज्ञातिभ्यां वा सखिभ्यां वा सङ्गतताभ्याꣳ समानं मोदनं पचेदजं वा"

"यथा मधु मधुकृतो निर्हरेयुः" ५. १. १.

"यदस्यै पृथिव्या अनाप्तं देवयजन मासीत्, तच्चन्द्रमसि न्यदधत ; तदेतच्चन्द्रमसि लक्ष्म" २. ३. १८. [७. ४. २३.

"यद् ब्रूयादिदं मद्दृक् सत्यादन्नत मुपैमीति, तदु खलु पुनर्मानुषो भवति"

"यद्यपि वङ्क्ष इव स्त्रियः सार्द्धं यन्ति, य एव तास्वपि कुमारक इव पुमान् भवति, त एव तत्र प्रथम इति" २. ४. ६.

"यदै नेत्यृचि, ओ मिति तत्" ३. ३. ३०.

"यथा च हि वा ऽयथा यथैतीवाथ येनैतेषाङ् होता भवति, तद् यावि-होत्र मित्याचक्षते" ५. ५. २६.

"यां वै काञ्च यज्ञ ऋत्विज आग्निध्य माग्नासते, यजमानस्यैव सा" ७. २. २१.

"यावती वै वेदिस्तावती पृथिवी" २. ६. ६.

"यावदेवास्येह मानुष मायुस्तस्मा एवैतदुपतिष्ठते" ७. ४. १८.

"येन वाहनेन धावयेत्, तद्विमुच्य ब्रूयात् पाययतैनत् सुहितं कुरुतेति। एष उ वाहनस्याप्लवः" ६. ४. ६.

"योषा वा आपो वृषाग्निः" १. १. १८.

"योषा वै पत्नी रेत आज्यम्" २. ४. १८.

"योषा वै वेदिर्बर्हिरग्निः" २. ३. १५.

"योषा वै वेदिर्बर्हिषा वेदः" ७. ३. २१.

'रेतो वा आज्यम्" ७. ३. ७.

"रेतो वै सोमः" ७. ३. ६.

"वज्रो वा आज्यम्" ४. ४. ४.

"वज्रो वा आपः" १. १. १७.

"वाग्वै यज्ञः" १. २. २.

"वामनो ह वै विष्णुरास" २. ३. ५.

"विदेघो ह माधवोऽग्निं वैश्वानरं मुखे बभार। × ×। तस्मै ह ऋषय-माणो × × ऽग्निर्वैश्वानरो मुखादुज्जग्वाल। तं न प्रत्याच धार-

वितुम्। सोऽस्य मुखाग्निप्येदे। × ×। तर्हि विदेघो माधव आस सरस्वत्याम्। स तत एव प्राड् दहन्नभीयायेमां पृथिवीम्। × ×। स इमाः सर्वा नदीरतिददाह; सदानीरेत्युत्तराद् गिरेर्निर्द्रावति, ताꣳ हैव नातिददाह। ताꣳ ह स्मैतां पुरा ब्राह्मणा न तरन्त्यनतिदग्धामिमा वैश्वानरेणेति। तत एतर्हि प्राचीनं बहवो ब्राह्मणास्तद्वात्तेचतर मिवास खावितर मिवास्खदित मग्निना वैश्वानरेणेति। तदु हैतर्हि त्तेचतर मिव ब्राह्मणा उ हि नून मेनद्यत्तैरसिष्यदन्। सापि जघन्ये नैदाघे स मिवैव कोपयति तावच्छीतानतिदग्धा ह्यग्निना वैश्वानरेण। स होवाच विदेघो माधवः,— ज्ञाहं भवानीति? अत एव ते प्राचीनं सुवन मिति होवाच। सैषाप्येतर्हि कोसलविदेहानां मर्यादा ते हि माधवाः" ३. ३. १०—१७.

"वृषा हि मनः, वृषा हि खुवः; × × योषा हि वाक्, योषा हि स्रुक्"

" विपतितलोमैव पापः पुरुषो भवति" ४. ५. ५. [३. ६. ३, ४।

"भ्रान्तिरापः" ६. २. ६.

"अग्निरो वै यज्ञस्याहवनीयः" २. ६. १२. [३. ५. ६.

"अग्निꣳ वै प्रोक्षिष्येषम्; अग्निꣳ ह्येदं अग्निनं भूयिष्ठꣳ प्रोक्षयति"

"संवत्सरो वै पिता वैश्वानरः प्रजापतिः" ४. २. १६.

"संस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयाद् यज्ञ मेवैतत् तर्पयति" ६. १. २८.

"स आज्यस्योपस्तीर्य द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति, सैवाज्येन मिश्राऽऽहुतिर्हूयते" ४. ६. २१.

" स इन्द्रोऽब्रवीद् × × × क्षुण्ण इवास्मि, न वै मेदं धिनोति; यन्मा धिनवत्तन्मे कुरुतेति। तथेति देवा अब्रुवन् × × × न वा इम मन्यत् सोमाद् धिनुयात्, सोम मेवास्मै सम्भरामेति" ५. ३. ४, ५।

"स एवꣳ सर्वतोऽभिभिर्गुप्यमानः स्वर्गं लोकꣳ समश्नुते" ४. ६. १५.

"स एष देवयानो वा पितृयाणो वा पन्थाः ७. ४. २.

"स एषोऽग्निर्ऋतुष्वाभक्तः समिधोऽ अग्ने तनूनपादग्न इडो अग्ने बर्हिरग्ने स्वहाग्नि मिति' ४. ६. ८.

"स यो घ उत्थिते नाव मापेदे, × × ×, तेनैत मुत्तरं गिरि मतिदुद्राव, × × ×, यावद्यावदुदकं समवायात्, × × ×, तावत्तावदे-वान्ववससर्प । तदप्येतदुत्तरस्य गिरेर्मनोरवसर्पण मिति। यो घो ह वा सर्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे" ६. ३. ६.

"सङ्ग्रामो वा एष सन्निधीयते, यः प्रयाजैर्यजते" ४. ४. १७.

"सत्यं वै चक्षुः । सत्यं हि वै चक्षुस्तस्माद् यदिदानीं द्वौ विवदमानावेयाता मह मदर्शं मह मश्रौष मिति, य एव ब्रूयादह मदर्शं मिति, तस्मा एव श्रद्दध्याम, तत्सत्येनैवैतत् समर्द्धयति" २. ४. २७.

"सत्य मेव देवाऽन्वतं मनुष्याः" १. १. ४ ; २. १७.

"सप्तदशाक्षराणि सप्तदशो वै प्रजापतिः" ४. ३. १७.

"स यद् वर्त्तमानः समभवत्, तस्माद् वृत्रः ; अथ यदपात् समभवत्, तस्मादहिः ; तं दनुश्च दनायूश्च मातेव च पितेव च परिजगृहतुः, तस्माद् दानव इत्याहुः" ५. २. ६.

"स यदिदं पुरा मानुषीं वाचं व्याहरेत्, तत्रो वैष्णवी ऋचं वा यजुर्वा जपेद्"

"सर्वं वै पूर्णं सर्वेणैव" ७. ४. ३. [१. ४. ६.

"सर्वं वै प्रजापतिः" ३. २. १०.

"सविता वै देवानां प्रसविता" ६. २. ८.

"स हैष यज्ञ उवाच × × ×, ब्राह्मणस्यैव हन्मि मनु हन्येय मिति"

"साम्राज्य मामाबास्यम्" ५. १. ६. [६. १. २८.

"सूर्य्य मुदीक्षते, सैषा गतिरेषा प्रतिष्ठा" ७. ४. १५.

"सैषा त्रयी विद्या यज्ञः" १. ३. ३.

"सोऽयं परोऽवरं यज्ञोऽनूच्यते पितेव पुत्राय ब्रह्मचारिणे" ५. १. ४.

"स्वेको ह वै नामैतद् यत् सुमेक इति" ५. ५. २६.

"हतो वृत्रः स यथा वृतिर्निर्ष्णीत एवं संक्षीणः शिश्ये, यथा निर्ऋतसक्तु-र्भस्त्रैवꣳ संक्षीणः शिश्ये" ५. २. १६.

अथ कर्मनामसूची ।

कर्मनाम	प्र० ब्रा० क०
अग्निपरिस्तरणम् ...	६. १. २८.
अग्निसम्मार्जनम् ...	३. ६. १४.
अग्निहोत्रहवण्यादानम्	१. २. १.
अग्नीषोमीयेष्टिः ...	५. २. १४.
अङ्गाराध्यूहनम् ...	१. ५. ६.
अङ्गाराभ्यूहनम् ...	१. ५. १३.
अङ्गारोदूहनम् ...	१. ५. ४.
अङ्गुल्यभिनिधानम् ...	१. ५. ७.
अनड्वाह्नामग्रम् ...	१. २. १३.
अनसोऽवरोहणम् ...	१. २. २२.
अनुप्रवणम् ...	५. ५. ३.
अनुयाजयागाः ...	६. ४. ७. ६
अनुवाक्यानुवचनम् ...	५. ५. १२.
अनुवाक्यापाठः ५. ५. १७ ;	६. १. १६.
अपाग्निनयनम् ...	३. १. ३.
अपामुपस्पर्शनम् ...	१. १. १.
अभिघारणम् ...	५. ५. १०.
अवदानम्	५. ५. ८०.
अवधूनम्	१. ४. ४.
अवान्तरेडावदानम् ...	६. ३. १७.
अष्टाकपालपुरोडाश-प्रथनम् ...	५. १. ५.
आग्नेयेष्टिः	५. १. १२.
आज्यनिर्वापः... ...	१. ५. २२.
आज्यभागयागः ...	५. २. १८.
आज्यविज्ञापनीयग्रहणम्	७. ३. ७.
आज्याधिश्रयणम् ...	१. ६. ६.
आज्याधिश्रपणम् ...	२. ४. २०.
आज्यावेक्षणम् ...	२. ४. १८.
आज्यासादनम् ...	२. ४. २१.
आज्योत्पवनम् ...	२. ४. २३.
आतञ्चनदानम् ...	५. ४. १६.
आतञ्चितापिधानम् ...	५. ४. २०.
आर्षेयग्रहोत्तरणम् ...	४. २. ६.
आवाहननिगदानुवचनम्	३. ४. १६.
आश्रावणम् ४. ३. ६, ७, १६–१०.	
आहवनीयप्रणयनम् ...	१. १. २०.
आहवनीयोपस्थानम्	७. ४. २२.
इडानिगदानुवचनम्...	६. ३. १६.
इडाप्राशनम्	६. ३. २६.
इडावदानम्	६. ३. १३.
इडोपस्थानम्	६. ३. १८.
ईषाभिमर्शनम् ...	१. २. १२.
उत्करनिधानम् ...	२. २. १६.
उत्तराधारः	३. ६. ४.

कर्मनाम	प्र० ब्रा० क्र०
उत्तरवेदिसंमिदभ्याधानम्	१. १. ७.
उत्पवनम्	१. ३. ९.
उदीक्षणम्	१. ३. ७.
उपभृत्याज्यग्रहणम्	२. ५. ६.
उपभृत्समञ्जनम् ...	७. १. १३.
उपभृत्सादनम् ...	३. १. १३.
उपभृदादानम् ...	४. १. १.
उपयोपधानम् ...	१. ५. १४.
उपसर्जन्यासेचनम् ...	१. ६. २.
उपस्तरणम्	५. ५. १०.
उपांशुयाजः	५. २. २८.
उपांशुवरणम्... ...	७. ३८.
उलूखलाधानम् ...	१. ४. ६, ७.
उल्मुकोद्वहनम् ...	६. ४. १.
एकादशकपालपुरोडाश-प्रथनम्... ...	५. २. १४.
ऐन्द्राग्नेष्टिः	५. ३. ३.
कपालोपधानम् ...	१. ५. ३, ७.
कृष्णाजिनादानम् ...	१. ४. १.
कृष्णाजिनास्तरणम्...	१. ५. १४.
कृष्णाजिनोपस्तरणम्	१. ४. ५.
गार्हपत्यसादनम् ...	१. १. १८.
गार्हपत्योपस्थानम्	७. ४. १८.
चतुरवदानानि... ...	५. ५. ७.
जुह्वाज्यग्रहणम्	७. ३. १६.
जुह्वासमञ्जनम्	७. १. १३.
जुह्वासम्मार्जनम् ...	२. ४. ६.
जुह्वासादनम्	३. १. १३.
जुह्वादानम्	४. १. १.
जुह्वाज्यग्रहणम् ...	२. ५. ८.
ट्यानिधानम्... ...	३. १. १०.
ट्यानिरसनम्... ...	१. २. १५.
वृषदुपधानम्... ...	१. ५. १४.
वृषदुपलोपधानम् ...	१. ५. १.
देवतादिग्रहणम् १. २. १८;	५. ४. ६.
देवद्दोऽवरणम् ...	४. १. ४.
द्वादशकपालपुरोडाश-प्रथनम् ...	५. ३. ३.
धाय्याप्रक्षेपः	३. ३. ३७.
धुरभिमर्शनम्...	१. २. ६-११.
ध्रुवाज्यग्रहणम् ...	२. ५. १०.
ध्रुवासमञ्जनम् ४. १. ५;	७. १. १३.
ध्रुवासादनम्	३. १. १४.
निगीताभितपनम् ...	२. १. ५.

कर्मनाम	प्र० ब्रा० क०
पञ्चावदानानि... ...	५. ५. ८.
पत्नीसंयाजः	७. ३. ५.
पत्नीसन्नहनम्	२. ४. १२.
पय आसेचनम्... ...	५. ४. १६.
पय उद्वासनम्	५. ४. १८.
परिधिपरिधानम्	३.१.१ ; २.६.१३.
परिधिसमञ्जनम् ...	७. १. ७.
परिधौना मनुप्रहरणम्	७. १. २२.
परिस्तरणम्	१. १. २२.
पवित्रकरणम् ...	१. ३. १.
पांस्वादानम्	२. २. १६.
पाणवनेजनम् ...	२. ३. २३.
पात्रप्रोक्षणम् ...	१. ३. १२.
पात्रासादनम्... ...	१. १. १२.
पात्रीनिर्लेजनम् ...	१. ६. १८.
पिष्टसंयवनम्... ...	१. ६. ३.
पिष्टसंवापः	१. ६. १.
पुत्रनामग्रहणम् ...	७. ४. २१.
पुरोडाशपर्यग्निकरणम्	१. ६. १३.
पुरोडाशप्रधनम् ...	१. ६. ८.
पुरोडाशश्रपणम् ...	१. ६. १४.
पुरोडाशाभिमर्शनम्	१. ६.११, १५.
पुरोडाशाभिवासनम्	१. ६. १६.१७.
पुरोऽनुवाक्यापाठः ...	३. ४. १८ ; ५. ५. ११, १२.
पूर्णपात्रनिनयनम् ...	७. ४. १.
पूर्वाधारः	३. ६. ३.
पूर्वाधारसमिदभ्याधानम्	३. १. ५.
प्रजाजननम्	५. ५. ४.
प्रणीताप्रणयनम् ...	१. १. १२.
प्रणीतानिनयनम् ...	७. ३. ३२.
प्रत्याश्रावणम्	४. ३. ६, ७, १३–२०.
प्रतिप्रैषः ...	४. ३. १६–२०.
प्रयाजयागाः ...४. ४. ५, ६.	
प्रयाजानुमन्त्रणम्	४. ५. १२–१६.
प्रवरनिगदानुवचनम्...	३. ७. २.
प्रवरायाश्रावणम् ...	४. २. १.
प्रस्तरस्तरणम्... ...	३. १. १०.
प्रस्तरादानम्... ...	७. १. ११.
प्रस्तरावयवानुप्रहरणम्	७. १. १६.
प्राङ्प्रेक्षणम्... ...	७. ४. १३.
प्राग्निचित्रहरणासम्मार्जनम्	२. ४. ६.
प्राग्निचित्रावदानम् ...	६. २. ६.
प्रैषः	४. ३. १६–२०.
प्रोक्षणादानम् ...	२. ६. १.
प्रोक्षणासादनम् ...	२. ३. २०.
प्रोक्षण्युत्पवनम् ...	२. ४. २४.
फलीकरणम्	१. ४. २४.
फलीकरणोपासनम् ...	७. ३. ३४.

कर्मनाम	प्र० ब्रा० क०
बर्हिःस्तरणम्... ...	२. ६. ७.
बर्हिर्यागः	७. ३. २६.
ब्राह्मणासन्तर्पणम् ...	६. १. २८.
भागप्राप्तनम्	६. २. १५.
मानुषहोत्रवरणम् ...	४. २. १३.
मुखोपस्पर्शनम् ...	७. ४. ७.
मुसलादानम् ...	१. ४. १०.
यजनम्	५. ५. २.
याज्यानुवचनम् ...	५. ५. १२.
याज्यापाठः	३. ४. १६; ५. ५. ११, १२, १७; ६. १. १६.
रज्ज्वुदोक्षणम्... ...	७. ४. १६.
वत्सापाकरणम् ...	५. ४. १.
वषट्करणम्	५. ५. २१.
वषट्कारः	४. ३. ११, १६—२०; ५. ५. १२, १३.
वाग्विसर्गः	१. ४. ६.
वासनाप्राप्तनदाने ...	५. ५. ५.
विष्णुक्रमक्रमणम् ...	७. ४. ८.
वेदग्रहणम्	७. ३. १६.
वेदविखंसनम्... ...	७. ३. २१.
वेदाग्रग्रहरणम् ...	२. ४. ११.
वेदानुग्रहरणम् ...	७. ३. १७.
वेदिकरणम्	२. ३. १४.
वेदिपरिग्रहः... ...	२. ३. १.
वेदिपूर्वपरिग्रहः ...	२. ३. १–१०.
वेदिप्रेक्षणम्	२. २. १६.
वेद्युत्तरपरिग्रहः	२. ३. ११–१३.
वेदिसंस्तरणम् ...	७. ३. २४.
व्रतविसर्जनम्	७. ४. २३.
व्रतोपायनम्	१. १. १.
शौच्यवेक्षणम्	१. २. १४.
शृंयुवाकप्रैषः	७. १. २१.
शृंयुवाकहौत्रम् ...	७. २. २४.
शृंयुवाकानुवचनम् ...	७. १. २६.
शम्योपधानम्... ...	१. ५. १६.
शाखागूहनम् ...	५. ४. ८.
शूर्पादानम्	१. २. १.
शेषाभिमर्शनम् ...	१. २. २०.
संस्रवभागहरणम् ...	७. १. २५.
सन्नहनविखंसनम् ...	२. ६. ६.
सन्नहनाभिच्छादनम्...	२. ६. ६.
समिदभ्याधानम् ...	६. ४. ३.
समिष्टयजुर्होमः ...	७. ३. २५.

कर्मनाम	प्र० ब्रा० सू०
सम्प्रैषाः	२. ३. २१.
साम्नाज्यकरणम् ...	५. ३. ७.
सामिधेनीसम्प्रैषः ...	३. २. २.
सामिधेन्यनुवचनम्	३. २. ३–१६.
सूक्तवाकप्रैषः ...	७. १. १०.
सूक्तवाकशौचम् ...	७. २. १.
सूक्तवाकानुवचनम् ...	७. २. ४.
सूर्याभिवीक्षणम् ...	७. ४. १५.
सूर्यावर्क्षणम्	७. ४. १७.
स्कन्नाभिमर्शनम् ...	२. ६. १७.
स्तम्बयजुर्हरणम्	२. २. १८–२१.
स्थाल्यादानम्... ...	५. ४. ११.
स्पयप्रहरणम्	२. २. १५; २. ३. २२.
स्पयादानम्	२. २. ४.
स्रुक्प्रतपनम्	२. ४. ८.
स्रुक्सम्मार्जनम् ...	२. ४. १.
स्रुग्व्याघारः	४. १. १.
स्रुग्घ्नहनम्	७. १. १.
स्रुगादानम्	२. ४. ८.
स्रुगादानानुवचनम्	४. ३. १.
स्रुवग्रहणम्	७. ३. १६.
स्रुवप्रतपनम्	२. ४. ४.

कर्मनाम	प्र० ब्रा० सू०
स्रुवसम्मार्जनम् ...	२. ४. ६.
स्रुवादानम्	२. ४. ४.
स्रुःप्रेक्षणम्	७. ४. १४.
स्वाहाकारः	४. ४. २३.
स्विष्टकृद्याजः	६. १. ६.
स्विष्टकृन्निगदानुवचनम्	६. १. १०.
हविःपेषणम् ...	१. ५. १८–२१.
हविःप्रोक्षणम् ...	१. ३. ६.
हविरनुमन्त्रणम् ...	१. ४. २३.
हविरभिमर्शनम् ...	३. १. १६.
हविरावपनम्... ...	१. ४. ८.
हविर्निधानम्... ...	१. ४. २०.
हविर्निष्पवनम् ...	१. ४. २१.
हविर्निर्वापः	१. २. १–८.
हविर्विवेचनम् ...	१. ४. २२.
हविष्प्रक्रमणम्	२. ४. २०; ६. १. २२.
हविष्समाहननम्	१. ४. १३, १८.
हविष्स्वादनम्	१. २. २३; ३. १. १४.
हविष्कृदाह्वानम् ...	१. ४. ११.
हिङ्करणम्	३. ३. १–३.
होत्रप्रैषः	४. ३. ७. १०. १६–२०.

अथर्षिनामादिसूची ।

नाम	प्र० ब्रा० क०
अबाढः	१. १. ७.
आङ्गिरसः (भृगवः)	१. ५. १३.
,, (बृहस्पतिः)	२. ३. २५, २६.
आत्याः	२. १. १.
आदर्शिः	१. २. ११.
आसुरिः	५. २. २६.
इडा	६. ३. ८-११.
उत्तरगिरिः	३. ३. १४; ६. १. ५, ६.
एकतः	२. १. १.
औपोदितेयः ...	७. ४. १६.
कुरवः	५. ५. ८.
कोसलाः	३. ३. १७.
गन्धर्वः	३. १. २.
गोतमः	३. ३. १०, १४, १८.
चितः	२. १. १.
त्वष्टा	५. २. ६.
त्वाष्ट्रः (त्रिशीर्षा षडक्षः)	५. २. १.
त्वाष्ट्रः (विश्वरूपः)	२. १. २.
दनुः	५. २. ६.
दनायूः	५. २. ६.
दानवः	५. २. ६.
दितः	२. १. १.
पाञ्चालाः	५. ५. ८.
पाणिः	३. ३. ६.
पाराशर्यः	१. १. ७.
पुलस्त्यः	७. २. २४, २५, २६.
पुलहः	७. २. २४, २५, २६.
पौरुकुत्सः ...	७. २. २४, २५, २६.
प्रजापतिः	१. १. १.
प्रयागः	३. ३. १४, १७.
प्रवाहणः	५. ३. १.
प्रस्कण्वः	१. १. ७.
प्राचीनशालः ...	३. ३. १४, १७.
प्राचीनशालिः ...	३. ३. १४, १७.
प्राचीनयोगः ...	३. ३. १४, १७.
प्राचीनयोगिः ...	३. ३. १४, १७.
प्राणः	२. १. १.
प्रियव्रतः	४. १. १.
प्लक्षः	३. ३. १४, १७.
प्लाक्षिः	३. ३. १४, १७.
बर्कुः	१. १. १०.
बार्हस्पत्यः	७. २. २४, २५, २६.
बृहस्पतिः ...	२. ३. २५, २६.
भाङ्गवेयः	६. १. १६.
भृगवः	१. ५. १३.
मनावी	१. ४. १६.
मनुः	१. ४. १४–१६; ३. ३. १, ६, ८, ६, ११; ३. ४. ५; ४. २. ७.
माधवः ('माधवः'-इति सा०भा०)	३. ३. १०, १४, १७.
याज्ञवल्क्यः	१. १. ६; २. ४. २६; ७. २. १२; ४. १७.
राङ्गगयाः ...	३. ३. १०, १४, १८.
वार्ष्णाः	१. १. १०.
विदेघः ...	३. ३. १०, १४, १७.
विदेहाः	३. ३. १७.
विश्वरूपः	२. १. २.
विश्वावसुः	३. १. २.
शुंयुः ...	७. २. २४, २५, २६.
सदागीरा ...	३. ३. १४, १७.
सरस्वती ...	३. ३. १४. १७.
सावयसः	१. १. ७.
हिरण्यस्तूपः ...	५. ३. २.

॥ अथ कण्डिकाचुटीसूची ॥

कण्डिकाप्रतीकम्	पृष्ठे
अथ सम्मार्ष्टि	३०६
आसीनस्त माघारयति ...	३०५
आसीनस्त माघारयति ...	३०६
तं वा एत मग्निꣳ ...	३०४
तूष्णीं त माघारयति ...	३०५
तूष्णीं त माघारयति ...	३०६
देवा ह वै यज्ञं	३०५
मन्त्रेण त माघारयति ...	३०५
मन्त्रेण त माघारयति ...	३०६
स यदुपाꣳशु क्रियते ...	३०४
स सम्मार्ष्टि	३०७
स स्रुवेण पूर्व माघारयति	३०३
स्रुचा त माघारयति ...	३०५
स्रुवेण त माघारयति ...	३०५
स्रुवेण त माघारयति ...	३०६

॥ अथ सूचीपत्रसूची ॥

	पृष्ठे
अथ प्रपाठकसूची	१
अथाध्यायसूची	१
अथ ब्राह्मणसूची	२
अथ कण्डिकासूची	४
अथ कण्डिकाचुटीसूची ...	५०
अथ विषयसूची	२२
अथ स्मर्त्तव्याक्षोच्यवचनसूची	३४
अथ कर्मनामसूची	४४
अथर्षिनामादिसूची... ...	४६
अथ सूचीपत्रसूची	५०

"युजौ ह वा एते"। विमोचनार्थवादोऽयम्। तच्च "यज्ञं वा अनु प्रजाः"— इत्यधिभूतं वक्ष्यते[१], तदुपक्रमार्थं 'युजौ' योक्तव्यावस्थौ 'एते यज्ञस्य यत् स्रुचौ'—इत्याह। "स यं निधायावद्येदिति। प्रसङ्गेनार्थप्राप्तं चरकश्रुतिप्राप्तं च निधायावदानं प्रतिषेधति। 'वाहनं' वाहयति तदेभिरिति वाहनमश्वादि, यथा तत् 'अवार्च्छत्' अधःपतेत्[२] वाह्यमानम्, 'एवं' निधानं स्रुचोः प्राग्विमोकाद्धश्चलनम्, 'तत्' यज्ञस्य स्यादित्यर्थः। "त एतत् क्षिप्तक्षतीति। ये चरतां युक्ते, 'ते' 'क्षिप्तक्षति' अतीते इति शेषः। 'वि' अपरिसमाप्तोऽर्थः[३]। विमुच्यतेऽस्मिन्निति 'विमोचनं' स्थानम्, तत् 'आगच्छतः'। 'ते' 'तत्' तच्च 'सादयति' अध्वर्युः, 'तत्' तच्च 'विमुञ्चति'। विश्रामार्थम् 'पुनः' च 'अनुयाजेषु' प्रयुङ्क्तेषु तदन्ते च विश्रामार्थमेव पुनः 'विमुञ्चति'। 'पुनः' च 'सम्प्रगृह्णाति' 'प्रयुङ्क्ते'; तदन्ते च कृतार्थः सन् 'गतिं' गतम् 'अभियुङ्क्ते' करोति। मन्त्रेण देशनियमेन च गम्यत इति 'गतिः' अध्वा गन्तव्यः। 'यां गतिं' य मध्वानम् 'अभि'गन्तुं 'युङ्क्ते', 'तां गतिं' त मध्वानं 'गत्वा' 'विमुञ्चते'। "यज्ञं वा अनुप्रजाः"—इत्यधियाज्ञिकयोर्योगविमोकयोरधिभूतवचनम्। 'साध्यौ—इति 'सुखे'—इत्यस्य व्याख्यानम्; 'साधौ'—इति च 'सुखे'—इत्यस्य। 'सुखं' सुखम्, तच्च साध्वित्यभिप्रायः[४] ॥ २७ ॥ १ ॥ [८. ३.] ॥

१— ५६५ पृ० १० पं०, इहैव च १६ पं० द्रष्टव्यम्।

२— 'अधः क्षयते'—इति ठ। ३— निरु० १. १. ५।

४— का० श्रौ० सू० ३. ६. ६६। मन्त्रस्तु— वा० सं० २. १६. १।

इत्याचार्यहरिस्वामिनः कृतौ शतपथभाष्ये
अष्टमस्य कृतीयं ब्राह्मणम् ॥

नागस्वामिसुतोऽवन्त्यां पाराशर्यो वसन् हरिः ।
श्रुत्यर्थं दर्शयामास शक्तितः पौष्करीयकः ॥
श्रीमतोऽवन्तिनाथस्य विक्रमार्कस्य भूपतेः
धर्माध्यक्षो हरिस्वामी व्याख्यच्छातपथीं श्रुतिम्[१] ॥

इति श्रीमदाचार्यहरिस्वामिनः कृतौ शतपथभाष्ये
अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

१— ५५७ पृ० २, ३ टीप्पन्यौ द्रष्टव्ये; एव मिश्रोत्तरत्रापि सर्वत्र ।

[अथ नवमाध्याये प्रथमं ब्राह्मणम्]

स यद्वाह। इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकायेति यदुतो होतान्वाह सुक्तैव* तदाह युजमानायैवैतदाशिष माशास्ते तद्वा ऽएतदुपरिष्टाद्यज्ञस्याशिष माशास्ते द्वयं तद्यस्मादुपरिष्टाद्यज्ञस्याशिष माशास्ते ॥ १ ॥

यज्ञं वा ऽएषु जनयति। यो युजत ऽएतेन ह्युक्ता† ऽऋत्विजस्तन्वते तं जनयन्त्युथाशिष माशास्ते तो मस्मै यज्ञ ऽआशिषः सुन्नमयति या माशिष माशास्ते यो माजीजनतेति तस्माद्वा ऽउपरिष्टाद्यज्ञस्याशिष माशास्ते ॥ २ ॥

देवान्वा ऽएषु प्रीणाति। यो युजत ऽएतेन यज्ञेनऽग्निर्भिरिव त्वद्युजुर्भिरिव त्वदाहुतिभिरिव त्वत्सु देवान् प्रीत्वा तेषपित्वी भवति तेषपित्वी भूत्वाथाशिष माशास्ते तो मस्मै देवा आशिषः सुन्नमयन्ति या

---

* 'सुक्त ऽइव'–इति च। 'सुक्तानि'–इति भा०-सम्मत इति डा०-वेबरः।

† 'ह्युक्ता'–इत्यपि वृत्तौ डा०–वेबरेण।

माशिष माशास्ते यो नोऽप्रैषीदिति तस्माद्वा ऽउपरिष्टाद्यज्ञस्याशिष माशास्ते ॥ ३ ॥

अथ प्रतिपद्यते। इदं द्यावापृथिवी भद्र मभूदिति भद्रꣳ ह्यभूद् यो यज्ञस्य सꣳस्था मगन्नार्ध्म स्रुक्तवाकꣳ सुत नमोवाक मित्युभयं वा ऽएतद्यज्ञ ऽएव युत् स्रुक्तवाकꣳस्थ नमोवाकꣳस्यारात्स्म यज्ञ मविदाम यज्ञ मित्येवैतदाहाग्ने त्वꣳ स्रुक्तवागस्युपश्रुती दिवस्पृथिव्यो*रित्यग्नि मेवैतदाह त्वꣳ स्रुक्तवागस्युपश्रुत्यो†रन्तरोर्द्यावापृथिव्योरित्योमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्ता मित्युन्नवत्यौ तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी स्ता मित्येवैतदाह ॥ ४ ॥

शुङ्गवो‡ जीवदानू ऽइति। शुङ्गवी ते जीवदानू स्ता मित्येवैतदाहाचस्रू ऽअप्रवेदे ऽइति माह§ कुस्माच्चन॥ प्रचासीर्मो त ऽइदं पुष्टं कुश्चन प्रविदतेत्येवैतदाह ॥५॥

उरुगव्यूती ऽअभयं कृताविति। उरुगव्यूती तेऽभये स्ता मित्येवैतदाह व्वृष्टिद्यावा रीत्यापेति व्वृष्टिमत्यौ ते स्ता मित्येवैतदाह ॥ ६ ॥

---

* 'दिवस्पृथिव्यो'–इत्यपि दृष्टौ डा०-वेबरेण।

† 'oऽन्तरण्वन्त्यो-'— इति क।

‡ 'शुङ्गवी'–इति, 'शुङ्गवी'–इति च दृष्टौ डा०—वेबरेण।

§ 'नाह'–इत्यपि डा०-वेबर्-दृष्टः। ॥ 'कुस्माच्चन'–इति च।

शम्भुवौ मयोभुवाविति। शम्भुवौ ते मयोभुवौ स्ता मित्येवैतदाहोर्ज्जस्वती च पयस्वती चेति रसवत्यौ त ऽउपजीवनीये स्ता मित्येवैतदाह ॥ ७ ॥

स्रूपचरणा च स्वधिचरणा चेति। स्रूपचरणा ह तेऽसावस्तु या मधुस्तादुपचरसि स्वधिचरणो त ऽइयमस्तु या मुपरिष्टादधिचरसीत्येवैतदाह तयोराविदीति तयोरनुमन्यमानयोरित्येवैतदाह ॥ ८ ॥

अग्निरिदꣳ हविः। अजुषतावीवृधत मुहो ज्यायोऽक्षतेति तदाग्नेय माज्यभाग माह सोम ऽइदꣳ हविरजुषतावीवृधत मुहो ज्यायोऽक्षतेति तत्सौम्य माज्यभाग माहाग्निरिदꣳ हविरजुषतावीवृधत मुहो ज्यायोऽक्षतेति तद्य एष ऽउभयुचाच्युत आग्नेयः पुरोडाशो भवति तमाह ॥ ९ ॥

अथ यथादेवतम्। देवा ऽआज्यपा आज्य मजुषन्तावीवृधन्त मुहो ज्यायोऽक्षतेति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा ऽआज्यपा ऽअग्निर्होचेणेदꣳ हविरजुषतावीवृधत मुहो ज्यायोऽक्षतेति तदग्निꣳ होचेणाजुषतेत्येवं या ऽइष्टा देवता भवन्ति ताः सम्पश्यत्यसौ हविरजुषतासौ हविरजुषतेति तद्यजुस्यैवैतत्समृद्धि माशास्ते यद्धि देवा हविर्जुषन्ते तेन हि

महज्जयति तस्मादाहाजुषतेत्युवीदधतेति यद्वै देवा हविर्जोषयन्ते तदुपि गिरिमाचं कुर्वते तस्मादाहावीदधतेति ॥ १० ॥

मुहो ज्यायोऽक्रतेति। यज्ञो वै देवानां मुहस्तुं ह्येतज्ज्यायाꣳस मिव कुर्वते* तस्मादाह मुहो ज्यायोऽक्रतेति ॥ ११ ॥

अस्या मृधेडुोचायां देवङ्गमाया मिति। अस्याꣳ राध्नोतु हुोचायां देवाङ्गमाया मित्येवैतदाहाशास्तेऽयं युजमानोऽसाविति नाम गृह्णाति तदेनं प्रत्यक्ष माशिषा सम्पादयति ॥ १२ ॥

दीर्घायुत्व माशास्त ऽडुति। सा यामुचोत्तरा देवयज्या तदिहु प्रत्यक्षं दीर्घायुत्वम्† ॥ १३ ॥

सुप्रजास्त्व माशास्त ऽडुति। तद्युदमुच भूयो हविष्कुरणं तदिहु प्रत्यक्षꣳ सुप्रजास्त्वं प्रशासनꣳ सु कुर्याद्यु ऽएवं कुर्यादुत्तरां देवयज्या माशास्त ऽडुति त्वेवु ब्रूयात्तदेवु जीवातुं तत्प्रजां तत् पशून् ॥ १४ ॥

भूयो हविष्कुरण माशास्त ऽडुति। तद्देव तत्सजातवनस्या माशास्त ऽडुति प्राणा वै सजाताः प्राणैर्हि सह जायते तत् प्राणानाशास्ते ॥ १५ ॥

---

* 'कुर्वते'—इति च। † 'दीर्घायुत्वꣳ'—इति च।

दिव्यं धामुाशास्त ऽइति। देवलोके मेऽप्यसदिति वै यजते यो युजते तुद्देवलोकु ऽएवैन मेतुदपित्विनं करोति युदनेन हविषाशुास्ते तुदश्यात्तुद्ध्यादिति युदनेन हविषाशुास्ते तुदस्मै सुर्वꣳ सुम्पद्यता मित्येवै-तुदाह ॥ १६ ॥

ता वुा ऽएताः*। पुच्चाशिषः करोति तिस्र ऽइडायां तुा ऽअष्टावष्टाक्षरा वै गायत्री वीर्यं गायत्री व्वीर्य मेवैतुदाशिषोऽभिसम्पादयति ॥ १७ ॥

नातो भूयसीः कुर्यात्। अतिरिक्तꣳ ह कुर्याद् यदुतो भूयसीः कुर्याद् यद्वै यन्नस्यातिरिक्तं द्विषन्तꣳ ह्यस्य तद् भ्रातृव्य मभ्यतिरिच्यते तुस्मान्नातो भूयसीः कुर्यात् ॥ १८ ॥

अपीद्वै कुनीयसीः सप्त†। तुदस्मै देवा रासन्ता मिति तुदस्मै देवा ऽअनुमन्यन्ता मित्येवैतुदाह तुदग्नि-र्ह्वेवो देवेभ्यो व्वनुतां व्वयु मग्नेः पुरि मानुषा ऽइति तुदग्निर्ह्वेवोदेवेभ्यो व्वनुतां व्वयु मग्नेरुध्यस्मा ऽएतुद्दन-वामहा ऽइत्येवैतुदाह ॥ १९ ॥

इष्टुश्च व्वित्तश्चेति। एषिषुरिव वुा ऽएतुद्यज्ञं तु मविदंस्तुस्मादाहेष्टुश्च व्वित्तश्चेत्युभे चैनं द्यावापृथिवी

---

* 'ऽएतुाः—इति च। † 'सप्तु'—इति च।

ऽश्रुंहसस्पाता मित्युभे चैनं द्यावापृथिवी ऽआत्तेर्गो-पायता मित्येवैतदाह ॥ २० ॥

तदु हैक ऽआहुः । उभे च मेति तथा होताशिष ऽआत्मानं नान्तरेतीति तदु तथा नु ब्रूयाद् यज-मानस्य वै यज्ञ ऽआशीः किन्नु तच्चर्त्विजां यां वै काञ्च यज्ञ ऽऋत्विज ऽआशिष माशासते यजमानस्यैव सा नु ह सु ऽएतां क्रतुनाशिषं प्रतिष्ठापयति यु ऽआह्वोभे च मेति तस्मादु ब्रूयादुभे चैन मित्येव ॥ २१ ॥

इह गतिर्व्वामस्येति । तद्यदेव यज्ञस्य साधु तदेवा-स्मिन्नेतद्दधाति तस्मादाहेह गतिर्वामस्येति ॥ २२ ॥

इदं च नमो देवेभ्य ऽइति । तद्यज्ञस्यैवैतत् संस्थां गत्वा नमो देवेभ्यः करोति तस्मादाहेदञ्च नमो देवेभ्य ऽइति* ॥ २३ ॥

अथ शंयोराह† । शंयुर्ह‡ वै बार्हस्पत्योऽज्ञसा यज्ञस्य संस्थां व्विदाञ्चकार सु देवलोक मुपीयाय तत्तुदन्तु-र्हित मिव मनुष्येभ्य ऽआस ॥ २४ ॥

तद्वा ऽऋषीणा मनुश्रुत मास । शंयुर्ह वै बार्ह-स्पत्योऽज्ञसा यज्ञस्य संस्थां विदाञ्चकार सु देवलोक मुपीयायेति ते तु मेव यज्ञस्य संस्था मुपायन्

* 'ऽइति'–इति च । † 'शम्योराह'–इति च ।

‡ 'शम्युर्ह'–इति च । च-पुस्तके त्वेव मेवोत्तरत्रापि सर्वत्र ।

याꣳ शंयुर्बार्हस्पत्योऽवेद्युच्छंयोरुब्रुवंस्ताम्वेवैषु एतद्यज्ञस्य सꣳस्था मुपैति याꣳ शंयुर्बार्हस्पत्योऽवेद् युच्छंयोराह तस्माद्वै शंयोराह ॥ २५ ॥

स प्रतिपद्यते। तुच्छंयोरावृणीमह ऽइति तां यज्ञस्य सꣳस्था मावृणीमहे याꣳ शंयुर्बार्हस्पत्योऽवेदि-त्येवैतदाह ॥ २६ ॥

गातुं यज्ञाय गातुं यज्ञपतय ऽइति। गातुꣳ ह्येषु यज्ञायेच्छति गातुं यज्ञपतये यो यज्ञस्य सꣳस्थां देवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्य ऽइति स्वस्ति नो देवेभ्यस्तु स्वस्ति मनुष्येभ्येत्येवैतदाहोर्ङ्क जिगातु भेषज मित्यूर्ङ्क नोऽयं यज्ञो देवलोकं जयत्वित्येवैतदाह ॥ २७ ॥

शुन्नो ऽअस्तु द्विपदे शं चतुष्पद ऽइति। एतावद्वा ऽइदꣳ सर्वं यावद् द्विपाच्चैव चतुष्पाच्च तस्मा ऽएवैतद्य-ज्ञस्य सꣳस्थां गत्वा शं करोति तस्मादाह शुन्नो ऽअस्तु द्विपदे शं चतुष्पद ऽइति* ॥ २८ ॥

अथानयेत्युपस्पृशति। अमानुष ऽइव वा ऽएतद् भवति यदार्त्विज्ये प्रवृत ऽइयं वै पृथिवी प्रतिष्ठा

---

* 'ऽइति'—इति ग, 'ऽइति'—इति च।

तदस्या मेवैतत् प्रतिष्ठायां प्रतितिष्ठति तदु खलु पुनर्मानुषो भवति तस्मादनयेत्युपस्पृशति ॥ २६ ॥ २ ॥

॥ इति सप्तमप्रपाठके द्वितीयं ब्राह्मणम् [६. १.] ॥

"स यत्राह"। आध्वर्यवः सूक्तवाकप्रैषः ग्रंयुवाक[1]प्रैषस्याधस्ता-दुक्तः[2], तत्प्रसङ्गात् सूक्तवाकग्रंयुवाकयोर्हेत्योरेतद्ब्राह्मणम्[3]। तत्रापि सूक्तवाकस्य प्रयोजनं विवक्षुः कालसम्बन्धागत[4] मुपादाय प्रयोजन माह— "स यत्राहेति। यस्मिन् काले ऽध्वर्युराह "इषिता दैव्या"— इत्यादि[5], 'अतः', अत इति सर्वनामव्यत्ययो द्रष्टव्यः, तत ऊर्ध्वं 'होता' 'यदाह' "इदं द्यावापृथिवी"—इत्यादि[6], 'तत्' 'सूक्तवा-क्याह[7]'। इति सूक्तवाकशब्दनिर्वचनम्। शोभनार्थत्वाच्छोभनादि-वचनानि सूक्तानि, ततश्च सूक्तानां वाकः वाचको ग्रन्थः सूक्तवाक इत्येवं सूक्तवाकशब्दो निर्वाच्य इत्यभिप्रायः। "यजमानायेति सूक्त-वाकस्य सङ्क्षेपार्थाभिधानम्। यदपि चात्रातीतार्थकीर्त्तनं तदपि

१— 'ग्रम्युवाक'—इति ठ। एव मिहोत्तरत्रापि सर्वत्रैव।

२— ५६०प्र० ७पं० ('इषिता दैव्या'), ५६३प्र० ६पं० ('स्यगा दैव्या')।

३— 'सूक्तवाकग्रंयुवाकयोरेतद्ब्राह्मणम्'—इति ठ।

४— 'कालसम्बन्धगत'—इति भा, ठ।

५— का० श्रौ० सू० ३. ६. १ द्रष्टव्यम्, ५७१ प्र० टीप्पणी च।

६— ५८०प्र० ३पं०, ५८७प्र० १२पं० (क० ४)।

७— 'सूक्तान्याह'—इति भा, ठ, ढ।

आग्नीःपर मेवेति दर्शयिष्यति—"तद्यज्ञस्यैवैतत्समृद्धि माशास्ते"—इति[१]। "तदा एतदिति कारणविवक्षयोपन्यासः ॥ १ ॥

"यज्ञं वा"। 'एषः' 'यः' यजमानः 'मा' 'अजीजनत' जनितान्, 'अस्मै' तस्मै 'आग्निषं' सन्नमयामीति[२] मन्यमानो 'यज्ञः' यजमानम् उत्तरकालं 'सन्नमयति'[३], न प्रागित्यभिप्रायः ॥ २ ॥

"देवान्वा एषः"। त्वच्छब्दः समुच्चये; ऋग्भिश्च यजुर्भिश्चाऽऽहुतिभिश्चेत्यर्थः। 'देवान्' 'प्रीत्वा' तर्पयित्वा, ग्राम्यपरिषदीव सन्तप्रश्ने[४](!) सन्दत्त्वा(!), 'तेषु' देवेषु, तेषां मध्ये 'अपिलो' भागी भवति। भागी हि भागं प्रार्थयमानो लभते, नाभागीत्यभिप्रायः। 'यो नः' 'अप्रैषीत्' तर्पितवान्, 'तस्मै' 'आग्निषं' सन्नमयाम[५] इति मन्यमाना 'देवाः' 'सन्नमयन्ति'। तच्चोर्ध्वं यज्ञात्, न प्रागित्यभिप्रायः ॥ ३ ॥

"अथ प्रतिपद्यते"। होता वक्तु मारभत इत्यर्थः। "इदं द्यावापृथिवी"—इत्यादिः सूक्तवाकः[६]। तत्रादौ तावत् हे 'द्यावापृथिव्यौ' 'इदं' तावद् युवयोः प्रसादादस्माकं कल्याणं जात मेव। 'आर्भं' ऋद्धवन्तः[७], 'सूक्तवाकं' देवान् स्तुतवन्तो वयं 'उत' अपि 'नमोवाकम्' अन्नदानवचनञ्च प्राप्तवन्तः अपि भवेदिति देवता दृष्टा अस्माभिरित्यर्थः। प्रसादादिदं 'सूक्तोक्थं' सूक्तवचन मुक्थास्येत्या

१— १०क० (५८१ष्ट० १६पं०)। २—

३— 'सन्नयति'—इति ठ। ४— 'ग्रा

५— 'सन्नयाम'—इति ठ। ६— "

७— 'ऋद्धवचनजुष्टं'—इ

इति अग्निं होतार मुपधावति। हे भगवन्! 'अग्ने!' 'त्वम्' एव सूक्तानां वक्ता 'असि'; नाहं मानुष इति विदित्वा[१] मा मधिष्टात् मर्हसीत्यभिप्रायः। 'उपश्रुत्यत्योः', 'द्यावापृथिव्योरिति' एकान्त मनक्ति[२] मपि कुर्यात्; न जनसंसदीत्यभिप्रायः।

"ओमन्वती"—इत्याग्नीर्यजमानं प्रत्यक्षीकृत्य। "तयोराविदि, "अग्निरिद मित्यादि[३] मिथो हेतुवचनम्,— यस्माद्द्यावापृथिव्योरनुमन्यमानयोरग्न्यादयो हवीꣳष्यजुषन्त, तस्माद्द्यावापृथिव्यौ ओमन्वदादिगुणौ स्ता मिति सम्बन्धः। "अस्रा मृधेदिति। परोक्षीकृत्य यजमानं तस्मा आग्निध आशास्ते। "उत्तरां देवयज्या मित्यादि। "यदनेन हविषेत्याग्निध एव समाप्ते "इदञ्च नमो देवेभ्य इति याचितेभ्यो निह्नवः। एत मेवार्थं 'भद्रं ह्यभूत्'—इत्यादि[४] विवृण्वन् दर्शयति। 'अरात्स्म यज्ञम्'—इति तत् "आर्भ सूक्तवाक मित्यस्य र्षिवचनम्; 'अरात्स्म'—इत्यस्यापि 'अविदाम'—इत्येतत्पर्यायः; संमाधितवन्तो लब्धवन्तो यज्ञं, वय मित्यर्थः। "उपश्रुती"। त्युपश्रुतिः, ततः सप्तमीद्विवचने उपश्रुत्योरिति प्राप्तम्, पूर्वसवर्णः 'उपश्रुती'—इति; 'उपश्रुत्यत्योरिति तद् स्यृथिव्योः"—इत्यस्य शब्दसमाधिः 'द्यावापृथिव्यो-ये" अवति तर्पयति इति 'ओमन्'[५] अन्नम्, अवत्यौ'—इति [illegible] धः ॥ ४ ॥

१— 'मनक्तु'—इति ठ।
२ (तै० ब्रा० ३. ५. १०.)।
३ "इद मभूत्"—इति मन्त्रस्य)।
४ (ऋ० ६. १. ५ अनृत्यम्।

"ग्रङ्गवी"। ग्रङ्ग ते गावौ च ग्रङ्ग्यावितिप्राप्ते पूर्वसवर्णः। "जीवदानू" जीवनस्य दात्र्यौ[1]। ग्रचसनग्रीले "ग्रचङ्गू"; ग्रचङ्गू च ते देवते उपासीनो न चस्यतीति देवधर्मं यजमाने दर्शयति—"माद्य कस्माच्चन प्रवासीरिति। "ग्रप्रवेदे" प्रवेदनं प्रलाभः, नास्ति प्रवेदन मेतयोः[2] 'ग्रप्रवेदे' दुर्लभे; तादृश्यौ चोपासीनस्य। 'पुष्टम्' पुष्टिरित्येतद् दुर्लभता न भवतीत्येतत् 'मो त इदं पुष्टं' 'कस्यन' कस्मिंदपि 'प्रविदत' मा लभत इत्यतिदिशति ॥ ५ ॥

"उरुगव्यूती"। गावः ग्रवन्ति ह्यन्त्यस्या मिति 'गव्यूतिः' गोप्रचारः; सा च क्षेमउर्वी भवति। व्याघ्रादिभये चसन्ति, न दूरं ग्रामाद्गावो गच्छन्तीत्यनुर्वी गव्यूतिर्भवति। तेन गवां क्षेमहेतू द्यावापृथिव्यौ स्ता मित्यर्थः। "ग्रभयं क्षतावितिः। सामान्येना-भयङ्करे स्ताता मिति। 'वृष्टिद्यावा' वृष्टेर्दात्र्यौ। ददातेर्वनिप्[3], यकारस्वागमः "ग्रातो युक्"—इति[4]; वृष्टिदातारावितिप्रा "रीत्यापा"। 'रीतिस्तृप्तिस्ता मापत इति 'रीत्यापा'; स वत्यावित्यर्थः ॥ ६ ॥

"ग्रभुवौ"। दुःखोपशमनं 'ग्रभ्' भावयत इति 'ग्र

१— 'जीवदानु-जीरदानु-शब्दावभिन्नार्थौ संहितामेदा
एतत्पदसिद्ध्यर्थ मेव वार्त्तिककृता "रक्ति ल
पठितम् (पा० १. १. ४.)। तच्च "र
च भाष्येष्टिः। 'जीरदानू'—इति वै०

२— 'नास्ति प्रवेदनं प्रलाभ एतयोः'

३— पा० सू० ३. २. ७४।

मिति सर्वेण प्रार्थ्यते। 'मयः' सुखम्, अनुकूलवेदनीयम्, तद्भावयतः 'मयोभुवौ'। 'ऊर्जस्वती[1]' "ऊर्ज बलप्राणनयोः[2]"। ऊर्जयतीति 'ऊर्ग्' रसः, सोऽनयोरस्तीत्यूर्जस्वत्यौ। ऊर्जः मतुपि असुगागमः मकारस्य वत्वम्[3]। 'एतदाह'— "रसवत्यौ ते स्तां मित्याहेति। 'पयः' आप्यायनं स्थावरजङ्गमानां नोपघातकम्, तद्वत्यौ; तदाह— "उपजीवनीये स्तां मित्येवैतदाहेति ॥ ७ ॥

"सूपचरणा"। अक्लेशेनोपचर्यत इति सूपचरणा द्यौः; सा ह्यविरुद्धा अक्लेशेनैवोपचर्यते। एवं 'सुधिचरणा' पृथिवी; तस्यां हि दृढाया अक्लेशेन चरन्ति। "छन्दसि गत्यर्थेभ्यः"—इति[4] स्वार्थे युच् प्रत्ययः। एतदाह— "सूपचरणा ह तेऽस्मावस्त्वित्यादिना। आवेदनम् 'आवित्'। आवेदनेनात्र यज्ञविषया मतिर्लक्ष्यते। यस्य जानतः अज्ञस्य यत् क्रियते, स तदनुमन्यत इति गम्यते ॥ ८ ॥

"अग्निरिदꣳ हविः"। "तदाग्नेय मिति समस्तार्थवचनम्। अग्निना हविषः सेचन मतीतं कीर्त्यत एव तावत् आग्नेयाज्य-ग इत्याह। अथवा[5] आज्यस्यासौ भागस्येत्याज्यभागः; होतव्य मिति भागशब्दार्थं दर्शयति। एवं पुरोडाशेन इतरथा तत्र पुरोडाशेन यागो लक्ष्येत। 'अजुषत'— [6] व्याख्यास्यति ॥ ९ ॥

१— सत्यम्। २— धा० पा० रुधा० प० १५।
३— 'वकारस्य च भत्वम्'—इति ठ।
४— । ५— नास्त्येतत् पदं ठ-पुस्तके।
६— ५८१, ५९१ पृ०)।

"अथ यथादेवतम्"। या या देवता यष्टव्या, तां ता माहेति वर्त्तन्ते। "प्रयाजानुयाजा वै देवा आज्यपाः"—इति। प्रयाजानुयाजा देवता देवाना माज्यपा इत्यर्थः। 'अग्निः' 'होचेण'। "इत्यभूतलक्षणे इतौया[1]। 'होचेण' देवताज्ञानेन कर्मणा युक्तः 'अग्निः' 'हविः अजुषत' खिष्टवानित्यर्थः। एवं "या इष्टा इत्येतया यथादेवतस्यार्थं स्फुटीकरोति। ततश्चेष्टदेवतावाचिना मेव देवतापदाना मस्मिन् प्रदेशे मन्त्रलावगते विहितावूहविधौ सेत्यतः प्रकृतौ च पौर्ण-मास्यमावास्यादेवतापदानां व्यवस्था भविष्यति। "सन्दृद्धि माग्नास्ते"—इत्येतदनुपपन्नम्; भूतानुवादस्वरूपत्वात्। "अजुषतेत्यस्य यद्पि हेतुवचनं "यद्धि देवा हविर्जुषन्ते, तेन हि मह्यमयतीति, तद्-प्याग्नीध्रं न साधयति; किन्तर्हि "ओमन्वतीति; "अस्मिन् यज्ञे यजमानो द्यावापृथिवी स्तो मिति[2]; अत्राग्निषो हेतुत्वेनोच्यते। "अग्निरजुषतेति। ततश्च यस्माद्द्यावापृथिव्योराविदि अग्निरजुषत, तस्माद्द्यावापृथिव्यौ ओमन्वती स्तो मित्याग्नीध्रपर मेवातीतजोष कीर्त्तन मित्युपपन्नं यज्ञसन्दृद्ध्याग्नीर्वचनम्। "यद्वै देवा हवि यन्ते"-इति। खैरनुचरैः सेव्यन्ते; तेषां हि बहूनां हविषे मपि यजमानेन दत्तम्, तद् बहु कुर्वन्नीत्यर्थः॥ १०

"महो ज्यायोऽकृतेति"। पूर्वं मेकवचनान्तं बहुवचनान्तं व्याचष्टे। व्याख्यानश्चाज्ञापित देवानां महः"। महनं, महः; पूजा, वि वृद्धतरं प्रशस्यतरं वा प्रागवस्थानं कुर्वा

१— पा० सू० २. ३. २१। २—

"अस्या मधेत्"। "तदेनं प्रत्यच मिति। श्रुतया आग्निषा विग्रहेण 'आग्नास्ते' 'अयं यजमानः' इति, स "मधेत्" 'राध्नोतु'। 'देवङ्गमायां' देवप्रापणशीलायाम्, यच्च इडायाम् "उपह्वतोऽयं यजमान इति। आग्नीःग्रब्दाभावान्नामाभावाच्च परोक्षम् 'आग्निषा सम्पादयति[१]' ॥ १२ ॥

"दीर्घायुत्व माग्नास्ते"। 'अमुत्र[२]' इडायाम्। 'उत्तरा देवयज्या' "उपह्वतोऽयं यजमान उत्तरस्यां देवयज्याया मिति, 'तदिह' 'प्रत्यचं' श्रौतं 'दीर्घायुत्वम्' आग्नास्त इति दीर्घजीवित्व मुपदिश्यत इत्यर्थः ॥ १३ ॥

"सुप्रजास्त्व माग्नास्ते"। 'प्रशासनं' प्रशास्यन्तेऽनेन देवाः प्रार्थ्यमाना इति प्रशासनम्, पुरुषस्य साचात् स्वार्थपरत्वं 'कुर्यात्' इत्यर्थः। "उत्तरां देवयज्याम्"—इत्येवं देवार्थाग्नीःपूर्वकान् स्वार्थानाधीरन् यजमानाः। यजनीयदेवानां भवति च यथा जीवनादिच मन्त्रगतम्, तथोक्त मेव[३] ॥ १४ ॥

"पुनरूर्जा निवर्त्तस्व माग्नास्ते"। "तदेव तदिति। यदेवैतत् पूर्वं चयं देवपुरःसरम् "उत्तरां देवयज्या मित्युक्तम्[४], तदेतद्ण मिति। किमर्थं तर्हि? तदेवोच्यते— "तदेव दात्। अन्या हि उत्तरा देवेज्या, पुनर्यागमाच

---

[१] ०त्यम् (५३१ए० १पं०)।
[२] ०म् (५३१ए० ६पं०)।
[३] ०त्यम् (५३१ए० ९-१६पं०)।
[४] (पुरस्ताच्च ५८८ ए० ९. पं०) द्रष्टव्यम्।

मन्यद् 'भूयः' वक्ष्ये 'हविष्करणम्' ; प्रयोगवाक्यात्मक मनल्पहविष्कत्वमेत्यपौनरुक्तम् । सजाताः भ्रातरः, आत्मिकास्तु प्राणास्तेषाञ्च तस्य सम्भक्तिस्नेहवियोगः 'सजातवनस्या[1]' । 'वनस्' शब्दः कण्वादिषु द्रष्टव्यः । "कण्वादिभ्यो यक्[2]", वननं वनस्या ॥ १५ ॥

"दिव्यं धाम" । दिवि भवं 'दिव्यम्' । "देवलोके मेऽपीति । 'यो यजते', स एवमर्थं इह तावन्नामास्त्येव, येन कार्यं देवलोकेऽपि मे कथं नाम स्यादिति । तत्र स्थान मात्मन आशास्त इत्यभिप्रायः । 'अश्नात्' "अशू व्याप्तौ[3]" प्राप्नोतु । 'ऋध्यात्' समृद्ध्यताम् ॥ १६ ॥

"ता वा एताः" । 'पञ्चाग्निषः' उत्तरदेवयज्या, भूयोहविष्करणम्, सजातवनस्या, दिव्यं धाम, यदनेनेति च कर्मफलं समीहितम् ; 'एताः पञ्च' । 'तिस्र दूडायां[4]' देवयज्या, हविष्करणं "देवा म इदं हविर्जुषता मिति[5]" । "वीर्यं गायत्री" वीर्यवती सा, यद्गायत्री श्येनो हि भूत्वा दिवः सोम माहरत् ॥ १७ ॥

"नातो भूयसीः" । शाखान्तराधीतानां प्रतिषेधः ॥ १८ ॥

"अपीदै कनीयसीः" । कनीयस्त्वे[6] कारणं प्रदेशान्तरे "न्यूनाद्वा एतमाः प्रजाः प्रजायन्ते तच्छ्रःश्रेयस मुत्तराव

१—"सजाताः प्राणानेव नान्तरेति"—इति तै० सं

२—पा० ३. १. २७ सू० । ३—धा० पा

४—८. १. ३०-३७ क० (५३१, ५३२ पृ

५—८. १. ३७ (५३२ पृ०) द्रष्टव्यम् ।

६—उत्तरस्मिन् काण्डे १प्र० १ब्रा०. १३ क.

'रासन्ताम्' "रासृ दाने"[१] ददतु; कर्मभिर्व्यज्यमाना देवा अनुमन्यन्ता मिति भावः। 'तत्' 'अग्निः' होता 'देवः' 'देवेभ्यः' 'वनुताम्' "वनु याचने[२]" याचताम्। 'वयं' च मानुषा होतारः। आत्मनि बहुवचनम्[३]। 'अग्नेः' 'अधि'-शब्दोऽग्नेरित्यस्य पञ्चम्यन्तत्व-द्योतनार्थः। अनेकपञ्चम्यर्थसम्भवेऽपादानार्थत्वद्योतकः[४] ॥ १९ ॥

"दृष्टञ्च वित्तञ्च"। 'उभे च द्यावापृथिवी' 'एनम्' यजमानयज्ञं 'गोपायताम्' इति सम्बधः। 'दृष्टं' कर्म, यज्ञः; सर्वकालं मनोरथै-र्वाञ्छित मित्यर्थः। 'वित्तं' तदेव लब्धम्। देवेषु 'ऐषिषुः' प्रार्थि-तवन्तः, ऋत्विग्यजमानाः। 'यज्ञम् त मविदन्' "विदॢ लाभे[५]" लब्धवन्तः ॥ २० ॥

"तदु हैक ऽआहुः"। 'उभे च मा' मां द्यावापृथिवी इत्येवं होता ब्रूयात्। "एके आहुः"—"यजमानस्य वै यज्ञ आग्नीः, किन्नु तच्चर्त्विजाम्"-इति; न काश्चिदप्याग्निष ऋत्विजा मित्यर्थः। कथम्? 'यां काञ्च' सर्वा मित्यर्थः; 'आग्निष मामासते', 'यज-मानस्यैव मा' भवति; न ऋत्विजाम्। ततश्च य एव सार्थी भवति, 'कचन' क्वचिदपि 'एता माग्निषं प्रतिष्ठापयति'। कथम्? 'तिष्ठातव्यो यजमानः, तच्च ग्रसन्नाह। यश्चाहात्मनि, तच्च नौति। "तस्मादु ब्रूयात् उभे चैन मित्येव"-इति। दस्यार्थः ॥ २१ ॥

१२६९। २—धा० पा० त० आ० ७। गुरावात्मनि चेश्वरे"-इति।
३ भा० द्रष्टव्यम्। ५—तु० उ० १५२ धा०।

"दृह गतिः"। 'दृह' यजमाने 'गतिः' प्रतिष्ठा 'वामस्य' वननीयस्य[1] 'साधु', अस्तीति शेषः। "तद्यदेव यज्ञस्य साध्विति। असाध्वपि किञ्चिदस्यास्ति, तत् यजमाने माभूदित्यर्थः॥ २२॥

"दद्ध्व नमः"। दद मिति नमस्करणं प्रत्यक्षम्, तदाह 'नमस्करोति'-इति। होता 'देवेभ्यः' वेगुण्याग्रङ्कानिरूवाय, यज्ञकृतकदर्थननिरूवाय वा, वदेदित्यभिप्रायः॥ २३॥

"अथ ग्रंथोः"। ग्रंथुर्नाम[2] बृहस्पतेः पुत्रः[3]। स यावदत्र लोके[4] आस्ते, तावत्तादृग्गी यज्ञस्य संस्था न भवति, यादृग्गीं 'स विदाञ्चकार'; द्युलोकगते तु ग्रंथौ तत्समानवीर्या कनीयसी संस्था सम्भवतीत्येतदितिहासेनाह— "ग्रंथोर्वाक मिति। विश्वेषत आह होता अध्वर्युणा प्रेषितः सन् 'अञ्जसा' ऋजु, सम्यगित्यर्थः। 'सः' च क्वचित्काले 'देवलोकम्' 'अपीयाय' अपिगतः। 'तत्' तदा 'तद्' विज्ञानं भवितव्यतावशादेव 'अन्तर्हितं' विच्छिन्नं 'मनुष्येभ्यः' बभूव॥ २४॥

"तदा ऽऋषीणाम्"। कथं तस्याः संस्थायाः प्रतिसन्धे तदृषिभिः तत्काले श्रुतावानीय तस्याश्च कालं विदित्वा[7] अवतारितवन्तः। तस्याश्चान्यूनवीर्यतायै आह— "ते यच्छंयोर्वाक मब्रुवन्॥ २५॥

१—निरु० ४. ४. ५ द्रष्टव्यम्। २—'ग्र
२—इत आरभ्य ग्रंथुवाकमन्त्रव्याख्यानम्। त
११ अनुवाकः समग्रः। तद्व्याख्यानन्तु तै०
३—'यावद्देवलोके'-इति ठ। ४-

"स प्रतिपद्यते"। यत् 'ग्रंथोः' सम्बन्धि संस्थानं ग्रंथुना दृष्टम्, 'तत्' 'आवृणीमहे' प्रार्थयामहे ॥ २६ ॥

"गातुं यज्ञाय"। कीदृशम् ? 'गातुं' गमनं 'यज्ञाय' द्युलोकगमनम्, 'यज्ञपतये' अपि च, यज्ञे यजमाने च 'दैवी' देवेषु भवा 'स्वस्तिः' अविनाशः 'नः' अस्माकम् 'अस्तु' ; 'स्वस्तिः' च 'मानुषेभ्यः' मानुषेषु च 'नः' अविनाशोऽस्तु। न इति ब्रुवन् स्वामिनं व्यपदिशति। 'ऊर्द्धं' देवलोकं 'जिगातु' जयतु, 'भेषजं' संसारव्याधिविनाशनं यज्ञाख्यं कर्म। यज्ञेन हि योजितः स यजमानेन जित एव भवतीत्यभिप्रायः ॥ २७ ॥

"ग्नस्रो ऽअस्तु"। यज्ञे गच्छति तदनुकारेण द्विपदादेरपि गमनं माभूदिति 'ग्नं' सुख माशास्ते। एव मेव मन्त्रार्थं ब्राह्मणं व्याचष्टे, तत्प्रसक्त मेव ॥ २८ ॥

"अथानया"। 'अनया' दक्षिणस्य पाणेः कनिष्ठिकया 'इति' एव मित्यभिनयेन ('आवृणीमहे'-इत्यादौ ऋत्विक्के यतः प्रवृत्तो क्तः[१]) पृथिव्या उपदर्शनं दर्शयति। "इयं वै पृथिवीति वाक्यशेषेणैवमन्तं मन्त्रं मन्यन्ते ;— अनयेत्येतेन मन्त्रेणोपस्पृशेत् ? वाक्यशेषात् पृथिवी मिति। तेषा मेव[२] कनिष्ठिकयोपस्पृशतीति काण्वश्रुत्युपरोधः। कः पुनरुपस्पृशति ? ऋत्विग्यजमानौ"-इति[३] उत्तरत्र होद्गग्रब्दश्रवणाद्ध्वर्युरुपस्पृशति। इयं इव वा ऽएतत्"-इति "अग्निर्देवो दैव्यो

१—पुस्तकादन्यत्र। २—'अथ'—इति ङ।

३.—५७६ पृ०) द्रष्टव्यम्।

होता[१]"-इति म्रियमाणोऽग्निभावं[२] चित्तेनोपगतः स पृथिवीस्वर्गयोने-नाभिनयेन मानुषायतनं[३] पृथिवी मुपगतोऽस्मीति दर्शयति। पृथिव्युपगमेनापि तत्स्थमानुषभावोपगम मुपलक्ष्य। योनिविमोचने वक्ष्यत्येतद्—"यद्धि युक्तं न विमुच्यते, प्र तद्दहते"-इति[४]; तस्मात् सर्वयज्ञेषु युक्तं[५] विमोक्तव्यम्॥

एवं प्रासङ्गिकं होत्रब्राह्मणं समाप्तम्[६]॥ २६॥ [६. १.]

श्रीमतोऽवन्तिनाथस्य विक्रमार्कस्य शासितुः।
धर्माध्यक्षो हरिस्वामी व्याख्यच्छातपथीं श्रुतिम्[७]॥

इत्याचार्यहरिस्वामिनः कृतौ शतपथभाष्ये हविर्यज्ञेषु नवमाध्यायस्य प्रथमं ब्राह्मणम्॥

१—५. १. ५ क० (३२७ पृ० १६ पं०) द्रष्टव्यम्।
२—'ऽग्निभवं'—इति भ, ठ। ३—'मानुषयजनं'—इति ट
४—उपरिष्टात् (६. ७. ४. ८.) द्रष्टव्यम्।
५—'सर्वयज्ञैर्युक्तम्'—इति भ, ठ।
६—"स आश्राव्याह"—इत्यादिः पुरस्तादुक्तः (५६० पृ
ज्ञेयः। तथा "अध्वर्युरेवाहैषिता दैव्या
प्रेषितो मानुषः सूक्तवाकायेति सूक्तवाकम्
इत्युपरिष्टाच्च पुनर्वक्ष्यति (२. ५. २. ४२
७—५५७ पृ० २-३-टीप्पन्योरिदमित्यपाठभेदः

ते वै पत्नीः संयाजयिष्यन्तः प्रतिपुरायन्ति । जुहूं च स्रुवं चाध्वर्युरादत्ते व्वेदꣳ होताज्यविलापनी मग्नीत्* ॥ १ ॥

तद्धैकेषा मध्वर्युः† । पूर्वेणाहवनीयं पुर्येति तदु तथा न कुर्याद्बहिर्द्धा ह यज्ञात्स्याद्यत्तेनेयात् ॥ २ ॥

जघनेनो हैव पत्नीम् । एकेषा मध्वर्युरेति नो ऽएव तथा कुर्यात् पूर्व्वार्द्धो वै यज्ञस्याध्वर्युर्जघनार्द्धः पत्नी यथा भसत्तः शिरः प्रतिदध्यादेवं तद्बहिर्द्धा हैव यज्ञात्स्याद्यत्तेनेयात्‡ ॥ ३ ॥

अन्तरेणो हैव पत्नीम् । एकेषा मध्वर्युरेति नो ऽएव तथा कुर्यादन्तरियाद्ध यज्ञात् पत्नीं यत्तेनेयात् तस्मादु पूर्वेणैव गार्हपत्य मन्तरेणाहवनीयञ्चैति तथा ह न बहिर्द्धा यज्ञाद्भवति यथो ऽएवादुः प्रचरन्नन्तरेण रति सु ऽउ ऽएवास्यैषु सञ्चरो भवति ॥ ४ ॥

पत्नीः संयाजयन्ति । यज्ञाद्वै प्रजाः प्रजायन्ते ायमाना मिथुनात् प्रजायन्ते मिथुनात् प्रन्ततो यज्ञस्य प्रजायन्ते तदेना एतदन्ततो प्रजननात् प्रजनयति तस्मान्मिथुनात्

। † 'मध्वर्युः'–इति च ।

नेयात्'–इति च ।

प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते तस्मात् पत्नीः संयाजयन्ति ॥ ५ ॥

चतस्रो देवता यजति। चतस्रो वै मिथुनं द्वन्द्वं वै मिथुनं द्वे द्वे हि खलु भवतो मिथुन मेवैतत् प्रजननं क्रियते तस्माच्चतस्रो देवता यजति ॥ ६ ॥

ता वा ऽआज्यहविषो भवन्ति। रेतो वा ऽआज्यꣳ रेत ऽएवैतत्सिञ्चति तस्मादाज्यहविषो भवन्ति ॥ ७ ॥

तेनोपाꣳशु चरन्ति। तिरु ऽइव वै मिथुनेन चर्यते तिरु ऽइवैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥ ८ ॥

अथ सोमं यजति। रेतो वै सोमो रेत ऽएवैतत् सिञ्चति तस्मात् सोमं यजति ॥ ९ ॥

अथ त्वष्टारं यजति। त्वष्टा वै सिक्तꣳ रेतो व्विकरोति तस्मात् त्वष्टारं यजति ॥ १० ॥

अथ देवानां पत्नीर्यजति। पत्नीषु वै योनौ रेः प्रतिष्ठितं तत्ततः प्रजायते तत्पत्नीष्वेवैतद्योनौ सिक्तं प्रतिष्ठापयति तत्ततः प्रजायते तस्म पत्नीर्यजति ॥ ११ ॥

स यच्च देवानां पत्नीर्यजति। तत्पुरुस्त ह वै तावद्देवता ऽआसते यावन्तु नु नो जुह्वत्विति ताभ्य एवैतत्तिरुः ꣳ

मानुष्य स्त्रियस्तिरु इवैवु पुꣳसो जिघत्सन्ति या ऽइव ता ऽइवेति ह स्माह याज्ञवल्क्यः ॥ १२ ॥

अथाग्निं गृहपतिं यजति। अयं वा ऽअग्निर्लोकु ऽइमु मेवैतल्लोकु मिमाः प्रजा ऽअभिप्रजनयति ता ऽइमं लोकु मिमाः प्रजा ऽअभिप्रजायन्ते तस्मादग्निं गृहपतिं यजति ॥ १३ ॥

तद्दिङान्तं भवति। न ह्युच परिधयो भुवन्ति नु प्रस्तरो युच वा ऽअदः प्रस्तरेण युजमानꣳ स्वगाकरोति पतिं वा ऽअनु जाया तदेवास्यापि पत्नी स्वगाकृता भवतीयसि तुꣳ ह कुर्याद्यत्प्रस्तरस्य रूपं कुर्यात् तस्मा-द्दिङान्त मेवु स्यादुतो प्रस्तरस्यैवु रूपं क्रियते ॥ १४ ॥

स यदि प्रस्तरस्य रूपं कुर्याद्। यथैवादः प्रस्तरेण युजमानꣳ स्वगाकरोत्येवु मेवैतत् पत्नीꣳ स्वगा-रोति ॥ १५ ॥

यदि प्रस्तरस्य रूपं कुर्याद्*। वेदस्यैकं तृण माच्छि-
मनक्ति मुखꣳ स्रुवे बुध्नꣳ स्थाल्याम्† ॥ १६ ॥
हानुप्रहरेति। तूष्णी मेवानुप्रहृत्य चक्षुष्या
पर्म्मे पाहीत्यात्मान मुपस्पृशति तेनो
प्रहरणक्ति ॥ १७ ॥

---

* 'दि' च। † 'स्थाल्याम्'–इति च।

अथाह संवदस्वेति*। अगानग्नीदुगञ्छावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्भूर्होति† ॥ १८ ॥

अथ जुहूञ्च स्रुवञ्च सम्मृष्टस्तोति। अदो वै वाहुतिं करोति यदनक्त्याहुतिर्भूत्वा देवलोकं गच्छादिति तस्माज्जुहूञ्च स्रुवञ्च सम्मृष्टस्तोति ॥ १९ ॥

स वा ऽअग्नये सम्मृष्टस्तोति। अग्नेऽदब्धायोऽशीतमेत्यमृतो ह्यग्निस्तस्मादाहादब्धायवित्युशीत‡मेत्युशिष्टो ह्यग्निस्तस्मादाहाशीतमेति पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्या ऽउति सर्वाभ्यो मार्त्तिभ्यो गोपायेत्येवैतदाहाविषं नः§ पितुं कृणुत्यन्नं वै पितुरनमीवं न ऽइदु मकिल्बिष मन्नं कुर्वित्येवैतदाह सुषदा योनावित्यात्मन्येतदाह स्वाहा वाडिति तद्यथा-वषट्कृतꣳ हुत मेव मस्यैतद्भवति ॥ २० ॥

अथ व्वेदं पत्नी व्विसꣳसयति। योषा वै व्वेदिर्व्वृषा व्वेदो मिथुनाय वै व्वेदः क्रियतेऽथ यदेनेन यज्ञ उपालुभते मिथुन मेवैतत्प्रजननं क्रियते ॥ २१ ॥

---

* 'संवदस्वेति'–इति च। † 'शंयोर्भूर्होति'–इति च।

‡ 'यविष्ठ्यशीत'–इति च। § 'oविषुम'–इति क।

॥ इतोऽनन्तरमिह 'घृतं ८००'–इति पाठः क-पुस्तके।

अथ यत्पत्नी व्विस्रꣳसयति। योषा वै पत्नी वृषा व्वेदो मिथुन मेवैतत्प्रजननं क्रियते। तस्माद् वेदं पत्नी व्विस्रꣳसयति ॥ २२ ॥

सा व्विस्रꣳसयति। व्वेदोऽसि येन त्वं देव व्वेद देवेभ्यो व्वेदोऽभवंस्तेन मह्यं व्वेदो भूया इति यदि युजुषा चिकीर्षेदेतेनैव कुर्यात् ॥ २३ ॥

त मा वेदेः सꣳस्तृणाति। योषा वै व्वेदिर्वृषा व्वेदः पश्चादै परीत्य व्वृषा योषा मधिद्रवति पश्चादेवैना मेतत् परीत्य वृष्णा व्वेदेनाधिद्रावयति तस्मादा वेदेः सꣳस्तृणाति ॥ २४ ॥

अथ समिष्टयजुर्जुहोति। प्राङ्मे युज्ञोऽनुसन्तिष्ठाता ऽइत्यथ युवुत्वा समिष्टयजुः पत्नीः संयाजयेत् प्रत्युङ् हैवास्यैष यज्ञः सन्तिष्ठेत तस्माद्वा ऽएतर्हि समिष्टयजुर्जुहोति प्राङ्मे युज्ञोऽनुसन्तिष्ठाता ऽइति ॥ २५ ॥

अथ यस्मात्समिष्टयजुर्नाम। या वा ऽएतेन यज्ञेन देवता ह्वयति याभ्य एषु यज्ञस्तायते सर्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्व्वासु समिष्टास्वथैतुज्जुहोति तस्मात्समिष्टयजुर्नाम ॥ २६ ॥

अथ यस्मा॰ त्समिष्टयजुर्जुहोति। या वा ऽएतेन यज्ञेन देवता ह्वयति याभ्य एषु यज्ञस्तायत ऽइव ह वै ता

ऽआसते यावन्तु समिष्टयजुर्जुह्वतीदं नु नो जुह्वत्स्तुति तु ऽएवैतद्यथायथं व्यवसृजति युच यचासां चुरणं तदुतु यज्ञं वु ऽएतदजीजनत युदेन मुतत तुं जनयित्वा युचास्य प्रतिष्ठा तत्प्रतिष्ठापयति तुस्मात्समिष्टयजुर्जुहोति ॥ २७ ॥

सु जुहोति। देवा गातुविद ऽइति गातुविदो हि देवु गातुं वित्त्वेति यज्ञं वित्त्वेत्येवैतदाह गातु मितेति तुदेतेन यथायथं व्यवसृजति मनसस्पत ऽइमं देवयज्ञꣳ स्वाहा व्वाते धा ऽइत्ययं वै यज्ञो योऽयं पुवते तुदिमं यज्ञꣳ सम्भृत्यै तुस्मिन् यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञꣳ सुन्दधाति तुस्मादाह स्वाहा वाते धा ऽइति ॥ २८ ॥

अथ बर्हिर्जुहोति। अयं वै लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोक ऽओषधीर्दधाति तु ऽइमा ऽअस्मिंल्लोक* ऽओषधयः प्रतिष्ठितास्तुस्माद्बर्हिर्जुहोति ॥ २९ ॥

तां वा ऽअतिरिक्तां जुहोति। समिष्टयजुर्ह्वैवान्तो यज्ञस्य युद्यूर्ह्वꣳ समिष्टयजुषोऽतिरिक्तं तुद्यदा हि समिष्टयजुर्जुहोत्युथैताभ्यो जुहोति तुस्मादिमा ऽअतिरिक्ता ऽअसम्मिता ओषधयः प्रजायन्ते ॥ ३० ॥

सु जुहोति। सुम्बर्हिरक्तꣳ हविषा घृतेन सु

---

* 'ऽअस्मिंल्लोक'—इति क ।

मादित्यैर्वसुभिः सुम्मरुद्भिः स मिन्द्रो विश्वदेवेभिरङ्गां दिव्यं नभो गच्छतु यत् स्वाहेति* ॥ ३१ ॥

अथ प्रणीता दक्षिणतः परीत्य निनयति। युङ्क्ते वा एतद्यज्ञं यदेनं तनुते स यन्न निनयेत्पुराडुः हाविमुक्त एवु यज्ञो युजमानं प्रक्षिणीयात् तथो हु यज्ञो युजमानं न प्रक्षिणाति तस्मात्प्रणीता दक्षिणतः परीत्य निनयति ॥ ३२ ॥

स निनयति। कुरुवा विमुञ्चति सु त्वा विमुञ्चति कुस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति पोषायेति तत्पुष्टि मुत्तमां युजमानाय निराह स येनैव प्रणयति तेन निनयति येन ह्येव योग्यं युञ्जन्ति तेन विमुञ्चन्ति योक्त्रेण हि योग्यं युजन्ति योक्त्रेण विमुञ्चन्त्युथ फलीकरणान् कपालेनाधोऽधः कृष्णाजिन मुपास्यति रक्षसां भागोऽसीति ॥ ३३ ॥

देवाश्च वा असुराश्च। उभये प्राजापत्याः पस्पृधिर एतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माक मयमभविष्यत्यस्माक मयमभविष्यतीति ॥ ३४ ॥

ततो देवाः† । सर्वं यज्ञꣳ संदृज्याथ यत्पापिष्ठं यज्ञस्य भागधेय मासीत्तेनैनान्विरभजन्नसा पशोः फलीकरणै-

---

* 'स्वाहेति'–इति च। † 'देवाः'–इति च।

र्हविर्यज्ञात्सुनिर्भक्ता ऽअसन्नित्येष वै सुनिर्भक्तो यं भागिनं निर्भजन्त्युथ यु मभागं निर्भुजन्त्येव स तावच्छꣳसत ऽउत हि वुशे लब्ध्वाह किं मा बभक्थेति स यु मेवैभ्यो देवा भाग मुकल्पयंस्तु मेवैभ्य ऽएषु एतद्भागं करोत्युथ युद्धोऽधः कृष्णाजिनु मुपास्यत्यनम्रावेवैभ्य ऽएतदन्धे तमसि प्रवेशयति तुथो ऽएवास्मक् पशो रुक्षसां भागो-ऽसीत्यनम्रावन्धे तमसि प्रवेशयति तस्मात् पशोस्तेदनीं नु कुर्वन्ति रुक्षसाꣳ हि सु भागः* ॥ ३५ ॥ ३ ॥

॥ इति सप्तमप्रपाठके तृतीयं ब्राह्मणम् [६. २.] ॥

"ते वै पत्नीः"। पत्नीसंयाजब्राह्मण मेतत्[1]। 'ते' वक्ष्यमाणाः अध्वर्य्वादयः 'पत्नीः' देवानां 'संयाजयिष्यन्तः' देवैः सह सङ्गता याजयिष्यन्तः। यजमानः संयजते, न यजमानेन समिज्यमानास्ते ऋत्विजः संयाजयन्ति। संयाजनार्थं 'प्रति' यस्मादेव गार्हपत्यदेशाद् गताः, त मेव 'परियन्ति' गमनप्रतिलोम आहवनीयात् परास्त मभिमुख मायन्ति[2]। आगच्छन्तश्चेदं कुर्वन्ति— "जुह्वं च स्रुवं चाध्वर्युरादत्ते"—इत्यादि ॥ १ ॥

---

* 'भाग'—इति च।

१— "पत्नीसंयाजेभ्यो गार्हपत्यं गच्छति"—इत्यादीनि सूत्राण्यालोच्यानि (का० श्रौ० सू० ३. ७. १–१६.)।

२— 'आहवनीयान्तपरस्तानभिमुख मानयन्ति'—इति ठ।

"तद्वैषाम्"। 'बहिर्द्धा' बहिरेव बहिर्द्धा, 'यज्ञात्यात्' साधनं शरीरो यज्ञः, न चाहवनीयात् प्राक् साधनं किञ्चिदस्ति, ततश्चाध्वर्युणा यज्ञाङ्गेन यज्ञशरीरं मोक्तव्य मित्यभिप्रायः ॥ २ ॥

"जघनेनो"। गार्हपत्य मुत्तरेणातीत्य पत्नी चापरेण। "पत्नी[1]-दक्षिणपार्श्व स्थितो यज्ञादित्यपरे[2] शाखिन आहुः। भसदुत्सर्गायतनम्[3]; 'भसत्तः' यथा भसदि शिरः संयोजयेत्, तच्चायुक्त मित्यभिप्रायः ॥ ३ ॥

"अन्तरेणो"। 'गार्हपत्य मन्तरेण' अतीत्य[4] गार्हपत्यस्य पत्न्याश्चान्तरालेनेत्यपरे ॥ ४ ॥

"अथ पत्नीः"। "यज्ञाद्वै प्रजाः"—इत्यस्मिन् काले पत्नीषु संयाज्यमानासु 'यज्ञस्य' जघनार्द्धं मिथुनं प्रजननं कृतं भवतीत्याह। प्रजापतिभावाय यज्ञसम्पादनाय युक्तः सन् सर्गस्य हेतुर्भवति। सोऽपि न च सर्वात्मना। किं तर्हि? यदाधियज्ञिकं मिथुनं तेनाग्नेन प्रजासर्गस्य साक्षात्कारणं भवति। तदाह—"यज्ञात् प्रजायमाना मिथुनात् प्रजायन्ते न खतः, एवं च तदपि मिथुनं यद्यज्ञस्यान्ते वर्त्तते, तस्मात् 'प्रजाः प्रजायन्ते'। स हि यज्ञपुरुषस्य जघनार्द्धभागित्यभिप्रायः। ततश्च यदेताः पत्नीः सह देवैर्यजति, 'तदेनाः' प्रजाः 'एतदन्ततो यज्ञस्य 'मिथुनात् प्रजननात् प्रजनयति' यस्माच्चैव मिथियज्ञं क्रियते, 'तस्माद्' यज्ञानुकारिणो 'मिथुनाद्' एव खिङ्ग-

---

१— 'पत्या'—इति ठ।

२— 'यजेदित्यपरे'—इति ठ।

३— 'भसदुपस्थं'—इति ठ।

४— 'मुत्तरेणातीत्य'—इति छ, झ।

दयात् 'प्रजननाद्गतः' जघनभावाद् 'यज्ञस्य' यज्ञकार्यपुरुषस्य 'इमाः' 'प्रजायन्ते' तस्मान्नियमनम्[१] ॥ ५ ॥

"चतस्रो देवताः"। 'चतस्रः'-इति[२]। देवानां पत्न्यो यद्यपि बह्व्यः[३], तथाप्येकैव सा हविर्भाग् देवतेत्यभिप्रायः। "द्वे-द्वे दीति। द्वाभ्यां देवताभ्यां मिथुनम्, अपराभ्या मपरं मिथुनम्, ताभ्या मपि मिथुनाभ्या मपरं मिथुन मित्येतद्दर्शयति ॥ ६ ॥

"ता वा आज्यहविषः"। 'रेत आज्यम्' सारत्वात्, कारणद्रव्यत्वच्छैश्चरेत्। त एवैतद्धियज्ञं 'सिञ्चति' प्रजार्थम् ॥ ७ ॥

"तेनोपांशु"। उपांशुचरणशब्देन सर्वं[४] होचाध्वर्यव मेव आख्यं[५] 'तिरः' अन्तर्हितं मप्रकाशं 'मिथुनेन' लिङ्गद्वयेन 'चर्यते' लोके। तेन यज्ञपूर्वकेन भवनीयम् 'उपांशु' चाप्रकाशम्। "तस्मादुपांश्वित्युपसंहारः ॥ ८ ॥

"अथ सोमं"। यद्यप्याज्येनैव रेतोऽर्थः सिद्धः, तथापि देवलोकमपि तत्सम्पाद्य मिति 'सोमं' यजति[६] ॥ ९ ॥

१— 'तस्मादित्यादिग्रन्थो ठ-पुस्तके न दृश्यते।

२— "चतस्रोऽवान्तरदिशः, त एव चत्वारः पत्नीसंयाजाः"-इत्यादिग्रन्थस्थैवोपरिष्टात् (११. १. ६. २७.) द्रष्टव्यः।

३— निरु० १२. ४. १०-११-१२-खण्डेषु व्याख्याताः।

४—"उपांशु चरन्ति, चरणशब्दे सर्वम्"-इति का०श्रौ०सू०३. ६. ७, ८।

५— 'होचाध्वर्यव मख्यम्।'-इति ठ।

६— "यजति सोमं त्वष्टारं देवानाम्पत्नीरग्निं गृहपति मिति"-इति का० श्रौ० सू० ३. ७. १०।

"अथ त्वष्टारम्"। मिथुनोपपादनाय यत्र क्वचन पुंसि यष्टव्ये मिथुनात् त्रिगुण एवाश्रयनीय इत्यभिप्रायः। 'त्वष्टा' वायुः[१] सोऽध्यात्म मवस्थितः सिक्तमात्र मेव 'रेतः' यावन्त्यण्डानि यस्य प्राणिनः, तावन्ति तस्य सूक्ष्मविभागानि खण्डितानि करोति। तस्माधियज्ञानुकारेण, नान्यथेति यज्ञे ऽपि मिथुने त्वष्टा विकुर्वन् दर्शनीयः[२]। सोऽयं यज्ञत इति तदेष एवैतदित्याह ॥ १० ॥

"अथ देवानाम्पत्नीः"। "पत्नीषु वै योनाविति। पत्न्या एव 'योनिः' प्रजाधारणस्थानम्[३], तस्मिन्नेव 'रेतः' 'प्रतिष्ठितम्'। 'ततः' एव च 'प्रजायते' अपत्यरूपेण[४]; पत्नीनां योनेरेव विक्षतरेतः सम्प्रसूतिर्भवति। 'तत्पत्नीष्वेव' योनिभूतासू 'सिक्तं रेतः' 'प्रतिष्ठापयति'[५]। 'ततः' ताभ्यः देवानाम्पत्नीभ्यः 'प्रजायते' सर्वः; योषितो ऽनुलक्ष्येत्यभिप्रायः[६] ॥ ११ ॥

"स यत्र देवानाम्पत्नीः"। "तत्पुरस्तात्तिरः करोति" अन्तर्द्धानं माहवनीयात्। ताभ्य एवैतत् 'तिरः' अन्तर्द्धानं 'करोति'। 'तस्मात्' हेतोः 'मानुष्यः स्त्रियः' 'तिर इव' 'पुंसः' "अन्तर्द्धौ

१— निरु० ८. २. १०, ११, १२; १०. ३. १० खण्डेषु व्याख्यातः।

२— "त्वष्टा रूपाणि स हि प्रभुः"—इत्यादिर्मन्त्रस्त्रेहालोच्यः (ऋ० स०)।

३— 'योनिः' स्थानम्'—इत्येव क, ख।

४— नास्त्येतत्पदं ठ-पुस्तकादन्यत्र।

५— पत्नीनामित्यादिः प्रतिष्ठापयतीत्यन्तो ग्रन्थस्तु ठ-पुस्तकेऽपाठ्यः।

६— "प्रजायते' ताभ्यः सर्वा योषितोऽनुरक्ता इव स्वपुरुष मुपासत इति किंवदन्ती न विरुद्धा'—इति ठ।

येनादर्शन मिच्छति"-इत्यपादानात्पञ्चमी[1]— 'पुंसः'-इति। 'पुंसः अन्तर्हिता', पुंसः अदृश्यमाना[2] 'जिघत्सन्ति' भक्षयितु मिच्छन्ति। 'याः इव'-इत्यनुकारः। याः पुंसः पुरो जिघत्सन्त्यश्नन्ति स्त्रियः, 'ताः इव'। अस्माद्यज्ञाङ्गानुकारात् 'इत्याह याज्ञवल्क्यः'। क्षुद्र-योषितस्तु पुंसः समक्ष मश्नन्तेऽश्नन्ति[3]; तथैवातो ऽनुकारादित्यभि-प्रायः॥ १२॥

"अथाग्निं गृहपतिं"। 'अयं लोकोऽग्निः' गृहपतिः। गार्हपत्यो हि गृहपतिः; "अय मग्निर्गार्हपत्यः"-इतिवचनात्; गार्हपत्यस्यायं लोकः। ततश्च यत् 'अग्निं गृहपतिं यजति' तत् 'इमं लोकम्' लोकोपलक्षिते देशे 'प्रजाः प्रजनयति'। ततश्च यज्ञानुकारेण तथैव 'ताः प्रजायन्ते'॥ १३॥

"तद्दिडान्तं"। दडान्तवत् 'दडान्तं'। 'दडान्तं' यजनान्त मित्यभिप्राये, तत् दडा पत्नीसंयाजेषु विधीयते। तस्याश्च पूर्वोक्त एव विधिः। अर्थवादोऽपि च पूर्वोक्त एवेति नोक्तः। तस्माद्यज्ञेऽव-कल्पयेत्यादि यथैव हि देवेष्विडावकॢप्ता, तथा स्त्रीष्वपि देवेष्वि-त्यभिप्रायः। "न ह्यच परिधयः"-इत्यादिषु दडाया अन्तत्वे-ऽर्थवादः। तत्राभिप्रायः। अत्रापि पत्नीयज्ञे। यथैव दडा देवयज्ञे भवत्येवं सूक्तवाक-शंयुवाकाभ्या मपि भवितव्य मित्यत आह— "न

१— पा० सू० १. ४. २८।

२— " 'करोति' अन्तर्द्धानेनादर्शन मिच्छति। 'पुंसः अन्तर्हिता' पुंसश्चादृश्यमाना (पुंसश्च दृश्यमाना C.)"—इति ठ।

३— 'मश्नन्ते नाश्नन्ति'—इति ठ।

ह्यत्र परिधयो भवन्तीति। परिधिप्रस्तरसम्बन्धौ सूक्तवाक-शंयुवाकौ तदभावेऽनुपपन्नावित्यभिप्रायः। ननु च प्रस्तरप्रहरणेन यजमानः स्वर्गाल्लोकाद्देवयज्ञः, अत्रापि यज्ञे पत्नी तथा स्वर्गाकर्त्तव्या; इतरथा तु स्वर्गाल्लोकात्सान्तरितैव स्यात्? इत्यत आह— "प्रस्तरेणेति। प्रस्तरकरणे 'इयमितं ह कुर्यात्' 'इयस्'-शब्दोऽवसानवचनः कण्वादिषु[1] पठ्यते। अवसन्न[2] मवसादं पत्न्याः कुर्याद्;— यजमाने गच्छति स्वर्गं लोकं पत्नी न गता, अत्रैवावसन्ना सा, अधुना यातीत्येतत्कुर्याद्; न च युक्तम्; पतिं ह्यनु च जायेत्यभिप्रायः॥ १४॥

"स यदि प्रस्तरस्य"। 'प्रस्तरस्य' 'रूपं' प्रतिनिधिं 'कुर्यात्', अध्वर्युणा ततः "यथैवाद इति। स्वेनैव महिम्ना यजमानवत् तां 'स्वगाकरोति' नाभिदध्ना मानयतीत्यर्थः॥ १५॥

"स यदि"। प्रसन्ना॥ १६॥

"अथाग्नीदाह"। स प्रस्तररूपवचनात् सूक्तवाको मा प्रापदित्याह— "अथाग्नीदाहेति। यावदुक्त मेव भवति; प्रैषसामर्थ्यात्; न सूक्तवाक माह॥ १७॥

"अथाह संवदस्व"। प्रसन्ना॥ १८॥

"अथ जुहूं च स्रुवं च"। "सम्प्रगृह्णातीति[3]। होतुं तत्स्थ

१— ग. पा. ३. १. २७ (३४.)।

२— 'अवसान'—इति ठ।

३— तत्र मन्त्राः—वा० सं० २. २०. १।

माज्यम्; न तु चरुवत्[१] हृणस्याकृतिकरणार्थत्वम्। किं कारणम्? 'अद एव' हृण मध्वर्युः 'आकृतिं करोति'। 'यत्' तत् 'अनक्ति' अयं जुह्वा मित्यादि। किमर्थञ्च जुह्वञ्च सम्प्रगृह्णाति, कथं नाम? 'आकृतिर्भूत्वा' दृद माज्यं 'दिवलोकं गच्छादिति'॥ १९॥

"स वा अग्नये"। 'अग्नीतमः' भोक्तृतमः[२]। 'अनमीवम्' अमीवा व्याधिः, स यस्य कार्यतया नास्ति, तदनमीवम्। 'आत्मनि' अग्नौ; दक्षिणाग्निहोमादिशाखान्तरात् ॥ २० ॥

"अथ वेदं"[३]। विस्रंसन मुपन्यस्त मेव, अर्थवादस्तु "यद्धि युक्तं न विमुच्यते प्र तद्दह्यते"-इति[४] गम्यमान एवेति नोक्तः। पत्न्यास्तु कर्तृत्वेऽर्थवादं वक्ष्यति— "अथ यत् पत्नी विस्रꣳसयति"-इति[५], अधुना विस्रंसनप्रसङ्गादुत्पत्तिविनियोगौ वेदस्याह। तत्रोत्पत्तिस्तावद् "योषा वै वेदिरिति। विनियोगः— 'अथ यत्' 'एनेन' वेदेन यज्ञे' किञ्चित् 'उपाक्षभते' उपगृह्णाति, गृहीत मपि सत् 'उपचर्याय' उपकाराय सुगृहीतत्वात् यद् गृह्णाति; यत् 'मिथुनं क्रियते'; उपयाक्षस्य च वेदस्य वेत्युपग्रहणे विनियोगः। स च एकद्रव्ये द्रव्येतन्मिथुनवचनादेव गम्यते; नैकद्रव्ये हि कर्मणि

१— नास्त्येतत्पदं ठ-पुस्तकादन्यत्र।

२— महीधरकृतं भाष्यत्रेह द्रष्टव्यम् (वा० सं० २. २०. १.)।

३— "पत्नी वेदं प्रमुञ्चति वेदोऽसीति"-इति का० श्रौ० सू० ३. ७. १। मन्त्रस्तु वा० सं० २. २१. १।

४— उपरिष्टाद् (६. ७. ४. ८.) द्रष्टव्यम्।

५— अनुपद मेव २२ कण्डिकायाम्।

(अनावृत्तौ[1]) तेषां यस्मोक्तान्योन्य मिव मिथुनं भिद्धम् । तदपि साध्ये कर्मणि संस्तवहोमादौ वेदेनोपग्रहणम्, न सर्वत्रेत्येतच्छाखान्तरात् ॥ २१ ॥

"अथ यत् पत्नी" । प्रसन्ना ॥ २२ ॥

"सा विस्रंसयति" । 'यदि यजुषा' कर्तुं मिच्छेदिति । 'यदि'-शब्दात् पाक्षिकं वेदस्य यजुषा करण मिति गम्यते । अथ यजुषा करणचिकीर्षानुपपन्नेतिसामर्थ्यात् पतिः कुर्यादिति । तच्च करण मासाद्याज्यनिर्वापकाले चिकीर्षति । कः पुनः कुर्याद् ? यजमानः; शाखान्तरात्, "मह्यं भूयाः"-इति[2]मन्त्रलिङ्गाच्च[3] ॥ २३ ॥

"त मा वेदेः[4]" । 'आङ्' अत्राभिविधौ, संस्तर्यते वेदिं व्याप्येति । "योषा वै वेदिर्वृषा वेदः"-इतिशेषात् । वेदिं संस्तृणाति[5] । समाख्यानादध्वर्युः; होत्रे तु विशेषवचनाद्धोता संस्तृणाति ॥ २४ ॥

"अथ समिष्टयजुः[6]" । प्रसन्नास्तस्रः ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

"अथ बर्हिः[7]" । 'अथं वै लोको बर्हिः' "बृहि वृद्धौ"

१— नैतत् पदं ठ-पुस्तकादन्यत्र ।

२— वा० स० २. २०. १ मन्त्रपाठो द्रष्टव्यः ।

३— 'इतिवचनादाग्नीध्रीयागः'-इति क्व, भ्र ।

४— "स्तृणात्यावेदेः"-इति का० श्रौ० सू० ३. ७. ३ ।

५— शाङ्खायने तूत्तरेण गार्हपत्य मा बर्हिषस्तीर्णेति (१. १५. १५.) ।

६— का० श्रौ० सू० ३. ८. ४ । तत्र मन्त्रः— वा० सं० २. २१. १ । समिष्टयजुरिति कर्मणः सञ्ज्ञा । वातश्चात्र देवता; 'स्वाहा वाते धाः'-इति (वा० सं० २. २१. १.) मन्त्रलिङ्गात् ।

७— का० श्रौ० सू० ३. ८. ५ । मन्त्रस्तु वा० सं० २. २२. १ ।

परिवृद्धो[1]ऽयं लोकः। ततः कियदेतद्बर्हिःशब्दवाच्यता च ओषधिवाच्यता च? बर्हिःशब्दवाच्यांशेन तद् 'बर्हिरयं लोकः' तस्यापि बर्हिःशब्दकत्वात्, ओषधित्वांशेन तत्सर्वाः 'ओषधयः'। ततश्च यद् 'बर्हिः' अधियज्ञं 'जुहोति', तत् 'एतल्लोके' 'ओषधीः' बर्हिष ओषध्यात्मकत्वात् 'दधाति'; तचेदं तथैव दृश्यते ॥ २८ ॥

"तां वा अतिरिक्तां"। बर्हिराऊतिं यज्ञात् 'अतिरिक्तां जुहोति'। कथम्? 'समिष्टयजुर्ह्येवान्तो यज्ञस्य'; तद्धि देवताविसर्जनार्थमित्यभिप्रायः[2]। ततश्च या 'ऊर्ध्वं समिष्टयजुषः' सातिरिक्ता, तस्मासु गतासु च देवतासु। 'यदा हि'। 'हि'-शब्दः 'च'-शब्दार्थे; यदा च 'समिष्टयजुर्जुहोति', 'अथ' अनन्तरम् 'एताभ्यः' ओषधिभ्यः। "तादर्थ्ये चतुर्थी[3]" ओषधयोऽस्मिंल्लोके कथं नाम भविष्यन्तीत्येवमर्थं 'जुहोति' ॥ ३० ॥

"स जुहोति[4]"। प्रसन्ना ॥ ३१ ॥

"अथ प्रणीताः[5]"। अध्वर्युरुत्तरपार्श्वाद् दक्षिणपार्श्वं वेदेः

१— 'परिवृढो'–इति ठ।

२— समिष्टयजुर्होमेनैव यज्ञसमाप्तिः। अत एतत् प्रतिपत्तिकर्मेत्युच्यते। अथेहोपरिष्टादाऊतिपरिगणनानुसारतः सामिधेनीसङ्ख्या चेत्थं श्रुतम्— "ताः पञ्चदश सामिधेन्यः। द्वावाघारौ पञ्च प्रयाजा इडा चयोऽनुयाजाः सूक्तवाकश्च प्रयोर्वाकश्च तास्त्रयोदशाऊतयोऽथ यदेवादः पत्नीसंयाजेषु सम्प्रैषाति समिष्टयजुश्च ताः पञ्चदशाहुतयः"–इत्यादि ११. २. ६. ५, ६।

३— पा० २. ३. १३ सू० १ वा०।

४— अत्र मन्त्रः— वा० सं० २. २२. १।

५— प्रणीताः = आपः। (१२. ५. २. ७.) प्रणीताप्रणयनं वक्ष्यति।

(आहवनीयं प्रदक्षिणतो[१]) गत्वा स्वदेशेऽवस्थिता एव 'प्रणीताः' 'निनयति' नीचैर्नयति, भूमौ पर्यस्यतीत्यर्थः। "युङ्क्ते वा इति निनयनार्थवादः। "दक्षिणत इत्येतस्य तु "तथा ह्युदग् भवती-त्यर्थवादं वक्ष्यति[२]। 'पराङ्' अनावृत्तौ 'यज्ञो यजमानं प्रक्षि-णीयात्' "क्षि हिंसायाम्[३]" हिंस्यात्। 'तथा' नीयमानासु प्रणी-तासु 'न प्रक्षिणाति' न हिनस्ति ॥ ३२ ॥

"स निनयति[४]"। "तत्पुष्टि मुक्तमा मिति। पुष्टेर्हेतुरापः, तासु निरस्यमानासु मा भूत् पुष्टेर्निरासस्तेन पुष्टिं निराह— "उक्तमा मिति। आध्वर्यवस्यान्ते इत्यर्थः। आध्वर्यवे ग्रिष्टम्, तच्च रक्षोनिरासप्रधानयागादि; ततश्च निनयन मेवाध्वर्योर्यज्ञे उक्त मित्यभिप्रायः[५]। "स येनैव प्रणयतीति। "कस्त्वेत्येताभिरनिरुक्ता-भिर्व्याहृतिभिरित्यभिप्रायः। "अथ फलीकरणान् कपालेनाधोऽधः'। फलीक्रियन्ते तण्डुला एभिरिति फलीकरणाः अङ्गीभवन्ति तण्डुल-निष्पत्तौ। "अभूततद्भावे[६]", "च्वौ सत्ययुक्तर्त्तरि च्विः[७]"। 'फलीकरणान्' तण्डुलादीन् 'उपास्यति' उत्क्षिपति उत्करे। 'कपालेन' मध्यमेन प्रथमं नातिक्रामेदिति 'अधोऽधः' अधस्तात्

१— ठ-पुस्तके त्वेष पाठोऽधिकः।

२— इत उत्तरस्मिन्नेव ब्राह्मणे (१ क०)।

३— क्षा० प० २८ धा०।

४— का० श्रौ० सू० २५. ७. २७। मन्त्रस्तु वा० सं० २. २३. १।

५— सत्यषाढ्यकल्पाः पाठभेदाः।

६— पा० ५. ४. ५० सू० १ वा०।

७— पा० सू० ५. ४. ५०।

नातिदूरे । 'कृष्णाजिनम्'-इति, 'अधोऽध इत्येतद्योगनिमित्ता द्वितीया[१]; कृष्णाजिनस्याधस्तात्, समीप इत्यर्थः[२] ॥ ३३ ॥

"देवाश्च वै" । प्रसङ्गा ॥ ३४ ॥

"ततो देवाः" । 'सर्वं यज्ञं' हविर्यज्ञाख्यम्, 'संसृज्य' समाप्ति-पूर्वं संहृत्य[३] । "अथेति । 'अथ' अनन्तरम् । 'भागधेयं' भाग एव भागधेयम्; स्वार्थिको धेयः[४] । 'तेन' भागधेयेन पापिष्ठेन 'एतान्' असुरान् 'निरभजन्' निर्भक्तवन्तः, बहिर्यज्ञात् कृतवन्तः । केन, कस्मात् ? आह— "अस्रा, पशोः" । असृक्शब्दस्य अस्रादेशः[५] । 'अस्रा' लोहितेन 'पशोः' 'निरभजन्' । 'फल्गीकरणैः' पाण्डुरभागैः 'हविर्यज्ञात्' निर्भजन्तोऽभूवन्। 'एष सुनिर्भक्तः' 'भागिनं स्वल्पभागे-नापि भक्तम्, 'अभागं' भाग मदत्त्वा यं 'निर्भजन्ति'[६]। 'सः' भागी प्रथमम् 'ग्रसते' एव, 'उत' अपि अबलो हि बलवतां वशे भवति । 'लब्धा' आसाद्य 'आह' ब्रूते— कुतश्चित्कालपर्यायात् 'किं' त्वं 'मा' मां 'बभक्थ', मनसि किं मह्यं त्वया दत्त मित्यर्थः । 'यं भागम्' 'एभ्यः' ऋत्विग्भ्यः 'देवाः' 'अकल्पयन्' कल्पितवन्तः, समीपे प्रत्ति-पति, अग्निहीने 'अन्धे तमसि' 'प्रवेशयति', 'तथा' 'पशोः असृक्'

१— पा० २. ३. २ सू० ३ वा० द्रष्टव्यम् ।

२— का० श्रौ० सू० ३. ८. ७ । मन्त्वस्तु वा० सं० २. २३. २ ।

३— "ततो देवाः" । 'सर्वयज्ञं हविर्यज्ञाख्यं संहृत्तं कृत्वा'—इति ठ ।

४— "भागरूपनामभ्यो धेयः"—इति पा० ६. ४. ३६ सू० २ वा० ।

५— पा० सू० ६. १. ६३ ।

६— " 'अभागं' भागहीनं 'निर्भजन्ति' "—इति ठ ।

अपि। "तस्मादिति। तेदनीकरणाभावेन रक्तोभागः। तेदनीकरणेन लोहितं[1] सिद्धम् ॥ ३५ ॥ ३[2] [९. २.] ॥

श्रीमतोऽवन्तिनाथस्य विक्रमादित्यभूपतेः।
धर्माध्यक्षो हरिस्वामी व्याख्यच्छतपथश्रुतिम् ॥

इत्याचार्यहरिस्वामिनः कृतौ शतपथभाष्ये हविर्यज्ञेषु नवमाध्यायस्य द्वितीयं ब्राह्मणम् ॥

१—'तेदनी (तेमनी A. C.) लोहितम्'–इति ठ। तेदनीशब्दोऽत्र पुनः श्रोष्यति १३. ५. ३. ८; अन्यत्रान्यत्र च, तथाहि वा० सं० २५. २, अथ० सं० २०. १३१. ११, ता० ब्रा० २१. ४, साङ्ख्या. श्रौ. ६. १२. १२. 'तेमनं तु निष्ठानम्'–इत्यमरः २. ९. ४४।

२— अत्र पद्धतिः। होता वेद मादाय, अध्वर्युर्जुहूं स्रुवमादाय, अग्नीदाग्न्यस्थाली मादाय, आग्नीध्रप्रथमाः पत्नीसंयाजान् कर्तुं गार्हपत्यं प्रति गच्छन्ति। तत्राध्वर्युर्गार्हपत्यदक्षिणाग्नी अन्तरेण गत्वा पत्न्या अग्रे गार्हपत्यस्य दक्षिणत इध्मानाभिमुखः, गार्हपत्यस्य पश्चाद्धोता ऊर्द्धजानुः, तदुत्तरतोऽग्नीद्दक्षिणाभिमुख इत्येवं सर्वे उपविशन्ति। ततोऽध्वर्युर्वेदं गृहीत्वा क्रमेण 'सोमायानुब्रूहि', 'त्वष्ट्रेऽनुब्रूहि', 'देवानाम्पत्नीभ्योऽनुब्रूहि', 'अग्नये गृहपतयेऽनुब्रूहि'–इत्युक्त्वा जुह्वां चतुर्गृहीतं माज्यं गृहीत्वा, आश्राव्य, क्रमेण 'सोमं यज'–इत्यादिकं माह। तथा 'इदं सोमाय'–इत्यादित्यागश्च। ततः सर्वेषां मिडाभागभक्षणम्, मार्जनम्, लग्नप्रहरणम्, आत्मोपस्पर्शनम्, अग्नीदध्वर्योः संवादः, संस्रवहोमः, गार्हपत्यं परीत्योत्तरहोमद्वयम्, पत्न्या

सꣳस्थिते यज्ञे। दक्षिणतः परीत्य पूर्णपात्रं निनयति तथा ह्युदग् भवति तस्माद्दक्षिणतः परीत्य पूर्णपात्रं निनयति देवलोके मेऽप्यसदिति वै यजते यो यजते सो ऽस्यैष यज्ञो देवलोकं मेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणा मन्वारभ्य यजमानः ॥ १ ॥

सु ऽएषु देवयानो वा पितृयाणो वा पन्थाः। तदुभयतोऽग्निशिखे समोषन्त्यौ तिष्ठतः प्रति तु मोषतो युः प्रत्युष्णोऽत्यु तꣳ सृजेते यो ऽतिसृज्यः शान्तिरापस्तदेत मेवैतत्पन्थानꣳ शमयति ॥ २ ॥

पूर्णं निनयति। सुर्वं वै पूर्णꣳ सुर्वेणैवैन मेतच्छमयति सन्तत मव्यवच्छिन्नं निनयति सन्ततेनैवैन मेतदव्यवच्छिन्नेन शमयति ॥ ३ ॥

यद्वेव पूर्णपात्रं निनयति। यद्वै यज्ञस्य मिथ्या

वेदयोरुत्तरयोर्विमुञ्चनम्, स्रोतुर्वेदयोरुत्तरपरिधिविमुञ्चनम्, गार्हपत्यस्योत्तरत आरभ्य वेदेः पूर्वान्तं यावत् वेदत्यागपरिस्तरणमेति पत्नीसंयाजसङ्क्षेपः।

ततोऽध्वर्युर्ध्रौव माज्यं विलाप्य, बर्हिषः सकाशात् कुशमुष्टिं सव्ये पाणौ गृहीत्वा, ऊर्द्धस्तिष्ठन्, सततं ध्रुवयैव समिष्टयजुर्जुहोति। ततो दर्भमुष्टेरनुप्रहरणम्, बर्हिर्होमश्च। ततो वेदिमध्ये उदङ्मुख उपविष्टः प्रणीता निनयति। ततः स्फ्यकरणानन्तरं स्थापितान् कपालान् प्रथमकपाले निधाय, सव्येनोत्तरस्योपरि कृष्णाजिनं धारयन्, कृष्णाजिनस्याधस्तादुत्तरे कपालेनैव कपालान् प्रास्यति, तत उदकोपस्पर्शं इति समिष्टयजुःसङ्क्षेपः॥

क्रियते व्यस्य तृह्यन्ति क्षण्वन्ति*। शान्तिरापस्तद्धिः शान्त्या शमयति तद्धिः सन्दधाति ॥ ४ ॥

पूर्णं निनयति। सुर्वं वै पूर्णꣳ सुर्वेणैवैतत्सन्दधाति सन्तत मव्यवच्छिन्नं निनयति सन्ततेनैवैतदव्यवच्छिन्नेन सन्दधाति ॥ ५ ॥

तद्ञ्जलिना प्रतिगृह्णाति। सं वर्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्नो यद्विलिष्ट मिति यद्विदृढं तत्सन्दधाति ॥ ६ ॥

अथ मुख मुपस्पृशते। द्वयं तद्यस्मान्मुख मुपस्पृशते ऽमृतं वा ऽआपो ऽमृतेनैवैतत्सꣳस्पृशत ऽएतद् वै चैवैतत्कर्म्मात्मन् कुरुते तस्मान्मुख मुपस्पृशते ॥ ७ ॥

अथ विष्णुक्रमान् क्रमते। देवान्वा ऽएषु प्रीणाति यो यजत ऽएतेन यज्ञेनऽर्ग्भिरिव त्वद्यजुर्भिरिव त्वदाहुतिभिरिव त्वत्सु देवान् प्रीत्वा तेषपित्वी भवति तेषपित्वी भूत्वा तानेवाभिप्रक्रामति ॥ ८ ॥

युद्वेव व्विष्णुक्रमान् क्रमते। यज्ञो वै विष्णुः सु देवेभ्य इमां विक्रान्तिं विचक्रमे यैषा मियं विक्रान्ति-

---

* 'ह्वण्वन्ति'– इति च।

रिदु मेवु प्रथमेन पदेन पस्पाराथेदु मन्तरिक्षं द्वितीयेन दिव मुत्तमेनैताम्वेवैषु ऽएतस्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते तस्माद्विष्णुक्रमान् क्रमते तद्वा ऽइतु एवु पराचीनं भूयिष्ठा ऽइव क्रमन्ते ॥ ९ ॥

तदु तत्पृथिव्यां विष्णुर्व्यक्रंस्त । गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मो दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म ऽइत्येवु मिमांल्लोकान्त्समारुह्याथैषा गतिरेषा प्रतिष्ठा यु ऽएष तपति तस्य ये रश्मयस्ते सुकृतोऽथ यत्पुरं भाः प्रजापतिर्वा सु स्वर्गो वा लोकस्तदेवु मिमांल्लोकान्त्समारुह्याथैतां गति मेतां प्रतिष्ठां गच्छति परस्तात् त्वेवार्वाङ् क्रमेत यु ऽइतोऽनुशासनं चिकीर्षेद् इयं तद्यस्मात्परस्तादर्वाङ् क्रमेत* ॥ १० ॥

अपसरणतो ह वा ऽअग्रे देवा जयन्तोऽजयन् । दिव मेवाग्रेऽथेदु मन्तरिक्ष मथेतोऽनपसरणात्सपत्नाननुदन्त तथो ऽएवैषु एतदपसरणतु ऽएवाग्रे जयन् जयति† दिव

---

* 'क्रमते'–इति च ।

† 'जयं जयति'–इति क, 'जयञ्जयति'–इति घ ।

मेवाग्रेऽथेदु मन्तरिक्ष मुथ्तेोऽनपसरणात्सपुत्रान्नुदत ऽइयं वै पृथिवी प्रतिष्ठा तुदस्या मेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥ ११ ॥

तुदु तुहिवि व्विष्णुर्व्यक्रंस्त । जागतेन छुन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि युञ्च वयं द्विष्मोऽन्तरिक्षे व्विष्णुर्व्यक्रंस्त वैष्टुभेन छुन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि युञ्च वयं द्विष्मः पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रेण छुन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि युञ्च वयं द्विष्मोऽस्मादुन्नादस्यै प्रतिष्ठाया ऽइत्यस्याꣳ ह्वीदꣳ सर्वं मन्नाद्यं प्रतिष्ठितं तस्मादाहास्मादुन्नादस्यै प्रतिष्ठाया ऽइति ॥ १२ ॥

अथ प्राङ् प्रेक्षते । प्राची हि देवानां दिक् तस्मात् प्राङ् प्रेक्षते ॥ १३ ॥

स प्रेक्षते । अगन्म स्वरिति देवा वै स्वरगन्म देवानित्येवैतदाह सं ज्योतिषाभूमेति सं देवैरभूमेत्येवैतदाह ॥ १४ ॥

अथ सूर्य मुदीक्षते । सैषा गतिरेषा प्रतिष्ठा तदेतां गति मेतां प्रतिष्ठां गच्छति तस्मात् सूर्य मुदीक्षते ॥ १५ ॥

स ऽउदीक्षते । स्वयम्भूरसि श्रेष्ठो रश्मिरित्येष वै

श्रेष्ठो रश्मिर्यत्सूर्यस्तस्मादाह स्वयम्भूरसि श्रेष्ठो रश्मिरिति ब्रर्चोदा ऽअसि व्वर्चो मे देहीति त्वेवाहं ब्रवीमीति ह स्माह याज्ञवल्क्यस्तद्धैव ब्राह्मणेनैष्टव्यं यद् ब्रह्मवर्चसी स्यादित्युतो ह स्माहौपोदितेयु ऽएष वाव मह्यं गा दास्यति गोदा गा मे देहीत्येवं यं कामं कामयते सोऽस्मै कामः समृद्ध्यते ॥ १६ ॥

अथावर्त्तते। सूर्यस्यावृत मन्वावर्त्त ऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृत मन्वावर्त्तते* ॥ १७ ॥

अथ गार्हपत्य मुपतिष्ठते। इयं तद्यस्माद्गार्हपत्य मुपतिष्ठते गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद् गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति यावदेवास्येह मानुष मायुस्तस्मा ऽएवैतदुपतिष्ठते तस्माद्गार्हपत्य मुपतिष्ठते ॥ १८ ॥

स ऽउपतिष्ठते। अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं गृहपतिना भूयासꣳ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूया ऽइति नाच तिरोहित मिवास्त्यथूरि णौ गार्हपत्यानि सन्वित्यन्यार्त्तानि नौ गार्हपत्यानि सन्वित्येवैतदाह शतꣳ हिमा ऽइति शतं व्वर्षाणि जीव्यास

---

* 'मन्वावर्त्तते'—इति घ।

मित्येवैतदाह तदुप्येतद् ब्रुवन्नाद्रियेतापि हि भूयाꣳसि शताद्वर्षेभ्यः पुरुषो जीवति तस्मादुप्येतद् ब्रुवन्नाद्रियेत ॥ १९ ॥

अथावर्त्तते। स्तूयꣳस्यावृत मन्वावर्त्त ऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृत मन्वावर्त्तते* ॥ २० ॥

अथ पुत्रस्य नाम गृह्णाति। इदꣳ मेऽयं वीर्यं पुनोऽनुसन्तनवदिति यदि पुनो न स्यादुप्यात्मन एव नाम गृह्णीयात् ॥ २१ ॥

अथाहवनीय मुपतिष्ठते। प्राङ्मे यज्ञोऽनुसन्तिष्ठाता ऽइति तूष्णी मुपतिष्ठते† ॥ २२ ॥

अथ व्रतं विसृजते। इदꣳ महं य एवास्मि सोऽस्मीत्यमानुष इव वा ऽएतद् भवति यद् व्रतमुपैति न हि तदवकल्पते यद् ब्रूयादिदꣳ महꣳ सत्यादुन्नत मुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदꣳ महं य एवास्मि सोऽस्मीत्येवं व्रतं विसृजेत ॥ २३ ॥ ४ ॥

॥ इति सप्तमप्रपाठके चतुर्थं ब्राह्मणम् [९० ३०] ॥

"संस्थिते यज्ञे"। याजमानकर्माभिधायि ब्राह्मण मेतत्। 'दक्षिणतः परीत्य' अध्वर्युः 'निनयति'। 'हि' यतः, 'तथा' कृते 'उदक् भवति', परीत्येत्युक्ते दक्षिणादागत्वा निनयनायोदगागमनं

* 'मन्वावर्त्तते'–इति क, घ। † 'मुपतिष्ठते'–इति क।

भवति। उदपाचनिनयनस्यानुवादो न सर्वतो विधिः। कुतः? "अथ विष्णुक्रमान् क्रमते"-इति[१] परतः 'अथ'-शब्देनानन्तर्यवचनं संयुज्य पदार्थान्तराणां विधानात्। तथा ह्युदगित्ययं दक्षिणतः परीत्येत्यर्थवादोऽयम्। पूर्णनिनयने "देवलोके मेऽस्यादि। अयं यज्ञः 'असत्' भवतु। एव मर्थं यजमानो 'यजते'; 'यो यजते, स यज्ञोऽस्य (यजमानस्य) देवलोक मेवाभिप्रैति'। मां संस्कृतवानसौ, अतो मया प्रत्युपकरणीय मित्यभिप्रायः। 'तदनूची:'। दक्षतेः समृद्ध्यर्थस्य[२] 'दक्षिणा' रूपम्। यज्ञसमृद्ध्यर्थं यज्ञ मनु विलग्ना दक्षिणेति। 'दक्षिणा मन्वारभ्य'। सा हि परिक्रयार्था; ऋत्विङ्निष्पादिता परिक्रीयते, यथान्यत्रापि परिक्रयसम्बद्धः परिक्रेता, एव मत्रापि ॥ १ ॥[३]

"स एष देवयानः"। आत्मयाजिनस्तस्य कुण्पादिमोक्षप्राप्तेः

१— इहैवोपरिष्टादस्मकण्डिका द्रष्टव्या (६१८ पृ० १३ पं०)।

२— भा० आ० ६०६ धा०।

३— ठ-पुस्तके त्विद मेव हरिस्वामिकृतं भाष्य मिहान्यथा दृश्यते। तद्यथा— "संस्थिते समाप्ते यज्ञे पूर्णपात्रासादितं जलं निनयति; अर्थादध्वर्युर्यजमानाङ्गलौ। यजमानोऽपि तदङ्गलिना प्रतिगृह्णातीति वक्ष्यति। यो दर्शपूर्णमासात्मना यजते, मम यज्ञोऽयं देवलोकेऽपि असत्। लेट् लिङर्थे, स्यादित्यर्थः। एष यज्ञोऽस्य देवलोक मेव आभिमुख्येन एति। तस्मादन्वगग्नयोक्षा मन्वाहार्यलक्षणाग्नीलां यां दक्षिणां ददाति, सा देवलोकमेति। ततो दक्षिणां समृद्धिरूपा मन्वारभ्य यजमानो देवलोक मेत्येव ॥ १ ॥"—इति।

देवयाजिनः पितृलोकः पन्थाः। एवञ्च केवलकर्मिणः पुनरावृत्तिर्दर्शिता ; यतस्तदर्थाय मेव 'अन्वावर्त्तते'-इत्युपसंहारः[१]। "अपि हि न ऋषेर्वचः श्रुतम्—द्वे सृती अशृणवं पितृणा मित्युपक्रम्य, ज्ञानसमुच्चितकर्मिणः पुनरावृत्तिर्दर्शिता— "ते य एव मेतदिदुः"-इत्यादिना[२]। 'वा'-शब्दो व्यवस्थितः। 'तदुभयतः' 'अग्निग्निखे' अग्निज्वाले 'ओषन्त्यौ' भस्मसात् कुर्वन्त्यौ 'मन्तिष्ठतः'। दहनात् मुक्तिरित्यर्थः। ज्ञानमङ्गकारिकर्मकारी यजमानः 'अतिसृज्यः'। ज्ञानिनस्तीक्ष्णं पन्थानञ्च उष्णगमनसमर्थाभिरङ्गिः गमयति। शान्तिसाधनं 'शान्तिः', ज्ञानसमुच्चितकर्मफलमलक्षालकं भवतीति सम्मतम्। केवलस्य स्वर्गादिफलं तु कार्य्यारम्भादौपचारिक मिति (मां कोकिलयहेणैव गच्छन्तीति यतस्तेऽतः किं [?][३]) यदि फलभोगाय देवलोकं यजमानो याति, स देव एव। स एष देवफलभोगार्थं देवानेति; "देवो भूत्वा देवानप्येतीतिवचनात्। पितृंश्च केवलात्कर्मणः। 'तदुभयतः' तच्च उभयतः, उभयोरपि मार्गयोः 'अग्निग्निखे' सूर्यरश्मयः 'ओषतः' दहतः। योऽक्षतक्षत्यः, त मोषतः; यस्तु क्षतनियतकर्मा, त मतिसृजतः। परन्त्वनेन पूर्णसेकेन शान्ते जाते 'यः' 'प्रत्युष्यः', "उष दाहे[४]" प्रतिदहनार्हः, 'तं' 'प्रत्योषतः' प्रतिदहतः। यथा दर्शितयज्ञादावेष एवाग्निसंयोगो निमित्त मिति, एवं तदपि ते प्रदीप्ते दहतः। 'अतिसृजेते' अतिसर्जनं विसर्जनम् ॥ २ ॥

१— इहैव विंशकाण्डिकान्ते द्रष्टव्यम् (६२२ पृ० ५ पं०)।

२— इहैवान्यकाण्डे ७प्र० २ब्रा० ४—१६क० (१४.६.१.४—१६.)।

३— एष च पाठो ग-ञ-पुस्तकयोः। ४— भा० प० ६६७ धा०।

"पूर्णं"। अपां पूर्णम्; 'शान्तिरापः'-इतिवचनात्[१]। उदकस्य एवं तावदाधिदैविकं नियमनस्य प्रयोजनम्[२] ॥ ३ ॥

अधियज्ञं दर्शयन्नाह—"यद्देवेति। 'यद्वै मिथ्या क्रियते यज्ञस्य' अकरणं मन्यथाकरणञ्च, 'तद् विस्रंसन्ति' व्यर्थं कुर्वन्ति यज्ञी-यापः, 'ध्वंसन्ति' "ध्वंसु हिंसायाम्"[३]; हिंसन्ति, दुःखायन्ती-त्यर्थः ॥ ४ ॥ ॥ ५ ॥"[४]

१— इतैव पुरस्तात् (६१७ पृ० ८ पं०) द्रष्टव्यम्।

२— का० श्रौ० सू० १. ८. ८। ३— त० उ० ३ध्या०।

४— ठ-पुस्तके तु द्वितीयादिचतुःकण्डिकानां भाष्याख्येवम्—

"देवलोकप्राप्तौ प्रसङ्गात् मार्गान्तरं श्रुतिरेवाह—"स एषः"। स यज्ञो देवयानः देवैः प्रापणीयः, पितृभिः प्रापणीयः पितृयाणः। देवयानोऽग्निहोत्रिणां मध्वा स्वर्गगमनाय; पितृयाणोऽन्यमनुष्याणां मध्वा। तदुभयतः अग्नेराहवनीयादेः देवयानपितृयाणौ शिखे ऊर्ध्वज्वाले ओषन्त्यौ सन्तिष्ठतः। अपां शान्तिस्वरूपत्वात् तन्नियनेन शान्तो भवति देवपन्थाः ॥ २ ॥

पूर्णं। अर्घाञ्जलेन नियनधर्माच्च पूर्णम्। सन्तत मव्यवच्छिन्नम् अनवखण्डितेन धारानियनेन ॥ ३ ॥

यद्देव। यज्ञस्य यत्किञ्चिन्मिथ्या प्रमादादिना क्रियते। अस्य तदिति। अस्य यजमानस्य तन्मिथ्याकृतं विस्रंसन्ति विनाशयति, यज्ञः सम्पूर्णो भवति; ध्वंसन्ति हिनस्ति, तत् मिथ्यादि न दुःखायतीत्यर्थः ॥ शान्तिरापः इति समानम् ॥ ४ ॥

पूर्णं। एतत् मिथ्याकृतं सन्दधाति सन्धितं करोति। सन्तत मनवखण्डितम्। तेन यज्ञस्यानुसन्धानं भवतीति श्रेषः ॥ ५ ॥"—इति।

"तद्ग्रहिणा"[१]। यद्यपि "अनुमार्ष्टु तन्नो यद्विरिष्टम्"—इतिलिङ्गात्[२] मुखोपस्पर्शनाङ्गता मन्त्रस्य प्रतिभाति, तथापि वाक्यात्प्रतिग्रहणाङ्गता। तथाहि "यद्विरिष्टं[३] तत्सन्दधाति"-इतिप्रतिग्रहणार्थवाद एव परतो दृश्यते, अर्थवादान्तराभावात्; अथशब्देन[४] च मुखोपस्पर्शनस्य व्यवधानादर्थवादान्तर[५]दर्शनाच्च। लिङ्गश्रुतिविरुद्धमेव; मुखवद्धस्तयोरपि शरीरैकदेशत्वात्। "यद्विरिष्टमिति। यजमानस्य एव यज्ञो वर्त्तते; तत्रैव स्थितस्य 'यद्विरिष्टं तत्सन्दधाति'-इत्यभिप्रायः। कण्वानान्तु "तद्ग्रहिणा प्रतिगृह्णाति, तच जपति संवर्चसेति"[६]। गृह्णतः यज्ञवीर्यं मच च जपमानः प्रतिग्रहणाय स्पर्शनेऽपि प्रकाशयिष्यति। कः पुनः प्रतिगृह्णाति? यजमानः; अध्वर्योर्निनयने व्यापृतत्वात्, अन्यः कोऽपीति सिद्धे आग्नीध्रलिङ्गत्वान्मन्त्रस्य यजमान एव। तथाच यज्ञस्य "यद् विरिष्टं तत्सन्दधातीति (उपपत्त्या, अत उत्तरत्र[७] च "एतदु चैवैतत् कर्म कुरुते"-इतिमन्त्रवाक्यशेषैरेव च सर्वं मेवातः परं याजमानमित्यवशीयते[८]॥ ६॥

१— का० श्रौ० सू० ३. ८. ६। तन्मन्त्रस्तु वा० सं० २. २४. १।

२— वा० सं० २. २४. १ द्रष्टव्यः।

३— 'यदूर्द्धं'—इति छ, झ।

४— 'उपग्रहेण'—इति ठ (उत्तरकाण्डिकारम्भे)।

५— 'व्यवधानार्थवादान्तर'—इति ठ।

६— संवर्चसेति मन्त्रस्तु वा० सं० २. २४. १।

७— ७ क० द्रष्टव्या।

८— उपपत्त्येत्यादिग्रन्थः ठ-पुस्तके नास्ति।

"अथ मुखम्"[१]। "एतदु चैवैतत्कर्मात्मन् कुरुते"-इतिशेषाद् यजमान आत्मीय मेव मुख मग्निरूपस्पृशत इति गम्यते। यस्मात् कारणात् मुखं स्पृशति, 'तद् द्वयम्' द्वे ते कारणे इत्यर्थः। तत्रैकं तावत्— 'अमृतेनैवैतदात्मानं संस्पृशते'-इति। कथ मग्निः संस्पृश्यमाने अमृतेन संस्पृशते? तदाह— "अमृतं वा आपः"-इति। यत्ते देवाना मन्न मन्नमृतम्, ता आपः; आप एव हि शुद्धतमा अमृत मित्यभिप्रायः। अमृतसंस्पर्शनं यजमानेन कर्त्तव्य मित्येकं कारणम्। अपर मपि— 'एतच्च कर्म आत्मनः कुरुते' यजमानः। कथम्? यज्ञो वा आपः; आपश्च संक्षेषणहेतुरित्यभिप्रायः॥ ७॥

"अथ विष्णुक्रमान्"[२]। ('विष्णोः यज्ञस्य') सम्प्रवेश्र मिव कृत्वा 'देवान् प्रीत्वा', (देवेषु मध्ये) 'अपित्वी' भागी 'भूत्वा' च उपेति विष्णुक्रमैर्देवयाजीत्यर्थः। "अनुपसर्गाद्वा"-इति[३] क्रमेरात्मनेपदम्॥ ८॥[४]

१— का० श्रौ० सू० ३. ८. १०। "एतच्चार्थकर्म, ततस्यान्तापच्छिन्नादौ न भवति"-इति च तद्वृत्तौ याज्ञिकदेवः।

२— का० श्रौ० सू० ३. ८. ११। मन्त्रास्तु वा० सं० २. २५. १, २, ३।

३— पा० सू० १. ३. ४२।

४— इहाप्यन्यथा भाष्यं ठ-पुस्तके। तद्यथा—

"अथ विष्णुक्रमान्। विष्णोर्यज्ञस्य क्रमणं विष्णुक्रमस्तं विष्णुप्रवेश्र मेव कुरुते। देवान् वा। देवानेतान् एष यजमानः प्रीतान् करोति, यो हविर्यज्ञं संस्थापयति। त्वच्छब्दः समुच्चये। ऋगादिभिर्देवान् प्रीत्वा तेषु देवेषु मध्ये भागवान् भवति। भागित्वं प्राप्य तान् विष्णुक्रमानेव सर्वतोभावेन प्रक्रामति॥ ८॥"-इति।

"यद्वेव विष्णुक्रमान्"। यजमानशरीरस्थ एव 'यज्ञो विष्णुः' यजमानार्थं 'विक्रमते'।[1] 'तद्वै' तच्च 'इत एव' लोकात् 'पराचीनम्' ऊर्ध्वम्, अन्तरिक्षं दिव मित्येवं 'भूयिष्ठा इव' बहुतमा इव 'क्रमन्ते' ॥ ९ ॥

विष्णुक्रमणे मन्त्राः[2]— "तदु तत् पृथिव्याम्"—इति। प्रथमा। "इत्येव मिमांल्लोकान्"-इति उत्तरपक्षस्यार्थवादः। गम्यत इति 'गतिः', प्रतितिष्ठन्त्यस्या मिति 'प्रतिष्ठा'। 'तस्य' आदित्यस्य 'ये रश्मयः' कदम्बकेसरवदनन्तभेदाः, 'ते सुकृतः' ये पूर्वं यजमानाः तेजःशरीराः। उपरित[न] मेव 'यद्' यज्ञरूपः 'प्रजापतिः', 'स्वर्गो वा लोकः' अज्ञानानां कर्मकर्तॄणां प्रजानां पतिः, ज्ञानिना सुपभोग्यं स्थानम्, 'तत्' तच्च; ते गच्छन्तीत्यभिप्रायः। 'भाः' प्रकाशमानं सूर्यरूपम्। (पक्षान्तरोपन्यासः।) "परस्तात् त्वेव"। 'तु'-शब्दः स्वशब्दार्थे, 'एव'-इत्यवधारणार्थः। 'इतः' अस्मादेव लोकात् 'अनुशासनम्' अस्मिन्नेव लोके फलोपभोगं बहुकाल माशास्ते, सः

१— ठ-पुस्तके त्वेतदुत्तर मेष ग्रन्थोऽधिकः—

"विष्णुरेव देवेभ्योऽर्थायेमां विष्णुक्रमणलक्षणां विक्रान्तवान्। प्रथमेन पादेन पृथिवीक्रमणलक्षणेन, पस्मात्। "स्पृ प्रीतिचलनयोः" क्विट्। द्वितीयेन पादेनान्तरिक्षं विक्रान्तवान्। उत्तमेन दिवि क्रमणात्मकेन। एतां विष्णुक्रमात्मिकां यज्ञो विक्रमते। तस्माद्धेतोः विष्णुक्रमान् क्रमते॥"—इति।

२— वा० सं०.२. २५. ३, २, १ द्रष्टव्याः।

'अर्वाङ्' विक्रमणेनैव 'यस्मात्' अध्वर्यवः 'परस्मात्' क्रमेत, 'तत् द्वयं' कारणम् ॥ १० ॥[१]

"अपसरणतो ह"। जितापसरणेन जितवन्तो द्युलोकाख्यम्, अस्माल्लोकादपसृत्य असुरान् हतवन्तः देवाः। द्वितीयश्च फलोपभोगानन्तरं प्रतिष्ठायां प्रच्युतानां स्वर्गाल्लोकान्निरुपद्रवात्। ततश्च यदितः पराचीनं क्रमेत, तदेतां गतिं गत्वा 'प्रतिष्ठायां प्रतितिष्ठति' ॥ ११ ॥[२]

"तदु तद्दिवि"[३]। यद्धि स्वर्गे अन्नाद्यम्, तदप्यस्मिन्नेव लोके

१— "तदु तत् पृथिव्याम्। प्रसन्ना। इमान् पृथिव्यन्तरिक्षद्युसञ्ज्ञकान्, एवं समारूढान् कृत्वा अग्नन्तरम्। विष्णुक्रमणस्यार्थवादः— एषा गतिः। गम्यत इति गतिः, प्रतिकूलं तिष्ठत्यस्या मिति प्रतिष्ठा। य एष आदित्यः, तस्यादित्यस्य ये रश्मयः किरणकदम्बाः, ते सुकृत इति। अथेति। पर मुत्कृष्टं भासनं प्रजापतिर्वा, स एव स्वर्गो लोको निरुपद्रवत्वात्। एवम्प्रकारेण यज्वा एतां गतिं प्रतिष्ठां प्राप्नोति, परस्मात्तु अर्वाङ् अर्वाक्तनश्लोकः क्रमेत, इतो लोकादनुग्रासनं कर्तुमिच्छेत्। इयम्, इहामुत्रफलत्यागम् अर्वाक्तनश्लेति ॥१०॥"— इतोऽ मेव भाष्यं ठ-पुस्तके।

२— अत्र ठ–पुस्तकलिखितं भाष्यपाठान्तरं चैतत्—

"अपसरणतः। जयन्तो देवा दिव मग्रे, ततोऽन्तरिक्षम्। इतः अपसरणात् एतदाचरणादेव सम्प्रान्ताञ्च्यवन् व्यथितवन्तः। एव मस्याचरणस्यापि भवति। इयं वै इति। अतिरोहितम्॥ ११॥"–इति।

३— दिवीत्यादयः प्रतिष्ठाया इत्यन्ताः पञ्च मन्त्राः वा० सं० २. १५. १–५। तत्र "अस्मादन्नादिति भाग मवेक्षते"–इति का० श्रौ० सू०

प्रतिष्ठितम् ; चन्द्रमसोऽप्याप्यायनं प्रतिपदि साक्षाय्येन क्रियते ; अतः 'अस्मादस्मात्' निष्क्राम्यते द्विषन् सर्वस्मान्निष्क्रामितो भवति ॥ १२ ॥[१]

"अथ प्राङ् प्रेक्षते"[२]। प्राङ्निरीक्षणेन सन्तर्पिता गच्छन्तो देवा निरीक्षिता भवन्तीत्यभिप्रायः[३] ॥ १३ ॥

"स प्रेक्षते"[४]। मच्चाक्रोशन्नीतिवत् 'स्वर्=देवाः'; तेजः-शरीरत्वात् ज्योतिर्=देवाः। 'समभूम' तद्देवत्वं प्राप्ता इत्यर्थः ॥ १४ ॥[५]

"अथ सूर्य मुदीक्षते"[६]। (सूर्यः खलु) यज्ञकर्तृणां गन्तव्यं प्रतिष्ठा च[७] ॥ १५ ॥

"स उदीक्षते[८]। तेजोधनो रश्मिशब्देनोच्यते। 'एषः' तेषा मति-

---

३. ८. १३। "अस्यै प्रतिष्ठाया इति भूमिम्"–इति च तदुत्तरसूत्रम् (१४)। 'भूमिम्' वेदिभूमिम् ; उपविष्ट एव।

१— इह चास्ति ठ-पुस्तकस्थता पाठान्तरता। तद्यथा—

"इत ऊर्ध्वा वेदीति तत्प्रकार माह— "तदु तदिति। दिवि अन्तरिक्षे पृथिव्या मस्मादन्नाद्भागलक्षणात्। अस्यै प्रतिष्ठायाः वेदेः। यावती वै वेदिरित्तावती पृथिवीति ॥ १२ ॥"–इति।

२— का० श्रौ० सू० ३. ८. १५। वा० सं० २. २५. ६।

३— ठ-पुस्तके त्विह 'प्रसन्ना'–इत्येव।

४— का० श्रौ० सू० ३. ८. १६। वा० सं० २. २५. ७।

५— "स प्रेक्षते। स्वरिति। यज्ञो ह वै स्वरिति यज्ञदेवसूर्य्याः स्व-शब्दवाच्याः, अत्र देवा अभिप्रेताः ; देवानगन्मेति ॥ १४ ॥"–इति ठ।

६— का० श्रौ० सू० ३. ८. १७। वा० सं० २. २६. १।

७— एषा तु 'प्रसन्ना'–इत्यव्याख्यातैव ठ-पुस्तके।

८— का० श्रौ० सू० ३. ८. १८। वा० सं० २. २६. २।

ग्रयः। 'याज्ञवल्क्य इत्याह स्म'— 'वर्चोदा अपि वर्चो मे देहीति (एत देवाग्राप्नुहे वयम्) 'अहमिति ब्रवीमि'। 'ब्राह्मणेन तदेष्टव्यम्' 'यत्' अहं ब्राह्मणयुक्तः स्या मिति तु 'आह स्म' उक्तवान् 'औपोदितेयः'। उपगम्य उदिता पितुरुपोदिता; "स्त्रीभ्यो टक्[1]"; उपोदिताया अपत्य मिति विग्रहः। 'गा दास्यति' इति गो-प्रार्थना। 'एवं' प्रजादिष्वपि वक्तव्यम् ॥ १६ ॥[2]

"अथावर्त्तते"[3]। प्रदक्षिण मावर्त्तते। एवं तस्य सूर्यस्यानु-वृत्तिः[4] ॥ १७ ॥

"अथ गार्हपत्यम्"[5]। कारणद्वयं तस्याप्युपस्थाने। सूर्योप-स्थानादिना स्वर्गतिः, गार्हपत्योपस्थानेन स्वगृहे प्रतितिष्ठति। द्वितीयश्च 'यावद्देवास्वेह' मानुषायुष 'उपतिष्ठते' ॥ १८ ॥[6]

१— पा० सू० ४. १. १२० ।

२— एतद्ग्राष्यग्वाप्यन्यविधं ठ-पुस्तके। तद्यथा—

"स उदीच्यते। प्रसन्ना। 'इति त्वेवाहं' इत्येवाहं ब्रवीमि। वर्च एव याचते। ब्राह्मणेन तद्धि एतस्य मेव यतो ब्रह्मवर्चसी स्यात्। उप समीपे उदिता आदित्यो यस्य इत्युपोदिता, तस्या अपत्य मौपोदितेयः। एष राजा मह्यं सम्प्रदानभूताय गाः पयस्वतीः दास्यति। हे गोदाः मे मह्यं गाः देहि। एव मित्याद्याग्रीः ॥ १६ ॥"—इति।

३— का० औ० सू० ३. ८. १९। वा० सं० २. २६. ३।

४— इय मप्यग्राख्याता प्रसन्नेति ठ-पुस्तके।

५—का० औ० सू० ३. ८. २१।

६— एतद्ग्राष्यग्वान्यविधं ठ-पुस्तके। तद्यथा—

"अथ गार्हपत्यम्। इयं गतिप्रतिष्ठात्मकं गार्हपत्योपस्थाना-

"स उपतिष्ठते"[१]। 'अस्थूरिणौ' असहाय-गो-वाह्यः स्थूरः, तथा-सहायमात्रं लक्ष्यते; स्थूरोऽस्मिन्नस्तीति स्थूरी, न स्थूरी अस्थूरी, असहायिनौ। तव गार्हपत्ये कर्मणि प्रवृत्ते अह मिन्धनादिना पालकः, अस्थूरी गृहपतिः; त्वम् कर्मणाम्[२]। अत आह— "अनार्त्तानीति। अस्थूरित्वेन च सामर्थ्यताच्छिं यजमानस्य जीवित मिति "शतं वर्षाणि जीव्यास मित्याह"–इति[३] विवृणोति॥ १९॥[४]

दवाप्यते। गृहा वै इत्याद्याग्नेः प्रवर्त्तनार्था। यावदिति। उ इति अनेककर्मा निपातः। यावत्प्रमाणा मस्य पुरुषस्य आयुर्जीवनम्, तस्मै एतदायुषे उपतिष्ठते। तस्मादिति निगमः॥ १८॥"–इति।

१— वा० सं० २. २७. १।

२— "'अस्थूरि' अस्थूरीणि। एकाश्वयुक्तः शकटः स्थूरिरित्युच्यते, तद्विपरीतो बहुभिरश्वैरुपेतः शकटोऽस्थूरिः। तेन च सम्पूर्णता लक्ष्यते"–इति ऋ० सं० ६. १५. १९ सा० भा०। "एकपार्श्वे बलीवर्दयुक्तं शकटं स्थूरि, न स्थूरि अस्थूरि। लुप्तोपमानम्"–इति वा० सं० २. २७. १ महीध० भा०। इहोत्तरत्रापि पुनः श्रोष्यति ३. ७. ४. १०। का० श्रौ० सू० ६. ४. ३ अपि द्रष्टव्यम्।

३— "शतं हिमा इति ब्रूयादा"–इति का० श्रौ० सू० ३. ८. २२।

४— ठ–पुस्तके त्वतोऽधिकोऽप्येष पाठः—

"स उपतिष्ठते। अग्ने इति। गृहपत्योः परस्पर मात्मांसन स्फुटतर मेव। अस्थूरि। असहायगोवाह्यः स्थूरः, तथासहायमात्रं लक्ष्यते; स्थूरोऽस्मिन्नस्तीति स्थूरि, अस्थूरि सहाययुक्तः त्वम्। अत आहानार्त्तानीति। अस्थूरित्वेन च सामर्थ्यात्तिं यजमानस्य जीवित मात्मास्ते— शतं हिमा। वर्षाणि शतसङ्ख्याकानि जीव्यासम्। इत्याहेति विवृणोति— एतत् ब्रुवन् अपि न आद्रियेत। तेन अपि

"अथावर्त्तते"[१]। मन्त्रवर्णात् प्रादक्षिण्यञ्च; — "सूर्यस्यावृत मन्विति मन्त्रे[२] दृश्यते, सूर्यो हि प्रादक्षिण्येन गच्छति। 'एतस्यैव' सूर्यस्य[३] ॥ २० ॥[४]

"अथ पुत्रस्य"[५]। कथं पुनर्गृह्यति? "ततोऽसि तन्तुरसि"-इत्येतस्मिन्मन्त्रे[६] तत्पदैरेकवाक्यभूतं गृह्यति। कुतः? काण्वसमाम्नानात्। "इदं मे कर्म, इदं वीर्यम्, पुत्रो देवदत्तोऽनुसन्तनवत्"-इति। किमर्थं नाम गृह्यति? 'इदं मे' 'वीर्यं' विक्रमम्, 'पुत्रः' देवदत्तादिः 'अयम्' 'अनुसन्तनवत्' अनुसन्तनोतु। कथम्? 'मे' मम 'इदं वीर्य मनुसन्तनवदिति' मा विच्छिन्द्यादित्येवमर्थम्।

वर्षेभ्यः शतात् वर्षशत मतीत्यापि पुरुषो जीवति। तस्मादिति निगमनम् ॥ १९ ॥"-इति।

१— का० श्रौ० सू० ३. ८. २३। २— वा० सं० २. २७. २।

३— अत्र "गच्छति प्राङ्डुरुविष्णाविति"-इति च का० श्रौ० सू० ३. ८. २४। मन्त्रस्तु— वा० सं० ५. ३८. १।

४— इहाप्यन्यविध मेव भाष्यं ठ-पुस्तके। तद्यथा—

"अथावर्त्तते। सूर्यस्य आवर्त्तन माहृत, ता मन्त्रावर्त्तते। तदेता मिति निगदव्याख्यातम्। अत्या मन्त्रवर्णात्प्रदक्षिणं समाहृत्याग्निमं गृह्णीयात् ॥ २० ॥"-इति।

५— का० श्रौ० सू० ३. ८. २५।

६— एष मन्त्रः शाखान्तरीय इति का० श्रौ० ३. ८. २५ सूत्रे पूर्ण एव संस्मृतः। तद्यथा—"ततोऽसि तन्तुरस्यनु मा तनुह्यस्मिन् यज्ञेऽस्याꣳ साधुकृत्याया मस्मिन्नग्नेऽस्मिंल्लोक इदं मे कर्मेदं वीर्यं पुत्रोऽनुसन्तनोतु"-इति।

(पक्षान्तर माह[1]—) 'यदि पुत्रो न स्यात्' कथञ्चित् पुत्ररहितस्येत्, अजातपुत्रो मृतपुत्रो वा, तदा 'आत्मनो नाम गृह्णीयात्'। तथाच[2] "इदं मे कर्मेदं वीर्यं देवदत्तोऽहं मन्त्रनवानि"-इति नाम ग्रहणम्[3] ॥ २१ ॥

"अथाहवनीयम्"[4]। (गार्हपत्योपस्थानादिकर्मणा यत् पदं न प्राप्नोति, अतः[5]) उपस्थानयज्ञक्रिया प्रत्यक्संस्था जाता; सा च जघन्या, अधोगतित्वात्; अत आहवनीयोपस्थानं विधत्ते प्राक्-संस्थित्यै। अपिच प्रत्यग्गमनशब्दो हि नरकपातवाचकः; एव-मधोगतिर्यज्ञस्य स्यात्। "तूष्णी मिति[6]। सामर्थ्यान्मन्त्रे प्राप्ते तूष्णी मुपस्थानं विधेय मिति मन्त्रनिवृत्तिः क्रियते[7] ॥ २२ ॥[8]

१— ठ-पुस्तके त्विदृश एष पाठोऽधिकः।

२— तथाचेत्यादिग्रन्थस्तु ठ-पुस्तके नास्ति; अस्ति च तत्रैष ग्रन्थः— 'अतो जातपुत्रः कृष्णाकेशोऽग्नीनादधीतेति सम्मतम्'-इति।

३— "अनेकेषु पुत्रेषु सर्वेषां ज्येष्ठस्य पुत्रस्य नामाभिव्याहृत्य"-इति सांख्यायनः २. १२. ११। "प्रियस्य पुत्रस्य नाम गृह्णाति"-इत्या-पस्तम्बः ४. १६. ४। ४— का० श्रौ० सू० ३. ८. २८।

५— बन्धनीचिह्नान्तर्गत एष पाठः ऋ-अ-पुस्तकयोरधिकः।

६— 'तूष्णी मिति लौकिकवागुच्चारणनिषेधः क्रियते; मन्त्राभावात्। एवञ्च तत्समीपे स्थित्वा तं विलोकयत्येव'-इतीदृश याज्ञिकदेवः।

७— अथ विष्णुक्रमानित्यारभ्य आहवनीयोपस्थानान्तं कर्म विष्णुक्रमसञ्ज्ञं भवति (का० श्रौ० ३. ८. २८ सू० या० दे० भ०)।

८— "अथाहवनीयम्। प्राक्संस्थं यज्ञस्याप्नोति। तूष्णी मेवोपस्थानम ॥ २२ ॥"-इत्येव भाष्यं दृश्यत इह ठ-पुस्तके।

"अथ व्रतम्"[१]। पूर्वोक्ता मितिकर्त्तव्यता मनूद्य यज्ञसमाप्तिः व्रतविसर्गसम्बद्धा विधीयते ; यदिद मुक्तं "संस्थिते"-इति[२], तदिद मवसरप्राप्तं व्रतं विसृजते। स्वशाखायाम् "इद मह मनृतात् सत्य मुपैमि"-इति[३] मन्त्रोच्चारोऽभिप्रेतः[४] ; अत एव पश्चान्मरोपन्यासो न कृतो भगवत्या श्रुत्या ॥[५]

समाप्तोऽयं पौर्णमासः, सर्वास्विष्टिषु पशुबन्धेषु यागेषु सौचामण्यां च प्रकृतिभूतः। यद्यप्ययं कृताधानस्य भवति, तथापि आधानेष्टीनां तनूनप्त्रविस्मृज्यकानां पौर्णमासयागः प्रकृतिः, तस्मात्

१— का० श्रौ० सू० ३. ८. २९। २— १. १. ३६ (६ष्ठ० ३पं०)।

३— वा० सं० १. ५. १। इह च पुरस्तात् १. १. ४।

४— पूर्वं हि व्रतग्रहणे द्वौ मन्त्रावुक्तौ "अग्ने व्रतपते"-इति (५ष्ठ० १३पं०), "इद मह मनृतात्"-इति च (६ष्ठ० ८पं०)। तत्र यद्यग्ने व्रतपत इति ग्रहीतम्, तदा "अग्ने व्रतपते व्रत मचारिषम्"-इति (६ष्ठ० ३पं०) विसर्गः कार्यः ; यदीद मह मिति ग्रहीतम्, तदा "इद मह य एवास्मि सोऽस्मिति"-इति (६ष्ठ० १३ पं०) विसर्गः कार्य इति कातीयश्रौतसूत्राभिप्रेतः। ३. ८. २९ सू० द्रष्टव्यम्।

५— "अथ व्रतम्। व्रत मिति कर्मणो नामधेयम्। तस्य विसर्गं कुरुते यजमानः इद मह मिति। यद् व्रतं विसृजते, तेन व्रतो ऽमानुष इव देव इव भवति। न ह्येति। मन्त्ररूपान्तरं दूषणम्। व्रतविसर्गानन्तरं पुनः मानुषो जायते, तस्मादिद मह मित्येतेन मन्त्रेण व्रतं विसृजेतेति विधिः। तदु खल्वित्यवधारणार्थः ; "अथाप्युकार एतस्मिन्नेवार्थ उत्तरेण"-इतिस्मरणात् (निरु० १.२.६.)। खलु पदं सत्यवचनसिद्धये, स वै सत्य मेव वदेदित्यादि विध्यर्थम् ॥ २३ ॥"-इति ठ-भाष्यम्।

पूर्वं सुपदेश्यः। ननु तर्हि तनूहविषा मेव सर्वेष्टिप्रकृतित्वं कृत्वा तान्येव पूर्वं कस्मान्नोपदिष्टानि ? सत्यम्! किन्तु तेष्वितिकर्त्तव्यता-वैकृत्यदर्शनात् सर्वप्रकृतित्वं न सम्भवति, तस्मात् पौर्णमासयाग एव पूर्वं सुपदिष्टः[1] ॥ २३ ॥ ४ ॥ [९. ३.] ॥

इत्याचार्यहरिस्वामिनः कृतौ व्रतपथभाष्ये
नवमस्य तृतीयं ब्राह्मणम्[2] ॥

१— "त्रिंशतं वर्षाण्येव दर्शपूर्णमासाभ्यां यजेत। पञ्चदश दाक्षायणा-याजी। अग्निहोत्र मेव वा जुहुयात्"—इति का० श्रौ० सू० ४. २. ४७. ४८. ४९। 'दाक्षायणायाजी' दाक्षायणायज्ञसञ्ज्ञक-दर्शपूर्णमासयाजीत्यर्थः। दाक्षायणो नाम न कर्मान्तर मपि तु दर्शपूर्णमासविशेष एवेति च तत्रैव तत्प्रकरणे स्फुटम् (४. ३. १—३.)। तृतीयसूत्रे चेह एवशब्दः खल्विवार्थो विवक्षितः; आपस्तम्बसूत्राद्यनुरोधात् (३. १४. ८—१३.)। तथाच यथाग्नि-होत्रं यावज्जीवं जुहुयात्, तथा दर्शपूर्णमासावपीत्यर्थो लभ्यते। तदेवं यावज्जीवं त्रिंशद्वर्षाणि वेति साधारणकालविधिः, दाक्षायण-यागिनां तु यावज्जीवं पञ्चदश वर्षाण्येव वेति च।

२— एतस्मिन् ब्राह्मणे तावत् पूर्णपात्रनिनयनम्, विष्णुक्रमणम्, व्रत-विसर्जनञ्चेति त्रीणि कर्माणि विहितानि। तत्रेयं पद्धतिः — अध्वर्युः पूर्णपात्र मादाय पूर्वेणाहवनीयं परीत्य दक्षिणत उत्तराभिमुखो यजमानस्याञ्जली सन्ततं निनयति, निगीयमानं पूर्णपात्रं यज-मानोऽञ्जलिना प्रतिगृह्णाति। ततस्तूष्णीं मुखं विमृष्टे। अत आरभ्य भागप्राप्तिनान्तं सर्वं कर्म यजमानः करोति। तत उत्थाय दक्षिणवेदिश्रोणेरारभ्याहवनीयादर्वाक् विष्णुक्रमान् क्रमते।

नागस्वामिसुतोऽवन्त्यां पाराशर्यो वसन् हरिः।
श्रुत्यर्थं दर्शयामास[1] शक्तितः पौष्करीयकः ॥
श्रीमतोऽवन्तिनाथस्य विक्रमार्कस्य भूपतेः[2]।
धर्माध्यक्षो हरिस्वामी व्याख्यच्छ्रातपथीं श्रुतिम् ॥

इति श्रीमदाचार्यहरिस्वामिनः कृतौ[3] शतपथभाष्ये
नवमोऽध्यायः समाप्तः ॥ ९ ॥

॥ इति सप्तमः प्रपाठकः समाप्तः[4] ॥

तत्रैव स्वं भागं प्रवेक्ष्यते, प्राचीं दिशं प्रवेक्ष्यते, सूर्यं प्रीक्षते, सूर्यं प्रार्थयते, सूर्यस्य प्रदक्षिणं प्रावर्त्तनं करोति, अप्रदक्षिणं चावर्त्तते, ततो गार्हपत्यसमीपे आगत्य तं प्रति मुपतिष्ठते, पुनस्तथैव प्रदक्षिणं प्रदक्षिणञ्च सूर्यं प्रावर्त्तते। ततो गार्हपत्यात् प्राच्यां गत्वोपविशः पुत्राणां नाम गृह्णाति, अविद्यमाने पुत्रे त्वात्मनामगृह्णम्। तत उत्थाय तूष्णीं माहवनीयं मुपतिष्ठते। एतदन्तं गतं विष्णुक्रमणम्। तत आहवनीयस्याग्रे स्थित्वा व्रतं विसृज्य पूर्वेणाहवनीयं दक्षिणाग्रेष्वन्तरेण गत्वाग्न्योरन्तरालेन निष्क्रामेत्। ततो भागप्राशन-ब्राह्मणभोजने। समाप्ता चैत्यं दर्शपूर्णमासेष्विति प्रम्॥

१— 'श्रुत्यर्थविवृतिं चक्रे'—इति ठ। २— 'प्रासितुः'—इति ठ।
३— 'इत्याचार्यवर्यश्रीहरिस्वाम्युल्लेखिते'—इति ठ।
४— इत उत्तरं मिश्र 'काण्डौ ११४'—इति क, घ; 'काण्डिकासङ्ख्या

भूभर्त्रा विक्रमार्कीण कुप्तां कनकवेदिकाम् ।
दानायाध्यास्य हृतवान् श्रुत्यर्थविदृतिं हरिः ॥ १ ॥

इति श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां
शुक्लयजुर्वेदीये माध्यन्दिनीशतपथब्राह्मणभाष्ये
हविर्यज्ञं नाम

प्रथमं काण्डं समाप्तम्[1] ॥

११४'—इति च। तत्र १ ब्रा० २७ क०, २ ब्रा० २६ क०, ३ ब्रा० ३५ क० ४ ब्रा० २३ क०। तदासां सङ्ख्यासयाच्छिन् प्रपाठके ११४ कण्डिकाः सम्पन्नाः।

१— अत्र प्रथमे काण्डे ८३८ कण्डिकाः श्रुताः। तत्र प्रथमे प्रपाठके १२१, द्वितीये १२२, तृतीये १२८, चतुर्थे १२१, पञ्चमे च १२१, षष्ठे १११, सप्तमे ११४। तदासां सङ्ख्यानया ८३८ इति सिद्धम्॥

...sc. 1–4 @ 2/	Rs.	8	0
...arvan, (Text) Fasc. 1–5 @ /6/ each		1	14
...a-Paingalam, Fasc. 1–7 @ /6/ each		2	10
ithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Part II, Fasc. 1		0	12
ākṛta Lakṣaṇam, (Text) Fasc. 1		1	8
rāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each		7	8
rāçara, Institutes of (English)		0	12
abandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each		2	4
Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.		12	6
āṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each		1	8
Ditto (English) Fasc. 1–3 @ /12/ each		2	4
uçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/		0	12
Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each		12	0
āṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each		7	2
attva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each		14	10
rikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/		0	12
'ul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each		1	14
'pamita-bhava-prapañca-kathā (Text) Fasc. 1-5 @ /6/ each ...		1	14
vāsagadasāo, (Text and English) Fasc. 1–6 @ /12/		4	8
arāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each		5	4
.rsa Krya Kaumudi, Fasc. 1–6 @ /6/		2	4
Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each		4	8
'idhons Pariguta Fasc. I		0	6
Viṣnu Smṛti, (Text) Fasc. 1–2 @ /6/ each		0	12
Vivâdaratnâkara, (Text) Fasc. 1–7 @ /6/ each		2	10
Vṛhannāradiya Purāṇa, (Text) Fasc. 1–6 @ /6/		2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6		2	4

Tibetan Series.

Pag-Sam Thi S'îâ, Fasc. 1–4 @ 1/ each		4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each		13	0
Rtogs brjod dpag hkhri S'îâ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0

Arabic and Persian Series.

'Âlamgirnâmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...		4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–3 @ /12/		2	4
Âin-i-Akbarî, (Text) Fasc. 1–22 @ 1/ each		22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each		29	12
Akbarnâmah, with Index, (Text) Fasc. 1–37 @ 1/ each		37	0
Ditto English Fasc, 1–8 @ 1/ each		8	0
Arabic Bibliography, by Dr. A. Sprenger		0	6
Bâdshâhnâmah, with Index, (Text) Fasc. 1–19 @ /6/ each		7	2
Catalogue of Arabic Books and Manuscripts		1	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each		3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each		21	0
Farhang-i-Rashîdî, (Text) Fasc. 1–14 @ 1/ each		14	0
Fihrist-i-Ṭûsi, or, Ṭûsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each		3	0
Futûh-ush-Shâm of Wâqidî, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto of Âzâdi, (Text) Fasc. 1–4 @ /6/ each		1	8
Haft Âsmân, History of the Persian Masnawi, (Text) Fasc. 1 ...		0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each		4	8
Iqbâlnâmah-i-Jahângiri, (Text) Fasc. 1–3 @ /6/ each		1	2
Iṣâbah, with Supplement, (Text) 51 Fasc. @ /12/ each		38	4
Maâṣir-ul-Umarâ, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each		13	2
Maghâzi of Wâqidî, (Text) Fasc. 1–5 @ /6/ each		1	14

The other Fasciculi of these works are out of stock, and complete copies cannot supplied.

Muntakhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc.
1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ...
Nukhbatu-l-Fikr, (Text) Fasc. 1 ... ...
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each
Riyāzu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each ... ...
Ditto Ditto (English) Fasc. 1–3 ... ...
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each ... ...
Ditto (English) Fasc. 1–14 @ /12/ each ...
Ditto Index ... ...
Tārikh-i-Firūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each.
Tārikh-i-Firūzshāhī, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each.
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ...
Wis o Rāmin, (Text) Fasc. 1–5 @ /6/ each ... ...
Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1 ... ...

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES, Vol. VII, Vols. XI and XVII, and Vols. XI and XX @ 10/ each ... ...
2. PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ pe No.; and from 1870 to date @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 184 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 187 8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8 1900 (7) & 1901 (7), @ 1/8 per No. to Members and @ 2/ per No. Non-Members.
   N.B.—The figures enclosed in brackets give the number of Nos. in each V
4. Centenary Review of the Researches of the Society from 1784–1883 .
   A sketch of the Turki language as spoken in Eastern Turkistan, b R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ... ...
   Theobald's Catalogue of Reptiles in the Museum of the Asiatic Societ (Extra No., *J.A.S.B.*, 1868) ... ...
   Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No *J.A.S.B.*, 1875) ... ...
   Introduction to the Maithilī Language of North Bihār, by *G. A* Grierson, Part II, Chrestomathy and Vocabulary (Extra No *J.A.S.B.*, 1882) ... ...
5. Anis-ul-Musharrahin ... ...
6. Catalogue of Fossil Vertebrata ... ...
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bio
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each..
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I
10. Khizānatu-l-'ilm ... ...
11. Mahābhārata, Vols. III and IV, @ 20/ each ... ...
12. Moore and Hewitson's Descriptions of New Indian Lepidopter Parts I–III, with 8 coloured Plates, 4to. @ 6/ each ...
13. Sharaya-col-Islām ... ...
14. Tibetan Dictionary, by Csoma de Körös ... ...
15. Ditto Grammar ,, ,, ...
16. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... ...
17. A descriptive catalogue of the paintings, statues, &c., in the roo ms o the Asiatic Society of Bengal by C. R. Wilson... ...
18. Memoir on maps illustrating the Ancient Geography of Kaśmir b M. A. Stein, Ph.D., Jl. Extra No. 2 of 1899 ... ...

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each ...
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Asiatic Society," only.

12-2-03

Books are supplied by V.-P.P.

آخری درج شدہ تاریخ پر یہ کتاب مستعار
لی گئی تھی مقررہ مدت سے زیادہ رکھنے کی
صورت میں ایک آنہ یومیہ دیرانہ لیا جائے گا۔